इन्द्रेश कुमार शुक्ल

वाजसनेयिमाध्यन्दिनशुक्ल-

यजुर्वेदसंहिता

सम्पादकः
वेददर्शनाचार्यो महामण्डलेश्वरोऽनन्तश्रीविभूषितः
स्वामिगङ्गेश्वरानन्द उदासीनः

योगेश्वर-गुरु-गङ्गेश्वर-चैरिटेबल-ट्रस्ट
गुरुगङ्गेश्वर-जयन्ती, विक्रमाब्दः २०५०

प्रकाशक :
योगेश्वर-गुरु-गङ्गेश्वर-चैरिटेबल-ट्रस्ट
तुलसी निवास, डी-रोड, चर्चगेट, बम्बई - २०

◆

मुद्रक : —
राधा प्रेस
२४६५, गोस्वामी गणेशदत्त मार्ग,
मुख्यमार्ग, गाँधी नगर, दिल्ली-११००३१

◆

प्रथमावृत्ति : १०००
विक्रमाब्द : २०५०

◆

© सर्वेऽधिकारा: प्रकाशकाधीना:

◆

प्राप्तिस्थानानि—
१. उदासीन-संस्कृत-महाविद्यालय :
ढुण्ढिराज, वाराणसी
२. उदासीनसद्गुरुगङ्गेश्वरजनकल्याणन्यास :
तुलसीनिवास, फ्लैट नं० ३१,
डी-रोड, चर्चगेट, बम्बई - २०
३. गङ्गेश्वरधाम, १३ गंगेश्वर-धाम-मार्ग,
करौलबाग, नई दिल्ली-११०००५

भूमिका

वेदं सभेदं प्रतिपद्य सारं संसारखेदं यततेऽपनेतुम् ।
कामादि जेतुं क्षमते च येन प्रख्यातकीर्तिं भुवि तं प्रपद्ये ॥१ ॥
विश्ववन्द्यपदो वन्दे विबुधान्वेदविश्रुतान् ।
पञ्च हेरम्बवैकुण्ठशक्तिशङ्करभास्करान् ॥२ ॥
हंसाप्तहंसविज्ञानं हंसं हंसविदुत्तमम् ।
औदास्यप्रथमाचार्यं कुमारं वैधसं भजे ॥३ ॥
वेदिवंशसमुद्भूतो वेदमार्गप्रचारकः ।
वित्तिभक्तिसमुच्चेता श्रीचन्द्रः पातु नः सदा ॥४ ॥
स्वान्तध्वान्तमपाकुर्वन्वेदविज्ञानभानुभिः ।
सर्वं समीहितं देयाद्रामानन्ददिवाकरः ॥५ ॥
ऋषिकोकिलसंरावो देवतासरघोत्सवः ।
कोऽपि कल्पो महानेष छन्दःस्तोमकलेवरः ॥६ ॥

सोऽयं निगमकल्पतरुः श्रद्धावीरुत्संवलितकलेवरोऽयमस्माकं भगवान् वेदो यस्य तरलितचतुर्वर्गमकरन्दमाधुर्याधिगर्धिमधुव्रताः सन्ति भागवतपुरोगमा आगमगणाः। दर्शं दर्शमिनं चिरदिदृक्षोपशमसौभाग्यं भजामोऽद्य। वन्दारुश्रद्धालुशालीनजनेभ्य उपाहरन्तः प्रमोदभरनिर्भरमानसमात्मानमनुबोभूमः। ईदृशं लोकोत्तरविग्रहं लभमाना मानवा लप्स्यन्ते लिप्सितं फलमस्य पारायणानुशीलनादिभ्य इति विश्वसिमः ।

वेदानां महत्त्वम्

'पुमान्पुमांसं परि पातु विश्वतः' (ऋ. ६-७५-१४)
'मा भ्राता भ्रातरं द्विक्षन्' (अथर्व. ३-३०-३)
'मधुमन्मे निक्रमणं मधुमन्मे परायणम्' (अथर्व. १-३४-३)
'संगच्छध्वं संवदध्वं सं वो मनांसि जानताम्' (ऋ. १०-१९१-२)
'समानो मन्त्रः समितिः समानी' (ऋ. १०-१९१-३)
'स्वस्ति पन्थामनु चरेम सूर्याचन्द्रमसाविव' (ऋ. ५-५१-१५)

इत्येवंविधा विश्वबन्धुत्वनिर्भरा विश्ववारा ('सा प्रथमा सँस्कृतिर्विश्ववारा' यजु. ७-१४, विश्वैः सर्वैर्व्रियते यद्वा विश्वं वृणोतीत्यर्थः) संस्कृतिर्भारतीयानां यतः प्रभवति भगवतो वेदान्नगाधिराजादिव जाह्नवी, तस्यैतस्य महतो महत्त्वं कः क्षमेत निर्वर्णयितुम् ! अभिजानाति भगवान् मनुः —

'पितृदेवमनुष्याणां वेदश्चक्षुः सनातनम् ।
अशक्यञ्चाप्रमेयञ्च वेदशास्त्रमिति स्थितिः ।। (मनु. १२-९४)
यः कश्चित्कस्यचिद्धर्मो मनुना परिकीर्तितः ।
स सर्वोऽभिहितो वेदे सर्वज्ञानमयो हि सः ।। (मनु. २-७)
चातुर्वर्ण्यं त्रयो लोकाश्चत्वारश्चाश्रमाः पृथक् ।
भूतं भव्यं भविष्यञ्च सर्वं वेदात्प्रसिद्ध्यति ।।' (मनु. १२-९७)

मन्त्रब्राह्मणयोर्वेदत्वम्

कोऽयं मन्त्रः? प्राहात्रभवानृषिः — 'तच्चोदकेषु मन्त्राख्या' (जै. सू. २-१-३२)। तस्य= अनुष्ठेयार्थप्रकाशनस्य चोदकेषु=प्रयोजकेषु वाक्येषु मन्त्रशब्दो वर्तत इति कुतूहलवृत्तिः। किं ब्राह्मणम् ? उत्तरयति स्म स एव महर्षिः 'शेषे ब्राह्मणशब्दः' (जै.सू. २-१-३३)। मन्त्रभागावशिष्टवेदभागे ब्राह्मणशब्दो वाचकतया वर्तत इति दीक्षितः। तत्र मन्त्रभागो यथा वेदत्वं भजते तथा ब्राह्मणमपि। प्रमाणञ्चात्र सूत्रकृतां वचांसि—

'आम्नायः पुनर्मन्त्राश्च ब्राह्मणानि च' (कौ.सू. १-३)
'मन्त्रब्राह्मणमित्याहुः' (बौ.सू. २-६-२)
'मन्त्रब्राह्मणयोर्वेदनामधेयम्' (आप.सू. २४-१-४१)
'मन्त्राश्च ब्राह्मणञ्च वेदः' (शबर. २-१-३३) ।

भाष्यग्रन्थेषु व्याख्येयव्याख्यानभावं बहुलमुपलभामहे तद्वद्वेदेषु मन्त्रब्राह्मणयोर्यदि स स्यात्, किमत्र चित्रम्।

वेदाश्चत्वारः

'ऋग्वेदं भगवोऽध्येमि यजुर्वेदं सामवेदमाथर्वणम्' (छा. उ. ७-१-२)
'ऋग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरसः' (बृ. उ. २-४-१०)
'ऋग्यजुः सामाथर्वाणश्चत्वारो वेदाः' (नृ. पू. ता. उ. १-१-२)
'तत्रापरा ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः' (मु. उ. १-१-५)

इत्येवमादीनि श्रुतिशिरोवचांसि चतुरो वेदान् गमयन्ति। क्वचित् त्रयीत्युक्तिस्तु गद्यपद्यगीत्यात्मकमन्त्रप्रकारत्रैविध्यमभिप्रेत्य नेतव्या ।

वस्तुतस्तु अग्नीषोमभेदेन वेदस्य द्वैविध्यम्। अग्नेश्च घन-तरल-विरलभेदेन त्रैविध्यम्। घनाग्निरग्निशब्देनैव व्यपदिश्यते, तरलाग्निस्तु वायुशब्देनोच्यते, विरलाग्निश्चादित्यशब्देन। घनाग्नेः ऋग्वेदो जायते, तरलाग्निरूपाद् वायोर्यजुर्वेदः, विरलाग्निरूपादादित्याच्च सामवेदो जायते। एते त्रयोऽपि ऋग्यजुस्सामान आग्नेया वेदाः सन्ति । यथोक्तमैतरेयब्राह्मणे— "ऋग्वेद एवाग्नेरजायत, यजुर्वेदो वायोः, सामवेद आदित्यात्" (५-३८) इति । कौषीतकिब्राह्मणमपि एतदेव प्रतिपादयति। तद्यथा— "स (प्रजापतिः) एतानि त्रीणि ज्योतींष्यभ्यतप्यत । सोऽग्नेरेवर्चोऽसृजत, वायोर्यजूंषि, आदित्यात् सामानि इति" (कौ. ब्रा. ६-१०)

भगवता मनुनापि —

"अग्निवायुरविभ्यस्तु त्रयं ब्रह्म सनातनम् ।
दुदोह यज्ञसिध्यर्थमृग्यजुः-सामलक्षणम् ॥" (मनु . १-२३)

इति श्लोकेन एतदेव उपोद्वलितम् ।

एते ऋग्यजुस्सामनामानस्त्रयो वेदा आग्नेयाः,चतुर्थस्तु अथर्ववेदः सौम्यो ब्रह्मवेदः । प्रतिपादितश्चैतदधस्तनीषु श्रुतिषु । तथा हि —

"चत्वारो वा इमे लोकाः पृथिव्यन्तरिक्षं द्यौराप" इति
"चत्वारो वा इमे वेदाः ऋग्वेदो यजुर्वेदः सामवेदो ब्रह्मवेद" इति
"चत्वारो वा इमे देवाः अग्निर्वायुरादित्यश्चन्द्रमाः" (गो. २-१६)

ब्रह्मवेदशब्देनात्र आथर्वणापरपर्यायः सोमवेदो गृह्यते । यतो हि "ऋचामग्निर्दैवतं, यजुषां वायुर्दैवतं, साम्नामादित्यो दैवतमथर्वणां चन्द्रमाः" इति (पू. १-२९) गोपथश्रुतावप्यथर्वापरपर्यायस्य ब्रह्मवेदस्य देवता चन्द्रमा उक्ता। चन्द्रमाश्च सोम एव। न केवलमेतावदेव, अपितु 'सोमात्मको ह्ययं वेदः' इति गोपथश्रुतौ स्पष्टमेवास्य सोम-वेदता मुखत एवोक्ता —

"अग्निर्दैवतमृग्वेदस्य, यजुर्वेदो वायुदैवतः, आदित्यः सामवेदस्य, चन्द्रमा वैद्युतश्च भृग्वङ्गिरसाम् " (पू. ५-२५) इति गोपथश्रुतिरपि भृग्वङ्गिरोरूपस्याथर्ववेदस्य चन्द्रमसं दैवतं प्रतिपादयन्ती अथर्ववेदस्य सोमवेदत्वमेवाचष्टे। किञ्च "त्रिविष्टपं त्रिदिवं नाकमुत्तमं तमेतया त्रय्या विद्ययैति । अत उत्तरे ब्रह्मलोका महान्तोऽथर्वणामङ्गिरसाञ्च सा गतिः" इति (पू. २५-१५) पूर्वगोपथश्रुतिः त्रय्या विद्याया ऊर्ध्वमथर्वणोऽङ्गिरसश्चाचक्षाणा अथर्वाङ्गिरसां वेदस्य सोमात्मकस्य ब्रह्मवेदस्य ऋग्यजुःसामात्मिकाया वेदत्रय्याः पार्थक्यमेव बोधयति ।

"ऋग्भिः पूर्वाह्णे दिवि देव ईयते,
यजुर्वेदे तिष्ठति मध्ये अह्नः ।
सामवेदेनास्तमये महीयते,
वेदैरशून्यस्त्रिभिरेति सूर्यः ॥" (तै. ब्रा. ३-१२-९-१)

इति तैत्तिरीयब्राह्मणश्रुतिरपि सूर्यस्य ऋग्यजुस्साममयत्वं प्रतिपादयन्ती ऋग्यजुस्सामाख्यानां त्रयाणां वेदानां सोमात्मकाद् ब्रह्मवेदाद्भिन्नतामेवाचष्टे ।

अपि च वाङ्मनसनिर्वर्त्यस्य यज्ञशरीरस्य अर्धमेव त्रिभिर्वेदैः ऋग्यजुस्सामभिर्निष्पाद्यते, अर्धान्तरं तु अथर्ववेदेनैवेति श्रूयते । तथा हि —

"प्रजापतिर्यज्ञमतनुत। स च ऋचैव हौत्रमकरोत्,
यजुषः आध्वर्यवम्, साम्नौद्गात्रम्, अथर्वाङ्गिरोभिर्ब्रह्मत्वम्,
इति प्रक्रम्य 'स' वा एष त्रिभिर्वेदैर्यज्ञस्यान्यतरः पक्षः
संस्क्रियते । मनसैव ब्रह्मा यज्ञस्यान्यतरं पक्षं संस्करोति" (गो. पू. ३-२) इति ।

ऐतरेयब्राह्मणेऽपि त्रयीनिष्पाद्य एकः पक्षः, मनोनिष्पाद्यः परः पक्षः, इति श्रुतम् । तथाहि—

"अयं वै यज्ञो योऽयं पवते । तस्य वाक् च मनश्च वर्तन्यौ । वाचा च हि मनसा च यज्ञोऽवर्तत । इयं वै वाक्, अदो मनः, तद् वाचा त्रय्या विद्ययैकं पक्षं संस्कुर्वन्ति । मनसैव ब्रह्मा संस्करोति" (५-३३) इति ।

उपर्युक्तेन प्रघट्टकेनेदं स्पष्टं सिध्यति यद् वेदत्रयीशब्देन विद्यात्रयी-शब्देन वा ऋग्यजुस्सामाख्यानां त्रयाणामग्निवेदानां ग्रहणं, न तु तुरीयस्य आथर्वणापरपर्यायस्य सोमवेदस्येति त्रयीत्युक्तेः स्वारसिकार्थमादायैवोपपत्तेः मीमांसासूत्रोक्त-गद्यपद्य-गीत्यात्मक-मन्त्रप्रकारत्रैविध्यमभिप्रेत्य नयनस्य न काप्यावश्यकता । तथा च वेदे त्रयीत्युक्तिरग्निवेदस्य बोधिका । ब्रह्मवेदापरपर्यायोऽथर्ववेदस्तु सोमवेदः । न तस्य त्रयीशब्देन ग्रहणम् । अग्निवेद-सोमवेदोभय-सङ्कलनेन तु वेदानां चतुष्ट्वं सिध्यति, यस्य प्रतिपादनम् "ऋग्वेदं भगवोऽध्येमि, यजुर्वेदं सामवेदमाथर्वणम्" इत्यादिश्रुतिषु पुरस्ताद्विहितम् ।

वेदानां पारायणम्

अध्ययनविधिना प्रयुक्तं वाऽध्यापनविधिप्रसादलभ्यं वाऽध्ययनं नित्यं कर्म द्विजन्मनाम् ।

तथा च सूत्रम्—

'वेदाध्ययनं नित्यमनध्ययने पातात्'

भाष्यं चरणव्यूहस्य—

'तस्माद्ब्रह्मयज्ञार्थे पारायणार्थे च ऋग्वेदस्याध्ययनं कर्तव्यम्' (खण्डः १)

श्रुतिवचांसि— 'स्वाध्यायान्मा प्रमदः' (तै. उ. १-११-१)

'स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम्' (तै.उ. १-११-१)

स्मृतिवचनानि—

'स्वाध्यायस्तप आर्जवम्' (भ. गी. १६-१)
'स्वाध्यायाभ्यसनञ्चैव' (भ. गी. १७-१५)
'वेदमेव सदाभ्यस्येत्तपस्तप्स्यन्द्विजोत्तमः ।
वेदाभ्यासो हि विप्रस्य तपः परमिहोच्यते ॥' (मनु. २-१६६)
'वेदानधीत्य वेदौ वा वेदं वापि यथाक्रमम् ।
अविप्लुतब्रह्मचर्यो गृहस्थाश्रममावसेत् ॥' (मनु. ३-२)

अपि च भाष्यं फणीश्वरस्य—

'ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च' (म.भा. पस्पशाह्निकम्) ।

पारायणप्रकाराः

पारायणं द्विविधं प्रकृतिविकृतिभेदात् । संहिता प्रकृतिरित्युच्यते। तद्विकृतयोऽष्टौ भवन्ति—जटा माला शिखा ध्वजो दण्डो रथो घनश्च। तत्र जटादण्डयोः प्राधान्यं शिखाया जटानुसारित्वात्, मालालेखाध्वजरथानां दण्डानुसारित्वात्, घनस्योभयानुहारित्वाच्च ।

प्राकृतं पारायणं द्विविधम्— क्रमपारः क्रमपदश्च। वैकृतमपि द्विविधम्— क्रमजटः क्रमदण्डश्च । तदेतत् सङ्कलय्य चतुष्पारायणं वर्णितं चरणव्यूहे। प्रकारान्तरेण पारायणश्चतुर्णां वेदानां द्वैविध्यमश्नुते—उपेन्द्रपारायणं विश्वरूपपारायणञ्च। तत्र केवलानाञ्चतसृणां संहितानां पारायणमुपेन्द्रपारायणं कीर्त्यते, उपेन्द्रो वामनः, तस्य ह्रस्वकायत्वात्। ब्राह्मणादिसमुपबृंहितानां तासां पारायणं तु बृहत्त्वाद्विश्वरूपपारायणमिति व्यपदिश्यते । तत्रेदानीन्तनैर्व्यस्तजीवनैर्विश्वरूपपारायणं नातीव सुकरमिति मनसिकृत्यास्माभिरुपेन्द्रपारायणार्थञ्चतसृणां संहितानामेव सम्पादनं व्यधायिं ।

वेदानां प्रचारः

श्रौतवाङ्मयसमुद्धाराय बद्धपरिकराणामस्मत्सम्प्रदायाचार्याणां सनकादिमूर्धन्यानां परममुद्देश्यमेव लोककल्याणैकनिलयस्य भगवतो वेदस्याभिरक्षणम्। श्रौतसम्प्रदायाम्बरमणेर्हंसावतारस्य प्रथमप्रभातरूपो भगवान्सनत्कुमारो हार्दं नारदमुनेस्तमस्तिरयन् श्रुतिषु विश्रुतो भृशम् । तस्मादोदपानपूतान्तरमुनिराजराजिषु बाभ्रव्यदाल्भ्यपद्मश्रुतिसिद्धादयो मुनिवरा विशेषतो गणनामर्हन्ति, यैः समये समये वेदप्रचाराय प्रचुरः प्रयासो नैकविधो व्यधायि । बाभ्रव्यो मुनिः सर्वतः प्रथमं क्रमसंहितां लोके प्रचारयामास, तदेतदवदत्प्रातिशाख्यकारः —

'बाभ्रव्य उवाच च क्रमम्' (ऋ. प्रा. ११-६५)

अपि च स्मरति भारतकृत्—

'पाञ्चालेन क्रमः प्राप्तस्तस्माद्भूतात्सनातनात् ।
बाभ्रव्यगोत्रः स बभौ प्रथमं वेदपारगः ॥' (म. भा. शा. ३४२-१००)

दाल्भ्यो मुनिः 'मधुबभ्र्वोर्ब्राह्मणकौशिकयोः' (अष्टा. ४-१-१०६) इति सूत्रेण निरूपितस्य कुशिकगोत्रीयश्च बाभ्रव्यस्य शिष्य आसीत्। अयमेवान्नाविष्कारिणीं विद्यामाविश्चकार मुख्यप्राणरूपसामगानादिति स्पष्टं संशृणुमश्छन्दोगानां रहस्ये —

'अथातः शौव उद्गीथस्तद्ध बको दाल्भ्यो ग्लावो वा मैत्रेयः स्वाध्यायमुद्वव्राज ॥ १ ॥ तस्मै श्वा श्वेतः प्रादुर्बभूव, तमन्ये श्वान उपसमेत्योचुरन्नं नो भगवानागायत्वशनायाम वा इति ॥ २ ॥ तान्होवाचेहैव मा प्रातरुपसमीयातेति । तद्ध बको दाल्भ्यो ग्लावो वा मैत्रेयः प्रतिपालयाञ्चकार ॥ ३ ॥ ते ह यथैवेदं बहिष्पवमानेन स्तोष्यमाणाः संरब्धाः सर्पयन्तीत्येव माससृपुस्ते ह समुपविश्य हिञ्चक्रुः ॥ ४ ॥ ओ३मदा३मों३ पिबा३मों३ देवो वरुणः प्रजापतिः सविता२न्नमिहा२ऽऽहरदन्नपते३न्नमिहा२ऽऽहरा२ऽऽहरो३मिति ॥ ५ ॥'

पद्ममुनिर्लौकायतिकधर्मेण लोकवञ्चकेन लोकायतीकृतां निरन्तरमुत्पथप्रापिताञ्जनतामुद्दिधीर्षया वेदाध्ययनं कणेहत्य प्रचारितवान्। तदर्थमेव च वैदिकव्याकरणस्यापि निर्माणाय महामुनिं पाणिनिं प्रेरितवाँश्च ।

युधिष्ठिरस्य द्वादशशताब्द्यामाविर्भूतः श्रुतिसिद्धमुनिस्तु न केवलं निघण्टुनिर्माणद्वारा वेदानां प्रचारे साहाय्यमकरोदपि तु प्रचारस्थेम्ने वेदमन्दिराण्यतिष्ठिपत् । तत्र च प्रतिदिनं वेदानां पूर्णोपचारमर्चनमपि प्रचारयामास ।

देवपूजामिव वेदपूजामपि भगवती श्रुतिरेव श्रावयति—

'यो नो अग्ने अररिवाँ अघायुररातिवा मर्चयति द्वयेन ।
मन्त्रो गुरुः पुनरस्तु सो अस्मा अनु मृक्षीष्ट तन्वं दुरुक्तैः ।।' (ऋ. १-१४७-४)

व्याख्यातश्चैष मन्त्रश्चान्द्रभाष्ये—

अग्ने = अग्निरूपेणावतिष्ठमान परमात्मन्! यः अररिवान् =अंदाता, दानविरोधी, दानादिनिषेधकः (रातेश्छान्दसः क्वसुः), अरातिवाः =अदानवान्, स्वयमप्रदाता (छान्दसो मत्वर्थे वनिप्)। अघायुः =शत्रुरिव अस्मदनिष्टकामः, पापेप्सुः, द्वयेन =मनसा वचनेन च, नः =अस्मान्, मर्चयति =निर्भर्त्सयति, न्यक्करोति, सर्वथास्मदभिभवमभिलषतीति यावत्। अस्मै पापात्मने, मन्त्रः =तदुपलक्षितो मन्त्रब्राह्मणात्मको वेदः, गुरुः = उपदेष्टा, शिक्षकः, अस्तु =भवतु। एतेन वेदं गुरुं मत्वा तस्य देववत्पुष्पादिभिः सपर्या विधेयेति सूचितम्। अत एव श्रुतिसिद्धमुनिना देवप्रतिमेव बहुषु मन्दिरेषु वेदः स्थापितः पुष्पादिभिः पूजितश्च । गुरुर्वेदपुरुषः, अस्य पापिष्ठस्य, स्वशिक्षया पापमपाकुर्वन् अनुग्राहको भवेत् । स पुनः, अस्मदनिष्टकारी, निर्निमित्तसपत्नः, दुरुक्तैः =दुष्टवचनैः, सत्पुरुषाक्रोशनादिलक्षणैः दूषितामपवित्राम्, तन्वं =तनुं शरीरम्, अनुमृक्षीष्ट = वेदोपदेशेन अनुमार्ष्टु, प्रमार्जनं विदध्यात् । तच्छब्देन वेदो वा ग्राह्यः । अत्रायमर्थः — स्वशिक्षया पापापाकरणेन दुर्वृत्तानुग्राहको गुरुरूपो वेदः, पुनः = भूयः, तन्वं = दुर्जनगात्रम्, अनुमृक्षीष्ट = स्वजपेन, स्वोक्तकर्मानुष्ठानेन वा, पवित्रीकरोतु इति ।

अत्र च 'मन्त्रो गुरुः' इत्युक्त्या मन्त्रस्य मन्त्रोपलक्षितस्य मन्त्रब्राह्मणात्मकवेदस्य गुरुत्वप्रतिपादनम्। गुरुपूजावद्देवपूजावद्वा वेदपूजापि कर्तव्येति स्पष्टमेव सिद्ध्यति । एवं वेदप्रचारार्थं श्रुतिसिद्धमुनिना युधिष्ठिरस्य द्वादशशताब्द्यां स्थापितानि वेदमन्दिराणि बौद्धयुगस्य धार्मिके विप्लवे विभ्रंशितानीति मन्यामहे। तथैव षोडश्यां विक्रमशताब्द्यामुदासीनमुनिभ्यो वेदमन्दिरस्थापनामहत्त्वं विज्ञाय भक्तशिरोमणिना धनरायशिष्येण ज्ञानरायेण व्रजभूमौ तलपतग्रामे निर्मितस्य वेदमन्दिरस्य अवरंगजेबसमये वेदविरोधिभिर्विनाशितत्वादिदानीं तद्ध्वंसावशेषोऽपि नोपलभ्यते ।

उपरितनेन प्रघट्टकेनेदं सिद्ध्यति यदुपक्रमनोऽद्य यावद्वैदिकसाहित्यस्य रक्षणं प्रचारणञ्चोदासीनमुनीनां परममुद्देश्यम्। साम्प्रतमपि तामेव परिपाटीमनुसन्दधानैरस्माभिर्वेदप्रचाराय वेदसंरक्षणाय च चतुर्वेदसंहितानां पृथक् पृथगप्ययं प्रकाशनप्रयास आरब्धः। तत्र पूर्वमस्माभिः ऋक्संहिता प्रकाशिता साम्प्रतञ्चेयं शुक्लयजुःसंहिता प्रस्तुता अस्ति ।

वाजसनेयि-माध्यन्दिनशुक्लयजुर्वेद-संहिता

संस्करणेऽत्र शुक्लयजुर्वेदस्य बहुप्रचलितत्वाद्वाजसनेयिमाध्यन्दिन-शाखीयसंहितायाः समावेशः समादृतः । अस्याः संहितायाः प्रत्यध्यायं सम्पूर्णाध्यायगतमन्त्राणामृष्यादिपरिचयं पूर्वं प्रदर्श्य संहिता मुद्रिता । वामभागे स्थूलाक्षरेषु निर्दिष्टानामृषिदेवताच्छन्दःशब्दानां तत्तत्प्रघट्टकगतर्षिदेवताच्छन्दोनामभिरन्वयः । ऋषिदेवते कण्डिकागतमन्त्राणामुल्लिखिते, छन्दस्तु केवलानामृचाम् । तत्र कस्यापिच्छन्दसो मध्येऽवसाने वा समागतं यजुः स्वरूपतः पृथग् दर्शितं येनच्छन्दोऽवधिः सुबोधः स्यात् । अनुवाकाङ्काः पूर्ववदेव वामभागे क्रमशो मुद्रिताः ।

अग्रिमकण्डिकायाः प्रतीको यत्र पूर्वकण्डिकान्ते समायातस्तत्राधोरेखाङ्कनेन स प्रदर्शितो यथा प्रथमाध्यायस्यैकोनविश्यां कण्डिकायाम् । एवमेव सर्वत्र व्यवहृतम् । ब्रह्मयज्ञे पठनीयाः प्रतीकोक्ता गलितमन्त्राश्च यथास्थलमुपर्यधस्ताच्च स्थूलतनुरेखाद्वयं सम्मुद्रय मध्ये साकल्येन मुद्रिता ।

प्रतिपृष्ठं पृष्ठशीर्षके दक्षिणतोऽध्यायानुवाककण्डिकानां सङ्केताक्षराणि मुद्रितानि । संहितायाः समाप्तौ च पूर्वोत्तरविंशत्योरनुवाककण्डिकानां प्रतीकोक्तानां गलितमन्त्राणाञ्च योगः प्रस्तुतः ।

संहितागताध्यायानुवाककण्डिकानां विभागः स्पष्टार्थमधस्तात् सारण्यां व्यज्यते-

पूर्वविंशत्याम्

अध्याये	अनुवाकाः	कण्डिकाः
१	१०	३१
२	७	३४
३	१०	६३
४	१०	३७
५	१०	४३
६	८	३७
७	२५	४८
८	२३	६३
९	८	४०
१०	८	३४
११	७	८३
१२	७	११७
१३	७	५८
१४	८	३१
१५	७	६५
१६	९	६६

उत्तरविंशत्याम्

अध्याये	अनुवाकाः	कण्डिकाः
२१	६	६१
२२	१९	३४
२३	११	६५
२४	४	४०
२५	१५	४७
२६	२	२६
२७	४	४५
२८	४	४६
२९	४	६०
३०	२	२२
३१	२	२२
३२	२	१६
३३	७	९७
३४	६	५८
३५	२	२२
३६	२	२४

१७	९	९९	३७	२	२१
१८	१३	७७	३८	३	२८
१९	७	९५	३९	२	१३
२०	९	९०	४०	२	१७
योगः	२०२	१२११	**योगः**	१०१	७६४

पूर्वविंशत्यामनुवाकाः २०२, कण्डिकाः १२११

उत्तरविंशत्यामनुवाकाः १०२, कण्डिकाः ७६४

सम्पूर्णसंहितायामनुवाकाः ३०३, कण्डिकाः १९७५

प्रतीकोक्तानां गलितमन्त्राणां स्थलानि गणना च—

अध्याये	**कण्डिकायां**	**गणना**
१३	५८	३
१४	१०	३
१४	२२	३
१४	३१	३
२८	२३	१
२८	४६	१
३२	३	७
३२	७	२
३३	२१	२
३३	२७	३
३३	३३	३
३३	४७	६
३३	५८	२
३३	७३	२
३३	९७	४
३४	५८	४
	योगः	४९

भगवतो वेदस्य शुद्धं प्रकाशनं कियद्दुरूहमिति जानन्त्यञ्जसा प्राज्ञाः प्रथमं तु ऋषिदेवताच्छन्दसामेव याथातथ्येन निर्धारणं न सुकरं यतो हि तत्प्रतिपादकेषु प्राचीनेषु ग्रन्थेष्वपि बहुत्र मतभेदो दृश्यते । ततश्च

प्रकाशितेषु विभिन्नेषु संस्करणेषु पाठभेदो द्वापरतां तनोति। सस्वरप्रकाशने त्वतितरां काठिन्यं, यत्र स्वल्पेनापि प्रमादेन महत्स्खलितं भवेत्। तथापि यथाशक्ति यथामति च विहितः प्रयासः शुद्ध-प्रकाशने, प्रयसितञ्च तत्र तत्र विवादास्पदस्थलेषु समीचीनतरमार्गावलम्बनाय।

पूर्वमृग्यजुस्सामाथर्वणां चतसृणां संहितानामेकत्र सङ्कलनरूपो "भगवान् वेदः" इत्याख्यया प्रथितो महान् ग्रन्थो महता यत्नेन सम्पादितः प्रकाशितश्च वेदप्रचाराय वेदसंरक्षणाय च । महाग्रन्थस्यामुष्य मन्दिरेषु स्थापनां कृत्वा देवप्रतिमावत् तस्य पुष्पधूपादिभिरर्चनार्थं तत्पारायणार्थञ्च भारते आस्तिकजनसमुदायस्त-त्स्थापनावसरे प्रेरितश्च। एवमेतस्य महाग्रन्थस्य प्रकाशनोद्देश्यं पूर्णतया साफल्यमितम्। देवप्रतिमावत् तस्यार्चनादिकं पारायणञ्च भारतस्य प्रसिद्धेषु स्थानेषु सातत्येन प्रचलितमास्तेऽद्यत्वेऽपि नवनवस्थलेषु प्रतिष्ठाक्रमश्चानवरतं प्रवर्तमान आस्ते। न केवलं भारत एव स्थापना विहिता अपितु इङ्गलैण्डामेरिका-प्रभृतिषु पाश्चात्त्यदेशेष्वपि तस्य स्थापना महता संरम्भेण भारत-सर्वकारसहयोगेन जाता। बहुत्र विदेशेषु वेदमन्दिराणामपि निर्माणं जातम्। किन्तु एतादृशो महान् ग्रन्थो विदुषां छात्राणाञ्चाध्ययनाध्यापनादिषु शोधकर्म-व्यापृतानां स्नातकानां शोधकार्ये च नातितरामुपयोगमावहतीति मनसि निधायैव चतसृणां वेदसंहितानां पृथक् पृथक् प्रकाशनमिदमारब्धम्।

यद्यपि सन्ति प्रकाशिताश्चतस्रः संहिताः पृथक् पृथक् संस्थाभिः, किन्तु तत्र क्वचित् पाठाशुद्धिर्दृश्यते। चतुःसंहितासङ्कलनरूपो "भगवान् वेदः" इत्याख्यो ग्रन्थश्चेतरसंस्करणापेक्षयाऽतीव शुद्धो वर्त्तते, यतो हि परम्पराप्राप्त-सम्प्रदायानुसारि-सस्वर-पाठकुशलैर्वैदिकैरस्य प्रकाशने तन्मयतया स्वीया सेवा समर्पिता। अतस्तत एवैषा यजुःसंहिताऽपि पृथक् कृत्वा प्रकाशिता, येन पाठाशुद्धिसम्भावना न स्यात्।

धन्यवादः

यजुर्वेदस्यास्य संस्करणेऽस्मिन् निरन्तरं मदीयं निखिलं बाह्यमाभ्यन्तरञ्च कार्यजातं सम्पादयितुं संलग्नस्य विश्वासभाजनतां गतस्योदासीनसम्प्रदाये महामण्डलेश्वरविश्रुतिं भजतः श्रीगोविन्दानन्दवेदान्ताचार्यस्य सहयोगः सुतरां सुन्दरः समुल्लेखनीयश्च वरीवर्ति। सहैव भगवतो वेदस्य प्रचार-प्रसारमहासवे शुभमार्त्विज्यं वितन्वतामस्मत्सहायकानां स्पृहणीयसमुत्साहस्य सर्वविधकार्य-सम्पादने समर्जितवैदग्ध्यस्य सर्वेषां स्नेहभाजनभूतस्य साधुसमाजे च लब्धयशोराशेः श्रीमदानन्दभास्करोदासीनस्यौद्गातृत्वमपि वैशिष्ट्यं बिभर्ति। मद्वात्सल्यभूतेनानेन पूर्वमपि "भगवान् वेदः" इति ग्रन्थराजस्य मुद्रण-सम्पादन - संशोधनादिकर्मणि निरवधिकं साहाय्यमाचरितं मम। साम्प्र-तमस्य संस्करणस्यापि सम्पादन-संशोधनाद्यविकलं कार्यभारं द्वयोरनयोर्विश्वासपात्रयोर्निक्षिप्य मया वीतचित्तेनाभूयत। अतो द्वाभ्यामाभ्यां हृदयेन सहस्रशः शुभाशिषो वितरामि।

अथास्मिन् लोकश्रेयोविधायिनि परमपावने कर्मणि नयीदिल्लीस्थेन येन "विष्णुचैरिटेबिलट्रस्ट" इत्यभिधेयेन न्यासेन विपुलामार्थिकसहायतां विधायास्मत्सहयोगोऽक्रियत तदर्थमेतस्य न्यासस्य सर्वे सदस्याः शतशः साधुवादैराशीर्वादैश्च सभाज्यन्ते। भगवान् वेदः सर्वेषामेषां मनःसमीहितं सम्पादयेदित्यहं कामये।

भगवान् वेद इत्यस्य द्वितीयो भाग एष हि ।
"यजुर्वेद" इतिख्यातो भूयादिष्टप्रदः सताम् ॥१॥

सम्पादितोऽतियत्नेन ब्रह्मणः शब्दविग्रहः ।
मनुजैर्गुरुवत् पूज्यो मन्त्रो गुरुरिति श्रुतेः ॥२॥

न कामं कामये धर्मं मोक्षमर्थमथापि वा ।
कामये वेदभक्तोऽहं विश्वस्मिन् वेदभारतीम् ॥३॥

गुम्फितो मन्त्रमुक्ताभिः सानुरागः समर्पितः ।
भगवद्धृदि हारोऽयमेतेन प्रीयतां परः ॥४॥

विद्वद्वशंवद :

गङ्गेश्वरानन्द उदासीनः

गुरुगङ्गेश्वरधाम
करोल बाग, नयी दिल्ली

वाजसनेयिमाध्यन्दिनशुक्ल-

यजुर्वेदसंहिता

अथ प्रथमोऽध्यायः

ऋषिः इषे त्वादिखस्त्रह्मान्तानां सामान्यतो विवस्वानृषिः। विशेषतश्च इषे त्वादिप्रथमाध्यायगतानां दर्शपौर्णमासमन्त्राणां प्राजापत्यः परमेष्ठी प्राजापत्या देवा वा ऋषयः। तत्राप्यष्टाविंश्याः 'पुरा क्रूरस्य' इत्यस्याः कण्डिकाया अघशंसश्च ॥

देवता (१) प्रथमायाः कण्डिकायाः 'इषे त्वा' 'ऊर्जे त्वा' 'यजमानस्य पशून्' इत्येषां मन्त्राणां शाखा, 'वायव स्थ' इत्यस्य वायुः, 'देवो वः' इत्यस्येन्द्रः।

(२) 'वसोः पवित्रम्' इत्यस्य वायुः, 'द्यौरसि' 'मातरिश्वनः' इत्यनयोरुखा।

(३) 'वसोः पवित्रम्' इत्यस्य वायुः, 'देवस्त्वा' इत्यस्य पयः, 'कामधुक्षः' इत्यस्य प्रश्नः।

(४) 'सा विश्वायुः' 'सा विश्वकर्मा' 'सा विश्वधायाः' इत्येषां गौः, 'इन्द्रस्य त्वा' इत्यस्येन्द्रः, 'विष्णो हव्यम्' इत्यस्य पयः।

(५) 'अग्ने व्रतपते' 'इदमहम्' इत्यनयोरग्निः।

(६) 'कस्त्वा' इत्यस्य प्रजापतिः, 'कर्मणे वाम्' इत्यस्य स्रुक् शूर्पश्च।

(७) 'प्रत्युष्टम्' 'निष्टप्तम्' इत्यनयो रक्षः, 'उर्वन्तरिक्षम्' इत्यस्यान्तरिक्षम्।

(८) 'धूरसि धूर्व' इत्यस्य धूः, 'देवानामसि' इत्यस्य आनः।

(९) 'विष्णुस्त्वा' इत्यस्य आनः, 'उरु वाताय' 'यच्छन्ताम्' इत्यनयोर्हविः, 'अपहतम्' इत्यस्य रक्षः।

(१०) 'देवस्य त्वा' इत्यस्य सविता, 'अग्नये जुष्टम्' इत्यस्याग्निः, 'अग्नीषोमाभ्याम्' इत्यस्याग्नीषोमौ।

(११) 'भूताय त्वा' इत्यस्य हविः, 'स्वरभिविख्येषम्' इत्यस्य सूर्यः, 'दृꣳहन्ताम्' इत्यस्य गृहाः, 'उर्वन्तरिक्षम्' इत्यस्यान्तरिक्षम्, 'पृथिव्यास्त्वा' इत्यस्य हव्यम्।

(१२) 'पवित्रे स्थ' इत्यस्य पवित्रे, 'सवितुर्वः' 'देवीरापः' इत्यनयोरापः।

(१३) 'प्रोक्षिता स्थ' इत्यस्यापः, 'अग्नये त्वा' इत्यस्याग्निः, 'अग्नीषोमाभ्याम्' इत्यस्याग्नीषोमौ, 'दैव्याय कर्मणे' इत्यस्य पात्राणि।

(१४) 'शर्मासि' 'अदित्यास्त्वक्' इत्यनयोः कृष्णाजिनम्, 'अवधूतम्' इत्यस्य रक्षः, 'अद्रिरसि' 'ग्रावासि' इत्यनयोरुलूखलम्।

(१५) 'अग्नेस्तनूः' इत्यस्य हविः. 'बृहद्ग्रावा' 'स इदम्' इत्यनयोर्मुसलम्, 'हविष्कृत' इत्यस्याधिदैवतं वाक्, अधियज्ञश्च पत्नी ।

(१६) 'कुक्कुटोसि' इत्यस्य वाक्, 'वर्षवृद्धम्' इत्यस्य शूर्पम्, 'प्रति त्वा' इत्यस्य हविः, 'परापूतम्' 'अपहतम्' इत्यनयो रक्षः, 'वायुर्वः' 'देवो वः' इत्यनयोस्तण्डुलाः ।

(१७) 'धृष्टिरसि' इत्यस्योपवेषः, 'अपाग्ने' 'आ देवयजम्' इत्यनयोरग्निः, 'ध्रुवमसि' इत्यस्य कपालानि ।

(१८) 'अग्ने ब्रह्म' इत्यस्याग्निः, 'धरुणमसि' 'धर्त्रमसि' 'विश्वाभ्यस्त्वा' 'चित स्थ' 'भृगूणाम्' इत्येषां कपालानि ।

(१९) 'शर्मासि' 'अदित्यास्त्वक्' इत्यनयोः कृष्णाजिनम्, 'धिषणासि' इत्यस्य दृषन्, 'दिव स्कम्भनीः' इत्यस्य शम्या, 'धिषणासि' इत्यस्योपलः ।

(२०) 'धान्यमसि' 'प्राणाय त्वा' 'उदानाय त्वा' 'व्यानाय त्वा' 'दीर्घामनु' 'चक्षुषे त्वा' इत्येषां हविः, 'महीनाम्' इत्यस्याज्यम् ।

(२१) 'देवस्य त्वा' इत्यस्य सविता, 'सं वपामि' इत्यस्य हविः, 'समापः' इत्यस्यापः ।

(२२) 'जनयत्यै त्वा' 'इदमग्नेः' 'इदमग्नीषोमयोः' इत्येषां हविः, 'इषे त्वा' इत्यस्याज्यम्, 'घर्मोसि' 'उरु प्रथस्व' 'अग्निष्टे' 'देवस्त्वा' इत्येषां पुरोडाशः ।

(२३) 'मा भेः' 'अतमेरुः' इत्यनयोः पुरोडाशः, 'त्रिताय त्वा' इत्यस्य त्रितः, 'द्विताय त्वा' इत्यस्य द्वितः, 'एकताय त्वा' इत्यस्य एकतः ।

(२४) 'देवस्य त्वा' इत्यस्य सविता, 'आददेध्वरकृतम्' 'इन्द्रस्य बाहुः' इत्यनयोः स्फ्यः ।

(२५) 'पृथिवि देवयजनि' 'वर्षतु ते' इत्यनयोर्वेदिः, 'व्रजङ्गच्छ' इत्यस्य पुरीषम्, 'वधान देव' इत्यस्य सविता ।

(२६) 'अपाररुम्' 'अररो दिवम्' इत्यनयोरसुरः, 'व्रजङ्गच्छ' इत्यनयोः पुरीषम्, 'वर्षतु ते' इत्यनयोः 'द्रप्सस्ते' इत्यस्य च वेदिः, 'बधान देव' इत्यनयोः सविता ।

(२७) 'गायत्रेण त्वा' 'त्रैष्टुभेन त्वा' 'जागतेन त्वा' इत्येषां विष्णुः, 'सुक्ष्मा च' 'स्योना च' 'ऊर्जस्वती च' इत्येषां वेदिः ।

(२८) 'पुरा क्रूरस्य' इत्यस्य चन्द्रमाः, 'प्रोक्षणीरासादय' इति प्रैषः, 'द्विषतो वधः' इत्यस्य स्फ्यः ।

(२९) 'प्रत्युष्टꣳ रक्षः' इत्यनयोः 'निष्टप्तꣳ रक्षः' इत्यनयोश्च रक्षः, 'अनिशितोसि' इत्यस्य स्रुवः, 'अनिशितासि' इत्यस्य स्रुक् ।

(३०) 'अदित्यै रास्ना' 'विष्णोर्वेष्पः' इत्यनयोर्योक्त्रम्, 'ऊर्जे त्वा' 'अदब्धेन त्वा' (३१) 'सवितुस्त्वा' 'तेजोसि' 'धाम नामासि' इत्येषामाज्यम्, 'सवितुर्वः' इत्यस्यापः ॥

छन्दः (१) 'इषे त्वा' 'ऊर्जे त्वा' इत्यनयोरनुष्टुप्, (२८) 'पुरा क्रूरस्य' इत्यस्य त्रिष्टुप् ॥

अनुवाकः

॥ श्रीवेदपुरुषाय नमः ॥ हरिःॐ ॥

॥१॥ इषे त्त्वोर्ज्जे त्त्वा व्वायव स्त्थ देवो वः सविता प्प्रार्प्पयतु श्श्रेष्ठतमाय कर्म्मणऽआप्प्यायद्ध्वमग्घ्न्याऽइन्द्राय भागम्प्रजावतीरनमीवाऽअयक्ष्मा मा व स्त्तेनऽईशत माघशꣳसो
ध्रुवाऽअस्म्मिन्न्गोपतौ स्यात बह्वीर्य्यजमानस्य पशून्न्पाहि ॥१॥

॥२॥ वसोः पवित्रमसि द्यौरसि पृथिव्व्यसि मातरिश्श्वनो घर्म्मोसि व्विश्श्वधाऽअसि ।
परमेण धाम्म्ना दृꣳहस्व मा ह्वार्म्मा ते यज्ञपतिर्ह्वार्षीत् ॥२॥

व्वसोः॑ प॒वित्र॑मसि श॒तधा॑रँ॒व्वसोः॑ प॒वित्र॑मसि स॒हस्र॑धारम् ।
दे॒वस्त्वा॑ सवि॒ता पु॑नातु॒ व्वसोः॑ प॒वित्रे॑ण श॒तधा॑रेण सु॒प्प्वा॒ काम॑धुक्षः ॥३॥
सा व्वि॒श्वायुः॑ सा व्वि॒श्वक॑र्म्मा॒ सा व्वि॒श्वधा॑याः ।
इन्द्र॑स्य त्वा भा॒गꣳ सोमे॒नात॑नच्मि॒ व्विष्ण्णो॑ ह॒व्यꣳ र॑क्ष ॥४॥
अग्ने॑ व्व्रतपते व्व्र॒तञ्च॑रिष्ष्यामि॒ तच्छ॑केय॒न्तन्मे॑ राद्ध्यताम् ।
इ॒दम॒हमनृ॑तात्स॒त्त्यमुपै॑मि ॥५॥
कस्त्वा॑ युनक्ति॒ स त्वा॑ युनक्ति॒ कस्म्मै॑ त्वा युनक्ति॒ तस्म्मै॑ त्वा युनक्ति ।
कर्म्म॑णे वाँ॒व्वेषा॑य वाम् ॥६॥
प्रत्त्यु॑ष्टꣳ॒ रक्षः॒ प्प्रत्त्यु॑ष्टा॒ऽअरा॑तयो॒ निष्ट॑प्तꣳ॒ रक्षो॒ निष्ट॑प्ता॒ऽअरा॑तयः ।
उ॒र्व्व॒न्तरि॑क्ष॒मन्न्वे॑मि ॥७॥
धूर॑सि॒ धूर्व्व॒ धूर्व्व॑न्त॒न्धूर्व्व॒ तँ॒य्यो॒स्म्मान्धूर्व्व॑ति॒ तन्धू॑र्व्व॒ यँ॒व्व॒यन्धूर्व्वा॑मः ।
दे॒वाना॑मसि॒ व्वह्नि॑तमꣳ॒ सस्नि॑तम॒म्पप्प्रि॑तम॒ञ्जुष्ट॑तमन्देव॒हूत॑मम् ॥८॥
अह्रु॑तमसि हवि॒र्द्धान॒न्दृꣳह॑स्व॒ मा ह्वा॒र्म्मा ते॑ य॒ज्ञप॑तिर्ह्वार्षीत् ।
व्विष्ण्णु॑स्त्वा क्क्रमतामु॒रु व्वाता॒याप॑हत॒ꣳ रक्षो॒ यच्छ॑न्ता॒म्पञ्च॑ ॥९॥
दे॒वस्य॑ त्वा सवि॒तुः प्प्र॑स॒वे॒ऽश्विनो॑र्ब्बा॒हुभ्या॑म्पू॒ष्ण्णो हस्ता॑भ्याम् ।
अ॒ग्नये॒ जुष्ट॑ङ्गृह्णाम्म्यग्नीषोमा॑भ्या॒ञ्जुष्ट॑ङ्गृह्णामि ॥१०॥
भू॒ताय॑ त्वा॒ नारा॑तये॒ स्व॑रभि॒विक्ख्ये॑षन्दृꣳह॑न्ता॒न्दुर्य्याः॑ पृथि॒व्यामु॒र्व्व॒न्तरि॑क्ष॒मन्न्वे॑मि
पृथि॒व्यास्त्वा॒ नाभौ॑ सादया॒म्म्यदि॑त्त्याऽउ॒पस्थेग्ने॑ ह॒व्यꣳ र॑क्ष ॥११॥

प॒वित्रे॑ स्त्थो व्वैष्ण्ण॒व्यौ॒ सवि॒तुर्व्व॑÷ प्प्रस॒वऽउत्पु॑ना॒म्म्यच्छि॑द्रेण प॒वित्रे॑ण॒ सूर्य्य॑स्य
र॒श्मिभि÷ । देवी॑रापोऽअग्ग्रेगुवोऽअग्ग्रेपु॒वोग्ग्र॑ऽइ॒मम॒द्य य॒ज्ञन्न॑यताग्ग्रे॑ य॒ज्ञप॑तिꣳ
सु॒धातुँ॑य्य॒ज्ञप॑तिन्देव॒युव॑म् ॥१२॥
यु॒ष्म्माऽइन्द्रो॑वृणीत व्वृत्र॒तूर्य्ये॑ यू॒यमिन्द्र॑मवृणीध्वँव्वृत्र॒तूर्य्ये॒ प्प्रोक्षि॑ता स्त्थ ।
अ॒ग्नये॑ त्वा॒ जुष्ट॒म्प्प्रोक्षा॑म्म्यग्नीषोमा॑भ्यान्त्वा॒ जुष्ट॒म्प्प्रोक्षा॑मि ।
दैव्या॑य॒ कर्म्म॑णे शुन्धद्ध्वन्देवय॒ज्ज्यायै॒ यद्वो॑शु॑द्धाः पराज॒घ्नुरि॒दँव्व॒स्तच्छु॑न्धामि ॥१३॥
शर्म्मा॒स्यव॑धूत॒ꣳ रक्षोव॑धूता॒ऽअरा॑त॒योदि॑त्त्या॒स्त्वग॑सि॒ प्प्रति॒ त्वादि॑तिर्व्वेत्तु ।
अद्रि॑रसि व्वानस्प॒त्त्यो ग्ग्रावा॑सि पृ॒थुबु॑ध्नः॒ प्प्रति॒ त्वादि॑त्त्या॒स्त्वग्व्वे॑त्तु ॥१४॥
अ॒ग्नेस्त॒नूर॑सि व्वा॒चो व्वि॒सर्ज्ज॑नन्दे॒ववी॑तये त्वा गृह्णामि बृ॒हद्ग्रा॑वासि व्वानस्प॒त्त्यः
सऽइ॒दन्दे॒वेभ्यो॑ ह॒विः श॑मीष्व सु॒शमि॑ शमीष्व । हवि॑ष्कृ॒देहि॒ हवि॑ष्कृ॒देहि॑ ॥१५॥

कुक्कुटोसि मधुजिह्वऽइषमूर्ज्जमावद त्त्वया व्वयꣳ सङ्घातꣳसङ्घातञ्जेष्म व्वर्षवृद्धमसि प्प्रति त्त्वा व्वर्षवृद्धँव्वेत्तु परापूतꣳ रक्क्षः परापूताऽअरातयोपहतꣳ रक्क्षो व्वायुर्व्वो व्विविनक्क्तु देवो वः सविता हिरण्ण्यपाणिः प्प्रति गृब्भ्णात्त्वच्छिद्द्रेण पाणिना ॥१६॥

धृष्टिरस्यपाग्ग्नेऽअग्ग्निमामादञ्जहि निष्क्रव्यादꣳ सेधा देवयजँव्वह । ध्रुवमसि पृथिवीन्दृꣳह ब्ब्रह्मवनि त्त्वा क्क्षत्रवनि सजातवन्न्युपदधामि भ्भ्रातृव्यस्य व्वधाय ॥१७॥

अग्ग्ने ब्ब्रह्म गृब्भ्णीष्ष्व धरुणमस्यन्तरिक्क्षन्दृꣳह ब्ब्रह्मवनि त्त्वा क्क्षत्रवनि सजातवन्न्युपदधामि भ्भ्रातृव्यस्य व्वधाय । धर्त्रमसि दिवन्दृꣳह ब्ब्रह्मवनि त्त्वा क्क्षत्रवनि सजातवन्न्युपदधामि भ्भ्रातृव्यस्य व्वधाय । व्विश्श्वाब्भ्यस्त्त्वाशाब्भ्यऽउपदधामि चितस्त्थोर्द्ध्वचितो भृगूणामङ्गिरसान्तपसा तप्प्यद्ध्वम् ॥१८॥

शर्म्मास्यवधूतꣳ रक्क्षोवधूताऽअरातयोदित्त्यास्त्त्वगसि प्प्रति त्त्वादितिर्व्वेत्तु । धिषणासि पर्व्वती प्प्रति त्त्वादित्त्यास्त्त्वग्वेत्तु दिव स्कम्भनीरसि धिषणासि पार्व्वतेयी प्प्रति त्त्वा पर्व्वती व्वेत्तु धान्न्यमसि ॥१९॥

धान्न्यमसि धिनुहि देवान्प्प्राणाय त्त्वोदानाय त्त्वा व्यानाय त्त्वा । दीर्ग्घामनु प्प्रसितिमायुषे धान्देवो वः सविता हिरण्ण्यपाणिः प्प्रतिगृब्भ्णात्त्वच्छिद्द्रेण पाणिना चक्क्षुषे त्त्वा महीनाम्पयोसि ॥२०॥

देवस्य त्त्वा सवितुः प्प्रसवेश्श्विनोर्ब्बाहुब्भ्याम्पूष्ष्णो हस्त्ताब्भ्याम् ।
सँव्वपामि समापऽओषधीभिः समोषधयो रसेन ।
सꣳ रेवतीर्ज्जगतीभिः पृच्च्यन्ताꣳ सम्मधुमतीर्म्मधुमतीभिः पृच्च्यन्ताम् ॥२१॥

जनयत्त्यै त्त्वा सँय्यौमीदमग्ग्नेरिदमग्ग्नीषोमयोरिषे त्त्वा घर्म्मोसि व्विश्श्वायुरुरुप्प्रथाऽउरु प्प्रथस्वोरु ते यज्ञपतिः प्प्रथतामग्ग्निष्टे त्त्वचम्मा हिꣳसीद्देवस्त्त्वा सविता श्श्रपयतु व्वर्षिष्ठेधि नाके ॥२२॥

मा भेर्म्मा सँव्विक्क्थाऽअतमेरुर्य्यज्ञोतमेरुर्य्यजमानस्य प्प्रजा भूयात्त्रिताय त्त्वा द्द्विताय त्त्वैकताय त्त्वा ॥२३॥

देवस्य त्त्वा सवितुः प्प्रसवेश्श्विनोर्ब्बाहुब्भ्याम्पूष्ष्णो हस्त्ताब्भ्याम् । आददेद्ध्वरकृतन्देवेब्भ्यऽइन्द्रस्य बाहुरसि दक्क्षिणः सहस्रभृष्टिः शततेजा व्वायुरसि तिग्ग्मतेजा द्द्विषतो व्वधः ॥२४॥

पृथिवि देवयजन्न्योषद्ध्यास्त्ते मूलम्मा हिꣳसिषँव्व्रजङ्गच्छ गोष्ठानँव्वर्षतु ते द्यौर्ब्बधान

दे॑व सवितः पर॒मस्यां॑पृथि॒व्व्याᳫं श॒तेन॒ पाशै॒र्य्यो॑स्मान्द्वेष्टि॒ यञ्च॑ व॒यन्द्वि॒ष्मस्तमतो॒ मा मौक् ॥२५॥

अपा॒ररुम्पृथि॒व्व्यै दे॑व॒यज॑नाद्वध्यासँव्व्र॒जङ्ग॑च्छ गो॒ष्ठान॒व्वर्ष॑तु ते॒ द्यौर्ब्ब॑धा॒न दे॑व सवितः पर॒मस्यां॑पृथि॒व्व्याᳫं श॒तेन॒ पाशै॒र्य्यो॑स्मान्द्वेष्टि॒ यञ्च॑ व॒यन्द्वि॒ष्मस्तमतो॒ मा मौक्। अर॑रो॒ दि॒वम्मा प॑प्तो द्र॒प्सस्ते॒ द्याम्मा स्क॑न्व्व्र॒जङ्ग॑च्छ गो॒ष्ठान॒व्वर्ष॑तु ते॒ द्यौर्ब्ब॑धा॒न दे॑व सवितः पर॒मस्यां॑पृथि॒व्व्याᳫं श॒तेन॒ पाशै॒र्य्यो॑स्मान्द्वेष्टि॒ यञ्च॑ व॒यन्द्वि॒ष्मस्त॒मतो॒ मा मौक् ॥२६॥

गा॒य॒त्रेण॑ त्वा॒ च्छन्द॑सा॒ परि॑गृह्णामि॒ त्रैष्टु॑भेन त्वा॒ च्छन्द॑सा॒ परि॑गृह्णामि॒ जाग॑तेन त्वा॒ च्छन्द॑सा॒ परि॑गृह्णामि। सु॒क्ष्मा चासि॑ शि॒वा चा॑सि स्यो॒ना चासि॑ सु॒षदा॑ चा॒सूर्ज॑स्वती॒ चासि॒ पय॑स्वती च ॥२७॥

पु॒रा क्क्रू॒रस्य॑ वि॒सृपो॑ विरप्प्शिन्नुदा॒दाय॑ पृथि॒वीञ्जी॒वदा॑नुम्। यामैर॑यँश्च॒न्द्रम॑सि स्व॒धाभि॒स्तामु॒ धीरा॑सोऽअनु॒दिश्य॑ यजन्ते। प्रोक्ष॑णी॒रासा॑दय द्विष॒तो व॒धो॑सि ॥२८॥

॥१०॥ प्रत्यु॑ष्टᳫं॒ रक्षः॒ प्प्रत्यु॑ष्टा॒ऽअरा॑तयो॒ निष्ट॑प्तᳫं॒ रक्षो॒ निष्ट॑प्ता॒ऽअरा॑तयः। अनि॑शितोसि सपत्न॒क्षिद्वा॒जिन॑न्त्वा व्वाजे॒द्ध्यायै॒ सम्मा॑र्ज्मि। प्रत्यु॑ष्टᳫं॒ रक्षः॒ प्प्रत्यु॑ष्टा॒ऽअरा॑तयो॒ निष्ट॑प्तᳫं॒ रक्षो॒ निष्ट॑प्ता॒ऽअरा॑तयः। अनि॑शितासि सपत्न॒क्षिद्वा॒जिनी॑न्त्वा व्वाजे॒द्ध्यायै॒ सम्मा॑र्ज्मि ॥२९॥

अदि॑त्त्यै॒ रास्ना॑सि॒ व्विष्णो॑र्व्वे॒ष्प्पो॑स्यू॒र्जे त्वाद॑ब्धेन त्वा॒ चक्षु॒षाव॑पश्यामि।
अ॒ग्नेर्ज्जि॒ह्वासि॑ सु॒हूर्द्दे॒वेभ्यो॒ धाम्ने॑धाम्ने मे भव॒ यजु॑षेयजुषे ॥३०॥

स॒वि॒तुस्त्वा॑ प्प्रस॒वऽउत्पु॑नाम्म्यच्छि॑द्द्रेण प॒वित्रे॑ण॒ सूर्य्य॑स्य र॒श्मिभिः॑। स॒वि॒तुर्व्वः॑ प्प्रस॒वऽउत्पु॑नाम्म्यच्छि॑द्द्रेण प॒वित्रे॑ण॒ सूर्य्य॑स्य र॒श्मिभिः॑। तेजो॑सि शु॒क्रम॑स्य॒मृत॑मसि॒ धाम॒ नामा॑सि प्प्रि॒यन्दे॒वाना॒मना॑धृष्टन्देव॒यज॑नमसि ॥३१॥

॥ इति प्रथमोऽध्यायः ॥

अथ द्वितीयोऽध्यायः

ऋषिः (१) 'कृष्णोसि' इत्यारभ्य (१९) 'घृताची स्थ' इत्यन्तानाम्, (२०) 'अग्नेदब्धायो' इत्यारभ्य (२८) 'अग्ने व्रतपते' इत्यन्तानाञ्च सामान्यतः प्राजापत्यः परमेष्ठी प्राजापत्या देवा वा ऋषयः। विशेषतश्च—
(४) 'वीतिहोत्रम्' इत्यस्य विश्वावसुः।
(११) 'देवस्य त्वा' इत्यारभ्य (१३) 'मनोजूतिः' इत्यन्तानामाङ्गिरसो बृहस्पतिः।
(१६) 'मरुताम्पृषतीः' 'चक्षुष्पा अग्ने' इत्यनयोः कपिः।

(१७) 'यम्परिधिम्' 'अग्नेः प्रियम्' इत्यनयोर्देवलः ।
(१८) 'सꣳस्रवभागा' 'स्वाहा वाट्' इत्यनयोः सोमशुष्मः ।
(१९) 'यज्ञ नमश्च' इत्यस्य शूर्पम्, यवमान्, ऋषिः, उद्वालवान्, धानान्तर्वांश्च ।
(२१) 'देवा गातु' इत्यस्य मनसस्पतिः ।
(२९) 'अग्नये कव्यवाहनाय' इत्यारभ्य (३४) 'ऊर्जं वहन्तीः' इत्यन्तानां प्रजापतिः ॥

देवता (१) 'कृष्णोऽसि' इत्यस्येध्मः, 'वेदिरसि' इत्यस्य वेदिः, 'बर्हिरसि' इत्यस्य बर्हिः ।
(२) 'अदित्यै व्युन्दनम्' इत्यस्यापः, 'विष्णो स्तुपः' इत्यस्य प्रस्तरः, 'ऊर्णम्म्रदसम्' इत्यस्य वेदिः, 'भुवपतये' 'भुवनपतये' 'भूतानाम्पतये' इत्येषामग्निः ।
(३) 'गन्धर्वस्त्वा' 'इन्द्रस्य बाहुः' 'मित्रावरुणौ' इत्येषां परिधयः ।
(४) 'वीतिहोत्रम्' इत्यस्याग्निः ।
(५) 'समिदसि' इत्यस्याग्निः, 'सूर्यस्त्वा' इत्यस्याहवनीयाग्निः, 'सवितुर्बाहू' इत्यस्य विधृतिः, 'ऊर्णम्म्रदसम्' 'आ त्वा' इत्यनयोः प्रस्तरः ।
(६) 'घृताच्यसि जुहूः' 'घृताच्यस्युपभृन्' 'घृताच्यसि ध्रुवा' इत्येषां क्रमेण जुहूः, उपभृत्, ध्रुवाः, 'प्रियेण धाम्ना' इत्यस्य हविः, 'ध्रुवा असदन्' 'पाहि माम्' इत्यनयोर्विष्णुः ।
(७) 'अग्ने वाजजित्' इत्यस्याग्निः, 'नमो देवेभ्यः' इत्यस्य देवाः, 'स्वधा पितृभ्यः' इत्यस्य पितरः, 'सुयमे मे' इत्यस्य स्रुचौ ।
(८) 'अङ्घ्रिणा विष्णो' इत्यस्य विष्णुः, 'वसुमतीमग्ने' इत्यस्याग्निः, 'इत इन्द्रः' इत्यस्येन्द्रः ।
(९) 'सञ्ज्योतिषा' इत्यस्याज्यम् ।
(१०) 'मयीदम्' इत्यस्येन्द्रो मघवा, 'उपहूता पृथिवी' इत्यस्य पृथिवी ।
(११) 'उपहूतो द्यौः' इत्यस्य द्यौः, 'देवस्य त्वा' इत्यस्य सविता, 'प्रतिगृह्णामि' 'अग्नेष्ट्वा' इत्यनयोः प्राशित्रम् ।
(१२–१३) 'एतन्ते' इत्यस्य विश्वे देवाः ।
(१४) 'एषा ते' 'अग्ने वाजजित्' इत्यनयोरग्निः ।
(१५) 'अग्नीषोमयोः' 'अग्नीषोमौ' इत्यनयोरग्नीषोमौ, 'इन्द्राग्न्योः' 'इन्द्राग्नी' इत्यनयोरिन्द्राग्नी ।
'सुभ्यस्त्वा' 'रुद्रेभ्यस्त्वा' 'आदित्येभ्यस्त्वा' इत्येषां परिधयः, 'सञ्जानाथाम्' 'व्यन्तु वयोक्तम्' 'मरुतावृषतीः' इत्येषां प्रस्तरः, 'चक्षुष्पा अग्ने' इत्यस्याग्निः ।
(१७) 'यम्परिधिम्' 'अग्नेः प्रियम्' इत्यनयोरग्निः ।
(१८) 'सꣳस्रवभागा' इत्यस्य विश्वे देवाः ।
(१९) 'घृताची स्थः' इत्यस्य स्रुचौ, 'यज्ञ नमश्च' इत्यस्य यज्ञः ।
(२०) 'अग्नेदब्धायो' इत्यस्य गार्हपत्योऽग्निः, 'अग्नये संवेशपतये' इत्यस्य दक्षिणाग्निः, 'सरस्वत्यै' इत्यस्य सरस्वती ।
(२१) 'वेदोसि' इत्यस्य वेदः, 'देवा गातुविदः' इत्यस्य वातः ।
(२२) 'सम्बर्हिरङ्क्ताम्' इत्यस्य बर्हिः ।
(२३) 'कस्त्वा' इत्यस्य प्रजापतिः, 'रक्षसां भागः' इत्यस्य रक्षांसि ।
(२४) 'सं वर्चसा' इत्यस्य त्वष्टा ।
(२५) 'दिवि विष्णुः' 'अन्तरिक्षे विष्णुः' 'पृथिव्यां विष्णुः' इत्येषां विष्णुः, 'अस्मादन्नात्' इत्यस्य भागः, 'अस्यै प्रतिष्ठायाः' इत्यस्य भूमिः, 'अगन्म स्वः' इत्यस्य देवाः, 'सञ्ज्योतिषा' इत्यस्याहवनीयः ।
(२६) 'स्वयम्भूरसि' 'सूर्यस्यावृतम्' इत्यनयोः सूर्यः ।
(२७) 'अग्ने गृहपते' इत्यस्य गार्हपत्यः, 'सूर्यस्यावृतम्' इत्यस्य सूर्यः ।
(२८) 'अग्ने व्रतपते' 'इदमहम्' इत्यनयोरग्निः ।
(२९) 'अग्नये कव्यवाहनाय' 'सोमाय पितृमते' इत्यनयो[illegible], 'अपहता असुरा' इत्यस्यासुराः ।

(३०) 'ये रूपाणि' इत्यस्य कव्यवाहनोऽग्निः ।
(३१) 'अत्र पितरः' 'अमी मदन्त' इत्यनयोः पितरः ।
(३२) 'नमो वः पितरो रसाय' इत्यस्य रसः, 'नमो वः पितरः शोषाय' इत्यस्य शोषः, 'नमो वः पितरो जीवाय' इत्यस्य जीवः, 'नमो वः पितरः स्वधायै' इत्यस्य स्वधा, 'नमो वः पितरो घोराय' इत्यस्य घोरः, 'नमो वः पितरो मन्यवे' इत्यस्य मन्युः, 'गृहान्नः' 'एतद्वः' इत्यनयोः पितरः ।
(३३) 'आधत्त पितरः' इत्यस्य पितरः ।
(३४) 'ऊर्जं वहन्तीः' इत्यस्यापः ॥

छन्दः (४) 'वीतिहोत्रन्त्वा' इत्यस्य गायत्री, (१४) 'एषा ते अग्ने' इत्यस्यानुष्टुप्, (१६) 'मरुताम्पृषतीः' 'चक्षुष्पा अग्ने' इत्यनयोर्बृहती, (१७) 'यम्परिधिम्' इत्यस्य विराड्रूपा त्रिष्टुप्, 'अग्नेः प्रियम्' इति यजुः, (१८) 'सꣳस्रवभागा' इत्यस्य त्रिष्टुप्, 'स्वाहा वाट्' इति यजुः, (२१) 'देवा गातुविदः' इत्यस्य विराट्, (२२) 'सम्बर्हिरङ्क्ताम्' इत्यस्य विराड्रूपा त्रिष्टुप्, (२४) 'सं वर्च्चसा' (३०) 'ये रूपाणि' इत्यनयोस्त्रिष्टुप्, (३३) 'आधत्त पितरः' इत्यस्य गायत्री, (३४) 'ऊर्जं वहन्तीः' इत्यस्य विराट् ॥

॥ हरिः ॐ ॥

॥१॥ कृ॒ष्ण्णो॑स्याखरे॒ष्ट्ठो॒ग्ग्नये॑ त्वा॒ जुष्ट्टम्प्रोक्क्षा॑मि॒ व्वेदि॑रसि ब॒र्हिषे॑ त्वा॒ जुष्ट्टाम्प्रोक्क्षा॑मि
ब॒र्हिर॑सि स्रु॒ग्ग्भ्यस्त्वा॒ जुष्ट्टम्प्रोक्क्षा॒म्म्यदि॑त्त्यै॒ व्व्युन्द॑नम् ॥१॥
अदि॑त्त्यै॒ व्व्युन्द॑नमसि॒ व्विष्ण्णो॑ स्त्तु॒पो॒स्यूर्ण्ण॑म्म्रदसन्त्वा स्त्तृणा॑मि स्वा॒स॒स्त्थान्दे॒वेब्भ्यो॒
भुव॑पतये॒ स्वाहा॒ भुव॑नपतये॒ स्वाहा॑ भूताना॒म्पत॑ये॒ स्वाहा॑ ॥२॥
ग॒न्ध॒र्व्वस्त्त्वा॑ व्वि॒श्श्वाव॑सुः॒ परि॑दधातु व्विश्श्व॒स्यारि॑ष्ट्ट्यै॒ यज॑मानस्य परि॒धिर॑स्य॒ग्ग्निरि॒डऽई॑डि॒तः । इन्द्र॑स्य बा॒हुर॑सि॒ दक्षि॑णो॒ व्विश्श्व॒स्यारि॑ष्ट्ट्यै॒ यज॑मानस्य परि॒धिर॑स्य॒ग्ग्निरि॒डऽई॑डि॒तः । मि॒त्त्रावरु॑णौ त्त्वोत्त॒रतः॒ परि॑धत्तान्ध्ध्रु॒वेण॒ धर्म्म॑णा॒ व्विश्श्व॒स्यारि॑ष्ट्ट्यै॒ यज॑मानस्य परि॒धिर॑स्य॒ग्ग्निरि॒डऽई॑डि॒तः ॥३॥
व्वी॒तिहो॑त्त्रन्त्वा कवे द्द्यु॒मन्तꣳ॒ समि॑धीमहि । अग्ग्ने॑ बृ॒हन्त॑मद्ध्व॒रे ॥४॥
स॒मिद॑सि॒ सू॒र्य्य॑स्त्त्वा पु॒रस्त्ता॑त्पातु॒ कस्यां॑श्चिद॒भिश॑स्त्त्यै । स॒वि॒तुर्ब्बा॒हू स्त्थ॒ऽऊर्ण्ण॑म्म्रदसन्त्वा स्त्तृणा॑मि स्वा॒स॒स्त्थन्दे॒वेब्भ्य॒ऽआ त्त्वा॒ व्वस॑वो रु॒द्द्राऽआ॑दि॒त्त्याः सद॑न्तु ॥५॥
घृ॒ताच्च्य॑सि जु॒हूर्न्नाम्म्ना॒ सेद॒म्प्प्रि॒येण॒ धाम्म्ना॑ प्प्रि॒यꣳ सद॒ऽआसी॑द घृ॒ताच्च्य॑स्युप॒भृन्नाम्म्ना॒ सेद॒म्प्प्रि॒येण॒ धाम्म्ना॑ प्प्रि॒यꣳ सद॒ऽआसी॑द घृ॒ताच्च्य॑सि ध्रु॒वा नाम्म्ना॒ सेद॒म्प्प्रि॒येण॒ धाम्म्ना॑ प्प्रि॒यꣳ सद॒ऽआसी॑द प्प्रि॒येण॒ धाम्म्ना॑ प्प्रि॒यꣳ सद॒ऽआसी॑द । ध्रु॒वाऽअ॑सदन्नृ॒तस्य॒ योनौ॒ ता व्वि॑ष्ण्णो पाहि पा॒हि य॒ज्ज्ञम्पा॒हि य॒ज्ज्ञप॑तिम्पा॒हि माँय्य॑ज्ज्ञ॒न्न्यम् ॥६॥
॥२॥ अग्ग्ने॑ व्वाजजि॒द्द्वाज॑न्त्वा सरि॒ष्ष्यन्तँ॑व्वाज॒जित॒ꣳ सम्मा॑र्ज्मि । नमो॑ दे॒वेब्भ्यः॑ स्व॒धा पि॒तृब्भ्यः॑ सु॒यमे॑ मे भूयास्त॒मस्क॑न्नम॒द्य ॥७॥

अस्क॑न्नम॒द्य दे॒वेब्भ्य॒ऽआज्ज्य॒ꣳ सम्भ्भ्रि॑यास॒मङ्घ्रि॑णा व्विष्ण्णो॒ मा त्त्वाव॑क्क्रमिषँ॒व्वसु॑मतीमग्ग्ने ते च्छा॒याम॒प॑स्त्थेषँ॒व्विष्ण्णो॒ स्त्थान॑मसी॒तऽइन्द्रो॑ व्वी॒र्य्य॑मकृणोदू॒र्द्ध्वो॑द्ध्व॒रऽआस्त्थात् ॥८॥ ॥५॥

अग्ग्ने॒ व्वेर्हो॒त्रँ॒व्वेर्दू॒त्त्यमव॑तान्त्वान्द्द्यावा॑पृथि॒वीऽअव॒ त्त्वन्द्द्यावा॑पृथि॒वी स्वि॑ष्ट्टकृद्दे॒वेब्भ्य॒ऽइन्द्र॒ऽआज्ज्ये॑न ह॒विषा॑ भू॒त्त्स्वाहा॒ सञ्ज्ज्योति॑षा॒ ज्ज्योति॑ः ॥९॥

॥३॥ मयी॒दमिन्द्र॑ऽइन्द्रि॒यन्द॑धात्त्व॒स्म्मान्रायो॑ म॒घवा॑नः सचन्ताम् । अ॒स्म्माक॑ꣳ सन्त्वा॒शिष॑ः स॒त्त्या न॑ः सन्त्वा॒शिष॒ऽउप॑हूता पृथि॒वी मा॒तोप॒ माम्पृ॑थि॒वी मा॒ता ह्व॑यताम॒ग्निराग्नी॑द्ध्रा॒त्त्स्वाहा॑ ॥१०॥

उप॑हूतो॒ द्यौष्पि॒तोप॒ मान्द्यौष्पि॒ता ह्व॑यताम॒ग्निराग्नी॑द्ध्रा॒त्त्स्वाहा॑ ।
दे॒वस्य॑ त्त्वा सवि॒तुः प्प्र॑स॒वेऽश्विनो॑र्ब्बा॒हुब्भ्या॑म्पू॒ष्ण्णो हस्त्ता॑ब्भ्याम् ।
प्रति॑गृह्णाम्म्य॒ग्नेष्ट्वा॒स्ये॑न॒ प्प्राश्ना॑मि ॥११॥

ए॒तन्ते॑ देव सवितर्य्य॒ज्ञम्प्रा॒हुर्ब्बृह॒स्प्पत॑ये ब्र॒ह्मणे॑ । ॥६॥
तेन॑ य॒ज्ञम॑व॒ तेन॑ य॒ज्ञप॑ति॒न्तेन॒ माम॑व ॥१२॥

मनो॑ जू॒तिर्ज्जु॑षता॒माज्ज्य॑स्य॒ बृह॒स्प्पति॑र्य्य॒ज्ञमि॒मन्त॑नो॒त्त्वरि॑ष्ट्टँय्य॒ज्ञꣳ समि॒मन्द॑धातु ।
व्विश्श्वे॑ दे॒वास॑ऽइ॒ह मा॑दयन्ता॒मो३म्प्प्रति॑ष्ठ ॥१३॥

ए॒षा ते॑ऽअग्ग्ने स॒मित्तया॒ व्वर्द्ध॑स्व॒ चा च॑ प्प्यायस्व । व्व॒र्द्धि॒षी॒महि॑ च व्व॒यमा च॑ प्प्यासिषीमहि । अग्ग्ने॑ व्वाजजि॒द्वाज॑न्त्त्वा ससृ॒वाꣳस॑ꣳव्वाज॒जित॒ꣳ सम्म्मा॑र्ज्जिम ॥१४॥

॥४॥ अ॒ग्नीषोम॑यो॒रुज्जि॑ति॒मनूज्जे॑षँ॒व्वाज॑स्य मा प्प्रस॒वेन॒ प्प्रोहा॑मि । अ॒ग्नीषोमौ॒ तमप॑नुदतां॒य्यो॒स्म्मान्द्वेष्टि॒ यञ्च॑ व्व॒यन्द्वि॒ष्म्मो व्वाज॑स्यैनम्प्प्रस॒वेनापो॑हामि । इ॒न्द्रा॒ग्न्योरु॒ज्जि॑ति॒मनूज्जे॑षँ॒व्वाज॑स्य मा प्प्रस॒वेन॒ प्प्रोहा॑मि । इ॒न्द्रा॒ग्नी तमप॑नुदता॒ँय्यो॒स्म्मान्द्वेष्टि॒ यञ्च॑ व्व॒यन्द्वि॒ष्म्मो व्वाज॑स्यैनम्प्प्रस॒वेनापो॑हामि ॥१५॥

व्वसु॑ब्भ्यस्त्वा रु॒द्द्रेब्भ्य॑स्त्वादि॒त्त्येब्भ्य॑स्त्वा॒ सञ्जा॑नाथान्द्द्यावापृथिवी मि॒त्त्रावरु॑णौ त्त्वा॒ व्वृष्ट्या॑वताम् । व्यन्तु॒ व्वयो॒क्क्तꣳ रिहा॑णा म॒रुताम्पृष॑तीर्ग्गच्छ व्व॒शा पृश्नि॑र्ब्भू॒त्त्वा दिव॑ङ्गच्छ॒ ततो॑ नो॒ व्वृष्टि॒माव॑ह । च॒क्क्षु॒ष्प्पाऽअ॑ग्ग्नेसि॒ चक्क्षु॑र्म्मे पाहि ॥१६॥

य॒म्परि॒धिम्प॒र्य्यध॑त्था॒ऽअग्ग्ने॑ देव प॒णिभि॒र्ग्गुह्य॑मानः । ॥७॥
तन्त॑ऽए॒तमनु॒ जोष॑म्भराम्म्ये॒ष नेत्त्वद॑पचे॒तया॑ताऽअ॒ग्ग्नेः प्प्रि॒यम्पाथोपी॑तम् ॥१७॥
स॒ꣳस्र॒वभा॑गा स्त्थे॒षा बृ॒हन्त॑ः प्प्रस्तरे॒ष्ठाः परि॒धेया॑श्च दे॒वाः ।
इ॒माँ॒व्वाच॑म॒भि व्विश्श्वे॑ गृ॒णन्त॑ऽआ॒सद्द्या॒स्म्मिन्ब॒र्हिषि॑ मादयद्ध्व॒ꣳ स्वाहा॒ व्वाट् ॥१८॥

घृताची॑ स्थो॒ धु॒र्य्यौ॑ पातꣳ सु॒म्ने स्थः॑ सु॒म्ने मा॑ धत्तम् ।
यज्ञ॒ नम॑श्च त॒ऽउप॑ च य॒ज्ञस्य॑ शि॒वे सन्ति॑ष्ठस्व॒ स्वि॑ष्टे॒ मे॒ सन्ति॑ष्ठस्व ॥१९॥

॥५॥ अग्ने॑दब्धायोशीतम पा॒हि मा॑ दि॒द्द्योः पा॒हि प्प्रसि॑त्त्यै पा॒हि दु॒रिष्ट्ट्यै॑ पा॒हि दु॑रद्म॒न्न्या॒ऽअ॑वि॒षन्नः॑ पि॒तुङ्कृ॑णु सु॒षदा॒ योनौ॒ स्वाहा॒ वाडग्ग्नये॑ सं॒वेश॑पतये॒ स्वाहा॒ सर॑स्वत्त्यै य॒शोभ॒गिन्न्यै॒ स्वाहा॑ ॥२०॥

वे॒दो॑सि॒ येन॒ त्वन्दे॑व वेद दे॒वेभ्भ्यो॑ वे॒दोभ॑व॒स्तेन॒ मह्यँ॑वे॒दो भू॑याः । देवा॑ गातुविदो गा॒तुँवि॒त्त्वा गा॒तुमि॑त । मन॑सस्प्पत॒ऽइ॒मन्दे॑व य॒ज्ञꣳ स्वाहा॒ वाते॑ धाः ॥२१॥

सम्ब॒र्हिर॑ङ्क्ताꣳ ह॒विषा॑ घृ॒तेन॒ समा॑दि॒त्त्यैर्व॒सु॑भि॒ः सम्म॒रुद्भिः॑ ।
समिन्द्रो॑ वि॒श्श्वदे॑वेभिरङ्क्तान्दि॒व्व्यन्नभो॑ गच्छतु॒ यत्स्वाहा॑ ॥२२॥

कस्त्त्वा॒ विमु॑ञ्चति॒ स त्त्वा॒ विमु॑ञ्चति॒ कस्म्मै॑ त्त्वा॒ विमु॑ञ्चति॒ तस्म्मै॑ त्त्वा॒ विमु॑ञ्चति ।
पोषा॑य॒ रक्क्षसा॒म्भा॒गो॑सि ॥२३॥

॥६॥ सँव॒र्च्च॑सा॒ पय॑सा॒ सन्त॒नूभि॒रग॑न्न्महि॒ मन॑सा॒ सꣳ शि॒वेन॑ ।
त्त्वष्टा॑ सु॒दत्त्रो॒ विद॑धातु॒ रायो॑नु॒मा॑र्ष्टु त॒न्न्वो॒ यद्विलि॑ष्टम् ॥२४॥

दि॒वि विष्ण्णु॒र्व्य॑क्रꣳस्त॒ जाग॑तेन॒ च्छन्द॑सा॒ ततो॒ निर्भ॑क्तो॒ यो॒स्म्मान्द्वेष्टि॒ यञ्च॑ व॒यन्द्वि॒ष्म्मो॒न्तरि॑क्क्षे॒ विष्ण्णु॒र्व्य॑क्रꣳस्त॒ त्रैष्टु॑भेन॒ च्छन्द॑सा॒ ततो॒ निर्भ॑क्तो॒ यो॒स्म्मान्द्वेष्टि॒ यञ्च॑ व॒यन्द्वि॒ष्म्मः पृ॑थि॒व्व्याँविष्ण्णु॒र्व्य॑क्रꣳस्त गाय॒त्त्रेण॒ च्छन्द॑सा॒ ततो॒ निर्भ॑क्तो॒ यो॒स्म्मान्द्वेष्टि॒ यञ्च॑ व॒यन्द्वि॒ष्म्मो॒स्म्मादन्ना॑द॒स्यै प्प्रति॑ष्ठाया॒ऽअग॑न्न्म॒ स्वः॑ सञ्ज्योति॑षाभूम ॥२५॥

स्व॒य॒म्भूर॑सि॒ श्श्रेष्ठो॑ र॒श्मिर्व॑र्च्चो॒दाऽअ॑सि॒ वर्च्चो॑ मे देहि ।
सूर्य्य॑स्या॒वृत॒मन्न्वाव॑र्त्ते ॥२६॥

अग्ने॑ गृहपते सु॒गृहप॒तिस्त्त्वया॑ग्ग्ने॒हङ्गृ॒हप॑तिना भूयासꣳ सु॒गृहप॒तिस्त्त्वम्मया॑ग्ग्ने गृ॒हप॑तिना भूयाः । अ॒स्त्थू॒रि णो॒ गार्ह॑पत्त्यानि सन्तु श॒तꣳ हिमाः॒ सूर्य्य॑स्या॒वृत॒मन्न्वाव॑र्त्ते ॥२७॥

अग्ने॑ व्व्रतपते व्व्र॒तम॑चारिष॒न्तद॑शक॒न्तन्मे॑राधी॒दम॒हँय॒ऽए॒वास्मि॒ सो॒स्मि ॥२८॥

॥७॥ अ॒ग्ग्नये॑ कव्व्य॒वाह॑नाय॒ स्वाहा॒ सोमा॑य पि॒तृम॑ते॒ स्वाहा॑ ।
अप॑हता॒ऽअसु॑रा॒ रक्क्षाꣳसि वे॒दि॒षदः॑ ॥२९॥

ये रू॒पाणि॑ प्प्रतिमु॒ञ्चमा॑ना॒ऽअसु॑राः॒ सन्तः॑ स्व॒धया॒ चर॑न्ति ।
प॒रा॒पुरो॑ नि॒पुरो॒ ये भर॑न्त्य॒ग्ग्निष्टाँल्लो॒का॑त्प्प्रणु॑दा॒त्त्य॒स्म्मात् ॥३०॥

अत्र पितरो मादयद्ध्वँय्यथाभागमावृषायद्ध्वम् ।
अमीमदन्त पितरो यथाभागमावृषायिषत ॥३१॥

नमो वः पितरो रसाय नमो वः पितरः शोषाय नमो वः पितरो जीवाय नमो वः
पितरः स्वधायै नमो वः पितरो घोराय नमो वः पितरो मन्यवे नमो वः पितरः
पितरो नमो वो गृहान्नः पितरो दत्त सतो वः पितरो देष्मैतद्वः पितरो वासऽ
आधत्त ॥३२॥

आधत्त पितरो गर्ब्भङ्कुमारम्पुष्करस्रजम् । यथेह पुरुषोसत् ॥३३॥

ऊर्ज्जँवहन्तीरमृतङ्घृतम्पयः कीलालम्परिस्रुतम् । स्वधा स्थ तर्प्पयत मे पितॄन् ॥३४॥

॥ इति द्वितीयोऽध्यायः ॥

अथ तृतीयोऽध्यायः

ऋषिः(१) 'समिधाग्निम्' इत्यारभ्य (८) 'त्रिंशद्धाम' इत्यन्तानां सामान्यतः प्रजापतिः, देवाः, अग्निः, गन्धर्वा वा ऋषयः । विशेषतश्च—(१) 'समिधाग्निम्' इत्यस्याङ्गिरसो विरूपः, (२) 'सुसमिद्धाय' इत्यस्य वसुश्रुतः, (३) 'तन्त्वा' इत्यस्य भरद्वाजः, (६) 'आयङ्गौः' (७) 'अन्तश्चरसि' (८) 'त्रिंशद्धाम' इत्येषां सर्पराज्ञी कद्रूः ।

(९) 'अग्निर्ज्योतिः' इत्यारभ्य (१०) 'सजूर्देवेन' इत्यन्तानां प्रजापतिस्तत्रापि (९) 'अग्निर्वर्चः' 'सूर्यो वर्चः' इत्यनयोस्तक्षा, 'ज्योतिः सूर्यः' इत्यस्य चैलकिर्जीवलः ।

(११) 'उपप्रयन्त' इत्यारभ्य (३६) 'परि ते' इत्यन्तानां देवाः । तत्रापि—(११) 'उपप्रयन्त' इत्यस्य गोतमो राहूगणः, (१२) 'अग्निर्मूर्धा' इत्यस्य विरूपः, (१३) 'उभा वाम्' इत्यस्य भरद्वाजः, (१४) 'अयन्ते' इत्यस्य भारतौ देवश्रवोदेववातौ, (१५) 'अयमिह' इत्यस्य वामदेवः, (१६) 'अस्य प्रत्नाम्' इत्यस्यावत्सारः, (१८) 'चित्रावसो' इत्यस्य ऋषयः, (२२) 'उप त्वा' (२३) 'राजन्तमध्वराणाम्' (२४) 'स नः' इत्येषां वैश्वामित्रो मधुच्छन्दाः, (२५) 'अग्ने त्वम्' इत्यस्य बन्धुः, 'वसुरग्निः' इत्यस्य सुबन्धुः, (२६) 'तन्त्वा' इत्यस्य श्रुतबन्धुः, 'स नः' इत्यस्य विप्रबन्धुः, (२८) 'सोमानंश्स्वरणम्' (२९) 'यो रेवान्' (३०) 'मा नः' इत्येषां ब्रह्मणस्पतिर्मेधातिथिर्वा, (३१) 'महि त्रीणाम्' (३२) 'नहि तेषाम्' (३३) 'ते हि' इत्येषां सत्यधृतिर्वारुणिः, (३४) 'कदा चन' इत्यस्य मधुच्छन्दाः, (३५) 'तत्सवितुः' इत्यस्य विश्वामित्रः, (३६) 'परि ते' इत्यस्य वामदेवः ।

(३७) 'भूर्भुवः' इत्यस्यासुरिः, 'नर्य प्रजाम्' इत्यारभ्य (४०) 'अयमग्निः पुरीष्यः' इत्यन्तानामादित्यः ।

(४१) 'गृहा मा' (४२) 'येषामध्येति' (४३) 'उपहूता इह' इत्येषां बार्हस्पत्यः शंयुः ।

(४४) 'प्रघासिनः' इत्यारभ्य (६३) 'निवर्तयामि' इत्यन्तानां प्रजापतिस्तत्रापि (४६) 'मो षू णः' इत्यस्यागस्त्यः, (४९) 'पूर्णा दर्वि' (५०) 'देहि मे' इत्यनयोरौर्णवाभः, (५१) 'अक्षन्नमीमदन्त' (५२) 'सुसन्दृशन्त्वा' इत्यनयोर्गोतमः, (५३) 'मनो नु' (५४) 'आ न एतु' (५५) 'पुनर्नः' (५६) 'वयंश्सोम' इत्येषां बन्धुः, (६०) 'त्र्यम्बकम्० पुष्टिवर्धनम्' इत्यस्य वसिष्ठः, (६२) 'त्र्यायुषम्' इत्यस्य नारायणः ॥

देवता(१) 'समिधाग्निम्' (२) 'सुसमिद्धाय' (३) 'तन्त्वा' (४) 'उप त्वा' इत्येषामग्निः, (५) 'भूर्भुवः स्वः' इत्येषां क्रमेणाग्निवायुसूर्याः, 'द्यौरिव' इत्यस्य लिङ्गोक्ता ।

(६) 'आयङ्गौः' (७) 'अन्तश्चरति' (८) 'त्रिंशद्धाम' इत्येषामग्निः ।

(९) 'अग्निर्ज्योतिः' 'सूर्यो ज्योतिः' 'अग्निर्वर्चः' 'सूर्यो वर्चः' 'ज्योतिः सूर्यः' (१०) 'सजूर्देवेन सवित्रा सजू रात्र्या' 'सजूर्देवेन सवित्रा सजूरुषसा' इत्येषां लिङ्गोक्ताः ।

(११) 'उपप्रयन्तः' (१२) 'अग्निर्मूर्धा' इत्यनयोरग्निः।

(१३) 'उभा वाम्' इत्यस्येन्द्राग्नी।

(१४) 'अयन्ते' (१५) 'अयमिह' इत्यनयोरग्निः।

(१६) 'अस्य प्रत्नाम्' इत्यस्य गौरग्निः पयो वा।

(१७) 'तनूपा अग्ने' 'आयुर्दा अग्ने' 'वर्चोदा अग्ने' 'अग्ने यन्मे' (१८) 'इन्धानास्त्वा' इत्येषामग्निः, 'चित्रावसो' इत्यस्य रात्रिः।

(१९) 'सन्त्वमग्ने' इत्यस्याग्निः।

(२०) 'अन्ध स्थ' (२१) 'रेवती रमध्वम्' (२२) 'सꣳहितासि' इत्येषां गौः।

(२२) 'उप त्वाग्ने' (२३) 'राजन्तमध्वराणाम्' (२४) 'स नः' (२५) 'अग्ने त्वम्' 'वसुरग्निः' (२६) 'तन्त्वा' 'स नो बोधि' इत्येषामग्निः।

(२७) 'इड एहि' 'काम्या एत' इत्यनयोर्गौः।

(२८) 'सोमानꣳ स्वरणम्' (२९) 'यो रेवान्' (३०) 'मा नः' इत्येषां ब्रह्मणस्पतिः।

(३१) 'महि त्रीणाम्' (३२) 'नहि तेषाम्' (३३) 'ते हि' इत्येषामादित्यः।

(३४) 'कदा चन' इत्यस्येन्द्रः।

(३५) 'तत्सवितुः' इत्यस्य सविता।

(३६) 'परि ते' इत्यस्याग्निः, (३७) 'भूर्भुवः स्वः' इत्यस्य गार्हपत्याहवनीयावग्नी, 'नर्य प्रजाम्' इत्यस्य गार्हपत्यः, 'शꣳस्य पशून्' इत्यस्याहवनीयः, 'अथर्य पितुम्' इत्यस्य दक्षिणाग्निः।

(३८) 'आ गन्म' इत्यस्याहवनीयः।

(३९) 'अयमग्निर्गृहपतिः' इत्यस्य गार्हपत्यः।

(४०) 'अयमग्निः पुरीष्यः' इत्यस्यान्वाहार्यपचनः।

(४१) 'गृहा मा' (४२) 'येषामध्येति' (४३) 'उपहूता इह' इत्येषां वास्तुः।

(४४) 'प्रघासिनः' (४५) 'यद्ग्रामे' इत्यनयोर्मरुतः।

(४६) 'मो षू णः' इत्यस्येन्द्रो मरुतश्च।

(४७) 'अक्रन् कर्म' इत्यस्याग्निः।

(४८) 'अवभृथ निचुम्पुण' इत्यस्य यज्ञः।

(४९) 'पूर्णा दर्वि' (५०) 'देहि मे' (५१) 'अक्षन्नमीमदन्त' (५२) 'सुसन्दृशन्त्वा' इत्येषामिन्द्रः।

(५३) 'मनो नु' (५४) 'आ न एतु' (५५) 'पुनर्नः' इत्येषां मनः।

(५६) 'वयꣳ सोम' इत्यस्य सोमः।

(५७) 'एष ते० स्वाहा' 'एष ते० पशुः' (५८) 'अव रुद्रम्' (५९) 'भेषजमसि' (६०) 'त्र्यम्बकं० पुष्टिवर्धनम्' 'त्र्यम्बकं० पतिवेदनम्' (६१) 'एतत्ते' इत्येषां रुद्रः।

(६२) 'त्र्यायुषञमदग्नेः' इत्यस्य यजमानाशीः।

(६३) 'शिवो नामासि' इत्यस्य क्षुरः, 'निवर्तयामि' इत्यस्य लिङ्गोक्ता॥

छन्दः(१) 'समिधाग्निम्' इत्यादिचतुर्णाम्, (६) 'आयङ्गौः' इत्यादित्रयाणाम्, (९) 'अग्निर्ज्योतिः' इत्यादिनवानाञ्च गायत्री, (१३) 'उभा वाम्' इत्यस्य त्रिष्टुप्, (१४) 'अयन्ते' इत्यस्यानुष्टुप्, (१५) 'अयमिह' इत्यस्य जगती, (१६) 'अस्य प्रत्नाम्' इत्यस्य गायत्री, (१८) 'इन्धानास्त्वा' इत्यस्य महापङ्क्तिः, (२२) 'उप त्वाग्ने' इत्यादित्रयाणां गायत्री, (२५) 'अग्ने त्वम्' इत्यादिचतुर्णां द्विपदा विराट्, (२८) 'सोमानम्' इत्यादिषण्णां गायत्री, (३४) 'कदा चन' इत्यस्य पथ्याबृहती, (३५) 'तत्सवितुः' (३६) 'परि ते' इत्यनयोर्गायत्री, (३८) 'आगन्म' इत्यस्यानुष्टुप्, (३९) 'अयमग्निर्गृहपतिः' इत्यस्य न्यङ्कुसारिणी बृहती, (४०) 'अयमग्निः पुरीष्यः' इत्यस्यानुष्टुप्, (४१) 'गृहा मा' इत्यस्य विराड्रूपा त्रिष्टुप्, (४२) 'येषामध्येति' इत्यस्यानुष्टुप्, (४३) 'उपहूता इह' इत्यस्य महापङ्क्तिः, (४४) 'प्रघासिनो हवामहे' इत्यस्य गायत्री, (४५) 'यद्ग्रामे'

इत्यस्यानुष्टुप् , (४६) 'मो षू णः' इत्यस्य विराट् , (४७) 'अक्रन्कर्म' इत्यस्यानुष्टुप् , (४८) 'अवभृथ निचुम्पुण' इत्यादित्रयाणामनुष्टुप् , (५१) 'अक्षन्नमीमदन्त' 'सुसन्दृशन्त्वा' इत्यनयोः पङ्क्तिः, (५३) 'मनो नु' इत्यादिचतुर्णां गायत्री, (५८) 'अव रुद्रम्' इत्यस्य पङ्क्तिः, (५९) 'भेषजमसि' इत्यस्य ककुप् , (६०) 'त्र्यम्बकं यजामहे' इत्यादिद्वयोरनुष्टुप्, (६१) 'एतत्ते' इत्यस्यास्तारपङ्क्तिः, (६२) 'त्र्यायुषञ्जमदग्नेः' इत्यादित्रयाणामुष्णिक् ॥

॥ हरिः ॐ ॥

॥१॥ स॒मिधा॒ग्निन्दु॑वस्यत घृ॒तैर्ब्बो॑धय॒ताति॑थिम् । आस्मि॑न्ह॒व्या जु॑होतन ॥१॥
सुस॑मिद्धाय शो॒चिषे॑ घृ॒तन्ती॒व्रञ्जु॑होतन । अ॒ग्नये॑ जा॒तवे॑दसे ॥२॥
तन्त्वा॑ स॒मिद्भि॑रङ्गिरो घृ॒तेन॑ वर्द्धयामसि । बृ॒हच्छो॑चा यविष्ठ्य ॥३॥
उप॑ त्वाग्ने ह॒विष्म॑तीर्घृ॒ताची॑र्य्यन्तु हर्य्यत । जु॒षस्व॑ स॒मिधो॒ मम॑ ॥४॥
॥२॥ भूर्भुव॒ः स्व॒र्द्यौरि॑व भू॒म्ना पृ॑थि॒वीव॑ वरि॒म्णा ।
तस्या॑स्ते पृथिवि देवयजनि पृ॒ष्ठे᳖ग्निम॑न्ना॒दम॒न्नाद्या॒याद॑धे ॥५॥
आयङ्गौः पृश्नि॑रक्रमी॒दस॑दन्मा॒तर॑म्पु॒रः । पि॒तर॑ञ्च प्र॒यन्त्स्वः॑ ॥६॥
अ॒न्तश्च॑रति रोच॒नास्य प्रा॒णाद॑पान॒ती । व्य॑ख्यन्महि॒षो दिव॑म् ॥७॥
त्रि॒ꣳशद्धाम॒ विरा॑जति॒ वाक्प॑त॒ङ्गाय॑ धीयते । प्रति॒ वस्तो॒रह॒ द्युभिः॑ ॥८॥
॥३॥ अ॒ग्निर्ज्योति॒र्ज्योति॑र॒ग्निः स्वाहा॒ सूर्य्यो॒ ज्योति॒र्ज्योतिः॒ सूर्य्यः॒ स्वाहा॑ ।
अ॒ग्निर्वर्च्चो॒ ज्योति॒र्वर्च्चः॒ स्वाहा॒ सूर्य्यो॒ वर्च्चो॒ ज्योति॒र्वर्च्चः॒ स्वाहा॑ ।
ज्योतिः॒ सूर्य्यः॒ सूर्य्यो॒ ज्योतिः॒ स्वाहा॑ ॥९॥
स॒जूर्द्दे॒वेन॑ सवि॒त्रा स॒जू रात्र्येन्द्र॑वत्या । जु॒षा॒णोऽअ॒ग्निर्वे॑तु॒ स्वाहा॑ ।
स॒जूर्द्दे॒वेन॑ सवि॒त्रा स॒जूरु॒षसेन्द्र॑वत्या । जु॒षा॒णः सूर्य्यो॑ वेतु॒ स्वाहा॑ ॥१०॥
॥४॥ उ॒प॒प्र॒यन्तो॑ऽअध्व॒रम्मन्त्रँ॑ वोचेमा॒ग्नये॑ । आ॒रेऽअ॒स्मे च॑ शृण्व॒ते ॥११॥
अ॒ग्निर्मू॒र्द्धा दि॒वः क॒कुत्पतिः॑ पृथि॒व्याऽअ॒यम् ।
अ॒पाꣳ रेता॑ꣳसि जिन्वति ॥१२॥
उ॒भा वा॑मिन्द्राग्नीऽआहु॒वध्या॑ऽउ॒भा राध॑सः स॒ह मा॑द॒यध्यै॑ ।
उ॒भा दा॒तारा॑वि॒षाꣳ र॑यी॒णामु॒भा वाज॑स्य सा॒तये॑ हुवे वाम् ॥१३॥
अ॒यन्ते॒ योनि॑र्ऋ॒त्वियो॒ यतो॑ जा॒तोऽअरो॑चथाः ।
तञ्जा॒नन्न॑ग्न॒ऽआरो॒हाथा॑ नो वर्द्धया र॒यिम् ॥१४॥
अ॒यमि॒ह प्र॑थ॒मो धा॑यि धा॒तृभि॒र्होता॒ यजि॑ष्ठोऽअध्व॒रेष्वीड्यः॑ ।
यमप्न॑वानो॒ भृग॑वो विरुरु॒चुर्वने॑षु चि॒त्रँ वि॒भ्वँ॑ वि॒शेवि॑शे ॥१५॥

अस्य प्प्रत्नामनु द्युतꣳ शुक्रन्दुदुह्रेऽअह्रयः । पयः सहस्रसामृषिम् ॥१६॥

तनूपाऽअग्नेसि तन्वम्मे पाह्यायुर्दाऽअग्नेस्यायुर्म्मे देहि वर्च्चोदाऽअग्नेसि वर्च्चो मे देहि । अग्ने यन्मे तन्वाऽऊनन्तन्मऽआपृण ॥१७॥

इन्धानास्त्वा शतꣳ हिमा द्युमन्तꣳ समिधीमहि । वयस्वन्तो वयस्कृतꣳ सहस्वन्तꣳ सहस्कृतम् । अग्ने सपत्नदम्भनमदब्धासोऽअदाभ्यम् । चित्रावसो स्वस्ति ते पारमशीय ॥१८॥

सन्त्वमग्ने सूर्य्यस्य वर्च्चसागथाः समृषीणाꣳ स्तुतेन । सम्प्रियेण धाम्ना समहमायुषा सँव्वर्च्चसा सम्प्रजया सꣳ रायस्प्पोषेण ग्ग्मिषीय ॥१९॥

अन्ध स्त्थान्धो वो भक्षीय मह स्त्थ महो वो भक्षीयोर्ज्ज स्त्थोर्ज्जँव्वो भक्षीय रायस्प्पोष स्त्थ रायस्प्पोषँव्वो भक्षीय ॥२०॥

रेवती रमध्वमस्मिन्योनावस्मिन्गोष्ठेस्मिँल्लोकेस्मिन्क्षये ।
इहैव स्त्त मापगात ॥२१॥

सꣳहितासि विश्श्वरूप्प्यूर्ज्जा माविश गौपत्त्येन । उप त्वाग्ने दिवेदिवे दोषावस्त्तर्द्धिया वयम् । नमो भरन्तऽएमसि ॥२२॥

राजन्तमध्वराणाङ्गोपामृतस्य दीदिविम् । वर्द्धमानꣳ स्वे दमे ॥२३॥

स नः पितेव सूनवेग्ने सूपायनो भव । सचस्वा नः स्वस्तये ॥२४॥

अग्ने त्वन्नोऽअन्तमऽउत त्राता शिवो भवा वरूथ्यः ।
वसुरग्निर्व्वसुश्श्रवाऽअच्छा नक्षि द्युमत्तमꣳ रयिन्दाः ॥२५॥

तन्त्वा शोचिष्ठ दीदिवः सुम्नाय नूनमीमहे सखिभ्यः ।
स नो बोधि श्श्रुधी हवमुरुष्या णोऽअघायतः समस्म्मात् ॥२६॥

इडऽएह्यदितऽएहि काम्म्याऽएत । मयि वः कामधरणम्भूयात् ॥२७॥

सोमानꣳ स्वरणङ्कृणुहि ब्रह्मणस्प्पते । कक्षीवन्तँय्यऽऔशिजः ॥२८॥

यो रेवान्योऽअमीवहा वसुवित्पुष्टिवर्द्धनः ।
स नः सिषक्तु यस्तुरः ॥२९॥

मा नः शꣳसोऽअररुषो धूर्त्तिः प्प्रणङ्मर्त्त्यस्य । रक्षा णो ब्रह्मणस्प्पते ॥३०॥

महि त्रीणामवोस्तु द्युक्षम्मित्रस्यार्य्यम्णः । दुराधर्षँव्वरुणस्य ॥३१॥

नहि तेषाममा चन नाध्वसु वारणेषु । ईशे रिपुरघशꣳसः ॥३२॥

ते हि पुत्रासोऽअदितेः प्प्रजीवसे मर्त्त्याय । ज्योतिर्य्यच्छन्त्यजस्रम् ॥३३॥

कु॒दा॒च॒न स्त्त॒रीर॑सि॒ नेन्द्र॑ सश्च॒सि दा॒शुषे॑ ।
उपो॒पेन्नु॒ म॑घव॒न्भूय॒ऽइन्नु॒ ते॒ दान॑न्दे॒वस्य॑ पृच्यते ॥३४॥
तत्स॑वि॒तुर्वरे॑ण्यम्भर्गो॑ दे॒वस्य॑ धीमहि । धियो॒ यो नः॑ प्रचो॒दया॑त् ॥३५॥
परि॑ ते दू॒डभो॒ रथो॒स्माँ२॥ऽअ॑श्नोतु वि॒श्वत॑ः । येन॒ रक्ष॑सि दा॒शुष॑ः ॥३६॥
॥५॥ भूर्भुव॒ः स्व॒ः सुप्र॒जाः प्र॒जाभि॑ः स्याꣳ सु॒वीरो॑ वी॒रैः सु॒पोष॒ः पोषै॑ः ।
नर्य॑ प्र॒जाम्मे॑ पाहि॒ शꣳस्य॑ प॒शून्मे॑ पा॒ह्यथ॑र्य पि॒तुम्मे॑ पाहि ॥३७॥
आग॑न्म वि॒श्ववे॑दसम॒स्मभ्यं॑ वसु॒वित्त॑मम् ।
अग्ने॑ सम्राड॒भि द्यु॒म्नम॒भि सह॒ऽआय॑च्छस्व ॥३८॥
अ॒यम॒ग्निर्गृ॒हप॑ति॒र्गार्ह॑पत्यः प्र॒जाया॑ वसु॒वित्त॑मः ।
अग्ने॑ गृहपते॒भि द्यु॒म्नम॒भि सह॒ऽआय॑च्छस्व ॥३९॥
अ॒यम॒ग्निः पु॑री॒ष्यो॑ रयि॒मान्पु॒ष्टिव॑र्द्धनः ।
अग्ने॑ पुरीष्या॒भि द्यु॒म्नम॒भि सह॒ऽआय॑च्छस्व ॥४०॥
॥६॥ गृ॒हा मा बि॑भीत॒ मा वे॑पध्व॒मूर्ज॒म्बिभ्र॑त॒ऽएम॑सि । ऊर्ज॒म्बिभ्र॑द्वः सु॒मना॑ः सु॒मेधा
गृ॒हानै॑मि॒ मन॑सा॒ मोद॑मानः ॥४१॥
येषा॑म॒ध्येति॑ प्र॒वस॒न्येषु॑ सौमन॒सो ब॒हुः ।
गृ॒हानुप॑ह्वयामहे॒ ते नो॑ जानन्तु जान॒तः ॥४२॥
उप॑हूता॒ऽइ॒ह गाव॒ऽउप॑हूताऽअ॒जाव॑य॑ः । अथो॒ऽअन्न॑स्य की॒लाल॒ऽउप॑हूतो गृ॒हेषु॑ नः ।
क्षेमा॑य वः॒ शान्त्यै॒ प्रप॑द्ये शि॒वꣳ श॒ग्मꣳ शँ॒य्योः शँ॒य्योः ॥४३॥
॥७॥ प्र॒घा॒सिनो॑ हवामहे म॒रुत॑श्च रि॒शाद॑सः । क॒र॒म्भेण॑ स॒जोष॑सः ॥४४॥
॥ यद्ग्रामे॒ यदर॑ण्ये॒ यत्स॒भायाँ॒ यदि॑न्द्रि॒ये ।
यदेन॑श्चकृ॒मा व॒यमि॒दन्तदव॑यजामहे॒ स्वाहा॑ ॥४५॥
मो षू ण॑ऽइ॒न्द्रात्र॑ पृ॒त्सु दे॒वैरस्ति॒ हि ष्मा॑ ते शुष्मिन्नव॒याः ।
म॒हश्चि॒द्यस्य॑ मी॒ढुषो॑ य॒व्या ह॒विष्म॑तो म॒रुतो॒ वन्द॑ते॒ गीः ॥४६॥
अक्र॒न्कर्म॑ कर्म॒कृत॑ः स॒ह वा॒चा म॑यो॒भुवा॑ ।
दे॒वेभ्य॒ः कर्म॑ कृ॒त्वास्त॒म्प्रेत॑ सचाभुवः ॥४७॥
अव॑भृथ निचुम्पुण निचे॒रुर॑सि निचु॒म्पुणः । अव॑ दे॒वैर्दे॒वकृ॑त॒मेनो॑यासिष॒मव॒ मर्त्यै॒-
र्मर्त्य॑कृतम्पुरु॒राव्णो॑ देव रि॒षस्पा॑हि ॥४८॥
॥८॥ पू॒र्णा द॑र्वि॒ परा॑पत॒ सुपू॑र्णा॒ पुन॒राप॑त । व॒स्नेव॒ विक्री॑णावहा॒ऽइष॒मूर्जꣳ॑ शतक्रतो ॥४९॥

देहि मे ददामि ते नि मे धेहि नि ते दधे ।
निहारञ्च हरासि मे निहारन्निहराणि ते स्वाहा ॥५०॥

९॥ अक्क्षन्नमीमदन्त ह्यव प्प्रियाऽअधूषत । अस्त्तोषत स्वभानवो व्विप्प्रा नविष्ठया
मती योजा न्विन्द्र ते हरी ॥५१॥
सुसन्दृशन्त्वा व्वयम्मघवन्वन्दिषीमहि । प्र नूनम्पूर्ण्णवन्धुर स्त्तुतो यासि व्वशाँ२॥ऽअनु
योजा न्विन्द्र ते हरी ॥५२॥
मनो न्वाह्वामहे नाराशꣳसेन स्तोमेन । पितॄणाञ्च मन्मभिः ॥५३॥
आ नऽएतु मनः पुनः क्क्रत्त्वे दक्क्षाय जीवसे ।
ज्योक्च सूर्य्यन्दृशे ॥५४॥
पुनर्न्नः पितरो मनो ददातु दैव्यो जनः । जीवँव्व्रातꣳ सचेमहि ॥५५॥
व्वयꣳ सोम व्व्रते तव मनस्त्तनूषु बिब्भ्रतः । प्रजावन्तः सचेमहि ॥५६॥

१०॥ एष ते रुद्र भागः सह स्वस्राम्बिकया तञ्जुषस्व
स्वाहैष ते रुद्र भागऽआखुस्ते पशुः ॥५७॥
अव रुद्रमदीमह्यव देवन्त्र्यम्बकम् । यथा नो व्वस्यसस्करद्यथा नः श्रेयसस्करद्यथा
नो व्व्यवसाययात् ॥५८॥
भेषजमसि भेषजङ्गवेश्श्वाय पुरुषाय भेषजम् । सुखम्मेषाय मेष्यै ॥५९॥
त्र्यम्बकँय्यजामहे सुगन्धिम्पुष्टिवर्द्धनम् ।
उर्व्वारुकमिव बन्धनान्मृत्त्योर्म्मुक्क्षीय मामृतात् ।
त्र्यम्बकँय्यजामहे सुगन्धिम्पतिवेदनम् ।
उर्व्वारुकमिव बन्धनादितो मुक्क्षीय मामुतः ॥६०॥
एतत्ते रुद्रावसन्तेन परो मूजवतोतीहि । अवततधन्वा पिनाकावसः कृत्तिवासा
ऽअहिꣳसन्नः शिवोतीहि ॥६१॥
त्र्यायुषञ्जमदग्नेः कश्श्यपस्य त्र्यायुषम् ।
यद्देवेषु त्र्यायुषन्तन्नोऽअस्तु त्र्यायुषम् ॥६२॥
शिवो नामासि स्वधितिस्ते पिता नमस्तेऽअस्तु मा मा हिꣳसीः । निवर्त्तयाम्म्यायुषेन्नाद्याय प्प्रजननाय रायस्प्पोषाय सुप्प्रजास्त्वाय सुवीर्य्याय ॥६३॥

॥ इति तृतीयोऽध्यायः ॥

अथ चतुर्थोऽध्यायः

ऋषिः(१) 'एदमगन्म' इत्यारभ्य (३७) 'या ते' इत्यन्तानां सामान्यतः प्रजापतिर्ऋषिः। विशेषतश्च—(८) 'विश्वो देवस्य' इत्यस्य स्वस्त्यात्रेयः, (१०) 'ऊर्गस्याङ्गिः' इत्यस्याङ्गिरसः, (१६) 'त्वमग्ने' इत्यस्य वत्सः, (३५) 'नमो मित्रस्य' इत्यस्याभितपनः सूर्यः, (३७) 'या ते' इत्यस्य गोतमः।

देवता(१) 'एदमगन्म' 'ऋक्सामाभ्याम्' इत्यनयोर्देवयजनम्, 'इमा आपः' इत्यस्यापः, 'ओषधे त्रायस्व' इत्यस्य कुशतरुणम्, 'स्वधिते मैनम्' इत्यस्य क्षुरः।

(२) 'आपो अस्मान्' 'उदिदाभ्यः' इत्यनयोरापः, 'दीक्षातपसोः' इत्यस्य वासः।

(३) 'महीनां पयः' इत्यस्य नवनीतम्, 'वृत्रस्यासि' इत्यस्याञ्जनम्।

(४) 'चित्पतिर्मा' 'वाक्पतिर्मा' इत्यनयोः प्रजापतिः, 'देवो मा' इत्यस्य सविता।

(५) 'आ वः' इत्यस्य देवाः।

(६) 'स्वाहा यज्ञम्' 'स्वाहोरोरन्तरिक्षात्' 'स्वाहा द्यावापृथिवीभ्याम्' 'स्वाहा वातात्' इत्येषां यज्ञः।

(७) 'आकूत्यै प्रयुजे' 'मेधायै मनसे' 'दीक्षायै तपसे' 'सरस्वत्यै पूष्णे' इत्येषामग्निः, 'आपो देवीः' इत्यस्य लिङ्गोक्ता।

(८) 'विश्वो देवस्य' इत्यस्य सविता।

(९) 'ऋक्सामयोः' इत्यस्य कृष्णाजिने, 'शर्मासि' इत्यस्य कृष्णाजिनम्।

(१०) 'ऊर्गस्याङ्गिः' इत्यस्य मेखला, 'सोमस्य नीविः' इत्यस्य नीविः, 'विष्णोः शर्मासि' इत्यस्य वासः, 'इन्द्रस्य योनिः' 'सुसस्याः' इत्यनयोः कृष्णविषाणा, 'उच्छ्रयस्व' इत्यस्य दण्डः।

(११) 'व्रतङ्कृणुत' इत्यस्य यज्ञः, 'दैवीन्धियम्' इत्यस्य धीः, 'ये देवा' इत्यस्याध्यात्मं वाक् प्राणोदानौ चक्षुः श्रोत्रम्, अधिदैवतश्चाग्निर्मित्रावरुणावादित्यो विश्वे देवाः।

(१२) 'श्वात्राः पीताः' इत्यस्यापः।

(१३) 'इयन्ते' 'पृथिव्याः' इत्यनयोर्लोष्टम्, 'अपो मुञ्चामि' [illegible]यस्य मूत्रम्।

(१४) 'अग्ने त्वम्' (१५) 'पुनर्मनः' (१६) 'त्वमग्ने' इत्येषामग्निः, 'रास्वेयत्' इत्यस्य सोमः।

(१७) 'एषा ते' इत्यस्य हिरण्यमाज्यञ्च, 'जूरसि' इत्यस्य वाक्, (१८) 'शुक्रमसि' इत्यस्य हिरण्यम्।

(१९) 'चिदसि' (२०) 'अनु त्वा' (२१) 'वस्व्यस्यदितिः' इत्येषां सोमक्रयणी गौर्वाग्रूपा।

(२२) 'अदित्यास्त्वा' इत्यस्याज्यम्, 'अस्मे रमस्व' 'अस्मे ते' 'त्वे रायः' 'मे रायः' 'मा वयम्' 'तोतो रायः' इत्येषां लिङ्गोक्ताः।

(२३) 'समख्ये देव्या' इत्यस्य पत्न्याशीः।

(२४) 'एष ते' इत्यस्य लिङ्गोक्ता, 'आस्माकोसि' इत्यस्य सोमः।

(२५) 'अभि त्यम्' इत्यस्य सविता, 'प्रजाभ्यस्त्वा' 'प्रजास्त्वा' (२६) 'शुक्रन्त्वा' इत्येषां सोमः, 'सग्मे ते' 'अस्मे ते' इत्यनयोर्लिङ्गोक्ता, 'तपसस्तनूः' इत्यस्य अजा, 'परमेण पशुना' (२७) 'मित्रो नः' 'इन्द्रस्योरुम्' इत्येषां सोमः, 'स्वान भ्राजाङ्घारे' इत्यस्य धिष्ण्यनामानि।

(२८) 'परि माग्ने' इत्यस्याग्निः।

(२९) 'प्रति पन्थाम्' इत्यस्य पन्थाः।

(३०) 'आदित्यास्त्वक्' इत्यस्य कृष्णाजिनम्, 'अदित्यै सदः' इत्यस्य सोमः, 'अस्तभ्नाद्द्याम्' (३१) 'वनेषु व्यन्तरिक्षम्' इत्यनयोर्वरुणः।

(३२) 'सूर्यस्य चक्षुः' इत्यस्य कृष्णाजिनम्।

(३३) 'उस्रावेतम्' इत्यस्यानड्वाहौ।

(३४) 'भद्रो मेसि' इत्यस्य सोमः।

(३५) 'नमो मित्रस्य' इत्यस्य सूर्यः।

(३६) 'वरुणस्योत्तम्भनमसि' 'वरुणस्य स्कम्भसर्जनी स्थः' 'वरुणस्य ऋतसदन्यसि' 'वरुणस्य ऋतसदनमसि' 'वरुणस्य ऋतसदनमासीद' इत्येषां वरुणः।

(३७) 'या ते' इत्यस्य सोमः॥

छन्दः(१) 'एदमगन्म' (२) 'आपोस्माकम्' इत्यनयोरत्यष्टिः. (५) 'आ वः' इत्यस्य दैव्यनुष्टुप्. (७) 'आपो देवीः' इत्यस्य विराट्. (८) 'विश्वो देवस्य' इत्यस्यानुष्टुप्. (१२) 'श्वात्राः पीताः' इत्यस्य जगती, (१४) 'अग्ने त्वम्' इत्यस्यानुष्टुप्. (१६) 'त्वमग्ने' इत्यस्य गायत्री. (२१) 'वस्व्यस्यदितिः' इत्यस्यानुष्टुब् बृहती वा. (२३) 'समख्ये देव्या' इत्यस्यास्तारपङ्क्तिः. (२५) 'अभि त्यम्' इत्यस्याष्टिः. (२८) 'परि माग्ने' इत्यस्य पुरस्ताद्बृहती, (२९) 'प्रति पन्थाम्' इत्यस्यानुष्टुप्, (३०) '[illegible]द्याम्', (३१) 'वनेषु व्यन्तरिक्षम्' इत्यनयोस्त्रिष्टुप्. (३२) 'सूर्यस्य चक्षुः' इत्यस्यानुष्टुप्. (३३) '[illegible]वेतम्' इत्यस्योर्ध्वबृहती, (३५) 'नमो मित्रस्य' इत्यस्य जगती, (३७) 'या ते' इत्यस्य त्रिष्टुप्॥

॥ हरिःॐ ॥

॥१॥ ए॒दम॑गन्म देव॒यज॑नम्पृथि॒व्या यत्र॑ दे॒वासो॒ऽअजु॑षन्त॒ व्विश्वे॑। ऋ॒क्सा॒मा॒भ्या॑ꣳ
स॒न्तर॑न्तो॒ यजु॑र्ब्भी रा॒यस्प्पोषे॑ण स॒मिषा॑ म॑देम। इ॒माऽआप॒ः शमु॑ मे सन्तु दे॒वीरोष॑धे॒
त्राय॑स्व॒ स्वधि॑ते॒ मैन॑ꣳ हिꣳसीः ॥१॥
आपो॑ऽअ॒स्मान्मा॒तर॑÷ शुन्धयन्तु घृ॒तेन॑ नो घृत॒प्प्व॒÷ पुनन्तु। व्विश्व॒ꣳ हि रि॒प्प्रम्प्रवह॑न्ति
दे॒वीरु॒दिदा॑भ्य॒ः शुचि॒रा पू॒तऽए॑मि। दी॒क्षा॒तप॒सोस्त॒नूर॑सि॒ तान्त्वा॑
शि॒वाꣳ श॒ग्ग्माम्परि॑दधे भ॒द्रँव्वर्ण्ण॒म्पुष्य॑न् ॥२॥
॥२॥ म॒हीना॒म्पयो॑सि व्वर्च्चो॒दाऽअ॑सि॒ व्वर्च्चो॑ मे देहि।
वृ॒त्रस्या॑सि क॒नीन॑कश्चक्षु॒र्द्दाऽअ॑सि॒ चक्षु॑र्म्मे देहि ॥३॥
चि॒त्पति॑र्म्मा पुनातु व्वा॒क्पति॑र्म्मा पुनातु दे॒वो मा॑ सवि॒ता पु॑ना॒त्त्वच्छि॑द्रेण प॒वित्रे॑ण॒
सूर्य्य॑स्य र॒श्म्मिभि॑÷। तस्य॑ ते पवित्रपते प॒वित्र॑पूतस्य॒ यत्का॑मः पु॒ने तच्छ॑केयम् ॥४॥
आ वो॑ देवासऽईमहे व्वा॒मम्प्रय॒॑त्यध्व॒रे।
आ वो॑ देवासऽआ॒शिषो॑ य॒ज्ञिया॑सो हवामहे ॥५॥
स्वाहा॑ य॒ज्ञम्मन॑स॒ः स्वाहो॒रोर॒न्तरि॑क्षा॒त्स्वाहा॒ द्यावा॑पृथि॒वीभ्या॒ꣳ स्वाहा॒ व्वाता॒दार॑भे॒ स्वाहा॑ ॥६॥
॥३॥ आकू॑त्त्यै प्प्र॒युजे॒ग्नये॒ स्वाहा॑ मे॒धायै॒ मन॑से॒ग्नये॒ स्वाहा॑ दी॒क्षायै॒ तप॑से॒ग्नये॒ स्वाहा॒
सर॑स्वत्त्यै पू॒ष्ण्णे॒ग्नये॒ स्वाहा॑। आपो॑ देवीर्ब्बृहतीर्व्विश्वशम्भुवो॒ द्यावा॑पृथिवी॒ऽउरो॑
ऽअन्तरिक्ष। बृह॒स्प्पत॑ये ह॒विषा॑ व्विधेम॒ स्वाहा॑ ॥७॥
व्विश्वो॑ दे॒वस्य॑ ने॒तुर्म्मर्त्तो॑ व्वुरीत स॒ख्यम्। व्विश्वो॑ रा॒यऽइ॑षुध्यति द्यु॒म्नँव्वृ॑णीत
पु॒ष्यसे॒ स्वाहा॑ ॥८॥

॥४॥ ऋक्क्सामयोः शिल्पे स्थस्ते वामारभे ते मा पातमास्य यज्ञस्योदृचः ।
शर्म्मासि शर्म्म मे यच्छ नमस्तेऽअस्तु मा मा हिꣳसीः ॥९॥
ऊर्ग्गस्याङ्गिरस्यूर्ण्णम्म्रदाऽऊर्ज्जम्मयि धेहि । सोमस्य नीविरसि व्विष्ण्णोः शर्म्मा
शर्म्म यजमानस्येन्द्रस्य योनिरसि सुसस्याः कृषीस्कृधि । उच्छ्रयस्व व्वनस
ऽऊर्द्ध्वो मा पाह्यꣳहसऽआस्य यज्ञस्योदृचः ॥१०॥

॥५॥ व्रतङ्कृणुत व्रतङ्कृणुताग्निर्ब्रह्माग्निर्यज्ञो व्वनस्पतिर्यज्ञियः । दैवीन्धियम्मना
सुमृडीकामभिष्टये व्वर्चोधाँय्यज्ञवाहसꣳ सुतीर्त्था नोऽअसद्वशे । ये देवा मनोज
मनोयुजो दक्षक्रतवस्ते नोवन्तु ते नः पान्तु तेब्भ्यः स्वाहा ॥११॥
श्वात्राः पीता भवत यूयमापोऽअस्म्माकमन्तरुदरे सुशेवाः ।
ताऽअस्म्मब्भ्यमयक्ष्माऽअनमीवाऽअनागसः स्वदन्तु देवीरमृताऽऋतावृधः ॥१
इयन्ते यज्ञिया तनूरपो मुञ्चामि न प्प्रजाम् ।
अꣳहोमुचः स्वाहाकृताः पृथिवीमाविशत पृथिव्व्या सम्भव ॥१३॥
अग्ने त्वꣳ सुजागृहि व्वयꣳ सुमन्दिषीमहि ।
रक्षा णोऽअप्प्रयुच्छन्प्प्रबुधे नः पुनस्कृधि ॥१४॥
पुनर्म्मनः पुनरायुर्म्मऽआगन्पुनः प्प्राणः पुनरात्त्मा मऽआगन्पुनश्चक
पुनः श्रोत्रम्मऽआगन् । व्वैश्वानरोऽअदब्धस्तनूपाऽअग्निर्न्नः पातु दुरिताद
द्यात् ॥१५॥
त्वमग्ने व्रतपाऽअसि देवऽआ मर्त्त्येष्ष्वा । त्वँय्यज्ञेष्ष्वीड्यः । रास्वेयत्सोमा भू
भर देवो नः सविता व्वसोर्दाता व्वस्वदात् ॥१६॥

॥६॥ एषा ते शुक्र तनूरेतद्वर्च्चस्तया सम्भव ब्भ्राजङ्गच्छ ।
जूरसि धृता मनसा जुष्ट्टा व्विष्ण्णवे ॥१७॥
तस्यास्ते सत्यसवसः प्प्रसवे तन्न्वो यन्त्रमशीय स्वाहा ।
शुक्रमसि चन्द्रमस्यमृतमसि व्वैश्वदेवमसि ॥१८॥
चिदसि मनासि धीरसि दक्षिणासि क्षत्रियासि यज्ञियास्यदितिरस्युभयत
शीर्ष्ण्णी । सा नः सुप्प्राची सुप्प्रतीच्येधि मित्रस्त्वा पदि बध्नीताम्पूषाद्ध्वनस्प्पात्त्विन्द्रा
याद्ध्यक्षाय ॥१९॥
अनु त्वा माता मन्न्यतामनु पितानु ब्भ्राता सगब्भ्र्योनु सखा सयूथ्थ्यः ।
सा देवि देवमच्छेहीन्द्राय सोमꣳ रुद्रस्त्वावर्त्तयतु स्वस्ति सोमसखा पुनरेहि ॥२०

॥७॥ व॒स्व्य॒स्यदि॑तिरस्यादि॒त्त्यासि॑ रु॒द्रासि॑ च॒न्द्रासि॑ ।
बृह॒स्प्पति॑ष्ट्वा सु॒म्म्ने र॑म्म्णातु रु॒द्रो वसु॑भि॒राच॑के ॥२१॥
अदि॑त्त्यास्त्वा मू॒र्द्धन्नाजि॑घर्म्मि देव॒यज॑ने पृथि॒व्व्याऽइडा॑यास्प्प॒दम॑सि घृ॒तव॒त्स्वाहा॑ ।
अ॒स्म्मे र॑मस्वा॒स्म्मे ते॒ बन्धु॒स्त्त्वे रायो॒ मे रायो॒ मा व॒यꣳ रा॒यस्प्पोषे॑ण॒ वियौ॑ष्म्म॒ तोतो॒ राय॑ः ॥२२॥
सम॑क्ख्ये दे॒व्व्या धि॒या सन्दक्षि॑णयो॒रुच॑क्षसा ।
मा म॒ऽआयु॑ः प्प्रमो॑षी॒र्म्मोऽअ॒हन्तव॑ वी॒रँविदे॑य॒ तव॑ देवि स॒न्दृशि॑ ॥२३॥
॥८॥ ए॒ष ते॑ गाय॒त्रो भा॒गऽइति॑ मे॒ सोमा॑य ब्रूतादे॒ष ते॒ त्रैष्टु॑भो भा॒गऽइति॑ मे॒ सोमा॑य ब्रूतादे॒ष ते॒ जाग॑तो भा॒गऽइति॑ मे॒ सोमा॑य ब्रूताच्छन्दोना॒माना॒ꣳ साम्म्रा॑ज्ज्यङ्ग॒च्छेति॑ मे॒ सोमा॑य ब्रूतादास्म्मा॒कोसि शु॒क्क्रस्ते॒ ग्ग्रह्ह्यो॑ वि॒चित॑स्त्वा॒ वि चि॑न्न्वन्तु ॥२४॥
अ॒भि त्त्यन्दे॒वꣳ स॑वि॒तार॑मो॒ण्ण्योः॑ क॒विक्क्र॑तु॒मर्च्चा॑मि स॒त्त्यस॑वꣳ रत्न॒धाम॒भि प्प्रि॒यम्म॒तिङ्क॒विम् । ऊ॒र्द्ध्वा यस्या॒मति॒र्ब्भाऽअदि॑द्द्युत॒त्सवी॑मनि॒ हिर॑ण्ण्यपाणिरमिमीत सु॒क्क्रतु॑ः कृ॒पा स्व॑ः । प्र॒जाब्भ्य॑स्त्वा प्प्र॒जास्त्वा॑नु॒प्प्राण॑न्तु प्प्र॒जास्त्वम॑नु॒प्प्राणि॑हि ॥२५॥
॥९॥ शु॒क्क्रन्त्वा॑ शु॒क्क्रेण॑ क्क्रीणामि च॒न्द्रञ्च॒न्द्रेणा॒मृत॑म॒मृते॑न । स॒ग्ग्मे ते॒ गोर॒स्म्मे ते॑ च॒न्द्राणि॒ तप॑सस्त॒नूर॑सि प्प्र॒जाप॑ते॒र्व्वर्ण्ण॑ः पर॒मेण॑ प॒शुना॑ क्क्रीयसे सहस्रपो॒षम्पु॑षेयम् ॥२६॥
मि॒त्रो न॒ऽएहि॒ सुमि॑त्त्रध॒ऽइन्द्र॑स्योरु॒मावि॑श॒ दक्षि॑णमु॒शन्नु॒शन्त॑ꣳ स्यो॒नः स्यो॒नम् । स्वान॒ ब्भ्राजाङ्घा॑रे॒ बम्भा॑रे॒ हस्त॒ सुह॑स्त॒ कृशा॑नवे॒ते व॑ः सोम॒क्क्रय॑णा॒स्तान्न्र॑क्षद्ध्व॒म्मा वो॑ दभन् ॥२७॥

परि॑ माग्ने॒ दुश्च॑रिताद्बाध॒स्वा मा॒ सुच॑रिते भज ।
उदायु॑षा स्वा॒युषोद॑स्थाम॒मृताँ२॥ऽअनु॑ ॥२८॥
प्रति॒ पन्था॑मपद्महि स्वस्ति॒गाम॑ने॒हस॑म् ।
येन॒ विश्श्वा॒ः परि॒ द्विषो॑ वृ॒णक्ति॑ वि॒न्दते॒ वसु॑ ॥२९॥

॥१०॥ अदि॑त्त्यास्त्वग॒स्यदि॑त्त्यै॒ सद॒ऽआसी॑द । अस्त्त॑भ्नाद्द्यां॑वृष॒भोऽअ॒न्तरि॑क्ष॒ममि॑मीत वरि॒माण॑म्पृथि॒व्व्याः । आसी॑द॒द्विश्श्वा॒ भुव॑नानि स॒म्म्राड्विश्श्वेत्तानि॒ वरु॑णस्य व्र॒तानि॑ ॥३०॥
वने॑षु॒ व्व्य॒न्तरि॑क्षन्ततान॒ वाज॒मर्व्व॑त्सु॒ पय॑ऽउ॒स्रिया॑सु ।
हृ॒त्सु क्क्रतुँ॑वरु॑णो वि॒क्ष्व॒ग्निन्दि॒वि सूर्य्य॑मदधा॒त्सोम॒मद्रौ॑ ॥३१॥
सूर्य्य॑स्य॒ चक्षु॒रारो॑हा॒ग्नेर॒क्ष्ण॑ः क॒नीन॑कम् ।
यत्रैत॑शेभि॒रीय॑से॒ ब्भ्राज॑मानो विप॒श्चिता॑ ॥३२॥

उस्रावेतन्धूर्षाहौ युज्येथामनश्श्रूऽअवीरहणौ ब्रह्मचोदनौ ।
स्वस्ति यजमानस्य गृहान्गच्छतम् ॥३३॥

भद्रो मेसि प्प्रच्यवस्व भुवस्प्पते विश्श्वान्यभि धामानि । मा त्वा परिपरिणो विदन्मा
त्वा परिपन्थिनो विदन्मा त्वा वृकाऽअघायवो विदन् । श्येनो भूत्वा परापत यजमानस्य गृहान्गच्छ तन्नौ सँस्कृतम् ॥३४॥

नमो मित्रस्य वरुणस्य चक्षसे महो देवाय तदृतꣳ सपर्य्यत ।
दूरेदृशे देवजाताय केतवे दिवस्प्पुत्राय सूर्य्याय शꣳसत ॥३५॥

वरुणस्योत्तम्भनमसि वरुणस्य स्क्कम्भसर्जनी स्त्थो वरुणस्यऽऋतसदन्यसि वरुणस्य
ऽऋतसदनमसि वरुणस्यऽऋतसदनमासीद ॥३६॥

या ते धामानि हविषा यजन्ति ता ते विश्श्वा परिभूरस्तु यज्ञम् ।
गयस्प्फानः प्प्रतरणः सुवीरोवीरहा प्प्रचरा सोम दुर्य्यान् ॥३७॥

॥ इति चतुर्थोऽध्यायः ॥

अथ पञ्चमोऽध्यायः

ऋषिः (१) 'अग्नेस्तनूः' इत्यारभ्य (४३) 'अतस्त्वम्' इत्यन्तानां सामान्यतः प्रजापतिर्ऋषिः । विशेषतश्च—(१४) 'युञ्जते मनः' इत्यस्य श्यावाश्वः, (१५) 'इदं विष्णुः' इत्यस्य मेधातिथिः, (१६) 'इरावती' इत्यस्य वसिष्ठः, (१८) 'विष्णोर्नुकम्' (२०) 'प्र तद्विष्णुः' इत्यनयोरौतथ्यो दीर्घतमाः, (२९) 'परि त्वा' इत्यस्य मधुच्छन्दाः, (३५) 'त्वꣳ सोम' इत्यस्य भार्गवः कृतुः, (३६) 'अग्ने नय' इत्यस्यागस्त्यः ॥

देवता (१) 'अग्नेस्तनूः' 'सोमस्य तनूः' 'अतिथेरातिथ्यम्' 'श्येनाय त्वा' 'अग्नये त्वा' इत्येषां विष्णुः ।

(२) 'अग्नेर्जनित्रम्' इत्यस्य शकलम्, 'वृषणौ स्थः' इत्यस्य दर्भतरुणके, 'उर्वश्यसि' 'आयुरसि' 'पुरूरवा असि' इत्येषां लिङ्गोक्ताः, 'गायत्रेण त्वा' 'त्रैष्टुभेन त्वा' 'जागतेन त्वा' इत्येषामग्निः ।

(३) 'भवतन्नः' (४) 'अग्नावग्निः' इत्यनयोर्निर्मथ्याहवनीयावग्नी ।

(५) 'आपतये त्वा' इत्यस्य वायुः, 'अनाधृष्टमसि' इत्यस्याज्यम् ।

(६) 'अग्ने व्रतपाः' इत्यस्याग्निः ।

(७) 'अꣳशुरꣳशुष्टे' इत्यस्य सोमः, 'एष्टा रायः' इत्यस्य लिङ्गोक्ता ।

(८) 'या ते अग्नेयःशया' 'या ते अग्ने रजःशया' 'या ते अग्ने हरिशया' इत्येषामग्निः ।

(९) 'तप्तायनी मेसि' 'वित्तायनी मेसि' 'अवतान्मा नाथितान्' 'अवतान्मा व्यथितान्' इत्येषां पृथिवी, 'विदेदग्निः' इत्यादित्रयाणामग्निः, 'अग्ने अङ्गिरः' इत्यादित्रयाणाम्, 'योस्याम्' 'यो द्वितीयस्याम्' 'यस्तृतीयस्याम्' 'अनु त्वा' इत्येषाञ्च लिङ्गोक्ताः ।

(१०) 'सिꣳह्यसि० कल्पस्व' 'सिꣳह्यसि० शुन्धस्व' 'सिꣳह्यसि० शुम्भस्व' इत्येषां वेदिः ।

(११) 'इन्द्रघोषस्त्वा' 'प्रचेतास्त्वा' 'मनोजवास्त्वा' 'विश्वकर्मा त्वा' इत्येषामुत्तरवेदिः, 'इदमहम्' इत्यस्यापः ।

(१२) 'सिꣳह्यसि स्वाहा' 'सिꣳह्यस्यादित्यवनिः' 'सिꣳह्यसि ब्रह्मवनिः' 'सिꣳह्यसि सुप्रजावनिः' 'सिꣳह्यस्या वह' इत्येषां वाक्, 'भूतेभ्यस्त्वा' इत्यस्य स्रुक् ।

(१३) 'ध्रुवोसि' 'ध्रुवक्षिदसि' 'अच्युतक्षिदसि' इत्यषां परिधयः, 'अग्नेः पुरीषम्' इत्यस्य गुग्गुल्वादयः सम्भाराः ।

(१४) 'युञ्जते मनः' इत्यस्य सविता ।

(१५) 'इदं विष्णुः' (१६) 'इरावती' इत्यनयोर्विष्णुः ।

(१७) 'देवश्रुतौ देवेषु' इत्यस्याक्षधुरौ, 'प्राची प्रेतम्' 'स्वङ्गोष्ठम्' 'अत्र रमेथाम्' इत्येषां हविर्धाने ।

(१८) 'विष्णोर्नुकम्' (१९) 'दिवो वा' (२०) 'प्र तद्विष्णुः' (२१) 'विष्णो रराटम्' 'विष्णोः श्नप्त्रे' 'विष्णोः स्यूः' 'विष्णोर्ध्रुवः' 'वैष्णवमसि' इत्येषां विष्णुः ।

(२२) 'देवस्य त्वा' इत्यस्य सविता, 'आददे नार्यसि' इत्यस्याभ्रिः, 'इदमहम्' इत्यस्य रक्षोघ्नम् , 'बृहन्नसि' इत्यस्योपरवाः, (२३) 'इदमहन्तम् इत्यादिचतुर्णाम् 'उत्कृत्याङ्किरामि' इत्यस्य च लिङ्गोक्ताः ।

(२४) 'स्वराडसि' 'सत्रराडसि' 'जनराडसि' 'सर्वराडसि' इत्येषामुपरवाः ।

(२५) 'रक्षोहणो वः' इत्यादित्रयाणाम् , 'रक्षोहणौ वाम्' इत्यादिद्वयोः, 'वैष्णवमसि' 'वैष्णवा स्थ' इत्यनयोश्च विष्णुः ।

(२६) 'देवस्य त्वा' इत्यस्य सविता, 'आददे नार्यसि' इत्यस्याभ्रिः, 'इदमहम्' इत्यस्य रक्षोघ्नम् , 'यवोसि' इत्यस्य यवः, 'दिवे त्वा' 'अन्तरिक्षाय त्वा' 'पृथिव्यै त्वा' इत्येषामौदुम्बरी, 'शुन्धन्ताम्' 'पितृषदनमसि' इत्यनयोः पितरः ।

(२७) 'उद्दिवꣳ स्तभान' 'द्युतानस्त्वा' 'ब्रह्मवनि त्वा' 'ब्रह्म दृꣳह' (२८) 'ध्रुवासि ध्रुवः' इत्येषामौदुम्बरी, 'घृतेन द्यावापृथिवी' इत्यस्य द्यावापृथिव्यौ, 'इन्द्रस्य छदिः' (२९) 'परि त्वा' (३०) 'इन्द्रस्य स्यूः' 'इन्द्रस्य ध्रुवः' 'ऐन्द्रमसि' इत्येषामिन्द्रः, 'वैश्वदेवमसि' इत्यस्य विश्वे देवाः ।

(३१) 'विभूरसि' 'वह्निरसि' 'श्वात्रोसि' 'तुथोसि' (३२) 'उशिगसि' 'अङ्घारिरसि' 'अवस्यूरसि' 'शुन्ध्यूरसि' इत्येषां धिष्ण्या अग्नयः, 'सम्राडसि' इत्यस्याहवनीयः, 'परिषद्योसि' इत्यस्य बहिष्पवमानदेशः, 'नभोसि' इत्यस्य चात्वालः, 'मृष्टोसि' इत्यस्य शामित्रः, 'ऋतधामासि' इत्यस्यौदुम्बरी ।

(३३) 'समुद्रोसि' इत्यस्य ब्रह्मासनम् , 'अजोसि' इत्यस्य शालाद्वार्यः, 'अहिरसि' इत्यस्य प्राजहितः, 'वागसि' इत्यस्य सदः, 'ऋतस्य द्वारौ' इत्यस्य द्वार्ये, 'अध्वनामध्वपते' इत्यस्य सूर्यः ।

(३४) 'मित्रस्य मा' इत्यस्य ऋत्विजः, 'अग्नयः सगराः' इत्यस्य धिष्ण्याः ।

(३५) 'ज्योतिरसि' इत्यस्य विश्वे देवाः, 'त्वꣳ सोम' इत्यस्य सोमः, 'जुषाणो अप्तुः' इत्यस्य अप्तुः ।

(३६) 'अग्ने नय' (३७) 'अयन्नः' इत्यनयोरग्निः ।

(३८) 'उरु विष्णो' इत्यस्य विष्णुः ।

(३९) 'देव सवितः' इत्यस्य सविता, 'एतत्त्वम्' इत्यस्य सोमः, 'स्वाहा निर्वरुणस्य' इत्यस्य लिङ्गोक्ताः ।

(४०) 'अग्ने व्रतपाः' इत्यस्याग्निः ।

(४१) 'उरु विष्णो' इत्यस्य विष्णुः ।

(४२) 'अत्यन्यान्' इत्यस्य वनस्पतिः, 'ओषधे त्रायस्व' इत्यस्य कुशतरुणम्, 'स्वधिते मैनम्' इत्यस्य परशुः ।

(४३) 'द्याम्मा' 'अतस्त्वम्' इत्यनयोर्वनस्पतिः ॥

छन्दः (३) 'भवतन्नः' इत्यस्य पङ्क्तिः; (४) 'अग्नावग्निः' इत्यस्य विराट्, (७) 'अꣳशुरꣳशुष्टे' इत्यस्य प्रकृतिः, (१४) 'युञ्जते मनः' इत्यस्य जगती, (१५) 'इदं विष्णुः' इत्यस्य गायत्री, (१६) 'इरावती' (१८) 'विष्णोर्नुकम्' (१९) 'दिवो वा' [उभयत्र 'विष्णवे त्वा' इति यजुः] (२०) 'प्र तद्विष्णुः' इत्येषां त्रिष्टुप्; (२९) 'परि त्वा' इत्यस्यानुष्टुप्. (३५) 'त्वꣳ सोम' इत्यस्य गायत्री, 'जुषाणो अप्तुः' इत्यस्यैकपदा विराट्, ['स्वाहा' इति यजुः] (३६) 'अग्ने नय' (३७) 'अयन्नः' इत्यनयोस्त्रिष्टुप्. (३८) 'उरु विष्णो' इत्यस्यानुष्टुप्, [उभयत्र 'स्वाहा' इति यजुः] ॥

॥ हरिः ॐ ॥

॥१॥ अ॒ग्नेस्त्त॒नूर॑सि॒ व्विष्ण्ण॑वे त्त्वा॒ सोम॑स्य त॒नूर॑सि॒ व्विष्ण्ण॑वे॒ त्त्वाति॑थेराति॒त्थ्यम॑सि॒ व्विष्ण्ण॑वे
त्त्वा श्श्ये॒नाय॑ त्त्वा सोम॒भृते॒ व्विष्ण्ण॑वे त्त्वा॒ग्नये॑ त्त्वा रायस्प्पोष॒दे व्विष्ण्ण॑वे त्त्वा ॥१॥ ॥४॥
अ॒ग्नेर्ज्ज॒नित्र॑मसि॒ व्वृष॑णौ स्त्थ॒ऽउ॒र्व्वश्श्य॑स्या॒युर॑सि पुरू॒रवा॑ऽअसि । गा॒य॒त्त्रेण॑ त्त्वा॒
च्छन्द॑सा मन्थामि॒ त्त्रैष्टु॑भेन त्त्वा॒ च्छन्द॑सा मन्थामि॒ जाग॑तेन त्त्वा॒ च्छन्द॑सा
मन्थामि ॥२॥
भव॑तन्नः॒ सम॑नसौ॒ सचे॑तसावरे॒पसौ॑ ।
मा य॒ज्ज्ञꣳ हिꣳसिष्ट्ट॒म्मा य॒ज्ज्ञप॑तिञ्जा॒तवे॑दसौ शि॒वौ भ॑वतम॒द्द्य नः॑ ॥३॥
अ॒ग्नाव॒ग्निश्श्च॑रति॒ प्प्रवि॑ष्ट॒ऽऋषी॑णाम्पु॒त्त्रोऽअ॑भिशस्त्ति॒पावा॑ ।
स नः॑ स्यो॒नः सु॒यजा॑ य॒जेह दे॒वेब्भ्यो॑ ह॒व्व्यꣳ सद॒मप्प्र॑युच्छ॒न्त्स्वाहा॑ ॥४॥
॥२॥ आप॑तये त्त्वा॒ परि॑पतये गृह्णामि॒ तनू॒नप्प्त्रे॑ शाक्क्व॒राय॒ शक्क्व॑न॒ऽओजि॑ष्ट्ठाय । अना॑- ॥५॥
धृष्ट्टमस्यनाधृष्ष्यन्दे॒वाना॒मोजोन॑भिशस्त्त्यभिशस्त्ति॒पाऽअ॑नभिशस्त्ते॒न्न्यम॒ञ्जसा॑ स॒त्त्य-
मुप॑गेषꣳ स्वि॒ते मा॑ धाः ॥५॥
अग्ने॑ व्व्रतपास्त्वे व्व्र॑तपा॒ या तव॑ त॒नूरि॒यꣳ सा मयि॒ यो मम॑ त॒नूरे॒षा सा त्त्वयि॑ ।
स॒ह नौ॑ व्व्रतपते व्व्र॒तान्न्यनु॑ मे दी॒क्क्षान्दी॒क्क्षाप॑तिर्म्मन्न्य॑ताम॒नु तप॒स्त्तप॑स्प्पतिः॑ ॥६॥
अ॒ꣳशुर॑ꣳशुष्ट्टे देव सो॒माप्प्या॑यता॒मिन्द्रा॑यैकधन॒विदे॑ । आ तुब्भ्य॒मिन्द्रः॒ प्प्याय॑-
ता॒मा त्त्वमिन्द्रा॑य प्प्यायस्व । आप्प्या॑यया॒स्म्मान्त्सखी॑न्त्स॒न्न्या मे॒धया॑ स्व॒स्ति ते॑ देव
सोम स॒त्त्याम॑शीय । एष्ट्टा रा॒यः प्प्रेषे भगा॑यऽऋ॒तमृ॑तवा॒दिब्भ्यो॒ नमो॒ द्द्यावा॑पृथि॒-
वीब्भ्या॑म् ॥७॥
या ते॑ऽअग्नेयःश॒या त॒नूर्व्वर्षि॑ष्ट्ठा गह्वरे॒ष्ट्ठा । उ॒ग्ग्रँव्वचो॒ऽअपा॑वधीत्त्वे॒षँव्वचो॒ऽअपा॑वधी॒-
त्त्स्वाहा॑ । या ते॑ऽअग्ने रजःश॒या त॒नूर्व्वर्षि॑ष्ट्ठा गह्वरे॒ष्ट्ठा । उ॒ग्ग्रँव्वचो॒ऽअपा॑वधीत्त्वे॒षँ-
व्वचो॒ऽअपा॑वधी॒त्त्स्वाहा॑ । या ते॑ऽअग्ने हरिश॒या त॒नूर्व्वर्षि॑ष्ट्ठा गह्वरे॒ष्ट्ठा । उ॒ग्ग्रँव्वचो॒
ऽअपा॑वधीत्त्वे॒षँव्वचो॒ऽअपा॑वधी॒त्त्स्वाहा॑ ॥८॥
॥३॥ त॒प्प्ताय॑नी मे॑सि व्वि॒त्ताय॑नी मे॒स्यव॑तान्मा नाथि॒ताद॑वतान्मा व्व्यथि॒तात् । व्वि॒देद॒-
ग्निर्न्नभो॒ नामाग्ने॑ऽअङ्गिर॒ऽआयु॑ना॒ नाम्न्नेहि॒ यो॒ऽस्याम्पृ॑थि॒व्व्याम॑सि॒ यत्तेना॑धृष्ट्ट॒न्नाम॑
य॒ज्ज्ञिय॒न्तेन॒ त्त्वा द॑धे व्वि॒देद॒ग्निर्न्नभो॒ नामाग्ने॑ऽअङ्गिर॒ऽआयु॑ना॒ नाम्न्नेहि॒ यो द्वि॒तीय॑-
स्याम्पृथि॒व्व्याम॑सि॒ यत्तेना॑धृष्ट्ट॒न्नाम॑ य॒ज्ज्ञिय॒न्तेन॒ त्त्वाद॑धे व्वि॒देद॒ग्निर्न्नभो॒ नामाग्ने॑ ॥६॥
ऽअङ्गिर॒ऽआयु॑ना॒ नाम्न्नेहि॒ यस्तृ॒तीय॑स्याम्पृथि॒व्व्याम॑सि॒ यत्तेना॑धृष्ट्ट॒न्नाम॑ य॒ज्ज्ञिय॒न्तेन॒
त्त्वा द॑धे । अनु॑ त्त्वा दे॒ववी॑तये ॥९॥

सिꣳह्यसि सपत्नसाही देवेब्भ्यः कल्प्पस्व सिꣳह्यसि सपत्नसाही देवेब्भ्यः
शुन्धस्व सिꣳह्यसि सपत्नसाही देवेब्भ्यः शुम्भस्व ॥१०॥

॥४॥ इन्द्रघोषस्त्त्वा वसुभिः पुरस्त्तात्पातु प्प्रचेतास्त्त्वा रुद्रैः पश्चात्पातु मनोजवास्त्त्वा
पितृभिर्द्दक्क्षिणतः पातु विश्श्वकर्म्मा त्त्वादित्त्यैरुत्तरतः पात्त्विदमहन्तप्तँव्वार्ब्बहिर्द्धा
यज्ज्ञान्निःसृजामि ॥११॥

सिꣳह्यसि स्वाहा सिꣳह्यस्यादित्त्यवनिः स्वाहा सिꣳह्यसि ब्रह्मवनिः क्क्षत्रवनिः स्वाहा सिꣳह्यसि सुप्प्रजावनी रायस्प्पोषवनिः स्वाहा सिꣳह्यस्यावह
देवान्यजमानाय स्वाहा भूतेब्भ्यस्त्त्वा ॥१२॥

ध्रुवोसि पृथिवीन्दृꣳह ध्रुवक्क्षिदस्यन्तरिक्क्षन्दृꣳहाच्युतक्क्षिदसि दिवन्दृꣳहाग्नेः
पुरीषमसि ॥१३॥

॥५॥ युञ्जते मनऽउत युञ्जते धियो विप्प्रा विप्प्रस्य बृहतो विपश्चितः ।
वि होत्रा दधे वयुनाविदेकऽइन्मही देवस्य सवितुः परिष्ष्टुतिः स्वाहा ॥१४॥
इदँव्विष्ण्णुर्व्विचक्क्रमे त्रेधा निदधे पदम् । समूढमस्य पाꣳसुरे स्वाहा ॥१५॥
इरावती धेनुमती हि भूतꣳ सूयवसिनी मनवे दशस्या ।
व्यस्क्कभ्ना रोदसी विष्ण्णवेते दाधर्त्थ पृथिवीमभितो मयूखैः स्वाहा ॥१६॥

देवश्श्रुतौ देवेष्ष्वा घोषतम्प्राची प्प्रेतमद्ध्वरङ्कल्प्पयन्तीऽऊर्द्ध्वँय्यज्ञन्नयतम्मा जिह्वरतम् । स्वङ्गोष्ठमावदतन्देवी दुर्य्येऽआयुर्म्मा निर्व्वादिष्ष्टम्प्रजाम्मा निर्व्वादिष्ष्टमत्र
रमेथाँव्वर्ष्ष्मन्पृथिव्व्याः ॥१७॥

विष्ण्णोर्न्नुकँव्वीर्य्याणि प्प्रवोचँय्यः पार्त्थिवानि विममे रजाꣳसि ।
योऽअस्कभायदुत्तरꣳ सधस्त्थँव्विचक्क्रमाणस्त्रेधोरुगायो विष्ण्णवे त्त्वा ॥१८॥
दिवो वा विष्ण्णऽउत वा पृथिव्व्या महो वा विष्ण्णऽउरोरन्तरिक्क्षात् ।
उभा हि हस्त्ता वसुना पृणस्वा प्प्रयच्छ दक्क्षिणादोत सव्व्याद्विष्ण्णवे त्त्वा ॥१९॥
प्र तद्विष्ण्णु स्तवते वीर्य्येण मृगो न भीमः कुचरो गिरिष्ठाः ।
यस्योरुषु त्रिषु विक्क्रमणेष्ष्वधिक्क्षियन्ति भुवनानि विश्श्वा ॥२०॥
विष्ण्णो रराटमसि विष्ण्णोः श्नप्प्त्रे स्त्थो विष्ण्णोः स्यूरसि विष्ण्णोर्द्ध्रुवोसि ।
वैष्ण्णवमसि विष्ण्णवे त्त्वा ॥२१॥

॥६॥ देवस्य त्त्वा सवितुः प्प्रसवेऽश्श्विनोर्ब्बाहुब्भ्याम्पूष्ण्णो हस्त्ताब्भ्याम् । आददे नार्य्यसीदमहꣳ रक्क्षसाङ्ग्रीवाऽअपि कृन्तामि । बृहन्नसि बृहद्रवा बृहतीमिन्द्राय वाचँव्वद ॥२२॥

रक्षोहणँव्वलगहनँव्वैष्णवीमिदमहन्तँव्वलगमुत्किरामि यम्मे निष्ट्यो यममात्त्यो
निचखानेदमहन्तँव्वलगमुत्किरामि यम्मे समानो यमसमानो निचखानेदमहन्तँव्व-
लगमुत्किरामि यम्मे सबन्धुर्य्यमसबन्धुर्न्निचखानेदमहन्तँव्वलगमुत्किरामि यम्मे
सजातो यमसजातो निचखानोत्कृत्त्याङ्किरामि ॥२३॥

स्वराडसि सपत्नहा सत्रराडस्यभिमातिहा जनराडसि रक्षोहा सर्व्वराडस्यमित्रहा ॥२४॥

रक्षोहणो वो व्वलगहनः प्प्रोक्षामि व्वैष्णवान्न्रक्षोहणो वो व्वलगहनोवनयामि
व्वैष्णवान्न्रक्षोहणो वो व्वलगहनोवस्तृणामि व्वैष्णवान्न्रक्षोहणौ वाँव्वलगहनाऽउप-
दधामि व्वैष्णवी रक्षोहणौ वाँव्वलगहनौ पर्य्यूहामि व्वैष्णवी व्वैष्णवमसि
व्वैष्णवा स्त्थ ॥२५॥

॥७॥ देवस्य त्वा सवितुः प्प्रसवेश्विनोर्ब्बाहुब्भ्याम्पूष्ष्णो हस्त्ताब्भ्याम् । आददे
नार्य्यसीदमहꣳ रक्षसाङ्ग्रीवाऽअपि कृन्तामि । यवोसि यवयास्म्मद्द्वेषो यवयारातीर्द्दिवे
त्वान्तरिक्षाय त्वा पृथिव्यै त्वा शुन्धन्ताँल्लोकाः पितृषदनाः पितृषदनमसि ॥२६॥

उद्दिवꣳ स्तभानान्तरिक्षम्पृण दृꣳहस्व पृथिव्यान्द्युतानस्त्वा मारुतो मिनोतु
मित्रावरुणौ द्ध्रुवेण धर्म्मणा । ब्रह्मवनि त्वा क्षत्रवनि रायस्प्पोषवनि पर्य्यूहामि ।
ब्रह्म दृꣳह क्षत्रन्दृꣳहायुर्दृꣳह प्प्रजान्दृꣳह ॥२७॥

ध्रुवासि द्ध्रुवोयँय्यजमानोस्म्मिन्नायतने प्प्रजया पशुभिर्ब्भूयात् । घृतेन द्यावापृथिवी
पूर्य्येथामिन्द्रस्य च्छदिरसि व्विश्श्वजनस्य च्छाया ॥२८॥

परि त्वा गिर्व्वणो गिरऽइमा भवन्तु व्विश्श्वतः ।
वृद्धायुमनु वृद्धयो जुष्ट्टा भवन्तु जुष्ट्टयः ॥२९॥

इन्द्रस्य स्यूरसीन्द्रस्य द्ध्रुवोसि । ऐन्द्रमसि व्वैश्श्वदेवमसि ॥३०॥

॥८॥ व्विभूरसि प्प्रवाहणो वह्निरसि हव्व्यवाहनः ।
श्श्वात्रोसि प्प्रचेतास्तुथोसि व्विश्श्ववेदाऽउशिगसि ॥३१॥

उशिगसि कविरङ्घारिरसि बम्भारिरवस्यूरसि दुवस्वाञ्छुन्ध्यूरसि मार्ज्जालीयः
सम्म्राडसि कृशानुः परिषद्योसि पवमानो नभोसि प्प्रतक्वा मृष्टोसि हव्व्यसूदनऽ
ऋतधामासि स्वर्ज्योतिः समुद्रोसि ॥३२॥

समुद्रोसि व्विश्श्वव्यचाऽअजोस्येकपादहिरसि बुध्न्यो व्वागस्यैन्द्रमसि सदोस्यृतस्य
द्वारौ मा मा सन्ताप्प्तमद्ध्वनामद्ध्वपते प्प्र मा तिर स्वस्त्ति मेस्म्मिन्पथि देवयाने
भूयाद्मित्रस्य मा ॥३३॥

मित्रस्य मा चक्क्षुषेक्क्षद्ध्वमग्नयः सगराः सगरा स्त्थ सगरेण नाम्म्ना रौद्द्रेणानीकेन
पात माग्नयः पिपृत माग्नयो गोपायत मा नमो वोस्त्तु मा मा हिꣳसिष्ट ॥३४॥
॥९॥ ज्योतिरसि विश्श्वरूपँविश्श्वेषान्देवानाꣳ समित्। त्वꣳ सोम तनूकृद्भ्यो द्द्वेषोब्भ्योन्न्य-
कृतेब्भ्यऽउरु यन्तासि वरूथꣳ स्वाहा जुषाणोऽअप्तुराज्ज्यस्य वेतु स्वाहा ॥३५॥
अग्ने नय सुपथा रायेऽअस्म्मान्विश्श्वानि देव वयुनानि विद्द्वान्। युयोद्ध्यस्म्म-
ज्जुहुराणमेनो भूयिष्ट्ठान्ते नमऽउक्क्तिं विधेम ॥३६॥
अयन्नोऽअग्निर्व्वरिवस्कृणोत्त्वयम्मृधः÷ पुरऽएतु प्प्रभिन्दन्।
अयँव्वाजाञ्जयतु व्वाजसातावयꣳ शत्त्रूञ्जयतु जर्हृषाणः स्वाहा ॥३७॥
उरु विष्ण्णो विक्क्रमस्वोरु क्क्षयाय नस्कृधि।
घृतङ्घृतयोने पिब प्प्रप्प्र यज्ज्ञपतिन्तिर स्वाहा ॥३८॥
देव सवितरेष ते सोमस्त्तꣳ रक्क्षस्व मा त्त्वा दभन्। एतत्त्वन्देव सोम देवो देवाँ२॥ऽ
उपागाऽइदमहम्मनुष्ष्यान्त्सह रायस्प्पोषेण स्वाहा निर्व्वरुणस्य पाशान्मुच्च्ये ॥३९॥
अग्ने व्रतपास्त्त्वे व्रतपा या तव तनूर्म्मय्यभूदेषा सा त्त्वयि यो मम तनूस्त्त्वय्यभूदियꣳ
सा मयि। यथायथन्नौ व्रतपते व्रतान्न्यनु मे दीक्क्षान्दीक्क्षापतिरमꣳस्तानु तपस्त्तप-
स्प्पतिः ॥४०॥
॥१०॥ उरु विष्ण्णो विक्क्रमस्वोरु क्क्षयाय नस्कृधि।
घृतङ्घृतयोने पिब प्प्रप्प्र यज्ज्ञपतिन्तिर स्वाहा ॥४१॥
अत्त्यन्न्याँ२॥ऽअगान्नान्न्याँ२॥ऽउपागामर्व्वाक्क्त्वा परेब्भ्योविदम्परोवरेब्भ्यः। तन्त्त्वा
जुषामहे देव व्वनस्प्पते देवयज्ज्यायै देवास्त्त्वा देवयज्ज्यायै जुषन्ताँव्विष्ण्णवे त्त्वा।
ओषधे त्त्रायस्व स्वधिते मैनꣳ हिꣳसीः ॥४२॥
द्यामा लेखीरन्तरिक्क्षम्मा हिꣳसीः पृथिव्व्या सम्भव। अयꣳ हि त्त्वा स्वधितिस्त्ते-
तिजानः प्प्रणिनाय महते सौभगाय। अतस्त्त्वन्देव व्वनस्प्पते शतवल्शो विरोह
सहस्रवल्शा वि वयꣳ रुहेम ॥४३॥

॥ इति पञ्चमोऽध्यायः ॥

अथ षष्ठोऽध्यायः

ऋषिः (१) 'देवस्य त्वा' इत्यारभ्य (३७) 'त्वमङ्ग' इत्यन्तानां सामान्यतः प्रजापतिर्ऋषिः। विशेषतश्च—
(३) 'या ते' इत्यस्य दीर्घतमाः, (४) 'विष्णोः कर्माणि' (४) 'तद्विष्णोः' (२४) 'अमूर्याः' इत्येषां मेधातिथिः।
(२९) 'यमग्ने' इत्यस्य मधुच्छन्दाः, (३७) 'त्वमङ्ग' इत्यस्य गोतमः॥

देवता (१) 'देवस्य त्वा' इत्यस्य सविता, 'आददे नार्यसि' इत्यस्याग्निः, 'इदमहम्' इत्यस्य रक्षोहा, 'यवोसि' इत्यस्य यवः, 'दिवे त्वा' 'अन्तरिक्षाय त्वा' 'पृथिव्यै त्वा' इत्येषामौदुम्बरी, 'शुन्धन्ताम्' 'पितृषदनमसि' इत्यनयोः पितरः ।

(२) 'अग्रेणीरसि' इत्यस्य शकलम्, 'सुपिप्पलाभ्यः' इत्यस्य चषालम्, 'देवस्त्वा' 'द्यामग्रेण' (३) 'या ते' 'ब्रह्मवनि त्वा' 'ब्रह्म दृꣳह' इत्येषां यूपः ।

(४) 'विष्णोः कर्माणि' (५) 'तद्विष्णोः' इत्यनयोर्विष्णुः ।

(६) 'परिवीरसि' 'एष ते' इत्यनयोर्यूपः, 'दिवः सूनुः' इत्यस्य स्वरुः ।

(७) 'उपावीरसि' इत्यस्य तृणम्, 'उप देवान्' इत्यस्य लिङ्गोक्ताः ।

(८) 'ऋतस्य त्वा' इत्यस्य पशुः ।

(९) 'देवस्य त्वा' इत्यस्य सविता, 'अग्नीषोमाभ्याम्' इत्यस्याग्नीषोमौ, 'अद्भ्यस्त्वौषधीभ्यः' (१०) 'अपास्पेरुरसि' 'सन्ते प्राणः' इत्येषां पशुः, 'आपो देवीः' इत्यस्यापः ।

(११) 'घृतेनाक्तौ' इत्यस्य स्वरुशासौ, 'रेवति यजमाने' इत्यस्य वाक्, 'वर्षो वर्षीयसि' इत्यस्य तृणम्, 'स्वाहा देवेभ्यः' 'देवेभ्यः स्वाहा' इत्यनयोर्देवाः ।

(१२) 'माहिर्भूः' इत्यस्य रज्जुः, 'नमस्ते' इत्यस्य यज्ञः ।

(१३) 'देवीरापः' इत्यस्यापः, 'सुपरिविष्टाः' इत्यस्याशीः ।

(१४) 'वाचन्ते' 'प्राणन्ते' 'चक्षुस्ते' 'श्रोत्रन्ते' 'नाभिन्ते' 'मेढ्रन्ते' 'पायुन्ते' 'चरित्राँस्ते' (१५) 'मनस्ते' 'वाक्ते' 'प्राणस्ते' 'चक्षुस्ते' 'श्रोत्रन्ते' 'यत्ते क्रूरम्' इत्येषां पशुः, 'शमहोभ्यः' इत्यस्य लिङ्गोक्ताः, 'ओषधे त्रायस्व' इत्यस्य तृणम्, 'स्वधिते मैनम्' इत्यस्य असिः ।

(१६) 'रक्षसाम्भागः' इत्यस्य लिङ्गोक्ताः, 'निरस्तम्' 'इदमहम्' इत्यनयो रक्षोहा, 'घृतेन द्यावापृथिवी' इत्यस्य द्यावापृथिव्यौ, 'वायो वेः' इत्यस्य वायुः, 'अग्निराज्यस्य' इत्यस्याग्निः, 'स्वाहाकृते' इत्यस्य वपाश्रपण्यौ ।

(१७) 'इदमापः' इत्यस्यापः ।

(१८) 'सन्ते मनः' इत्यस्य हृदयम्, 'रेडस्यग्निः' इत्यस्य वसा, 'प्रयुतन्द्वेषः' इत्यस्य लिङ्गोक्ता ।

(१९) 'घृतङ्घृतपावानः' इत्यस्य विश्वे देवाः, 'दिशः' 'प्रदिशः' 'आदिशः' 'विदिशः' 'उद्दिशः' 'दिग्भ्यः' इत्येषां दिशः ।

(२०) 'ऐन्द्रः प्राणः' इत्यस्य लिङ्गोक्ता, 'देव त्वष्टः' इत्यस्य त्वष्टा ।

(२१) 'समुद्रङ्गच्छ' 'अन्तरिक्षङ्गच्छ' 'देवꣳ सवितारम्' 'मित्रावरुणौ गच्छ' 'अहोरात्रे गच्छ' 'छन्दाꣳसि गच्छ' 'द्यावापृथिवी गच्छ' 'यज्ञङ्गच्छ' 'सोमङ्गच्छ' 'दिव्यन्नभः' 'अग्निं वैश्वानरम्' 'मनो मे' इत्येषां लिङ्गोक्ताः, 'दिवन्ते' इत्यस्य स्वरुः ।

(२२) 'मापो मौषधीः' इत्यस्य् हृदयशूलम्, 'धाम्नोधाम्नः' 'यदाहुः' इत्यनयोर्वरुणः, 'सुमित्रिया नः' इत्यस्यापः ।

(२३) 'हविष्मतीः' इत्यस्य लिङ्गोक्ताः ।

(२४) 'अग्नेर्वः' 'इन्द्राग्न्योः' 'मित्रावरुणयोः' 'विश्वेषाम्' 'असूर्याः' इत्येषामापः ।

(२५) 'हृदे त्वा' (२६) 'सोम राजन्' 'विश्वास्त्वाम्' इत्येषां सोमः, 'श्रृणोत्वग्निः' इत्यस्य लिङ्गोक्ता ।

(२७) 'देवीरापः' इत्यस्यापः ।

(२८) 'कार्षिरसि' इत्यस्याज्यम्, 'समुद्रस्य त्वा' 'समापो अद्भिः' इत्यनयोरापः ।

(२९) 'यमग्ने' इत्यस्याग्निः ।

(३०-३१) 'देवस्य त्वा' इत्यस्य सविता, 'आददे' इत्यस्य ग्रावा, 'निग्राभ्या स्थ' इत्यस्यापः ।

(३२) 'इन्द्राय त्वा' इत्यादित्रयाणाम्, 'श्येनाय त्वा' 'अग्नये त्वा' (३३) 'यत्ते सोम' इत्येषाञ्च सोमः ।

(३४) 'श्वात्रा स्थ' इत्यस्य निग्राभ्या आपः ।

(३५) 'मा भेर्मा' इत्यस्य सोमः, 'धिषणे वीड्वी' इत्यस्य द्यावापृथिव्यौ ।

(३६) 'प्रागपाक्' इत्यस्य सोमः ।
(३७) 'त्वमङ्ग' इत्यस्येन्द्रः ॥

छन्दः (३) 'या ते' इत्यस्य त्रिष्टुप्, (४) 'विष्णोः कर्माणि' (५) 'तद्विष्णोः' इत्यनयोर्गायत्री, (१७) 'इदमापः' इत्यस्य महापङ्क्तिः, (२०) 'देव त्वष्टः' इत्यस्य त्रिष्टुप्, (२२) 'यदाहुः' इत्यस्य गायत्री, (२३) 'हविष्मतीरिमाः' इत्यस्यानुष्टुप्, (२४) 'असूर्याः' इत्यस्य गायत्री, (२५) 'हृदे त्वा' इत्यस्यानुष्टुप्, (२६) 'शृणोत्वग्निः' इत्यस्य त्रिष्टुप्, (२७) 'देवीरापः' इत्यस्य पङ्क्तिः, (२८) 'कार्षिरसि' इत्यादित्रयाणां मिलितानामनुष्टुप्, (२९) 'यमग्ने' इत्यस्य गायत्री, (३३) 'यत्ते सोम' इत्यस्य विपरीता बृहती, (३४) 'श्वात्रा स्थ' इत्यस्य पथ्याबृहती, (३६) 'प्रागपाक्' इत्यस्योष्णिक्, (३७) 'त्वमङ्ग' इत्यस्य पथ्याबृहती ॥

॥ हरिःॐ ॥

॥१॥ दे॒वस्य॑ त्त्वा सवि॒तुः प्प्र॑स॒वेऽश्विनो॑र्ब्बा॒हुब्भ्यां॑म्पू॒ष्ण्णो हस्त्ता॑ब्भ्याम् । आद॑दे॒ नार्य्य॑सी॒दम॒हꣳ रक्ष॑साङ्ग्री॒वाऽअपि॑ कृन्तामि । यवो॑सि य॒वया॒स्म्मद्द्वेषो॑ य॒वयारा॑तीर्द्दि॒वे त्त्वा॒न्तरि॑क्क्षाय त्त्वा पृथि॒व्व्यै त्त्वा॒ शुन्ध॑न्ताँल्लो॒काः पि॑तृषद॑नाः पितृषद॑नमसि ॥१॥

अ॒ग्ग्रे॒णीर॑सि स्वावे॒शऽउ॑न्नेतृ॒णामे॒तस्य॑ व्वि॒त्तादधि॑ त्त्वा स्त्थास्यति दे॒वस्त्त्वा॑ सवि॒ता मद्ध्वा॑नक्क्तु सुपिप्प॒लाब्भ्य॒स्त्त्वौष॑धीब्भ्यः । द्यामग्ग्रे॑णास्पृक्क्ष॒ऽआन्तरि॑क्क्ष॒म्मद्ध्ये॑नाप्प्राः पृथि॒वीमुप॑रेणादꣳहीः ॥२॥

या ते॒ धामा॑न्युश्म॒सि गम॑द्ध्यै॒ यत्र॒ गावो॒ भूरि॑शृङ्गाऽअ॒यासः॑ । अत्राह॒ तदु॑रुगा॒यस्य॒ व्विष्ण्णोः॑ प॒रमम्प॒दमव॑ भारि॒ भूरि॑ । ब्र॒ह्म॒वनि॑ त्त्वा क्क्षत्र॒वनि॑ रायस्प्पोष॒वनि॒ पर्य्यू॑हामि । ब्रह्म॑ दꣳह क्क्ष॒त्रन्दꣳहायु॑र्दꣳह प्प्र॒जान्दꣳह ॥३॥

व्विष्ण्णोः॒ कर्म्मा॑णि पश्श्यत॒ यतो॑ व्व्र॒तानि॑ पस्प्प॒शे । इन्द्र॑स्य॒ युज्ज्यः॒ सखा॑ ॥४॥

तद्विष्ण्णोः॑ प॒रमम्प॒दꣳ सदा॑ पश्श्यन्ति सू॒रयः॑ । दि॒वी᳖व॒ चक्क्षु॒रात॑तम् ॥५॥

प॒रि॒वीर॑सि॒ परि॑ त्त्वा॒ दैवी॒र्व्विशो॑ व्ययन्ता॒म्परी॒मँय्यज॑मान॒ꣳ रायो॑ मनु॒ष्ष्याणाम् । दि॒वः सू॒नुर॑स्ये॒ष ते॑ पृथि॒व्व्याँल्लो॒कऽआ॑र॒ण्ण्यस्ते॑ प॒शुः ॥६॥

॥२॥ उ॒पा॒वीर॒स्युप॑ दे॒वान्दैवी॒र्व्विशः॒ प्प्रागु॑रु॒शिजो॒ व्वह्नि॑तमान् ।
दे॑व त्त्वष्ट॒र्व्वसु॑ रम ह॒व्व्या ते॑ स्वद॒न्ताम् ॥७॥
रेव॑ती॒ रम॑द्ध्वम्बृ॒हस्प्पते धा॒रया॒ व्वसू॑नि ।
ऋ॒तस्य॑ त्त्वा देवहविः॒ पाशे॑न॒ प्प्रति॑मुञ्चामि॒ धर्षा॒ मानु॑षः ॥८॥

दे॒वस्य॑ त्त्वा सवि॒तुः प्प्र॑स॒वेऽश्विनो॑र्ब्बा॒हुब्भ्यां॑म्पू॒ष्ण्णो हस्त्ता॑ब्भ्याम् । अ॒ग्ग्नीषोमा॑ब्भ्या॒ञ्जुष्ट॒न्नियु॑नज्ज्मि । अ॒द्ब्भ्यस्त्त्वौष॑धी॒ब्भ्योनु॑ त्त्वा मा॒ता म॑न्न्यता॒मनु॑ पि॒तानु॒ ब्भ्राता॒ सग॒र्ब्भ्योनु॒ सखा॒ सयू॑त्थ्यः । अ॒ग्ग्नीषोमा॑ब्भ्यान्त्त्वा॒ जुष्ट॒म्प्प्रोक्षा॑मि ॥९॥

अपाम्पेरुरस्यापो देवीः स्वदन्तु स्वात्तञ्चित्सद्देवहविः । सन्ते प्प्राणो व्वातेन गच्छताꣳ
समङ्गानि यजत्रैः सँय्यज्ञपतिराशिषा ॥१०॥

घृतेनाक्तौ पशूँस्त्रायेथाꣳ रेवति यजमाने प्प्रियन्धाऽआविश । उरोरन्तरिक्क्षात्सजूर्द्देवेन
व्वातेनास्य हविषस्त्मना यज समस्य तन्न्वा भव । व्वर्षो व्वर्षीयसि यज्ञे यज्ञपतिन्धाः
स्वाहा देवेब्भ्यो देवेब्भ्यः स्वाहा ॥११॥

॥३॥ माहिर्भूर्म्मा पृदाकुर्न्नमस्तऽआतानानर्वा प्प्रेहि । ॥६॥
घृतस्य कुल्ल्याऽउपऽऋतस्य पत्थ्याऽअनु ॥१२॥

देवीरापः शुद्धा व्वोढ्वꣳ सुपरिविष्टा देवेषु सुपरिविष्टा व्वयम्परिवेष्टारो भूयास्म ॥१३॥

व्वाचन्ते शुन्धामि प्प्राणन्ते शुन्धामि चक्क्षुस्ते शुन्धामि श्श्रोत्रन्ते शुन्धामि नाभिन्ते
शुन्धामि मेढ्रन्ते शुन्धामि पायुन्ते शुन्धामि चरित्राँस्ते शुन्धामि ॥१४॥

मनस्तऽआप्प्यायताँव्वाक्तऽआप्प्यायताम्प्प्राणस्तऽआप्प्यायताञ्चक्क्षुस्तऽआप्प्यायताꣳ ॥७॥
श्रोत्रन्तऽआप्प्यायताम् । यत्ते क्क्रूरँय्यदास्थितन्तत्तऽआप्प्यायतान्निष्ट्यायतान्तत्ते
शुद्ध्यतु शमहोब्भ्यः । ओषधे त्रायस्व स्वधिते मैनꣳ हिꣳसीः ॥१५॥

रक्क्षसाम्भागोसि निरस्तꣳ रक्क्षऽइदमहꣳ रक्क्षोभि तिष्ठामीदमहꣳ रक्क्षोवबाध
ऽइदमहꣳ रक्क्षोधमन्तमो नयामि । घृतेन द्यावापृथिवी प्प्रोर्ण्णुवाथाँव्वायो व्वे स्तोकानामग्निराज्ज्यस्य
व्वेतु स्वाहा स्वाहाकृतेऽऊर्द्ध्वनभसम्मारुतङ्गच्छतम् ॥१६॥

इदमापः प्प्रवहतावद्यञ्च मलञ्च यत् । यच्चाभिदुद्द्रोहानृतँय्यच्च शेपेऽअभीरुणम् ।
आपो मा तस्मादेनसः पवमानश्च मुञ्चतु ॥१७॥

॥४॥ सन्ते मनो मनसा सम्प्प्राणः प्प्राणेन गच्छताम् । रेडस्यग्निष्ट्वा श्श्रीणात्त्वापस्त्वा
समरिणन्व्वातस्य त्वा द्ध्राज्यै पूष्णो रꣳह्याऽऊष्मणो व्व्यथिषत्प्प्रयुतन्द्द्वेषः ॥१८॥ ॥८॥

घृतङ्घृतपावानः पिबत व्वसाँव्वसापावानः पिबतान्तरिक्क्षस्य हविरसि स्वाहा ।
दिशः प्प्रदिशऽआदिशो व्विदिशऽउद्दिशो दिग्ग्भ्यः स्वाहा ॥१९॥

ऐन्द्रः प्प्राणोऽअङ्गेऽअङ्गे निदीद्ध्यदैन्द्रऽउदानोऽअङ्गेऽअङ्गे निधीतः । देव त्त्वष्टर्ब्भूरि
ते सꣳ समेतु सलक्ष्मा यद्विषुरूपम्भवाति । देवत्रा यन्तमवसे सखायोनु त्त्वा माता
पितरो मदन्तु ॥२०॥

॥५॥ समुद्रङ्गच्छ स्वाहान्तरिक्क्षङ्गच्छ स्वाहा देवꣳ सवितारङ्गच्छ स्वाहा मित्रावरुणौ
गच्छ स्वाहाहोरात्रे गच्छ स्वाहा च्छन्दाꣳसि गच्छ स्वाहा द्यावापृथिवी गच्छ
स्वाहा यज्ञङ्गच्छ स्वाहा सोमङ्गच्छ स्वाहा दिव्यन्नभो गच्छ स्वाहाग्निंव्वैश्वानरङ्गच्छ

स्वाहा॒ मनो॑ मे॒ हार्दि॑ यच्छ॒ दिव॑न्ते धूमो ग॑च्छतु॒ स्व॒र्ज्योति॑÷ पृथि॒वीम्भस्म॒नापृ॑ण॒ स्वाहा॑ ॥२१॥

मापो॒ मौष॑धीर्हि॑ꣳसी॒र्द्धाम्म्नोधाम्म्नो राजँ॒स्ततो॑ व्वरुण नो मुञ्च । यदा॒हु॒रग्घ्न्या॒ऽइति॒ व्वरु॒णेति॒ शपा॑महे॒ ततो॑ व्वरुण नो मुञ्च । सु॒मि॒त्रि॒या न॒ऽआप॒ऽओष॑धयः सन्तु दु॒र्म्मि॒त्रि॒यास्त्तस्म्मै सन्तु॒ यो॒ऽस्म्मान्द्वेष्टि॒ यञ्च॑ व्व॒यन्द्वि॒ष्म्मः ॥२२॥

॥६॥ ह॒विष्म्म॑तीरि॒माऽआपो॑ ह॒विष्म्मा॒२ँ॥ऽआवि॑वासति ।
ह॒विष्म्मा॑न्दे॒वोऽअ॑द्ध्व॒रो ह॒विष्म्मा॑२ँ॥ऽअस्त्तु॒ सूर्य्य॑÷ ॥२३॥

अ॒ग्नेर्व्वो॑पन्नगृहस्य॒ सद॑सि सादयामीन्द्रा॒ग्न्न्योर्ब्भा॑ग॒धेयी॑ स्त्थ मि॒त्रावरु॑णयोर्ब्भाग॒धेयी॑ स्त्थ॒ व्विश्श्वे॑षान्दे॒वाना॑म्भाग॒धेयी॑ स्त्थ । अ॒मूर्य्याऽउप॒ सूर्य्ये॒ याभि॑र्व्वा॒ सूर्य्य॑÷ स॒ह । ता नो॑ हिन्न्वन्त्वद्ध्व॒रम् ॥२४॥

॥७॥ हृ॒दे त्वा॒ मन॑से त्वा दि॒वे त्वा॒ सूर्य्या॑य त्वा ।
ऊ॒र्द्ध्वमि॒मम॑द्ध्व॒रन्दि॒वि दे॒वेषु॒ होत्रा॑ यच्छ ॥२५॥

सोम॑ राज॒न्विश्श्वा॒स्त्त्वम्प्र॒जाऽउ॒पाव॑रोह॒ व्विश्श्वा॒स्त्त्वाम्प्र॒जाऽउ॒पाव॑रोहन्तु । शृ॒णोत्व॒ग्निः स॒मिधा॒ हव॑म्मे शृ॒ण्ण्वन्त्वापो॑ धि॒षणा॑श्च दे॒वीः । श्रोता॑ ग्ग्रावाणो व्वि॒दुषो॒ न य॒ज्ञꣳ शृ॒णोतु॑ दे॒वः स॑वि॒ता हव॑म्मे॒ स्वाहा॑ ॥२६॥

दे॒वीरापोऽअपान्नपा॒द्यो व॑ऽऊ॒र्म्मिर्ह॑वि॒ष्य॒ऽइन्द्रि॒यावा॑न्म॒दिन्त॑मः ।
तन्दे॒वेब्भ्यो॑ देव॒त्रा द॑त्त शुक्र॒पेब्भ्यो॒ येषा॑म्भा॒ग स्त्थ स्वाहा॑ ॥२७॥

का॒र्षि॒रसि समु॒द्रस्य॒ त्वा क्षि॑त्त्या॒ऽउन्न॑यामि ।
समापो॑ऽअ॒द्भिर॑ग्ग्मत॒ समोष॑धीभि॒रोष॑धीः ॥२८॥

यम॑ग्ने पृ॒त्सु मर्त्त्य॒मवा॒ व्वाजे॑षु॒ यञ्जु॒नाः । स यन्ता॒ शश्श्व॑ती॒रिषः॒ स्वाहा॑ ॥२९॥

॥८॥ दे॒वस्य॑ त्वा सवि॒तुः प्प्र॑स॒वे॒ऽश्विनो॑र्ब्बा॒हुब्भ्या॒म्पू॒ष्ण्णो हस्त्ताब्भ्याम् । आद॑दे॒ रावा॑सि गभी॒रमि॒मम॑द्ध्व॒रङ्कृ॒धीन्द्रा॑य सु॒षूत॑मम् । उ॒त्त॒मेन॑ प॒विनोर्ज्ज॑स्वन्त॒म्मधु॑मन्त॒म्पय॑स्वन्तन्निग्ग्रा॒ब्भ्या॒ स्त्थ देव॒श्श्रुत॑स्त्त॒र्प्प॑यत मा॒ मनो॑ मे ॥३०॥

मनो॑ मे तर्प्पयत॒ व्वाच॑म्मे तर्प्पयत प्प्रा॒णम्मे॑ तर्प्पयत॒ चक्क्षु॑र्म्मे तर्प्पयत॒ श्श्रोत्र॑म्मे तर्प्पयता॒त्मान॑म्मे तर्प्पयत प्प्र॒जाम्मे॑ तर्प्पयत प॒शून्मे॑ तर्प्पयत ग॒णान्मे॑ तर्प्पयत ग॒णा मे॒ मा व्वितृ॑षन् ॥३१॥

इन्द्रा॑य त्वा॒ व्वसु॑मते रु॒द्रव॑त॒ऽइन्द्रा॑य त्वादि॒त्त्यव॑त॒ऽइन्द्रा॑य त्वाभिमाति॒ग्घ्ने ।
श्ये॒नाय॑ त्वा सोम॒भृते॒ग्नये॑ त्वा रायस्प्पोष॒दे ॥३२॥

यत्ते सोम दिवि ज्योतिर्य्यत्पृथिव्याँय्यदुरावन्तरिक्षे ।
तेनास्म्मै यजमानायोरु राये कृद्ध्यधि दात्रे व्वोचः ॥३३॥
श्वात्रा स्त्थ वृत्रतुरो राधोगूर्त्ताऽअमृतस्य पत्नीः । ता देवीर्द्देवत्रेमँय्यज्ञन्नयतोपहूताः सोमस्य पिबत ॥३४॥
मा भेर्म्मा सँव्विक्क्थाऽऊर्ज्जन्धत्स्व धिषणे व्वीड्वी सती व्वीडयेथामूर्ज्जन्दधाथाम् ।
पाप्प्मा हतो न सोमः ॥३५॥
प्रागपागुदगधराक्सर्व्वतस्त्वा दिशऽआधावन्तु । अम्ब निष्प्पर समरीर्व्विदाम् ॥३६॥
त्वमङ्ग प्प्रशꣳसिषो देवः शविष्ठ मर्त्त्यम् । न त्वदन्यो मघवन्नस्ति मर्ड्डितेन्द्र ब्ब्रवीमि ते व्वचः ॥३७॥

॥ इति षष्ठोऽध्यायः ॥

अथ सप्तमोऽध्यायः

ऋषिः(१) 'वाचस्पतये' इत्यारभ्य (४८) 'कोदात्' इत्यन्तानां सामान्यतः प्जापतिर्ऋषिः । विशेषतश्च—
(७) 'आ वायो' इत्यस्य वसिष्ठः, (८) 'इन्द्रवायू' इत्यस्य मधुच्छन्दाः, (९) 'अयं वाम्' इत्यस्य गृत्समदः, (१०) 'राया वयम्' इत्यस्य त्रसदस्युः, (११) 'या वाम्' इत्यस्य मेधातिथिः, (१२) 'तम्प्रत्नथा' इत्यस्य काश्यपोऽवत्सारः, (१९) 'ये देवासः' इत्यस्य परुच्छेपः, (२४) 'मूर्धानन्दिवः' इत्यस्य भरद्वाजः, (२६) 'यस्ते द्रप्सः' इत्यस्य देवश्रवाः, (३१) 'इन्द्राग्नी' इत्यस्य विश्वामित्रः, (३२) 'आ घा ये' इत्यस्य त्रिशोकः, (३३) 'ओमासश्चर्षणीधृतः' इत्यस्य मधुच्छन्दाः, (३४) 'विश्वे देवासः' इत्यस्य गृत्समदः, (३५) 'इन्द्र मरुत्वः' (३६) 'मरुत्वन्तं वृषभम्' (३७) 'सजोषा इन्द्र' (३८) 'मरुत्वाँ इन्द्र' इत्येषां विश्वामित्रः, (३९) 'महाँ इन्द्रो नृवत्' इत्यस्य भरद्वाजः, (४०) 'महाँ इन्द्रो यः' इत्यस्य वत्सः, (४१) 'उदु त्यम्' इत्यस्य प्रस्कण्वः, (४२) 'चित्रन्देवानाम्' इत्यस्याङ्गिरसः कुत्सः, (४३) 'अग्ने नय' इत्यस्यागस्त्यः ॥

देवता(१) 'वाचस्पतये' इत्यस्य प्राणः ।
(२) 'मधुमतीर्नः' 'स्वाहा' 'उर्वन्तरिक्षम्' इत्येषां लिङ्गोक्ताः, 'यत्ते सोम' इत्यस्य सोमः ।
(३) 'स्वाङ्कृतोसि' इत्यस्योपांशुग्रहः, 'देवेभ्यस्त्वा' इत्यस्य देवाः, 'देवाꣳशो यस्मै' इत्यस्य लिङ्गोक्ता, 'प्राणाय त्वा' इत्यस्योपांशुग्रहः, 'व्यानाय त्वा' इत्यस्योपांशुसवनः ।
(४) 'उपयामगृहीतः' इत्यस्येन्द्रः ।
(५) 'अन्तस्ते' इत्यस्य मघवा ।
(६) 'स्वाङ्कृतोसि' इत्यस्योपांशुग्रहः, 'देवेभ्यस्त्वा' इत्यस्य देवाः, 'उदानाय त्वा' इत्यस्योपांशुग्रहः ।
(७) 'आ वायो' 'वायवे त्वा' इत्यनयोर्वायुः ।
(८) 'इन्द्रवायू' 'उपयामगृहीतः' 'एष ते योनिः' इत्येषामिन्द्रवायू ।
(९) 'अयं वाम्' 'उपयामगृहीतः' इत्यनयोर्मित्रावरुणौ ।
(१०) 'राया वयम्' 'एष ते योनिः' इत्यनयोर्मित्रावरुणौ ।
(११) 'या वाम्' 'उपयामगृहीतः' 'एष ते योनिः' इत्येषामश्विनौ ।

(१२) 'तम्प्रत्नथा' इत्यस्य विश्वे देवाः, 'उपयामगृहीतः' 'एष ते योनिः' इत्यनयोः शुक्रग्रहः, 'अपमृष्टः शण्डः' इत्यस्य शण्डः, 'देवास्त्वा शुक्रपाः' इत्यस्य शुक्रः, 'अनाधृष्टासि' इत्यस्य वेदिश्रोणी ।

(१३) 'सुवीरो वीरान्' 'सञ्जग्मानः' इत्यनयोः शुक्रः, 'निरस्तः शण्डः' इत्यस्य शण्डः, 'शुक्रस्याधिष्ठानम्' इत्यस्य शकलम् ।

(१४-१५) 'अच्छिन्नस्य ते' इत्यस्य सोमः, 'सा प्रथमा' इत्यस्येन्द्रः, 'तृम्पन्तु होत्राः' 'अयाडग्नीत्' इत्यनयोर्लिङ्गोक्ताः ।

(१६) 'अयं वेनः' 'उपयामगृहीतः' इत्यनयोः सोमः ।

(१७) 'मनो न' इत्यस्य सोमः, 'एष ते योनिः' इत्यस्य मन्थिग्रहः, 'अपमृष्टो मर्कः' इत्यस्य मर्कः, 'देवास्त्वा मन्थिपाः' इत्यस्य मन्थिग्रहः, 'अनाधृष्टासि' इत्यस्य वेदिश्रोणी ।

(१८) 'सुप्रजाः प्रजाः' 'सञ्जग्मानः' इत्यनयोर्मन्थिग्रहः, 'निरस्तो मर्कः' इत्यस्य मर्कः, 'मन्थिनोधिष्ठानम्' इत्यस्य शकलम् ।

(१९) 'ये देवासः' इत्यस्य विश्वे देवाः ।

(२०) 'उपयामगृहीतोस्याग्रयणः' इत्यस्याग्रयणः ।

(२१) 'सोमः पवते' इत्यस्य विश्वे देवाः, 'एष ते योनिः' इत्यस्याग्रयणः ।

(२२) 'उपयामगृहीतः' 'एष ते योनिः' 'देवेभ्यस्त्वा' इत्येषां सोमः ।

(२३) 'मित्रावरुणाभ्यान्त्वा' इत्यस्य सोमः, 'इन्द्राय त्वा' 'इन्द्राग्निभ्यान्त्वा' 'इन्द्रावरुणाभ्यान्त्वा' 'इन्द्राबृहस्पतिभ्यान्त्वा' 'इन्द्राविष्णुभ्यान्त्वा' इत्येषां लिङ्गोक्ताः ।

(२४) 'मूर्धानन्दिवः' इत्यस्य वैश्वानरः ।

(२५) 'उपयामगृहीतः' इत्यस्य सोमः, 'ध्रुवोसि' इत्यस्य ध्रुवः, 'एष ते योनिः' इत्यस्य ग्रहः, 'ध्रुवन्ध्रुवेण' इत्यस्य ध्रुवः, 'अथा न इन्द्रः' इत्यस्येन्द्रः ।

(२६) 'यस्ते द्रप्सः' इत्यस्य सोमः, 'देवानामुत्क्रमणमसि' इत्यस्य चात्वालः ।

(२७) 'प्राणाय मे' 'व्यानाय मे' 'उदानाय मे' 'वाचे मे' 'क्रतूदक्षाभ्यास्मे' 'श्रोत्राय मे' 'चक्षुर्भ्यास्मे' (२८) 'आत्मने मे' 'ओजसे मे' 'आयुषे मे' 'विश्वाभ्यो मे' इत्येषां लिङ्गोक्ताः ।

(२९) 'कोसि' इत्यस्य प्रजापतिः, 'भूर्भुवः स्वः' इत्यस्याग्निवायुसूर्याः ।

(३०) 'उपयामगृहीतोसि मधवे त्वा' 'उप० माधवाय त्वा' 'उप० शुक्राय त्वा' 'उप० शुचये त्वा' 'उप० नभसे त्वा' 'उप० नभस्याय त्वा' 'उप० इषे त्वा' 'उप० ऊर्जे त्वा' 'उप० सहसे त्वा' 'उप० सहस्याय त्वा' 'उप० तपसे त्वा' 'उप० तपस्याय त्वा' 'उप० अꣳहस्पतये त्वा' इत्येषां लिङ्गोक्ताः ।

(३१) 'इन्द्राग्नी' इत्यस्येन्द्राग्नी, 'उपयामगृहीतः' 'एष ते योनिः' इत्यनयोः सोमः ।

(३२) 'आ घा ये' इत्यस्याग्नीन्द्रौ, 'उपयामगृहीतः' 'एष ते योनिः' इत्यनयोः सोमः ।

(३३) 'ओमासश्चर्षणीधृतः' इत्यस्य विश्वे देवाः, 'उपयामगृहीतः' 'एष ते योनिः' इत्यनयोः सोमः ।

(३४) 'विश्वे देवासः' इत्यस्य विश्वे देवाः, 'उपयामगृहीतः' 'एष ते योनिः' इत्यनयोः सोमः ।

(३५) 'इन्द्र मरुत्वः' इत्यस्येन्द्रामरुतौ, 'उपयामगृहीतः' 'एष ते योनिः' इत्यनयोः सोमः ।

(३६) 'मरुत्वन्तं वृषभम्' इत्यस्येन्द्रामरुतौ, 'उपयामगृहीतः' 'एष ते योनिः' इत्यनयोः सोमः, 'उपयामगृहीतः' इत्यस्य मरुत्वान् ।

(३७) 'सजोषा इन्द्र' इत्यस्येन्द्रामरुतौ, 'उपयामगृहीतः' 'एष ते योनिः' इत्यनयोः सोमः ।

(३८) 'मरुत्वाँ इन्द्र' इत्यस्येन्द्रामरुतौ, 'उपयामगृहीतः' 'एष ते योनिः' इत्यनयोः सोमः ।

(३९) 'महाँ इन्द्रो नृवत्' इत्यस्य माहेन्द्रः, 'उपयामगृहीतः' 'एष ते योनिः' इत्यनयोर्ग्रहः ।

(४०) 'महाँ इन्द्रो यः' इत्यस्य माहेन्द्रः, 'उपयामगृहीतः' 'एष ते योनिः' इत्यनयोर्ग्रहः ।

(४१) 'उदु त्यम्' (४२) 'चित्रन्देवानाम्' इत्यनयोः सूर्यः ।

(४३) 'अग्ने नय' (४४) 'अयन्नः' इत्यनयोरग्निः ।

(४५) 'रूपेण वः' 'ऋतस्य पथा' 'वि स्वः पश्य' 'यतास्व' इत्येषां दक्षिणा ।

(४६) 'ब्राह्मणमद्य' इत्यस्य ब्राह्मणः, 'अस्मद्राता' इत्यस्य दक्षिणा ।

(४७) 'अग्नये त्वा' इत्यस्य हिरण्यम्, 'रुद्राय त्वा' इत्यस्य गौः, 'बृहस्पतये त्वा' इत्यस्य वासः, 'यमाय त्वा' इत्यस्याश्वः ।

(४८) 'कोदात्' इत्यस्य कामः ॥ ॥५॥

छन्दः (१) 'वाचस्पतये' इत्यस्य विराट्, (५) 'अन्तस्ते' (७) 'आ वायो' इत्यनयोस्त्रिष्टुप्, (८) 'इन्द्रवायू' (९) 'अयं वाम्' इत्यनयोर्गायत्री, (१०) 'राया वयम्' इत्यस्य त्रिष्टुप्, (११) 'या वाम्' इत्यस्य गायत्री, (१२) 'तम्प्रत्नथा' इत्यस्य जगती, (१४) 'सा प्रथमा' 'तृम्पन्तु' इत्यनयोस्त्रिष्टुप्, 'अंयाडग्नीत्' इत्यस्य दैवी बृहती, (१६) 'अयं ॥६॥ वेनः' (१७) 'मनो न येषु' (१९) 'ये देवासः' (२४) 'मूर्धानन्दिवः' इत्येषां त्रिष्टुप्, (२५) 'भुवन्भुवेण' इत्यस्य बृहती, (२६) 'यस्ते द्रप्सः' इत्यस्य त्रिष्टुप्, 'स्वाहा' इति यजुः, (२९) 'कोसि कतमः' इत्यस्य वर्द्धमानोष्णिक्, (३१) 'इन्द्राग्नी' (३२) 'आ घा ये' (३३) 'ओमासश्चर्षणीधृतः' (३४) 'विश्वे देवासः' इत्येषां गायत्री, (३५) 'इन्द्र मरुत्वः' (३६) 'मरुत्वन्तं वृषभम्' इत्यनयोस्त्रिष्टुप्, 'मरुतान्त्वौजसे' इति यजुः, (३७) 'सजोषा इन्द्र' (३८) 'मरुत्वाँ इन्द्र' (३९) 'महाँ इन्द्रो नृवत्' इत्येषां त्रिष्टुप्, (४०) 'महाँ इन्द्रो यः' (४१) 'उदु त्यम्' इत्यनयोर्गायत्री, (४२) 'चित्रन्देवानाम्' (४३) 'अग्ने नय' (४४) 'अयन्नः' इत्येषां त्रिष्टुप्, 'स्वाहा' इति यजुः ॥

॥ हरिःॐ ॥

॥१॥ व्वाचस्पतये पवस्व व्वृष्णोऽअꣳशुब्भ्याङ्गभस्तिपूतः । देवो देवेब्भ्यः पवस्व
येषाम्भागोसि ॥१॥
मधुमतीर्न्नऽइषस्कृधि यत्ते सोमादाब्भ्यन्नाम जागृवि तस्म्मै ते सोम सोमाय
स्वाहा स्वाहोर्व्वन्तरिक्षमन्न्वेमि स्वाङ्कृतोसि ॥२॥ ॥७॥
स्वाङ्कृतोसि व्विश्श्वेब्भ्यऽइन्द्रियेब्भ्यो दिव्येब्भ्यः पार्त्थिवेब्भ्यो मनस्त्वाष्टु स्वाहा
त्वा सुभव सूर्य्याय देवेब्भ्यस्त्वा मरीचिपेब्भ्यो देवाꣳशो यस्म्मै त्वेडे तत्सत्यमुपरिप्प्रुता भङ्गेन हतोसौ फट्प्राणाय त्वा व्व्यानाय त्वा ॥३॥
॥२॥ उपयामगृहीतोस्यन्तर्य्यच्छ मघवन्पाहि सोमम् । उरुष्य रायऽएषो यजस्व ॥४॥
अन्तस्ते द्यावापृथिवी दधाम्म्यन्तर्द्दधाम्म्युर्व्वन्तरिक्षम् । सजूर्द्देवेभिरवरैः परैश्चान्तर्य्यामे मघवन्मादयस्व ॥५॥
स्वाङ्कृतोसि व्विश्श्वेब्भ्यऽइन्द्रियेब्भ्यो दिव्येब्भ्यः पार्त्थिवेब्भ्यो मनस्त्वाष्टु स्वाहा त्वा ॥८॥
सुभव सूर्य्याय देवेब्भ्यस्त्वा मरीचिपेब्भ्यऽउदानाय त्वा ॥६॥
॥३॥ आ वायो भूष शुचिपाऽउप नः सहस्रन्ते नियुतो व्विश्श्ववार । उपो तेऽअन्धो मद्यमयामि यस्य देव दधिषे पूर्व्वपेयँव्वायवे त्वा ॥७॥
इन्द्रवायूऽइमे सुताऽउप प्प्रयोभिरागतम् । इन्दवो वामुशन्ति हि । उपयामगृहीतोसि
व्वायवऽइन्द्रवायुब्भ्यान्त्वैष ते योनिः सजोषोब्भ्यान्त्वा ॥८॥
॥४॥ अयँव्वाम्मित्त्रावरुणा सुतः सोमऽऋतावृधा । ममेदिह श्श्रुतꣳ हवम् । उपयामगृहीतोसि मित्त्रावरुणाब्भ्यान्त्वा ॥९॥ ॥९॥

राया ब्वयꣳ ससुवाꣳसो मदेम हव्येन देवा यवसेन गावः । तान्धेनुम्मित्रावरुणा युवन्नो ब्विश्श्वाहा धत्तमनपस्फुरन्तीमेष ते योनिर्ऋतायुब्भ्यान्त्वा ॥१०॥

॥५॥ या वाङ्कशा मधुमत्त्यश्श्विना सूनृतावती । तया यज्ञम्मिमिक्षतम् । उपयामगृहीतोस्यश्श्विब्भ्यान्त्वैष ते योनिर्म्माद्ध्वीब्भ्यान्त्वा ॥११॥

॥६॥ तम्प्रत्नथा पूर्व्वथा ब्विश्श्वथेमथा ज्ज्येष्ठतातिम्बर्हिषदꣳ स्वर्व्विदम् । प्रतीचीनँव्वृजनन्दोहसे धुनिमाशुञ्जयन्तमनु यासु ब्वर्द्धसे । उपयामगृहीतोसि शण्डाय त्त्वैष ते योनिर्व्वीरताम्पाह्यपमृष्टः शण्डो देवास्त्वा शुक्रपाः प्प्रणयन्त्वनाधृष्टासि ॥१२॥

सुवीरो व्वीरान्प्रजनयन्परीह्यभि रायस्प्पोषेण यजमानम् । सञ्जग्ग्मानो दिवा पृथिव्या शुक्रः शुक्रशोचिषा निरस्तः शण्डः शुक्रस्याधिष्ठानमसि ॥१३॥

अच्छिन्नस्य ते देव सोम सुवीर्य्यस्य रायस्प्पोषस्य ददितारः स्याम । सा प्प्रथमा सँस्कृतिर्व्विश्श्ववारा स प्प्रथमो व्वरुणो मित्रोऽअग्निः ॥१४॥

स प्प्रथमो बृहस्प्पतिश्चिकित्त्वाँस्तस्म्माऽइन्द्राय सुतमा जुहोत स्वाहा । तृम्पन्तु होत्रा मद्ध्वो याः स्विष्टा याः सुप्प्रीताः सुहुता यत्स्वाहायाडग्नीत् ॥१५॥

॥७॥ अयँव्वेनश्चोदयत्पृश्निगर्ब्भा ज्ज्योतिर्ज्जरायू रजसो व्विमाने । इममपाꣳ सङ्गमे सूर्य्यस्य शिशुन्न व्विप्प्रा मतिभी रिहन्ति । उपयामगृहीतोसि मर्क्काय त्वा ॥१६॥

मनो न येषु हवनेषु तिग्ग्मँव्विपः शच्च्या व्वनुथो द्द्रवन्ता । आ यः शर्य्याभिस्तुविनृम्म्णोऽअस्याश्श्रीणीतादिशङ्गभस्तावेष ते योनिः प्प्रजाः पाह्यपमृष्टो मर्क्को देवास्त्वा मन्थिपाः प्प्रणयन्त्वनाधृष्टासि ॥१७॥

सुप्प्रजाः प्प्रजाः प्प्रजनयन्परीह्यभि रायस्प्पोषेण यजमानम् । सञ्जग्ग्मानो दिवा पृथिव्या मन्थी मन्थिशोचिषा निरस्तो मर्क्को मन्थिनोधिष्ठानमसि ॥१८॥

॥८॥ ये देवासो दिव्येकादश स्त्थ पृथिव्यामद्ध्येकादश स्त्थ । अप्प्सुक्षितो महिनैकादश स्त्थ ते देवासो यज्ञमिमञ्जुषद्ध्वम् ॥१९॥

उपयामगृहीतोस्याग्ग्रयणोसि स्वाग्ग्रयणः । पाहि यज्ञम्पाहि यज्ञपतिँव्विष्ण्णुस्त्वामिन्द्रियेण पातु व्विष्ण्णुन्त्वम्पाह्यभि सवनानि पाहि ॥२०॥

सोमः पवते सोमः पवतेस्म्मै ब्रह्मणेस्म्मै क्षत्रायास्म्मै सुन्न्वते यजमानाय पवतऽइषऽऊर्ज्जे पवतेद्ब्भ्यऽओषधीब्भ्यः पवते द्यावापृथिवीब्भ्याम्पवते सुभूताय पवते व्विश्श्वेब्भ्यस्त्वा देवेब्भ्यऽएष ते योनिर्व्विश्श्वेब्भ्यस्त्वा देवेब्भ्यः ॥२१॥

॥९॥ उपयामगृहीतोसीन्द्राय त्वा बृहद्वते व्वयस्वतऽउक्क्थाव्यङ्गृह्णामि । यत्तऽइन्द्र बृहद्वय-

स्त्तस्म्मै त्त्वा व्विष्ण्णवे त्त्वैष ते योनिरुक्क्थेब्भ्यस्त्त्वा देवेब्भ्यस्त्त्वा देवाव्व्यँय्यज्ञस्यायुषे ॥१४॥
गृह्णामि मित्त्रावरुणाब्भ्यान्त्वा ॥२२॥
मित्त्रावरुणाब्भ्यान्त्वा देवाव्व्यँय्यज्ञस्यायुषे गृह्णामीन्द्राय त्त्वा देवाव्व्यँय्यज्ञस्यायुषे ॥१५॥
गृह्णामीन्द्राग्ग्निब्भ्यान्त्वा देवाव्व्यँय्यज्ञस्यायुषे गृह्णामीन्द्रावरुणाब्भ्यान्त्वा देवाव्व्यँ-
य्यज्ञस्यायुषे गृह्णामीन्द्राबृहस्प्पतिब्भ्यान्त्वा देवाव्व्यँय्यज्ञस्यायुषे गृह्णामीन्द्रा- ॥१६॥
विष्ण्णुब्भ्यान्त्वा देवाव्व्यँय्यज्ञस्यायुषे गृह्णामि ॥२३॥

॥१०॥ मूर्द्धानन्दिवोऽअरतिम्पृथिव्व्या व्वैश्श्वानरमृतऽआजातमग्ग्निम् । ॥१७॥
कविꣳ सम्म्राजमतिथिञ्ज्जनानामासन्ना पात्रञ्ज्जनयन्त देवाः ॥२४॥
उपयामगृहीतोसि द्ध्रुवोसि द्ध्रुवक्क्षितिर्द्ध्रुवाणान्ध्रुवतमोच्च्युतानामच्च्युतक्क्षित्तमऽएष ॥१८॥
ते योनिर्व्वैश्श्वानराय त्त्वा । ध्रुवन्ध्रुवेण मनसा व्वाचा सोममवनयामि । अथा नऽइन्द्र
ऽइद्विशोसपत्नाः समनसस्क्करत् ॥२५॥

॥११॥ यस्त्ते द्रप्प्स स्क्कन्दति यस्त्तेऽअꣳशुर्ग्ग्रावच्च्युतो धिषणयोरुपस्त्थात् । ॥१९॥
अद्ध्वर्य्योर्व्वा परि व्वा यः पवित्रात्तन्ते जुहोमि मनसा व्वषट्कृतꣳ स्वाहा देवाना-
मुत्क्रमणमसि ॥२६॥

॥१२॥ प्राणाय मे व्वर्च्चोदा व्वर्च्चसे पवस्व व्यानाय मे व्वर्च्चोदा व्वर्च्चसे पवस्वोदानाय मे व्वर्च्चोदा ॥२०॥
व्वर्च्चसे पवस्व व्वाचे मे व्वर्च्चोदा व्वर्च्चसे पवस्व क्क्रतूदक्क्षाब्भ्याम्मे व्वर्च्चोदा व्वर्च्चसे पवस्व ॥२१॥
श्श्रोत्राय मे व्वर्च्चोदा व्वर्च्चसे पवस्व चक्क्षुर्ब्भ्याम्मे व्वर्च्चोदसौ व्वर्च्चसे पवेथामात्त्मने
मे ॥२७॥
आत्त्मने मे व्वर्च्चोदा व्वर्च्चसे पवस्वौजसे मे व्वर्च्चोदा व्वर्च्चसे पवस्वायुषे मे व्वर्च्चोदा ॥२२॥
व्वर्च्चसे पवस्व व्विश्श्वाब्भ्यो मे प्प्रजाब्भ्यो व्वर्च्चोदसौ व्वर्च्चसे पवेथाम् ॥२८॥
कोसि कतमोसि कस्यासि को नामासि । यस्य ते नामामन्महि यन्त्वा सोमेना-
तीतृपाम । भूर्ब्भुवः स्वः सुप्प्रजाः प्प्रजाभिः स्याꣳ सुवीरो व्वीरैः सुपोषः ॥२३॥
पोषैः ॥२९॥

॥१३॥ उपयामगृहीतोसि मधवे त्त्वोपयामगृहीतोसि माधवाय त्त्वोपयामगृहीतोसि शुक्क्राय
त्त्वोपयामगृहीतोसि शुचये त्त्वोपयामगृहीतोसि नभसे त्त्वोपयामगृहीतोसि ॥२४॥
नभस्याय त्त्वोपयामगृहीतोसीषे त्त्वोपयामगृहीतोस्यूर्ज्जे त्त्वोपयामगृहीतोसि सहसे
त्त्वोपयामगृहीतोसि सहस्याय त्त्वोपयामगृहीतोसि तपसे त्त्वोपयामगृहीतोसि तपस्याय ॥२५॥
त्त्वोपयामगृहीतोस्यꣳहसस्प्पतये त्त्वा ॥३०॥

॥१४॥ इन्द्राग्नीऽआगतꣳ सुतङ्गीर्ब्भिर्न्नभो व्वरेण्ण्यम् । अस्य पातन्धियेषिता । उपयामगृहीतोसीन्द्राग्निब्भ्यान्त्वैष ते योनिरिन्द्राग्निब्भ्यान्त्वा ॥३१॥

॥१५॥ आ घा येऽअग्निमिन्धते स्तृणन्ति बर्हिरानुषक् । येषामिन्द्रो युवा सखा । उपयामगृहीतोस्यग्नीन्द्राब्भ्यान्त्वैष ते योनिरग्नीन्द्राब्भ्यान्त्वा ॥३२॥

॥१६॥ ओमासश्चर्षणीधृतो व्विश्श्वे देवासऽआगत । दाश्वाꣳसो दाशुषः सुतम् । उपयामगृहीतोसि विश्श्वेब्भ्यस्त्वा देवेब्भ्यऽएष ते योनिर्व्विश्श्वेब्भ्यस्त्वा देवेब्भ्यः ॥३३॥

॥१७॥ व्विश्श्वे देवासऽआगत शृणुता मऽइमꣳ हवम् । एदम्बर्हिर्न्निषीदत । उपयामगृहीतोसि व्विश्श्वेब्भ्यस्त्वा देवेब्भ्यऽएष ते योनिर्व्विश्श्वेब्भ्यस्त्वा देवेब्भ्यः ॥३४॥

॥१८॥ इन्द्र मरुत्त्वऽइह पाहि सोमँय्यथा शार्य्यातेऽअपिबः सुतस्य । तव प्प्रणीती तव शूर शर्म्मन्नाविवासन्ति कवयः सुयज्ज्ञाः । उपयामगृहीतोसीन्द्राय त्वा मरुत्त्वतऽएष ते योनिरिन्द्राय त्वा मरुत्त्वते ॥३५॥

॥१९॥ मरुत्त्वन्तँव्वृषभँव्वावृधानमकवारिन्दिव्व्यꣳ शासमिन्द्रम् । व्विश्श्वासाहमवसे नूतनायोग्रꣳ सहोदामिह तꣳ हुवेम । उपयामगृहीतोसीन्द्राय त्वा मरुत्त्वतऽएष ते योनिरिन्द्राय त्वा मरुत्त्वते ।

॥२०॥ उपयामगृहीतोसि मरुतान्त्वौजसे ॥३६॥

॥२१॥ सजोषाऽइन्द्र सगणो मरुद्भिः सोमम्पिब व्वृत्रहा शूर व्विद्वान् । जहि शत्रूँ२॥रप मृधो नुदस्वाथाभयङ्कृणुहि व्विश्श्वतो नः । उपयामगृहीतोसीन्द्राय त्वा मरुत्त्वतऽएष ते योनिरिन्द्राय त्वा मरुत्त्वते ॥३७॥

॥२२॥ मरुत्त्वाँ२॥ऽइन्द्र व्वृषभो रणाय पिबा सोममनुष्ष्वधम्मदाय । आसिञ्चस्व जठरे मद्ध्वऽऊर्म्मिन्त्वꣳ राजासि प्प्रतिपत्त्सुतानाम् । उपयामगृहीतोसीन्द्राय त्वा मरुत्त्वतऽएष ते योनिरिन्द्राय त्वा मरुत्त्वते ॥३८॥

॥२३॥ महाँ२॥ऽइन्द्रो नृवदाचर्षणिप्प्राऽउत द्विबर्हाऽअमिनः सहोभिः । अस्म्मद्र्यग्ग्वावृधे व्वीर्य्यायोरुः पृथुः सुकृतः कर्त्तृभिर्ब्भूत् । उपयामगृहीतोसि महेन्द्राय त्वैष ते योनिर्म्महेन्द्राय त्वा ॥३९॥

॥२४॥ महाँ२॥ऽइन्द्रो यऽओजसा पर्ज्जन्यो व्वृष्टिमाँ२॥ऽइव । स्तोमैर्व्वत्सस्य व्वावृधे । उपयामगृहीतोसि महेन्द्राय त्वैष ते योनिर्म्महेन्द्राय त्वा ॥४०॥

॥२५॥ उदु त्त्यञ्जातवेदसन्देवँव्वहन्ति केतवः । दृशे व्विश्श्वाय सूर्य्यꣳ स्वाहा ॥४१॥
चित्रन्देवानामुदगादनीकञ्चक्षुर्म्मित्रस्य व्वरुणस्याग्नेः ।

आप्प्रा॒ द्यावा॑पृथि॒वीऽअ॒न्तरि॑क्क्ष॒ꣳ सूर्य्य॑ऽआ॒त्त्मा जग॑तस्त॒स्त्थुष॑श्च॒ स्वाहा॑ ॥४२॥
अग्ने॒ नय॑ सु॒पथा॑ रा॒येऽअ॒स्स्मान्विश्श्वा॑नि देव व॒युना॑नि वि॒द्द्वान् ।
यु॒योद्ध्य॒स्स्मज्जु॑हुरा॒णमेनो॒ भूयि॑ष्ठान्ते॒ नम॑ऽउक्क्तिँविधेम॒ स्वाहा॑ ॥४३॥
अ॒यन्नो॑ऽअ॒ग्निर्व्वरि॑वस्कृणोत्व॒यम्मृध॑÷ पु॒रऽए॑तु प्प्रभि॒न्दन् ।
अ॒यँव्वाजा॑ञ्जयतु॒ व्वाज॑साताव॒यꣳ शत्रू॑ञ्जयतु॒ जर्हृ॑षाण॒ꣳ स्वाहा॑ ॥४४॥
रू॒पेण॑ वो रू॒पम॒ब्भ्यागा॑न्तु॒थो वो॑ वि॒श्श्ववे॑दा॒ विभ॑जतु ।
ऋ॒तस्य॑ प॒था प्प्रेत॑ च॒न्द्रद॑क्क्षिणा वि॒स्व॑ꣳ पश्श्य॒ व्व्य॒न्तरि॑क्क्षँय्यत॑स्व स॒दस्स्यै॑÷ ॥४५॥
ब्रा॒ह्म॒णम॒द्य वि॑देयम्पि॒तृम॑न्तम्पैतृम॒त्त्यमृषि॑मार्षे॒यꣳ सु॒धातु॑दक्क्षिणम् ।
अ॒स्स्मद्रा॑ता देव॒त्रा गच्छत प्प्रदा॒तार॒मावि॑शत ॥४६॥
अ॒ग्नये॑ त्वा॒ मह्यँ॒व्वरु॑णो ददातु॒ सो॒मृत॒त्त्वम॑शी॒याயु॒र्द्दा॒त्रऽए॑धि॒ मयो॒ मह्य॒म्प्रतिग्रही॒त्रे रु॒द्राय॑ त्वा॒ मह्यँ॒व्वरु॑णो ददातु॒ सो॒मृत॒त्त्वम॑शीय प्प्रा॒णो दा॒त्रऽए॑धि॒ व्वयो॒ मह्य॒म्प्रतिग्रही॒त्रे बृह॒स्प्पत॑ये त्वा॒ मह्यँ॒व्वरु॑णो ददातु॒ सो॒मृत॒त्त्वम॑शीय॒ त्वग्दा॒त्रऽए॑धि॒ मयो॒ मह्य॒म्प्रतिग्रही॒त्रे य॒माय॑ त्वा॒ मह्यँ॒व्वरु॑णो ददातु॒ सो॒मृत॒त्त्वम॑शीय॒ हयो॑ दा॒त्रऽए॑धि॒ व्वयो॒ मह्य॒म्प्रतिग्रही॒त्रे ॥४७॥
को॑दा॒त्कस्स्मा॑ऽअदा॒त्कामो॑दा॒त्कामा॑यादात् ।
कामो॑ दा॒ता काम॑÷ प्प्रतिग्रही॒ता कामै॒तत्ते॑ ॥४८॥

॥ इति सप्तमोऽध्यायः ॥

अथाष्टमोऽध्यायः

ऋषिः (१) 'उपयामगृहीतोसि' इत्यारभ्य (३२) 'मही द्यौः' इत्यन्तानां सामान्यतः प्रजापतिर्ऋषिः । विशेषतश्च—
(४) 'यज्ञो देवानाम्' इत्यस्य कुत्सः, (६) 'वाममद्य' इत्यस्य बार्हस्पत्यो भरद्वाजः, (१५) 'समिन्द्र णः' इत्यस्यात्रिः, (२१) 'देवा गातुविदः' इत्यस्य मनसस्पतिः, (२३) 'उरुꣳ हि राजा' इत्यस्य शुनःशेपः, (३१) 'मरुतो यस्य' इत्यस्य गोतमः, (३२) 'मही द्यौः' इत्यस्य मेधातिथिः ।
(३३) 'आतिष्ठ वृत्रहन' इत्यस्य गोतमः, (३४) 'युक्ष्वा हि' इत्यस्य मधुच्छन्दाः, (३५) 'इन्द्रमिद्धरी' इत्यस्य गोतमः, (३६) 'यस्मान्न जातः' (३७) 'इन्द्रश्च सम्राट्' इत्यनयोर्विवस्वान् , (३८) 'अग्ने पवस्व' इत्यस्य वैखानसः, (३९) 'उत्तिष्ठन्नोजसा' इत्यस्य कुरुस्तुतिः, (४०) 'अदृश्रमस्य' इत्यस्य प्रस्कण्वः, (४१) 'उदु त्यम्' इत्यस्य देवाः, (४२) 'आजिघ्र कलशम्' (४३) 'इडे रन्ते' इत्यनयोः कुसुरुबिन्दुः, (४४) 'वि न इन्द्र' (४५) 'वाचस्पतिम्' (४६) 'विश्वकर्मन्' इत्येषां भारद्वाजः शासः ।
(४७) 'उपयाम० अग्नये त्वा' इत्यारभ्य (५३) 'दूरे चत्ताय' इत्यन्तानां देवास्तत्रापि—(५३) 'युवन्तमिन्द्रा' 'दूरे चत्ताय' इत्यनयोः परुच्छेपः ।
(५४) 'परमेष्ठ्यभिधीतः' इत्यारभ्य (६३) 'आपवस्व' इत्यन्तानां वसिष्ठस्तत्रापि–(६३) 'आपवस्व' इत्यस्य नैध्रुविः कश्यपः ॥

देवता (१) 'उपयाम० आदित्येभ्यः' इत्यस्य सोमः, 'विष्ण उरु' इत्यस्य विष्णुः ।

(२) 'कदा चन स्तरीः' इत्यस्यादित्यः, 'आदित्येभ्यस्त्वा' इत्यस्यादित्यग्रहः ।

(३) 'कदा चन प्रयुच्छसि' इत्यस्यादित्यः, 'आदित्येभ्यस्त्वा' इत्यस्यादित्यग्रहः ।

(४) 'यज्ञो देवानाम्' इत्यस्यादित्यः, 'आदित्येभ्यस्त्वा' इत्यस्यादित्यग्रहः ।

(५) 'विवस्वन्नादित्य' इत्यस्यादित्यः, 'श्रदस्मै नरः' इत्यस्याशीर्नरो वा ।

(६) 'वाममद्य' इत्यस्य सविता ।

(७) 'उपयाम० सावित्रोसि' इत्यस्य सविता ।

(८) 'उपयाम० सुशर्मासि' 'एष ते योनिः' इत्यनयोर्विश्वे देवाः ।

(९) 'उपयाम० बृहस्पतिसुतस्य' इत्यस्य लिङ्गोक्ता, 'अहम्परस्तात्' इत्यस्य प्रजापतिरूप आत्मा ।

(१०) 'अग्ना३इ' इत्यस्याग्निः, 'प्रजापतिर्वृषासि' इत्यस्य प्रजापतिः ।

(११) 'उपयाम० हरिरसि' इत्यस्य ऋक्सामे, 'हर्योर्धानाः' इत्यस्य लिङ्गोक्ताः ।

(१२) 'यस्ते अश्वसनिः' इत्यस्य लिङ्गोक्ता ।

(१३) 'देवकृतस्य' 'मनुष्यकृतस्य' 'पितृकृतस्य' 'आत्मकृतस्य' 'एनस एनसः' 'यच्चाहमेनः' इत्येषामग्निः ।

(१४) 'सं वर्चसा' इत्यस्य त्वष्टा ।

(१५) 'समिन्द्र णः' इत्यस्य विश्वे देवाः ।

(१६) 'सं वर्चसा' इत्यस्य त्वष्टा ।

(१७) 'धाता रातिः' इत्यस्य लिङ्गोक्ता ।

(१८) 'सुगा वः' इत्यस्य देवाः ।

(१९) 'याँ आवह' (२०) 'वयꣳ हि' इत्यनयोरग्निः ।

(२१) 'देवा गातुविदः' इत्यस्य वातः ।

(२२) 'यज्ञ यज्ञम्' 'एष ते यज्ञः' इत्यनयोर्लिङ्गोक्ता ।

(२३) 'माहिर्भूः' इत्यस्य रज्जुः, 'उरुꣳ हि' इत्यस्य वरुणः, 'नमो वरुणाय' इत्यस्य वरुणः ।

(२४) 'अग्नेरनीकम्' इत्यस्याग्निः ।

(२५) 'समुद्रे ते' इत्यस्य सोमः ।

(२६) 'देवीरापः' इत्यस्यापः, 'देव सोमैष' इत्यस्य सोमः ।

(२७) 'अवभृथ निचुम्पुण' इत्यस्य यज्ञः, 'देवानाꣳ समिदसि' इत्यस्याग्निः ।

(२८) 'एजतु दशमास्यः' इत्यस्य गर्भः ।

(२९) 'यस्यै ते' इत्यस्य वशा ।

(३०) 'पुरुदस्मो विषुरूपः' इत्यस्य गर्भः ।

(३१) 'मरुतो यस्य' इत्यस्य मरुतः ।

(३२) 'मही द्यौः' इत्यस्य द्यावापृथिव्यौ ।

(३३) 'आतिष्ठ वृत्रहन्' इत्यस्येन्द्रः, 'उपयाम० इन्द्राय' इत्यस्य सोमः, 'एष ते योनिः' इत्यस्य षोडशिग्रहः ।

(३४) 'युक्ष्वा हि' इत्यस्येन्द्रः, 'उपयाम० इन्द्राय' इत्यस्य सोमः, 'एष ते योनिः' इत्यस्य षोडशिग्रहः ।

(३५) 'इन्द्रमिद्धरी' इत्यस्येन्द्रः, 'उपयाम० इन्द्राय' इत्यस्य सोमः, 'एष ते योनिः' इत्यस्य षोडशिग्रहः ।

(३६) 'यस्मान्न जातः' इत्यस्येन्द्रः ।

(३७) 'इन्द्रश्च सम्राट्' इत्यस्येन्द्रावरुणौ षोडशी वा ।

(३८) 'अग्ने पवस्व' इत्यस्याग्निः, 'उपयाम० अग्नये' इत्यस्य सोमः, 'एष ते योनिः' इत्यस्य ग्रहः, 'अग्ने वर्चस्विन्' इत्यस्याग्निः ।

(३९) 'उत्तिष्ठन्नोजसा' इत्यस्य सोमः, 'उपयाम० इन्द्राय' इत्यस्य सोमः, 'एष ते योमिः' इत्यस्य ग्रहः, 'इन्द्रौजिष्ठ' इत्यस्येन्द्रः ।

(४०) 'अदृश्रमस्य' इत्यस्य सूर्यः, 'उपयाम० सूर्याय' इत्यस्य सोमः, 'एष ते योनिः' इत्यस्य ग्रहः, 'सूर्य भ्राजिष्ठ' इत्यस्य सूर्यः ।

(४१) 'उदु त्यम्' इत्यस्य सूर्यः, 'उपयाम० सूर्याय' इत्यस्य सोमः, 'एष ते योनिः' इत्यस्य ग्रहः ।

(४२) 'आजिघ्र कलशम्' (४३) 'इडे रन्ते' इत्यनयोर्गौः ।

(४४) 'वि न इन्द्र' इत्यस्येन्द्रः, 'उपयाम० इन्द्राय' इत्यस्य सोमः, 'एष ते योनिः' इत्यस्य ग्रहः ।

(४५) 'वाचस्पतिम्' इत्यस्य विश्वकर्मा, 'उपयाम० इन्द्राय' इत्यस्य सोमः, 'एष ते योनिः' इत्यस्य ग्रहः ।

(४६) 'विश्वकर्मन्' इत्यस्येन्द्रो विश्वकर्मा, 'उपयाम० इन्द्राय' इत्यस्य सोमः, 'एष ते योनिः' इत्यस्य ग्रहः ।

(४७) 'उपयाम० अग्नये त्वा' 'इन्द्राय त्वा' 'विश्वेभ्यस्त्वा' 'अनुष्टुप्ते' इत्येषामदाभ्यः ।

(४८) 'म्रेशीनान्त्वा' (४९) 'ककुभꣳ रूपम्' 'तस्मै ते' (५०) 'उशिक्त्वम्' 'वशी त्वम्' 'अस्मत्सखा' 'विश्वेषान्देवानाम्' इत्येषां सोमः ।

(५१) 'इह रतिः' इत्यस्य पशवः, 'उपसृजन्धरुणम्' इत्यस्याग्निः ।

(५२) 'सत्रस्य ऋद्धिः' इत्यस्य यजमानानामात्मा ।

(५३) 'युवन्तम्' इत्यस्येन्द्रापर्वतौ, 'दूरे चत्ताय' इत्यस्येन्द्रः, 'भूर्भुवः स्वः' इत्यस्याशीः ।

(५४) 'परमेष्ठ्यभिधीतः' 'प्रजापतिर्वाचि' 'अन्धो अच्छेतः' 'सविता सन्याम्' 'विश्वकर्मा दीक्षायाम्' 'पूषा सोमक्रयण्याम्' (५५) 'इन्द्रश्च मरुतश्च' 'असुरः पण्यमानः' 'मित्रः क्रीतः' 'विष्णुः शिपिविष्टः' 'विष्णुर्नरन्धिषः' (५६) 'सोम आगतः' 'वरुण आसन्द्याम्' 'अग्निराग्नीध्रे' 'इन्द्रो. हविर्धाने' 'अथर्वोपावह्रियमाणः' (५७) 'विश्वे देवाः' 'विष्णुराप्रीतपाः' 'यमः सूयमानः' 'विष्णुः सम्भ्रियमाणः' 'वायुः पूयमानः' 'शुक्रः पूतः' 'शुक्रः क्षीरश्रीः' 'मन्थी सक्तुश्रीः' (५८) 'विश्वे देवाः' 'असुर्होमाय' 'रुद्रो हूयमानः' 'वातोभ्यावृत्तः' 'नृचक्षाः प्रतिख्यातः' 'भक्षो भक्ष्यमाणः' 'पितरो नाराशꣳसाः' (५९) 'सन्नः सिन्धुः' 'समुद्रोभ्यवह्रियमाणः' 'सलिलः प्रप्लुतः' इत्येषां लिङ्गोक्ताः, 'ययोरोजसा' इत्यस्य विष्णुवरुणौ ।

(६०) 'देवान्दिवम्' इत्यस्य लिङ्गोक्ता ।

(६१) 'चतुस्त्रिꣳशत्' इत्यस्य घर्मः ।

(६२) 'यज्ञस्य दोहः' इत्यस्य यज्ञः ।

(६३) 'आपवस्व' इत्यस्य सोमः ॥

छन्दः(२) 'कदा चन' इत्यादिद्वयोर्बृहती, 'आदित्येभ्यस्त्वा' इति यजुः, (४) 'यज्ञो देवानाम्' इत्यस्य त्रिष्टुप् , (५) 'श्रदस्मै' इत्यस्य जगती, (६) 'वाममद्य' (९) 'अहस्परस्तात्' (१४) 'सं वर्चसा' इत्यारभ्य (२०) 'वयꣳ हि त्वा' इत्यन्तानां त्रिष्टुप्, (२१) 'देवा गातुविदः' इत्यस्य विराट्, (२३) 'उरुꣳ हि राजा' (२४) 'अग्नेरनीकम्' इत्यनयोस्त्रिष्टुप् , (२५) 'समुद्रे ते' इत्यस्य विराट् , (२६) 'देवीरापः' इत्यस्य पङ्क्तिर्बृहती वा, (२८) 'एजतु दशमास्यः' इत्यस्य महापङ्क्तिः, (३१) 'मरुतो यस्य' (३२) 'मही द्यौः' इत्यनयोर्गायत्री, (३३) 'आतिष्ठ वृत्रहन्' (३४) 'युक्ष्वा हि' (३५) 'इन्द्रमिद्धरी' इत्येषामनुष्टुप्, (३६) 'यस्मान्न जातः' (३७) 'इन्द्रश्च सम्राट्' इत्यनयोस्त्रिष्टुप्, 'सह प्राणेन' इति यजुः, (३८) 'अग्ने पवस्व' (३९) 'उत्तिष्ठन्नोजसा' (४०) 'अदृश्रमस्य' इत्येषां गायत्री, सर्वेषामन्ते यजूंषि, (४१) 'उदु त्यम्' इत्यस्य गायत्री, (४२) 'आजिघ्र कलशम्' इत्यस्य महापङ्क्तिः, (४३) 'इडे रन्ते' इत्यस्य प्रस्तारपङ्क्तिः, (४४) 'वि न इन्द्र' इत्यस्यानुष्टुप् , (४५) 'वाचस्पतिम्' (४६) 'विश्वकर्मन्' इत्यनयोस्त्रिष्टुप्, (५१) 'उपसृजन्धरुणम्' इत्यस्योष्णिक् , (५२) 'सत्रस्य ऋद्धिः' इत्यस्य बृहती, (५३) 'युवन्तमिन्द्रा' 'दूरे चत्ताय' इत्यनयोरत्यष्टिः, (५९) 'ययोरोजसा' इत्यस्य त्रिष्टुप् , (६१) 'चतुस्त्रिꣳशत्' इत्यस्य पङ्क्तिस्त्रिष्टुब्वा, (६२) 'यज्ञस्य दोहः' इत्यस्य त्रिष्टुप् , (६३) 'आपवस्व' इत्यस्य गायत्री ॥

॥ हरिःॐ ॥

॥१॥ उ॒प॒या॒मगृ॑हीतोस्यादि॒त्त्येभ्य॑स्त्वा ।
विष्ण॑ऽउरुगा॒यैष ते॒ सोम॒स्तꣳ रक्ष॑स्व॒ मा त्वा॑ दभन् ॥१॥

कदा चन स्तरीरसि नेन्द्र सश्चसि दाशुषे ।
उपोपेन्नु मघवन्भूयऽइन्नु ते दानन्देवस्य पृच्यतऽआदित्त्येब्भ्यस्त्वा ॥२॥
कदा चन प्प्रयुच्छस्युभे निपासि जन्मनी ।
तुरीयादित्त्य सवनन्तऽइन्द्रियमातस्त्थावमृतन्दिव्व्यादित्त्येब्भ्यस्त्वा ॥३॥
यज्ञो देवानाम्प्रत्त्येति सुम्नमादित्त्यासो भवता मृडयन्तः ।
आ वोर्वाची सुमतिर्ववृत्त्यादꣳहोश्चिद्या वरिवोवित्तरासदादित्त्येब्भ्यस्त्वा ॥४॥
विवस्वन्नादित्त्यैष ते सोमपीथस्तस्मिन्मत्त्स्व । श्रदस्मै नरो वचसे दधातन यदाशीर्दा दम्पती वाममश्नुतः । पुमान्पुत्रो जायते विन्दते वस्वधा विश्श्वाहारपऽएधते
गृहे ॥५॥

॥२॥ वाममद्य सवितर्वाममु श्वो दिवेदिवे वाममस्मभ्यꣳ सावीः ।
वामस्य हि क्षयस्य देव भूरेरया धिया वामभाजः स्याम ॥६॥
उपयामगृहीतोसि सावित्रोसि चनोधाश्चनोधाऽअसि चनो मयि धेहि ।
जिन्व यज्ञञ्जिन्व यज्ञपतिम्भगाय देवाय त्वा सवित्रे ॥७॥

॥३॥ उपयामगृहीतोसि सुशर्म्मासि सुप्प्रतिष्ठानो बृहदुक्षाय नमः ।
विश्श्वेब्भ्यस्त्वा देवेब्भ्यऽएष ते योनिर्विश्श्वेब्भ्यस्त्वा देवेब्भ्यः ॥८॥

॥४॥ उपयामगृहीतोसि बृहस्प्पतिसुतस्य देव सोम तऽइन्दोरिन्द्रियावतः पत्नीवतो ग्ग्रहाँ॥ऽऋद्ध्यासम् । अहम्परस्तादहमवस्ताद्यदन्तरिक्षन्तदु मे पिताभूत् । अहꣳ सूर्य्यमुभयतो ददर्शाहन्देवानाम्परमङ्गुहा यत् ॥९॥
अग्ना३॥ऽइ पत्नीवन्त्सजूर्देवेन त्वष्ट्रा सोमम्पिब स्वाहा । प्रजापतिर्वृषासि रेतोधा
रेतो मयि धेहि प्प्रजापतेस्त्ते वृष्ण्णो रेतोधसो रेतोधामशीय ॥१०॥

॥५॥ उपयामगृहीतोसि हरिरसि हारियोजनो हरिब्भ्यान्त्वा ।
हर्य्योर्द्धाना स्त्थ सहसोमाऽइन्द्राय ॥११॥
यस्तेऽअश्श्वसनिर्ब्भक्षो यो गोसनिस्तस्य तऽइष्टयजुषस्तुतस्तोमस्य शस्तोक्थस्योपहूतस्योपहूतो भक्षयामि ॥१२॥
देवकृतस्यैनसोवयजनमसि मनुष्यकृतस्यैनसोवयजनमसि पितृकृतस्यैनसोवयजनमस्यात्मकृतस्यैनसोवयजनमस्येनसऽएनसोवयजनमसि । यच्चाहमेनो विद्वाँश्चकार
यच्चाविद्वाँस्तस्य सर्व्वस्यैनसोवयजनमसि ॥१३॥

सँव्वर्च॑सा॒ पय॑सा॒ सन्त॒नूभि॒रग॑न्न्महि॒ मन॑सा॒ स॒ꣳ शि॒वेन॑ ।
त्वष्टा॑ सु॒दत्रो॒ व्विद॑धातु॒ रायो॑नुमार्ष्टु त॒न्न्वो॒ यद्विलि॑ष्टम् ॥१४॥

॥६॥ समि॑न्द्र णो॒ मन॑सा नेषि॒ गोभि॒ः सꣳ सू॒रिभि॑र्म्मघव॒न्त्सꣳ स्व॒स्त्या ।
सम्ब्रह्म॑णा दे॒वकृ॑तँ॒यद॑स्ति॒ सन्दे॒वाना॑ꣳ सुम॒तौ य॒ज्ञिया॑ना॒ꣳ स्वाहा॑ ॥१५॥
सँव्वर्च॑सा॒ पय॑सा॒ सन्त॒नूभि॒रग॑न्न्महि॒ मन॑सा॒ स॒ꣳ शि॒वेन॑ ।
त्वष्टा॑ सु॒दत्रो॒ व्विद॑धातु॒ रायो॑नुमार्ष्टु त॒न्न्वो॒ यद्विलि॑ष्टम् ॥१६॥
धा॒ता रा॒तिः स॑वि॒तेदञ्जु॑षन्ताम्प्र॒जाप॑ति॒र्न्निधि॒पा दे॒वोऽअ॒ग्निः ।
त्वष्टा॒ व्विष्णु॑ः प्र॒जया॑ सꣳररा॒णा यज॑मानाय॒ द्रवि॑णन्दधात॒ स्वाहा॑ ॥१७॥
सु॒गा वो॑ देवा॒ः सद॑नाऽअकर्म्म॒ यऽआ॑ज॒ग्मेदꣳ सव॑नञ्जुषा॒णाः ।
भर॑माणा॒ व्वह॑माना ह॒वीꣳष्य॒स्मे ध॑त्त व्वसवो॒ व्वसू॑नि॒ स्वाहा॑ ॥१८॥
या२ँ॥ऽआव॑हऽउश॒तो दे॑व दे॒वाँस्तान्प्रेर॑य॒ स्वेऽअ॑ग्ने स॒धस्थे॑ ।
ज॒क्षि॒वाꣳस॑ः पपि॒वाꣳस॑श्च॒ व्विश्वे॑सु॒ङ्घर्म्मꣳ स्व॒राति॑ष्ठ॒तान॒ स्वाहा॑ ॥१९॥
व्व॒यꣳ हि त्वा॑ प्रय॒ति य॒ज्ञेऽअ॒स्म्मिन्नग्ग्ने॒ होता॑रमवृ॑णीमही॒ह ।
ऋध॑गया॒ऽऋध॑गु॒ताश॑मिष्ठाः प्र॒जान॑न्यु॒ज्ञमु॒पया॑हि व्वि॒द्वान्त्स्वाहा॑ ॥२०॥
देवा॑ गातुविदो गा॒तुँव्वि॒त्त्वा गा॒तुमि॑त ।
मन॑सस्पतऽइ॒मन्दे॑व य॒ज्ञꣳ स्वाहा॒ व्वाते॑ धाः ॥२१॥
यज्ञ॑ य॒ज्ञङ्ग॑च्छ य॒ज्ञप॑तिङ्गच्छ॒ स्वाँय्योनि॑ङ्गच्छ॒ स्वाहा॑ ।
ए॒ष ते॑ य॒ज्ञो य॑ज्ञपते स॒हसू॑क्तवाकः॒ सर्व्व॑वीर॒स्तञ्जु॑षस्व॒ स्वाहा॑ ॥२२॥

७॥ माहि॑र्भू॒र्म्मा पृदा॑कुः । उ॒रुꣳ हि राजा॒ व्वरु॑णश्च॒कार॒ सूर्य्या॑य॒ पन्था॒मन्न्वे॑त॒वाऽउ॑ ।
अ॒पदे॒ पादा॒ प्प्रति॑धातवेकरु॒ताप॑व॒क्ता हृ॑दया॒विध॑श्चित् ।
नमो॒ व्वरु॑णाया॒भिष्ठि॑तो॒ व्वरु॑णस्य॒ पाशः॑ ॥२३॥
अ॒ग्नेरनी॑कम॒पऽआवि॑वेशा॒पान्नपा॑त्प्प्रति॒रक्ष॑न्नसु॒र्य्य॑म् ।
दमे॑दमे स॒मिधँ॑यक्ष्यग्ने॒ प्प्रति॑ ते जि॒ह्वा घृ॒तमुच्च॑रण्ण्य॒त्त्स्वाहा॑ ॥२४॥
स॒मु॒द्रे ते॒ हृद॑यम॒प्स्व॒न्तः सन्त्वा॑ व्विश॒न्त्वोष॑धीरु॒तापः॑ ।
य॒ज्ञस्य॑ त्वा यज्ञपते सू॒क्तोक्तौ नमोवा॒के व्वि॑धेम॒ यत्स्वाहा॑ ॥२५॥
देवी॑रापऽए॒ष वो॒ गर्भ॒स्तꣳ सुप्प्री॑त॒ꣳ सुभृ॑तम्बिभृत ।
देव॑ सोमै॒ष ते॑ लो॒कस्तस्मि॒ञ्छञ्च॒ व्वक्ष्व॒ परि॑ च व्वक्ष्व ॥२६॥

अवभृथ निचुम्पुण निचेरुरसि निचुम्पुणः । अव देवैर्देवकृतमेनोयासिषमव मर्त्यैर्म्मर्त्यकृतम्पुरुराव्णो देव रिषस्पाहि ।?देवानाᳫं समिदसि ॥२७॥ ?

॥८॥ एजतु दशमास्यो गर्ब्भो जरायुणा सह । यथायँव्वायुरेजति यथा समुद्रऽएजति । एवायन्दशमास्योऽअस्रज्जरायुणा सह ॥२८॥

यस्यै ते यज्ञियो गर्ब्भो यस्यै योनिर्हिरण्ययी । अङ्गान्यह्रुता यस्य तम्मात्रा समजीगमᳫं स्वाहा ॥२९॥

पुरुदस्मो विषुरूपऽइन्दुरन्तर्म्महिमानमानञ्ज धीर÷ । एकपदीन्द्विपदीन्त्रिपदीञ्चतुष्पदीमष्टापदीम्भुवनानु प्प्रथन्ताᳫं स्वाहा ॥३०॥

मरुतो यस्य हि क्षये पाथा दिवो विमहसः । स सुगोपातमो जन÷ ॥३१॥

मही द्यौः पृथिवी च नऽइमँय्यज्ञम्मिमिक्षताम् । पिपृतान्नो भरीमभिः ॥३२॥

॥९॥ आतिष्ठ वृत्रहन्रथँय्युक्ता ते ब्रह्मणा हरी । अर्वाचीनꣳ सु ते मनो ग्रावा कृणोतु वग्नुना । उपयामगृहीतोसीन्द्राय त्वा षोडशिनऽएष ते योनिरिन्द्राय त्वा षोडशिने ॥३३॥

॥१०॥ युक्ष्वा हि केशिना हरी वृषणा कक्ष्यप्प्रा । अथा नऽइन्द्र सोमपा गिरामुपश्श्रुतिञ्चर । उपयामगृहीतोसीन्द्राय त्वा षोडशिनऽएष ते योनिरिन्द्राय त्वा षोडशिने ॥३४॥

॥११॥ इन्द्रमिद्धरी वहतोप्प्रतिधृष्टशवसम् । ऋषीणाञ्च स्तुतीरुप यज्ञञ्च मानुषाणाम् । उपयामगृहीतोसीन्द्राय त्वा षोडशिनऽएष ते योनिरिन्द्राय त्वा षोडशिने ॥३५॥

॥१२॥ यस्मान्न जातः परोऽअन्न्योऽअस्ति यऽआविवेश भुवनानि विश्श्वा । प्रजापतिः प्प्रजया सꣳरराणस्त्रीणि ज्योतीᳫंषि सचते स षोडशी ॥३६॥

इन्द्रश्च सम्म्राड्वरुणश्च राजा तौ ते भक्षञ्चक्रतुरग्ग्रऽएतम् । तयोरहमनु भक्षम्भक्षयामि वाग्देवी जुषाणा सोमस्य तृप्प्यतु सह प्प्राणेन स्वाहा ॥३७॥

॥१३॥ अग्ग्ने पवस्व स्वपाऽअस्म्मे वर्च्च÷ सुवीर्य्यम् । दधद्रयिम्मयि पोषम् । उपयामगृहीतोस्यग्ग्नये त्वा वर्च्चसऽएष ते योनिरग्ग्नये त्वा वर्च्चसे । अग्ग्ने वर्च्चस्विन्वर्च्चस्वाँस्त्वन्देवेष्वसि वर्च्चस्वानहम्मनुष्ष्येषु भूयासम् ॥३८॥

॥१४॥ उत्तिष्ठन्नोजसा सह पीत्त्वी शिप्प्रेऽअवेपयः । सोममिन्द्र चमूसुतम् । उपयामगृहीतोसीन्द्राय त्वौजसऽएष ते योनिरिन्द्राय त्वौजसे । इन्द्रौजिष्ठौजिष्ठस्त्वन्देवेष्ष्वस्योजिष्ठोहम्मनुष्ष्येषु भूयासम् ॥३९॥

॥१५॥ अदृ॑श्श्रमस्य के॒तवो॒ वि र॒श्मयो॒ जनाँ॒२॥ऽअनु॑ । भ्राज॑न्तोऽअ॒ग्नयो॑ यथा । उ॒प॒या॒मगृ॑हीतोसि॒ सूर्य्या॑य त्वा ब्भ्रा॒जायै॒ष ते॒ योनि॒ः सूर्य्या॑य त्वा ब्भ्रा॒जाय॑ । सूर्य्य॑ ब्भ्राजिष्ठ॒ ब्भ्राजि॑ष्ठ॒स्त्वन्दे॒वेष्व॑सि॒ ब्भ्राजि॑ष्ठो॒हम्म॑नु॒ष्ये॒षु भूयासम् ॥४०॥

॥१६॥ उदु॒ त्यञ्जा॒तवे॑दसन्दे॒वँव्व॑हन्ति के॒तव॑ः । दृ॒शे विश्श्वा॑य॒ सूर्य॑म् । उ॒प॒या॒मगृ॑हीतोसि॒ सूर्य्या॑य त्वा ब्भ्रा॒जायै॒ष ते॒ योनि॒ः सूर्य्या॑य त्वा ब्भ्रा॒जाय॑ ॥४१॥

॥१७॥ आजि॑घ्र क॒लश॑म्म॒ह्या त्वा॑ व्विश॒न्त्विन्द॑व॒ः । पुन॑रू॒र्ज्जा निव॑र्त्तस्व॒ सा न॑ः स॒हस्र॑न्धुक्ष्वो॒रुधा॑रा॒ पय॑स्वती॒ पुन॒र्म्मावि॑शताद्र॒यिः ॥४२॥

इडे॒ रन्ते॒ हव्ये॒ काम्म्ये॒ चन्द्रे॒ ज्योतेऽदि॑ति॒ सर॑स्वति॒ महि॒ व्विश्श्रु॑ति ।
ए॒ता ते॑ऽअघ्न्ये॒ नामा॑नि दे॒वेब्भ्यो॑ मा सु॒कृत॑म्ब्रूतात् ॥४३॥

॥१८॥ वि न॑ऽइन्द्र॒ मृधो॑ जहि नी॒चा य॑च्छ पृतन्य॒तः । यो॑ऽअ॒स्माँ२॥ऽअ॑भि॒दास॒त्त्यध॑रङ्गम॒या तम॑ः । उ॒प॒या॒मगृ॑हीतो॒सीन्द्रा॑य त्वा व्वि॒मृध॑ऽए॒ष ते॒ योनि॒रिन्द्रा॑य त्वा व्वि॒मृधे॑ ॥४४॥

॥१९॥ व्वा॒चस्प्पतिँ॑व्वि॒श्श्वक॑र्म्माणमू॒तये॑ मनो॒जुवँ॒व्वाजे॑ऽअ॒द्या हु॑वेम । स नो॒ व्विश्श्वा॑नि॒ हव॑नानि जोषद्वि॒श्श्वश॑म्भूरव॑से सा॒धुक॑र्म्मा । उ॒प॒या॒मगृ॑हीतो॒सीन्द्रा॑य त्वा व्वि॒श्श्वक॑र्म्मण॑ऽए॒ष ते॒ योनि॒रिन्द्रा॑य त्वा व्वि॒श्श्वक॑र्म्मणे ॥४५॥

॥२०॥ व्विश्श्व॑कर्म्मन्ह॒विषा॒ व्वर्द्ध॑नेन त्रा॒तार॒मिन्द्र॑मकृणोरव॒ध्यम् । तस्म्मै॒ व्विश॒ः सम॑नमन्त पू॒र्व्वीर॒यमु॒ग्रो व्वि॒हव्यो॒ यथास॑त् । उ॒प॒या॒मगृ॑हीतो॒सीन्द्रा॑य त्वा व्वि॒श्श्वक॑र्म्मण॑ऽए॒ष ते॒ योनि॒रिन्द्रा॑य त्वा व्वि॒श्श्वक॑र्म्मणे ॥४६॥

॥२१॥ उ॒प॒या॒मगृ॑हीतोस्य॒ग्नये॑ त्वा गाय॒त्रच्छ॑न्दसङ्गृह्णा॒मीन्द्रा॑य त्वा त्रि॒ष्टुप्प्छ॑न्दसङ्गृह्णामि॒ व्विश्श्वे॑ब्भ्यस्त्वा दे॒वेब्भ्यो॒ जग॑च्छन्दसङ्गृह्णाम्म्यनु॒ष्टुप्प्ते॑भिग॒रः ॥४७॥

व्रेशी॑नान्त्वा॒ पत्म॑न्न॒ाधू॑नोमि कुकू॒नना॑नान्त्वा॒ पत्म॑न्न॒ाधू॑नोमि भ॒न्दना॑नान्त्वा॒ पत्म॑न्न॒ाधू॑नोमि म॒दिन्त॑मानान्त्वा॒ पत्म॑न्न॒ाधू॑नोमि म॒धुन्त॑मानान्त्वा॒ पत्म॑न्न॒ाधू॑नोमि शु॒क्रन्त्वा॑ शु॒क्रऽआधू॑नो॒म्म्यह्नो॑ रू॒पे सूर्य्य॑स्य र॒श्मिम्म॑षु॒ ॥४८॥

क॒कु॒भꣳ रू॒पँव्वृ॑ष॒भस्य॑ रोचते बृ॒हच्छु॒क्रः शु॒क्रस्य॑ पु॒रो॒गाः सोम॒ः सोम॑स्य पु॒रो॒गाः । यत्ते॑ सो॒मादा॑ब्भ्य॒न्नाम॒ जागृ॑वि॒ तस्म्मै॑ त्वा गृह्णामि॒ तस्म्मै॑ ते सोम॒ सोमा॑य॒ स्वाहा॑ ॥४९॥

उ॒शिक्त्वन्दे॑व सोमा॒ग्नेः प्प्रि॒यम्पाथोपी॑हि व्व॒शी त्वन्दे॑व सो॒मेन्द्र॑स्य प्प्रि॒यम्पाथोपी॑ह्य॒स्म्मत्स॑खा॒ त्वन्दे॑व सोम॒ व्विश्श्वे॑षान्दे॒वाना॑म्प्प्रि॒यम्पाथोपी॑हि ॥५०॥

॥२२॥ इह रतिरिह रमद्ध्वमिह धृतिरिह स्वधृतिः स्वाहा । उपसृजन्धरुणम्मात्रे धरुणो मातरन्धयन् । रायस्प्पोषमस्म्मासु दीधरत्स्वाहा ॥५१॥

सत्रस्यऽऋद्धिरस्यगन्म ज्ज्योतिरमृताऽअभूम । दिवम्पृथिव्व्याऽअद्ध्यारुहामाविदाम देवान्त्स्वर्ज्ज्योतिः ॥५२॥

युवन्तमिन्द्रापर्व्वता पुरोयुधा यो नः पृतन्न्यादप तन्तमिद्धतँव्वज्ज्रेण तन्तमिद्धतम् । दूरे चत्ताय च्छन्त्सद्गहनँय्यदिनक्षत् । अस्म्माकꣳ शत्रून्परि शूर व्विश्श्वतो दर्म्मा दर्षीष्ट व्विश्श्वतः । भूर्भुवः स्वः सुप्प्रजाः प्प्रजाभिः स्याम सुवीरा व्वीरैः सुपोषाः पोषैः ॥५३॥

॥२३॥ परमेष्ठ्यभिधीतः प्प्रजापतिर्व्वाचि व्व्याहृतायामन्धोऽअच्छेतः
सविता सन्न्याँव्विश्श्वकर्म्मा दीक्षायाम्पूषा सोमक्क्रयण्ण्यामिन्द्रश्च ॥५४॥

इन्द्रश्च मरुतश्च क्क्रयायोपोत्त्थितोसुरः पण्ण्यमानो मित्रः क्क्रीतो व्विष्ण्णुः शिपिविष्टऽऊरावासन्नो व्विष्ण्णुर्न्नरन्धिषः प्प्रोह्यमाणः सोमः ॥५५॥

प्प्रोह्यमाणः सोमऽआगतो व्वरुणऽआसन्द्यामासन्नोग्निराग्नीद्ध्रऽइन्द्रो हविर्द्धानेथर्व्वोपावह्रियमाणो व्विश्श्वे देवाः ॥५६॥

व्विश्श्वे देवाऽअꣳशुषु न्न्युप्तो व्विष्ण्णुराप्प्रीतपाऽआप्प्याय्यमानो यमः सूयमानो व्विष्ण्णुः सम्भ्रियमाणो व्वायुः पूयमानः शुक्क्रः पूतः शुक्क्रः क्क्षीरश्श्रीर्म्मन्थी सक्क्तुश्श्रीर्व्विश्श्वे देवाः ॥५७॥

व्विश्श्वे देवाश्च्चमसेषून्नीतोसुर्होमायोद्यतो रुद्द्रो हूयमानो व्वातोभ्यावृत्तो नृचक्क्षाः प्प्रतिक्ख्यातो भक्क्षो भक्क्ष्यमाणः पितरो नाराशꣳसाः सन्नः सिन्धुः ॥५८॥

सन्नः सिन्धुरवभृथायोद्यतः समुद्द्रोभ्यवह्रियमाणः सलिलः प्प्रप्प्लुतो ययोरोजसा स्क्कभिता रजाꣳसि व्वीर्य्येभिर्व्वीरतमा शविष्ट्ठा । या पत्त्येतेऽअप्प्रतीता सहोभिर्व्विष्ण्णूऽअगन्व्वरुणा पूर्व्वहूतौ ॥५९॥

देवान्दिवमगन्न्यज्ञस्ततो मा द्रविणमष्ट्टु मनुष्ष्यानन्तरिक्क्षमगन्न्यज्ञस्ततो मा द्रविणमष्ट्टु पितॄन्पृथिवीमगन्न्यज्ञस्ततो मा द्रविणमष्ट्टु यङ्कञ्च लोकमगन्न्यज्ञस्ततो मे भद्द्रमभूत् ॥६०॥

चतुस्त्त्रिꣳशत्तन्तवो ये व्वितत्निरे यऽइमँय्यज्ञꣳ स्वधया ददन्ते । तेषाञ्छिन्नꣳ सम्व्वेतद्दधामि स्वाहा घर्म्मोऽअप्प्येतु देवान् ॥६१॥

य॒ज्ञस्य॒ दो॑हो॒ व्वित॑तः पुरु॒त्त्रा सो॑ऽअ॒ष्ट्टधा॒ दिव॑म॒न्न्वात॑तान । स य॑ज्ञ धुक्क्ष्व॒ महि॑
मे प्प्र॒जाया॑ꣳ रा॒यस्प्पोषँ॒व्विश्श्व॒मायु॑रशीय॒ स्वाहा॑ ॥६२॥
आप॑वस्व॒ हिर॑ण्ण्यव॒दश्श्व॑वत्त्सोम॒ व्वी॒रव॑त् । व्वाज॒ङ्गोम॑न्त॒माभ॑र॒ स्वाहा॑ ॥६३॥

॥ इत्यष्टमोऽध्यायः ॥

अथ नवमोऽध्यायः

ऋषिः (१) 'देव सवितः' इत्यारभ्य (३४) 'वसवस्त्रयोदशाक्षरेण' इत्यन्तानां सामान्यतो बृहस्पतिरिन्द्रश्च ऋषी । विशेषतश्च—

(१४) 'एष स्य' (१५) 'उत स्मास्य' इत्यनयोर्वामदेव्यो दधिक्रावा, (१६) 'शन्नो भवन्तु' इत्यस्य वसिष्ठः, (१७) 'ते नो अर्वन्तः' इत्यस्य नाभानेदिष्ठः, (१८) 'वाजेवाजे' (१९) 'आ मा' इत्यनयोर्वसिष्ठः. (२६) 'सोमꣳ राजानम्' इत्यादित्रयाणां तापसः ।

(३५) 'एष ते निर्ऋते' इत्यस्य वरुणः, 'अग्निनेत्रेभ्यः' इत्यारभ्य (४०) 'इमन्देवाः' इत्यन्तानां वरुणो देवाश्च, तत्रापि–(३७) 'अग्ने सहस्व' इत्यस्य भारतौ देवश्रवोदेववातौ ।

देवता (१) 'देव सवितः' इत्यस्य सविता ।

(२) 'ध्रुवसदन्त्वा' इत्यस्येन्द्रः, 'उपयाम० इन्द्राय' इत्यस्य सोमः, 'एष ते योनिः' इत्यस्य ग्रहः, 'अप्सुषदम्' इत्यस्येन्द्रः, 'उपयामगृहीतः' 'एष ते योनिः' इत्यनयोः क्रमेण सोमग्रहौ, 'पृथिविसदम्' इत्यस्येन्द्रः, 'उपयामगृहीतः' 'एष ते योनिः' इत्यनयोः क्रमेण सोमग्रहौ ।

(३) 'अपाꣳ रसम्' इत्यस्य रसः, 'उपयामगृहीतः' 'एष ते योनिः' इत्यनयोः क्रमेण सोमग्रहौ ।

(४) 'ग्रहा ऊर्जाहुतयः' इत्यस्य लिङ्गोक्ता, 'उपयामगृहीतः' 'एष ते योनिः' इत्यनयोः क्रमेण सोमग्रहौ, 'संम्पृचौ स्थः' 'विपृचौ स्थः' इत्यनयोर्लिङ्गोक्ता ।

(५) 'इन्द्रस्य वज्रः' इत्यस्य रथः, 'वाजस्य नु' इत्यस्य पृथिवी, 'तस्यान्नो देवः' इत्यस्य सविता ।

(६) 'अप्स्वन्तः' इत्यस्याश्वः, 'देवीरापः' इत्यस्यापः ।

(७) 'वातो वा' (८) 'वातरꣳहा भव' (९) 'जवो यस्ते' 'वाजिनो वाजजितः' इत्येषामश्वः ।

(१०) 'देवस्याहम्' इत्यादिचतुर्णाम्, (११) 'बृहस्पते वाजम्' 'इन्द्र वाजम्' इत्यनयोः, (१२) 'एषा वः' इत्यादिद्वयोः, (१३) 'देवस्याहम्' 'बृहस्पतेर्वाजजितः' इत्यनयोश्च लिङ्गोक्ता, 'वाजिनो वाजजितः' (१४) 'एष स्य' (१५) 'उत स्मास्य' (१६) 'शन्नो भवन्तु' (१७) 'ते नो अर्वन्तः' (१८) 'वाजेवाजे' इत्येषामश्वः ।

(१९) 'आ मा' इत्यस्य प्रजापतिः, 'वाजिनो वाजजितः' इत्यस्याश्वः ।

(२०) 'आपये स्वाहा' 'स्वापये स्वाहा' 'अपिजाय स्वाहा' 'क्रतवे स्वाहा' 'वसवे स्वाहा' 'अहर्पतये स्वाहा' 'अह्ने मुग्धाय' 'मुग्धाय वैनꣳशिनाय' 'विनꣳशिन आन्त्यायनाय' 'अन्त्याय भौवनाय' 'भुवनस्य पतये' 'अधिपतये स्वाहा' (२१) 'आयुर्यज्ञेन' 'प्राणो यज्ञेन' 'चक्षुर्यज्ञेन' 'श्रोत्रं यज्ञेन' 'पृष्ठं यज्ञेन' 'यज्ञो यज्ञेन' इत्येषां प्रजापतिः, 'प्रजापतेः प्रजाः' 'स्वर्देवाः' 'अमृता अभूम' इत्येषां यजमानः ।

(२२) 'अस्मे वः' इत्यस्य दिशः, 'नमो मात्रे' इत्यस्य पृथिवी, 'इयन्ते' इत्यस्यासन्दी, 'यन्तासि' इत्यस्य सुम्वन् ।

(२३) 'वाजस्येमम्' (२४) 'वाजस्येमाम्' (२५) 'वाजस्य नु' इत्येषां प्रजापतिः ।

(२६) 'सोमानꣳ राजानम्' इत्यस्य विश्वे देवाः ।

(२७) 'अर्यमणम्' इत्यस्य लिङ्गोक्ता ।

(२८) 'अग्ने अच्छावदेह' इत्यस्याग्निः ।
(२९) 'प्र नो यच्छतु' इत्यस्य लिङ्गोक्ता ।
(३०) 'देवस्य त्वा' इत्यस्य सविता, 'सरस्वत्यै वाचः' इत्यस्य सुन्वन् ।
(३१) 'अग्निरेकाक्षरेण' 'अश्विनौ द्व्यक्षरेण' 'विष्णुस्त्र्यक्षरेण' 'सोमश्चतुरक्षरेण' (३२) 'पूषा पञ्चाक्षरेण' 'सविता षडक्षरेण' 'मरुतः सप्ताक्षरेण' 'बृहस्पतिरष्टाक्षरेण' (३३) 'मित्रो नवाक्षरेण' 'वरुणो दशाक्षरेण' 'इन्द्र एकादशाक्षरेण' 'विश्वे देवा द्वादशाक्षरेण' (३४) 'वसवस्त्रयोदशाक्षरेण' 'रुद्राश्चतुर्दशाक्षरेण' 'आदित्याः पञ्चदशाक्षरेण' 'अदितिः षोडशाक्षरेण' 'प्रजापतिः सप्तदशाक्षरेण' इत्येषां लिङ्गोक्ता ।
(३५) 'एष ते निर्ऋते' इत्यस्य पृथिवी, 'अग्निनेत्रेभ्यः' 'यमनेत्रेभ्यः' 'विश्वदेवनेत्रेभ्यः' 'मित्रावरुणनेत्रेभ्यः' 'सोमनेत्रेभ्यः' (३६) 'ये देवा अग्निनेत्राः' 'ये देवा यमनेत्राः' 'ये देवा विश्वदेवनेत्राः' 'ये देवा मित्रावरुणनेत्राः' 'ये देवाः सोमनेत्राः' इत्येषां देवाः ।
(३७) 'अग्ने सहस्व' इत्यस्याग्निः ।
(३८) 'देवस्य त्वा' इत्यस्य सविता, 'उपाꣳशोर्वीर्येण' 'रक्षसान्त्वा' 'अवधिष्म रक्षः' इत्येषां रक्षोहा ।
(३९) 'सविता त्वा' (४०) 'इमन्देवाः' इत्यनयोर्यजमानः ॥

छन्दः (१) 'देव सवितः' इत्यस्य त्रिष्टुप्, 'स्वाहा' इति यजुः, (३) 'अपाꣳ रसम्' (४) 'ग्रहा ऊर्जाहुतयः' इत्यनयोरनुष्टुप्, (५) 'वाजस्य नु' इत्यस्यातिजगती, (६) 'अप्स्वन्तः' इत्यस्य पुरउष्णिक्, (७) 'वातो वा' इत्यस्योष्णिक्, (८) 'वातरꣳहा भव' इत्यस्य त्रिष्टुप्, (९) 'जवो यस्ते' (१४) 'एष स्य वाजी' (१५) 'उत स्मास्य' इत्येषां जगती, 'स्वाहा' इति यजुः, (१६) 'शन्नो भवन्तु' इत्यस्य विराट्, (१७) 'ते नो अर्वन्तः' इत्यस्य जगती, (१८) 'वाजेवाजे' (१९) 'आ मा' (२३) 'वाजस्येमम्' (२४) 'वाजस्येमाम्' (२५) 'वाजस्य नु' इत्येषां त्रिष्टुप्, (२६) 'सोमꣳ राजानम्' (२७) 'अर्यमणम्' (२८) 'अग्ने अच्छावदेह' इत्येषामनुष्टुप्, (२९) 'प्र नो यच्छतु' इत्यस्य गायत्री, (३७) 'अग्ने सहस्व' इत्यस्यानुष्टुप् ॥

॥ हरिः ॐ ॥

॥१॥ देव॑ सवितुः प्प्रसु॑व य॒ज्ञम्प्रसु॑व य॒ज्ञप॑तिम्भगा॑य । दि॒व्यो ग॑न्ध॒र्व्वः केतु॒पूः केत॑न्नः पुनातु ब्वा॒चस्प्पति॒र्ब्वाज॑न्नः स्वदतु॒ स्वाहा॑ ॥१॥

ध्रु॒व॒सद॑न्त्वा नृ॒षद॑म्मनः॒सद॑मुपया॒मगृ॑हीतो॒सीन्द्रा॑य त्वा॒ जुष्ट्ट॑ङ्गृह्णाम्म्येष॒ ते॒ योनि॒रिन्द्रा॑य त्वा॒ जुष्ट्ट॑तमम् । अ॒प्प्सु॒षद॑न्त्वा घृत॒सद॑ँव्योम॒सद॑मुपया॒मगृ॑हीतो॒सीन्द्रा॑य त्वा॒ जुष्ट्ट॑ङ्गृह्णाम्म्येष॒ ते॒ योनि॒रिन्द्रा॑य त्वा॒ जुष्ट्ट॑तमम् । पृथि॒वि॒सद॑न्त्वान्तरिक्क्ष॒सद॑न्दिवि॒सद॑न्देव॒सद॑न्नाक॒सद॑मुपया॒मगृ॑हीतो॒सीन्द्रा॑य त्वा॒ जुष्ट्ट॑ङ्गृह्णाम्म्येष॒ ते॒ योनि॒रिन्द्रा॑य त्वा॒ जुष्ट्ट॑तमम् ॥२॥

अ॒पाꣳ रस॒मुद्द्व॑यस॒ꣳ सूर्य्ये॒ सन्त॑ꣳ स॒माहि॑तम् । अ॒पाꣳ रस॑स्य॒ यो रस॒स्त्तँव्वो॑ गृह्णाम्म्युत्तम॑मुपया॒मगृ॑हीतो॒सीन्द्रा॑य त्वा॒ जुष्ट्ट॑ङ्गृह्णाम्म्येष॒ ते॒ योनि॒रिन्द्रा॑य त्वा॒ जुष्ट्ट॑तमम् ॥३॥

ग्रहा॑ऽऊर्ज्जाहु॒तयो॒ व्यन्तो॒ ब्विप्प्रा॑य म॒तिम् । तेषाँ॒ब्विशि॑प्प्रियाणाँ॒ब्वो॒हमिष॒मूर्ज्ज॒ꣳ सम॑ग्ग्रभमुपया॒मगृ॑हीतो॒सीन्द्रा॑य त्वा॒ जुष्ट्ट॑ङ्गृह्णाम्म्येष॒ ते॒ योनि॒रिन्द्रा॑य त्वा॒ जुष्ट्ट॑तमम् । स॒म्पृचौ॑ स्त्थः॒ सम्मा॑ भ॒द्द्रेण॑ पृङ्क्तँ॒ब्वि॒पृचौ॑ स्त्थो॒ ब्वि मा॑ पा॒प्मना॑ पृङ्क्तम् ॥४॥

॥२॥ इन्द्र॑स्य॒ व्वज्ज्रो॑सि व्वाज॒सास्त्वया॒यँव्वाज॑ꣳ सेत्। व्वाज॑स्य॒ नु प्प्र॑स॒वे मा॒तर॑म्म॒हीमदि॑ति॒न्नाम॒ वच॑सा करामहे। यस्या॑मि॒दँव्विश्श्व॒म्भुव॑नमावि॒वेश॒ तस्या॑न्नो दे॒वः स॑वि॒ता धर्म्म॑ साविषत्॥५॥

अ॒प्प्स्व॒न्तर॒मृत॑म॒प्प्सु भे॑षज॒म॒पामु॒त प्प्रश॑स्ति॒ष्ष्वश्श्वा॒ भव॑त व्वा॒जिन॑ः।
देवी॑रापो॒ यो व॑ऽऊ॒र्म्मिः प्प्र॒तूर्त्तिः क॒कुन्मा॑न्वाज॒सास्तेना॒यँव्वाज॑ꣳ सेत्॥६॥
व्वा॒तो वा॒ मनो॑ वा गन्ध॒र्व्वाः स॒प्तवि॑ꣳशतिः।
तेऽअग्ग्रेऽश्श्व॑मयुञ्जँस्तेऽअ॑स्म्मिञ्ज॒वमाद॑धुः॥७॥
व्वात॑ꣳहा भव व्वाजिन्न्यु॒ज्ज्यमा॑न॒ऽइन्द्र॑स्येव॒ दक्षि॑णः श्रि॒यैधि।
यु॒ञ्जन्तु॑ त्त्वा म॒रुतो॑ व्वि॒श्श्ववे॑दस॒ऽआ ते॒ त्त्वष्टा॑ प॒त्त्सु ज॒वन्द॑धातु॥८॥
ज॒वो यस्ते॑ व्वाजि॒न्निहि॑तो॒ गुहा॒ यः श्ये॒ने परी॑त्तो॒ऽअच॑रच्च॒ व्वाते॑। तेन॑ नो व्वाजि॒न्बल॑वा॒न्बले॑न व्वाज॒जिच्च॒ भव॒ सम॑ने च पारयि॒ष्ण्णुः। व्वा॒जिनो॑ व्वाजजितो॒ व्वाज॑ꣳ सरि॒ष्ष्यन्तो॑ बृह॒स्प्पते॑र्ब्भा॒गमव॑जिग्घ्रत॥९॥

॥३॥ दे॒वस्या॒हꣳ स॑वि॒तुः स॒वे स॒त्त्यस॑वसो॒ बृह॒स्प्पते॑रुत्त॒मन्नाक॑ꣳ रुहेयम्। दे॒वस्या॒हꣳ स॑वि॒तुः स॒वे स॒त्यस॑वस॒ऽइन्द्र॑स्योत्त॒मन्नाक॑ꣳ रुहेयम्। दे॒दस्या॒हꣳ स॑वि॒तुः स॒वे स॒त्त्यप्प्र॑सवसो॒ बृह॒स्प्पते॑रुत्त॒मन्नाक॑मरुहम्। दे॒वस्या॒हꣳ स॑वि॒तुः स॒वे स॒त्त्यप्प्र॑सवस॒ऽइन्द्र॑स्योत्त॒मन्नाक॑मरुहम्॥१०॥

बृह॑स्प्पते॒ व्वाज॑ञ्जय॒ बृह॒स्प्पत॑ये॒ व्वाचँ॑व्वदत॒ बृह॒स्प्पतिँ॒व्वाज॑ञ्जापयत।
इन्द्र॒ व्वाज॑ञ्जयेन्द्रा॑य॒ व्वाचँ॑व्वद॒तेन्द्रँ॒व्वाज॑ञ्जापयत॥११॥
एषा व॒ः सा स॒त्त्या सँ॒व्वाग॑भू॒द्यया॒ बृह॒स्प्पतिँ॒व्वाज॒मजी॑जपु॒ताजी॑जपत॒ बृह॒स्प्पतिँ॒व्वाजँ॒व्वन॑स्प्पतयो॒ व्विमु॑च्च्यद्ध्वम्। एषा व॒ः सा स॒त्त्या सँ॒व्वाग॑भू॒द्येन्द्रँ॒व्वाज॒मजी॑जपु॒ताजी॑जपतेन्द्रँ॒व्वाजँ॒व्वन॑स्प्पतयो॒ व्विमु॑च्च्यद्ध्वम्॥१२॥
दे॒वस्या॒हꣳ स॑वि॒तुः स॒वे स॒त्त्यप्प्र॑सवसो॒ बृह॒स्प्पते॑र्व्वाज॒जितो॒ व्वाज॑ञ्जेषम्।
व्वा॒जिनो॑ व्वाजजि॒तोद्ध्व॑न स्क्क॒भ्नु॒वन्तो॒ योज॑ना॒ मिमा॑नाः काष्ट्ठा॑ङ्गच्छत॥१३॥
ए॒ष स्य व्वा॒जी क्षि॑प॒णिन्तु॑रण्ण्यति ग्ग्री॒वाया॑म्ब॒द्धोऽअ॑पिक॒क्षऽआ॒सनि॑।
क्रतु॑न्दधि॒क्क्राऽअनु॑ स॒ꣳसनि॑ष्ष्यदत्प॒थामङ्का॒ꣳस्यन्वा॒पनी॑फण॒त्स्वाहा॑॥१४॥
उ॒त स्म्मा॑स्य॒ द्द्रव॑तस्तुरण्ण्य॒तः प॒र्ण्णन्न वेर॑नुवाति प्प्रग॒र्द्धिन॑ः।
श्ये॒नस्ये॑व॒ ध्रज॑तोऽअङ्क॒सम्परि॑ दधि॒क्क्राव्ण्ण॑ः स॒होर्ज्जा तरि॑त्रतः॒ स्वाहा॑॥१५॥

शन्नो भवन्तु वाजिनो हवेषु देवताता मितद्द्रवः स्वर्क्काः ।
जम्भयन्तोहिंवृकꣳ रक्षाꣳसि सनेम्म्यस्म्मद्युयवन्नमीवाः ॥१६॥
ते नोऽअर्वन्तो हवनश्श्रुतो हवँव्विश्श्वे श्शृण्ण्वन्तु वाजिनो मितद्द्रवः ।
सहस्रसा मेधसाता सनिष्ष्यवो महो ये धनꣳ समिथेषु जब्भ्रिरे ॥१७॥
वाजेवाजेवत वाजिनो नो धनेषु व्विप्प्राऽअमृताऽऋतज्ज्ञाः ।
अस्य मद्ध्वः पिबत मादयद्ध्वन्तृप्प्ता यात पथिभिर्द्देवयानैः ॥१८॥
आ मा वाजस्य प्प्रसवो जगम्म्यादेमे द्यावापृथिवी व्विश्श्वरूपे । आ मा गन्ताम्पितरा
मातरा चा मा सोमोऽअमृतत्त्वेन गम्म्यात् । वाजिनो वाजजितो वाजꣳ ससृवाꣳसो
बृहस्प्पतेर्ब्भागमवजिग्घ्रत निमृजानाः ॥१९॥

॥४॥ आपये स्वाहा स्वापये स्वाहापिजाय स्वाहा क्क्रतवे स्वाहा व्वसवे स्वाहाहर्प्पतये
स्वाहाह्ने मुग्ग्धाय स्वाहा मुग्ग्धाय वैनꣳशिनाय स्वाहा व्विनꣳशिनऽआन्त्यायनाय
स्वाहान्त्याय भौवनाय स्वाहा भुवनस्य पतये स्वाहाधिपतये स्वाहा ॥२०॥
आयुर्य्यज्ञेन कल्प्पताम्प्राणो यज्ञेन कल्प्पताञ्चक्षुर्य्यज्ञेन कल्प्पताꣳ श्श्रोत्रँ-
य्यज्ञेन कल्प्पताम्पृष्ठँय्यज्ञेन कल्प्पताँय्यज्ञो यज्ञेन कल्प्पताम् ।
प्रजापतेः प्प्रजाऽअभूम स्वर्द्देवाऽअगन्ममामृताऽअभूम ॥२१॥
अस्म्मे वोऽअस्त्विन्द्रियमस्म्मे नृम्म्णमुत क्क्रतुरस्म्मे वर्च्चाꣳसि सन्तु वः । नमो मात्रे
पृथिव्व्यै नमो मात्रे पृथिव्व्याऽइयन्ते राड्यन्तासि यमनो द्ध्रुवोसि धरुणः । कृष्यै त्त्वा
क्क्षेमाय त्त्वा रय्यै त्त्वा पोषाय त्त्वा ॥२२॥

॥५॥ वाजस्येमम्प्रसवः सुषुवेग्ग्रे सोमꣳ राजानमोषधीष्ष्वप्प्सु ।
ताऽअस्म्मब्भ्यम्मधुमतीर्ब्भवन्तु वयꣳ राष्ट्रे जागृयाम पुरोहिताः स्वाहा ॥२३॥
वाजस्येमाम्प्रसवः शिश्श्रिये दिवमिमा च व्विश्श्वा भुवनानि सम्म्राट् ।
अदित्सन्तन्दापयति प्प्रजानन्त्स नो रयिꣳ सर्व्ववीरन्नियच्छतु स्वाहा ॥२४॥
वाजस्य नु प्प्रसवऽआबभूवेमा च व्विश्श्वा भुवनानि सर्व्वतः ।
सनेमि राजा परियाति व्विद्द्वान्प्रजाम्पुष्टिँव्वर्द्धयमानोऽअस्म्मे स्वाहा ॥२५॥
सोमꣳ राजानमवसेग्निमन्न्वारभामहे ।
आदित्त्यान्व्विष्ण्णुꣳ सूर्य्यम्ब्रह्माणञ्च बृहस्प्पतिꣳ स्वाहा ॥२६॥
अर्य्यमणम्बृहस्प्पतिमिन्द्रन्दानाय चोदय ।
वाचँव्विष्ण्णुꣳ सरस्वतीꣳ सवितारञ्च वाजिनꣳ स्वाहा ॥२७॥

अग्ग्नेऽअच्छा व्वदेह नः प्प्रति नः सुमना भव ।
प्र नो यच्छ सहस्रजित्त्वꣳ हि धनदाऽअसि स्वाहा ॥२८॥
प्र नो यच्छत्त्वर्य्यमा प्प्र पूषा प्प्र बृहस्प्पतिः ।
प्र वाग्ग्देवी ददातु नः स्वाहा ॥२९॥

देवस्य त्त्वा सवितुः प्प्रसवेऽश्श्विनोर्ब्बाहुब्भ्याम्पूष्ष्णो हस्त्ताब्भ्याम् । सरस्वत्त्यै व्वाचो यन्तुर्य्यन्त्रियै दधामि बृहस्प्पतेष्ट्वा साम्म्राज्ज्येनाभिषिञ्चाम्म्यसौ ॥३०॥

॥६॥ अग्ग्निरेकाक्क्षरेण प्प्राणमुदजयत्तमुज्जेषमश्श्विनौ द्व्यक्क्षरेण द्विपदो मनुष्ष्यानुदजयतान्तानुज्जेषँ व्विष्ष्णुस्त्र्यक्क्षरेण त्त्रीँल्लोकानुदजयत्तानुज्जेषꣳ सोमश्च्चतुरक्क्षरेण चतुष्प्पदः पशूनुदजयत्तानुज्जेषम्पूषा पञ्चाक्क्षरेण ॥३१॥

पूषा पञ्चाक्क्षरेण पञ्च दिशऽउदजयत्ताऽउज्जेषꣳ सविता षडक्क्षरेण षडृतूनुदजयत्तानुज्जेषम्मरुतः सप्प्ताक्क्षरेण सप्प्त ग्ग्राम्म्यान्पशूनुदजयँस्तानुज्जेषम्बृहस्प्पतिरष्टाक्क्षरेण गायत्त्रीमुदजयत्तामुज्जेषम्मित्त्रो नवाक्क्षरेण ॥३२॥

मित्त्रो नवाक्क्षरेण त्त्रिवृतꣳ स्तोममुदजयत्तमुज्जेषँ व्वरुणो दशाक्क्षरेण व्विराजमुदजयत्तामुज्जेषमिन्द्रऽएकादशाक्क्षरेण त्त्रिष्टुभमुदजयत्तामुज्जेषँ व्विश्श्वे देवा द्वादशाक्क्षरेण जगतीमुदजयँस्तामुज्जेषँ व्वसवस्त्त्रयोदशाक्क्षरेण ॥३३॥

व्वसवस्त्त्रयोदशाक्क्षरेण त्त्रयोदशꣳ स्तोममुदजयँस्तमुज्जेषꣳ रुद्राश्च्चतुर्द्दशाक्क्षरेण चतुर्द्दशꣳ स्तोममुदजयँस्तमुज्जेषमादित्त्याः पञ्चदशाक्क्षरेण पञ्चदशꣳ स्तोममुदजयँस्तमुज्जेषमदितिः षोडशाक्क्षरेण षोडशꣳ स्तोममुदजयत्तमुज्जेषम्प्रजापतिः सप्प्तदशाक्क्षरेण सप्प्तदशꣳ स्तोममुदजयत्तमुज्जेषम् ॥३४॥

॥७॥ एष ते निर्ऋते भागस्त्तञ्जुषस्व स्वाहाग्ग्निनेत्त्रेब्भ्यो देवेब्भ्यः पुरःसद्भ्यः स्वाहा यमनेत्त्रेब्भ्यो देवेब्भ्यो दक्षिणासद्भ्यः स्वाहा व्विश्श्वदेवनेत्त्रेब्भ्यो देवेब्भ्यः पश्चात्त्सद्भ्यः स्वाहा मित्त्रावरुणनत्त्रेब्भ्यो वा मरुन्नेत्त्रेब्भ्यो वा देवेब्भ्यऽउत्तरासद्भ्यः स्वाहा सोमनेत्त्रेब्भ्यो देवेब्भ्यऽउपरिसद्भ्यो दुवस्वद्भ्यः स्वाहा ॥३५॥

ये देवाऽअग्ग्निनेत्त्राः पुरःसदस्त्तेब्भ्यः स्वाहा ये देवा यमनेत्त्रा दक्षिणासदस्त्तेब्भ्यः स्वाहा ये देवा व्विश्श्वदेवनेत्त्राः पश्चात्त्सदस्त्तेब्भ्यः स्वाहा ये देवा मित्त्रावरुणनेत्त्रा वा मरुन्नेत्त्रा वोत्तरासदस्त्तेब्भ्यः स्वाहा ये देवाः सोमनेत्त्राऽउपरिसदो दुवस्वन्तस्त्तेब्भ्यः स्वाहा ॥३६॥

अग्ग्ने सहस्व पृतनाऽअभिमातीरपास्य । दुष्ट्टरस्त्तरन्नरातीर्व्वर्च्चो धा यज्ञवाहसि ॥३७॥

दे॒वस्य॑ त्वा सवि॒तुः प्प्र॑स॒वे᳕ऽश्विनो॑र्ब्बा॒हुभ्या॑म्पू॒ष्ण्णो हस्त्ता॑भ्याम् । उ॒पा॒ꣳशोर्व्वी॒र्य्ये᳖ण जु॒होमि ह॒तꣳ रक्क्षः॒ स्वाहा॒ रक्क्षा॑सान्त्वा व॒धाया॒वधि॑ष्म्म॒ रक्क्षो॒वधि॑ष्म्मा॒मुम॒सौ ह॒तः ॥३८॥

स॒वि॒ता त्वा॑ स॒वाना॑ꣳ सुव॒ताम॒ग्निर्गृ॒हप॑तीना॒ꣳ सोमो॒ व॒नस्प्पती॑नाम् । बृह॒स्प्पति॑र्व्वा॒चऽइन्द्रो॒ ज्ज्यैष्ठ्या॑य रु॒द्रः प॒शुभ्यो॑ मि॒त्रः स॒त्त्यो व॑रु॒णो धर्म्म॑पतीनाम् ॥३९॥

इ॒मन्दे॑वाऽअसप॒त्त्नꣳ सु॑वद्ध्वम्मह॒ते क्क्ष॒त्राय॑ मह॒ते ज्ज्यैष्ठ्या॑य मह॒ते जान॑राज्ज्या॒येन्द्र॑स्येन्द्रि॒याय॑ । इ॒मम॒मुष्य॑ पु॒त्रम॒मुष्यै॑ पु॒त्रम॒स्यै वि॒शऽए॒ष वो॑मी॒ राजा॒ सोमो॒स्म्माक॑म्ब्राह्म॒णाना॒ꣳ राजा॑ ॥४०॥

॥ इति नवमोऽध्यायः ॥

अथ दशमोऽध्यायः

षिः (१) 'अपो देवाः' इत्यारभ्य (३०) 'सवित्रा प्रसवित्रा' इत्यन्तानां, (३१) 'वायुः पूतः' इत्यारभ्य (३४) 'पुत्रमिव' इत्यन्तानाञ्च सामान्यतो वरुण ऋषिः । विशेषतश्च—(२२) 'मा ते' इत्यस्य प्राजापत्यः संवरणः, (२४) 'हꣳसः शुचिषद्' इत्यस्य वामदेवः, (२७) 'निषसाद धृतव्रतः' इत्यस्य शुनःशेपः, (३१) 'अश्विभ्याम्पच्यस्व' इत्यारभ्य (३४) 'पुत्रमिव पितरौ' इत्यन्तानामश्विनौ, तत्रापि—(३२) 'कुविदङ्ग यवमन्तः' इत्यादित्रयाणां काक्षीवतः सुकीर्तिः ॥

वता (१) 'अपो देवाः' इत्यस्यापः ।

(२) 'वृष्ण ऊर्मिरसि' इत्यादिद्वयोः, 'वृषसेनोसि' इत्यादिद्वयोः, (३) 'अर्थेत स्थ' इत्यादिद्वयोः, 'ओजस्वती स्थः' इत्यादिद्वयोः, 'आपः परिवाहिणीः' इत्यादिद्वयोः, 'अपाम्पतिः' इत्यादिद्वयोः, 'अपाङ्गर्भः' इत्यादिद्वयोः, (४) 'सूर्यत्वचसः' इत्यादिद्वयोः, 'सूर्यवर्चसः' इत्यादिद्वयोः, 'मान्दाः' इत्यादिद्वयोः, 'व्रजक्षितः' इत्यादिद्वयोः, 'वाशा स्थ' इत्यादिद्वयोः, 'शविष्ठा स्थ' इत्यादिद्वयोः, 'शक्करी स्थ' इत्यादिद्वयोः. 'जनभृत स्थ' इत्यादिद्वयोः, 'विश्वभृत स्थ' इत्यादिद्वयोः, 'अपः स्वराजः' इत्यस्य च लिङ्गोक्ता, 'मधुमतीर्मधुमतीभिः' 'अनाधृष्टाः सीदत' इत्यनयोरापः ।

(५) 'सोमस्य त्विषिः' इत्यस्य चर्म, 'अग्नये स्वाहा' इत्यादिस्वाहान्तानां द्वादशानां, (६) 'पवित्रे स्थः' इत्यस्य च लिङ्गोक्ता, 'सवितुर्वः' 'अनिभृष्टमसि' इत्यनयोरापः ।

(७) 'सधमादो द्युम्निनीः' इत्यस्य वरुणः ।

(८) 'क्षत्रस्योल्बम्' इत्यादिचतुर्णां क्रमेण तार्प्यपाण्ड्वाधीवासउष्णीषाणि, 'इन्द्रस्य वार्त्रघ्नम्' इत्यस्य धनुः, 'मित्रस्यासि' 'वरुणस्यासि' इत्यनयोर्बाहू, 'त्वयायम्' इत्यस्य धनुः, 'हवासि' 'रुजासि' 'क्षुमासि' 'पातैनम्प्राञ्चम्' 'पातैनम्प्रत्यञ्चम्' 'पातैनन्तिर्यञ्चम्' इत्येषामिषवः ।

(९) 'आविर्मर्याः' इत्यस्य प्रजापतिः, 'आवित्तो अग्निः' 'आवित्त इन्द्रः' 'आवित्तौ मित्रावरुणौ' 'आवित्तः पूषा' 'आवित्ते द्यावापृथिवी' 'आवित्तादितिः' इत्येषां लिङ्गोक्ता ।

(१०) 'अवेष्टा दन्दशूकाः' इत्यस्य मृत्युहा, 'प्राचीमारोह' (११) 'दक्षिणामारोह' (१२) 'प्रतीचीमारोह' (१३) 'उदीचीमारोह' (१४) 'ऊर्ध्वामारोह' इत्येषां यजमानः, 'प्रत्यस्तन्नमुचेः' इत्यस्यासुरः ।

(१५) 'सोमस्य त्विषिः' इत्यस्य चर्म, 'मृत्योः पाहि' 'ओजोसि' इत्यनयो रुक्मः ।

(१६) 'हिरण्यरूपा उषसः' 'मित्रोसि' इत्यनयोर्मित्रावरुणौ ।

(१७) 'सोमस्य त्वा' 'अग्नेर्भ्राजसा' 'सूर्यस्य वर्चसा' 'इन्द्रस्येन्द्रियेण' (१८) 'इमन्देवाः' इत्येषां सुन्वन्यजमानः ।

(१९) 'प्र पर्वतस्य' इत्यस्यापः, 'विष्णोर्विक्रमणम्' 'विष्णोर्विक्रान्तम्' 'विष्णोः क्रान्तम्' इत्येषां लिङ्गोक्ता ।
(२०) 'प्रजापते न' इत्यस्य प्रजापतिः, 'रुद्र यत्ते' इत्यस्य रुद्रः ।
(२१) 'इन्द्रस्य वज्रः' 'मित्रावरुणयोः' 'अव्यथायै त्वा' 'मरुताम्प्रसवेन' 'अपाम मनसा' 'समिन्द्रियेण' इत्येषां लिङ्गोक्ता ।
(२२) 'मा ते' इत्यस्येन्द्रः ।
(२३) 'अग्नये गृहपतये' 'सोमाय वनस्पतये' 'मरुतामोजसे' 'इन्द्रस्येन्द्रियाय' इत्येषां लिङ्गोक्ता, 'पृथिवि मातः' इत्यस्य भूमिः ।
(२४) 'हꣳसः शुचिषद्' इत्यस्य सूर्यः ।
(२५) 'इयदसि' 'युङ्ङसि' इत्यनयोः शतमानौ, 'ऊर्गसि' इत्यस्य शाखा, 'इन्द्रस्य वाम्' इत्यस्य बाहू ।
(२६) 'स्योनासि' इत्यस्यासन्दी, 'क्षत्रस्य योनिः' इत्यस्याधीवासम्, 'स्योनामासीद' इत्यस्य सुन्वन्यजमानः ।
(२७) 'निषसाद धृतव्रतः' इत्यस्य वरुणः ।
(२८) 'अभिभूरसि' इत्यस्याक्षा यजमानो वा, 'ब्रह्मँस्त्वम्' 'वरुणोसि' 'इन्द्रोसि' 'रुद्रोसि' 'बहुकार श्रेयस्कर' इत्येषां लिङ्गोक्ता, 'इन्द्रस्य वज्रः' इत्यस्य स्फ्यः ।
(२९) 'अग्निः पृथुः' इत्यस्याग्निः, 'स्वाहाकृताः' इत्यस्याक्षाः ।
(३०) 'सवित्रा प्रसवित्रा' (३१) 'अश्विभ्याम्पच्यस्व' 'सरस्वत्यै पच्यस्व' 'इन्द्राय सुत्राम्णे' इत्येषां लिङ्गोक्ता, 'वायुः पूतः' इत्यस्य सोमः ।
(३२) 'कुविदङ्ग यवमन्तः' इत्यस्य सोमः, 'उपयाम० अश्विभ्यान्त्वा' इत्यस्य ग्रहः ।
(३३) 'युवꣳ सुरामम्' (३४) 'पुत्रमिव पितरौ' इत्यनयोरश्विसरस्वतीन्द्राः ॥

छन्दः (१) 'अपो देवाः' (७) 'सधमादो द्युम्निनीः' (१६) 'हिरण्यरूपा उषसः' इत्येषां त्रिष्टुप्, अन्त्ये 'मित्रोसि' इति यजुः, (१८) 'इमन्देवाः' इत्यस्यात्यष्टिः, (१९) 'प्र पर्वतस्य' (२०) 'प्रजापते न' (२२) 'मा ते' इत्येषां त्रिष्टुप्, द्वितीये 'अयममुष्य' इति यजुः, (२४) 'हꣳसः शुचिषद्' इत्यस्यातिजगती, (२७) 'निषसाद धृतव्रतः' (३१) 'वायुः पूतः' इत्यनयोर्गायत्री, (३२) 'कुविदङ्ग यवमन्तः' इत्यस्य त्रिष्टुप्, (३३) 'युवꣳ सुरामम्' इत्यस्यानुष्टुप्, (३४) 'पुत्रमिव पितरौ' इत्यस्य त्रिष्टुप् ॥

॥ हरिःॐ ॥

॥१॥ अपो देवा मधुमतीरगृब्भ्णन्नूर्ज्जस्वती राजस्वश्चितानाः ।
याभिर्म्मित्रावरुणावब्भ्यषिञ्चन्याभिरिन्द्रमनयन्नत्त्यरातीः ॥१॥

वृष्ण्णऽऊर्म्मिरसि राष्ट्रदा राष्ट्रम्मे देहि स्वाहा वृष्ण्णऽऊर्म्मिरसि राष्ट्रदा राष्ट्रममुष्म्मै देहि वृषसेनोसि राष्ट्रदा राष्ट्रम्मे देहि स्वाहा वृषसेनोसि राष्ट्रदा राष्ट्रममुष्म्मै देह्यर्त्थेत स्त्थ ॥२॥

अर्त्थेत स्त्थ राष्ट्रदा राष्ट्रम्मे दत्त स्वाहार्त्थेत स्त्थ राष्ट्रदा राष्ट्रममुष्म्मै दत्तौजस्वती स्त्थ राष्ट्रदा राष्ट्रम्मे दत्त स्वाहौजस्वती स्त्थ राष्ट्रदा राष्ट्रममुष्म्मै दत्तापः परिवाहिणी स्त्थ राष्ट्रदा राष्ट्रम्मे दत्त स्वाहापः परिवाहिणी स्त्थ राष्ट्रदा राष्ट्रममुष्म्मै दत्तापाम्पतिरसि राष्ट्रदा राष्ट्रम्मे देहि स्वाहापाम्पतिरसि राष्ट्रदा राष्ट्रममुष्म्मै देह्यपाङ्गर्ब्भोसि राष्ट्रदा राष्ट्रम्मे देहि स्वाहापाङ्गर्ब्भोसि राष्ट्रदा राष्ट्रममुष्म्मै देहि सूर्य्यत्त्वचस स्त्थ ॥३॥

सूर्य्यत्त्वचस स्त्थ राष्ट्रदा राष्ट्रम्मे दत्त स्वाहा सूर्य्यत्त्वचस स्त्थ राष्ट्रदा राष्ट्रममुष्मै दत्त सूर्य्यवर्च्चस स्त्थ राष्ट्रदा राष्ट्रम्मे दत्त स्वाहा सूर्य्यवर्च्चस स्त्थ राष्ट्रदा राष्ट्रममुष्मै दत्त मान्दा स्त्थ राष्ट्रदा राष्ट्रम्मे दत्त स्वाहा मान्दा स्त्थ राष्ट्रदा राष्ट्रममुष्मै दत्त व्रजक्षित स्त्थ राष्ट्रदा राष्ट्रम्मे दत्त स्वाहा व्रजक्षित स्त्थ राष्ट्रदा राष्ट्रममुष्मै दत्त वाशा स्त्थ राष्ट्रदा राष्ट्रम्मे दत्त स्वाहा वाशा स्त्थ राष्ट्रदा राष्ट्रममुष्मै दत्त शविष्ठा स्त्थ राष्ट्रदा राष्ट्रम्मे दत्त स्वाहा शविष्ठा स्त्थ राष्ट्रदा राष्ट्रममुष्मै दत्त शक्क्वरी स्त्थ राष्ट्रदा राष्ट्रम्मे दत्त स्वाहा शक्क्वरी स्त्थ राष्ट्रदा राष्ट्रममुष्मै दत्त जनभृत स्त्थ राष्ट्रदा राष्ट्रम्मे दत्त स्वाहा जनभृत स्त्थ राष्ट्रदा राष्ट्रममुष्मै दत्त विश्श्वभृत स्त्थ राष्ट्रदा राष्ट्रम्मे दत्त स्वाहा विश्श्वभृत स्त्थ राष्ट्रदा राष्ट्रममुष्मै दत्तापः स्वराज स्त्थ राष्ट्रदा राष्ट्रममुष्मै दत्त । मधुमतीर्म्मधुमतीभिः पृच्च्यन्ताम्महि क्षत्रङ्क्षत्रियाय वन्वानाऽअनाधृष्टाः सीदत सहौजसो महि क्षत्रङ्क्षत्रियाय दधतीः ॥४॥

॥२॥ सोमस्य त्त्विषिरसि तवेव मे त्त्विषिर्भूयात् । अग्नये स्वाहा सोमाय स्वाहा सवित्रे स्वाहा सरस्वत्यै स्वाहा पूष्णे स्वाहा बृहस्पतये स्वाहेन्द्राय स्वाहा घोषाय स्वाहा श्श्लोकाय स्वाहाᳫंशाय स्वाहा भगाय स्वाहार्य्यम्णे स्वाहा ॥५॥

पवित्रे स्त्थो वैष्णव्यौ सवितुर्व्वः प्प्रसवऽउत्पुनाम्म्यच्छिद्रेण पवित्रेण सूर्य्यस्य रश्मिभिः । अनिभृष्टमसि वाचो बन्धुस्तपोजाः सोमस्य दात्रमसि स्वाहा राजस्वः ॥६॥

सधमादो द्युम्निनीरापऽएताऽअनाधृष्टाऽअपस्यो वसानाः ।
पस्त्यासु चक्क्रे वरुणः सधस्त्थमपाᳫंशिशुर्म्मातृतमास्वन्तः ॥७॥

क्षत्रस्योल्बमसि क्षत्रस्य जराय्वसि क्षत्रस्य योनिरसि क्षत्रस्य नाभिरसीन्द्रस्य वार्त्रघ्नमसि मित्रस्यासि वरुणस्यासि त्वयायँवृत्रँवधेत् । दृवासि रुजासि क्षुमासि । पातैनम्प्राञ्चम्पातैनम्प्रत्यञ्चम्पातैनन्तिर्य्यञ्चन्दिग्भ्यः पात ॥८॥

आविर्म्मर्य्याऽआवित्तोऽअग्निर्गृहपतिरावित्तऽइन्द्रो वृद्धश्श्रवाऽआवित्तौ मित्रावरुणौ धृतव्रतावावित्तः पूषा विश्श्ववेदाऽआवित्ते द्यावापृथिवी विश्श्वशम्भुवावावित्तादितिरुरुशर्म्मा ॥९॥

॥३॥ अवेष्टा दन्दशूकाः प्प्राचीमारोह गायत्री त्वावतु रथन्तरᳫं साम त्त्रिवृत्स्तोमो वसन्तऽऋतुर्ब्रह्म द्रविणन्दक्षिणामारोह ॥१०॥

द॒क्षि॑णा॒मारो॑ह त्रि॒ष्टुप्प्त्वा॑वतु बृ॒हत्साम॑ पञ्चद॒श स्त्तोमो॑ ग्ग्री॒ष्म्मऽऋ॒तुः क्ष॒त्रन्द्र॑विण॒म्प्र॒तीची॒मारो॑ह ॥११॥

प्र॒तीची॒मारो॑ह॒ जग॑ती त्त्वावतु वैरू॒पꣳ साम॑ सप्प्तद॒श स्त्तोमो॑ व॒र्षाऽऋ॒तुर्वि॒ड्द्रवि॑ण॒मुदी॑ची॒मारो॑ह ॥१२॥

उदी॑ची॒मारो॑हानु॒ष्टुप्प्त्वा॑वतु वैरा॒जꣳ सामै॑कवि॒ꣳश स्त्तोम॑ः श॒रदृ॒तुः फल॒न्द्रवि॑णमू॒र्द्ध्वामारो॑ह ॥१३॥

ऊ॒र्द्ध्वामारो॑ह प॒ङ्क्तिस्त्त्वा॑वतु शाक्वररैव॒ते साम॑नी त्रिणवत्रयस्त्रि॒ꣳशौ स्त्तोमौ॑ हेमन्तशिशि॒रावृ॒तू व॒र्च्चो॒ द्रवि॑ण॒म्प्रत्त्य॑स्त्त॒न्नमु॑चेः॒ शिर॑ः ॥१४॥ ॥६॥

सोम॑स्य॒ त्त्विषि॑रसि॒ तवे॑व मे॒ त्त्विषि॑र्भूयात् ।
मृ॒त्त्योः पा॒ह्योजो॑सि॒ सहो॑स्य॒मृत॑मसि ॥१५॥

हिर॑ण्ण्यरूपाऽउ॒षसो॑ विरो॒कऽउ॒भावि॑न्द्राऽउ॒दिथः॒ सूर्य्य॑श्च ।
आरो॑हतँवरुण मित्र॒ गर्त्त॒न्ततश्च॑क्षाथा॒मदि॑ति॒न्दिति॑ञ्च मि॒त्रो॑सि॒ वरु॑णोसि ॥१६॥

॥४॥ सोम॑स्य त्त्वा द्यु॒म्म्नेना॒भिषि॑ञ्चाम्म्य॒ग्ग्नेर्ब्भ्राज॑सा॒ सूर्य्य॑स्य॒ वर्च्च॒सेन्द्र॑स्येन्द्रि॒येण॑ ।
क्ष॒त्राणा॑ङ्क्ष॒त्रप॑तिरे॒द्ध्यति॑ दि॒द्यून्पा॑हि ॥१७॥

इ॒मन्दे॑वाऽअसप॒त्नꣳ सु॑वद्ध्वम्महते॒ क्ष॒त्राय॑ मह॒ते ज्ज्यैष्ठ्या॑य मह॒ते जान॑राज्ज्या॒येन्द्र॑स्येन्द्रि॒याय॑ । इ॒मम॒मुष्ष्य॑ पु॒त्रम॒मुष्ष्यै॑ पु॒त्रम॒स्यै वि॒शऽए॒ष वो॑मी॒ राजा॒ सोमो॒स्म्माक॑म्ब्राह्म॒णाना॒ꣳ राजा॑ ॥१८॥ ॥७॥

प्र पर्व्व॑तस्य वृ॒ष॒भस्य॑ पृ॒ष्ठान्नाव॑श्चरन्ति स्व॒सिच॑ऽइया॒नाः । ताऽआव॑वृत्रन्नध॒रागुद॑क्ता॒ऽअहि॒म्बुद्ध्न्य॒मनु॒ रीय॑माणाः । विष्ण्णो॑र्वि॒क्क्रम॑णमसि॒ विष्ण्णो॒र्विक्क्रा॑न्तमसि॒ विष्ण्णोः॑ क्क्रा॒न्तम॑सि ॥१९॥ ॥८॥

प्रजा॑पते॒ न त्त्वदे॒तान्न्य॒न्न्यो विश्श्वा॑ रू॒पाणि॒ परि॒ ता ब॑भूव । यत्का॑मास्ते जुहु॒मस्तन्नो॑ऽअस्तु व॒यम॒मुष्ष्य॑ पि॒तासाव॒स्य पि॒ता व॒यꣳ स्या॑म॒ पत॑यो र॒यी॒णाꣳ स्वाहा॑ । रुद्र॒ यत्त्ते॒ क्क्रिवि॒ पर॒न्नाम॒ तस्मि॑न्न्हु॒तम॑स्यमे॒ष्टम॑सि॒ स्वाहा॑ ॥२०॥

॥५॥ इन्द्र॑स्य॒ वज्ज्रो॑सि मि॒त्रावरु॑णयोस्त्त्वा प्प्रशा॒स्त्रोः प्प्र॒शिषा॑ युनज्ज्मि । अव्य॑थायै त्त्वा स्व॒धायै॒ त्त्वारि॑ष्टो॒ऽअर्ज्जु॑नो म॒रुता॑म्प्रस॒वेन॑ ज॒यापा॑म॒ मन॑सा॒ समि॑न्द्रि॒येण॑ ॥२१॥

मा त॑ऽइन्द्र ते व॒यन्तु॑राषा॒डयु॑क्तासोऽअब्ब्रह्म॑ता॒ विद॑साम ।
तिष्ठा॒ रथ॒मधि॒ यँव॑ज्ज्रह॒स्ता र॒श्म्मीन्दे॑व यमसे॒ स्वश्श्वा॑न् ॥२२॥

अ॒ग्नये॑ गृ॒हप॑तये॒ स्वाहा॒ सोमा॑य॒ व्वन॒स्प्पत॑ये॒ स्वाहा॑ म॒रुता॒मोज॑से॒ स्वाहेन्द्र॑स्येन्द्रि॒याय॒ स्वाहा॑ । पृथि॑वि मात॒र्म्मा मा॑ हिꣳसी॒र्म्मो॑ऽअ॒हन्त्वाम् ॥२३॥

ह॒ꣳसः शु॑चि॒षद्व्वसु॑रन्तरिक्ष॒सद्धोता॑ व्वेदि॒षदति॑थिर्द्दुरोण॒सत् । नृ॒षद्व्व॑र॒सदृ॑त॒सद्व्यो॑म॒सद॒ब्जा गो॒जाऽऋ॑त॒जाऽअ॑द्रि॒जाऽऋ॒तम्बृ॒हत् ॥२४॥

इय॑द॒स्यायु॑र॒स्यायु॒र्म्मयि॑ धेहि॒ युङ्ङ॑सि॒ व्वर्च्चो॑सि॒ व्वर्च्चो॒ मयि॑ धेह्यू॒र्ग्ग॑स्यू॒र्ज्जम्मयि॑ धेहि । इन्द्र॑स्य वाँव्वी॒र्य्य॒कृतो॑ बा॒हूऽअ॑भ्यु॒पाव॑हरामि ॥२५॥

॥६॥ स्यो॒नासि॑ सु॒षदा॑सि क्क्ष॒त्रस्य॒ योनि॑रसि ।
स्यो॒नामासी॑द सु॒षदा॒मासी॑द क्क्ष॒त्रस्य॒ योनि॒मासी॑द ॥२६॥

निष॑साद धृ॒तव्व्र॑तो॒ व्वरु॑णः प॒स्त्या॒स्वा । साम्म्रा॑ज्ज्याय सु॒क्क्रतुः॑ ॥२७॥

अ॒भि॒भूर॑स्ये॒तास्ते॒ पञ्च॒ दिशः॑ कल्प्पन्ताम्ब्रह्म॒ँस्त्वम्ब्र॒ह्मासि॑ सवि॒तासि॑ स॒त्त्यप्प्र॑सवो॒ व्वरु॑णोसि स॒त्त्यौजा॒ऽइन्द्रो॑सि॒ व्विशौ॑जा रु॒द्रो॑सि सु॒शेवः॑ । बहु॑कार॒ श्श्रेय॑स्कर॒ भूय॑स्क्करेन्द्र॑स्य॒ व्वज्ज्रो॑सि॒ तेन॑ मे रद्ध्य ॥२८॥

अ॒ग्निः पृ॒थुर्द्धर्म्म॑ण॒स्प्पति॑र्ज्जुषा॒णोऽअ॒ग्निः पृ॒थुर्द्धर्म्म॑ण॒स्प्पति॒राज्ज्य॑स्य व्वेतु॒ स्वाहा॒ स्वाहा॑कृताः॒ सूर्य्य॑स्य र॒श्म्मिभि॑र्य्यतद्ध्व॒ꣳ सजा॒ताना॑म्मद्ध्य॒मेष्ठ्या॑य ॥२९॥

॥७॥ स॒वि॒त्रा प्प्र॑सवि॒त्रा सर॑स्वत्त्या॒ व्वा॒चा त्त्वष्ट्रा॑ रू॒पैः पू॒ष्ण्णा प॒शुभि॒रिन्द्रे॑णा॒स्म्मे बृह॒स्प्पति॑ना॒ ब्रह्म॑णा॒ व्वरु॑णे॒नौज॑सा॒ग्निना॒ तेज॑सा॒ सोमे॑न॒ राज्ज्ञा॒ व्विष्ण्णु॑ना द॒शम्म्या॑ दे॒वत॑या॒ प्प्रसू॑तः॒ प्प्रस॑र्प्पामि ॥३०॥

॥८॥ अ॒श्श्विभ्या॒म्पच्च्य॑स्व॒ सर॑स्वत्त्यै॒ पच्च्य॒स्वेन्द्रा॑य सु॒त्राम्म्णे॑ पच्च्यस्व । व्वा॒युः पू॒तः प॒वित्रे॑ण प्प्र॒त्त्यङ्क्सोमो॒ऽअति॑स्स्रुतः । इन्द्र॑स्य॒ युज्ज्यः॒ सखा॑ ॥३१॥

कु॒विद॒ङ्ग यव॑मन्तो॒ यव॑ञ्चि॒द्यथा॒ दान्त्य॑नुपू॒र्व्वँव्वि॒यूय॑ । इ॒हेहै॑षाङ्कृणुहि॒ भोज॑नानि॒ ये ब॒र्हिषो॒ नम॑ऽउक्क्तिँ॒य्यज॑न्ति । उ॒प॒या॒मगृ॑हीतोस्य॒श्श्विभ्या॑न्त्वा॒ सर॑स्वत्त्यै॒ त्वेन्द्रा॑य त्वा सु॒त्राम्म्णे॑ ॥३२॥

यु॒वꣳ सु॒राम॑मश्श्विना॒ नमु॑चावासु॒रे सचा॑ । व्वि॒पि॒पा॒ना शु॑भस्प्पती॒ऽइन्द्र॒ङ्कर्म्म॑स्वावतम् ॥३३॥

पु॒त्रमि॑व पि॒तरा॑व॒श्श्विनो॒भेन्द्रा॒वथुः॒ काव्यै॑र्द्द॒ꣳसना॑भिः । यत्त्सु॒रामँ॒व्व्यपि॑बः॒ शची॑भिः॒ सर॑स्वती त्वा मघवन्नभिष्ण्णक् ॥३४॥

॥ इति दशमोऽध्यायः ॥

अथैकादशोऽध्यायः

ऋषिः (१) 'युञ्जानः प्रथमम्' इत्यारभ्य (८३) 'अन्नपतेन्नस्य' इत्यन्तानां सामान्यतः प्रजापतिः साध्या वा ऋषयः। विशेषतश्च—

(१) 'युञ्जानः प्रथमम्' इत्यारभ्य (८) 'ऋचा स्तोमम्' इत्यन्तानां सविता, (१२) 'प्रतूर्तं वाजिन्' इत्यस्य नाभानेदिष्ठः, (१३) 'युञ्जाथां रासभम्' इत्यस्य कुश्रिः, (१४) 'योगेयोगे' इत्यस्य शुनःशेपः, (१७) 'अन्वग्निरुषसाम्' इत्यस्य पुरोधसः, (१८) 'आगत्य वाजी' इत्यस्य मयोभुवः, (२३) 'आ त्वा' (२४) 'आ विश्वतः' इत्यनयोर्गृत्समदः, (२५) 'परि वाजपतिः' इत्यस्य सोमकः, (२६) 'परि त्वाग्ने' इत्यस्य पायुः, (२७) 'त्वमग्ने' इत्यस्य गृत्समदः, (३२) 'त्वामग्ने' (३३) 'तमु त्वा दध्यङ्' (३४) 'तमु त्वा पाथ्यः' इत्येषां भरद्वाजः, (३५) 'सीद होतः' इत्यस्य देवश्रवोदेववातौ, (३६) 'नि होता' इत्यस्य गृत्समदः, (३७) 'सꣳसीदस्व' इत्यस्य प्रस्कण्वः, (३८) 'अपो देवीः' इत्यस्य सिन्धुद्वीपः, (४१) 'उदु तिष्ठ' इत्यस्य विश्वमनाः, (४२) 'ऊर्ध्व ऊ षु' इत्यस्य कण्वः, (४३) 'स जातः' इत्यस्य त्रितः, (४९) 'वि पाजसा' इत्यस्य कात्य उत्कीलः, (५०) 'आपो हि ष्ठा' (५१) 'यो वः' (५२) 'तस्मा अरम्' इत्येषां सिन्धुद्वीपः, (६२) 'मित्रस्य चर्षणीधृतः' इत्यस्य विश्वामित्रः, (६७) 'विश्वो देवस्य' इत्यस्य स्वस्त्यात्रेयः, (७०) 'द्रून्नः सर्पिः' इत्यस्य सोमाहुतिः, (७१) 'परस्या अधि' इत्यस्याङ्गिरसो विरूपः, (७२) 'परमस्याः' इत्यस्यारुणिः, (७३) 'यदग्ने कानि' (७४) 'यदत्त्युपजिह्विका' इत्यनयोर्जमदग्निः, (७५) 'अहरहः' (७६) 'नाभा पृथिव्याः' इत्यनयोर्नाभानेदिष्ठः ॥

देवता (१) 'युञ्जानः प्रथमम्' (२) 'युक्तेन मनसा' (३) 'युक्त्वाय सविता' (४) 'युञ्जते मनः' (५) 'युजे वाम्' (६) 'यस्य प्रयाणम्' (७) 'देव सवितः' (८) 'इमन्नो देव' (९) 'देवस्य त्वा' इत्येषां सविता, 'आददे गायत्रेण' (१०) 'अभ्रिरसि' (११) 'हस्त आधाय' इत्येषामभ्रिः।

(१२) 'प्रतूर्तं वाजिन्' इत्यस्याश्वः।
(१३) 'युञ्जाथाꣳ रासभम्' इत्यस्य रासभः।
(१४) 'योगेयोगे' इत्यस्य अजः।
(१५) 'प्र तूर्वन्नेहि' इत्यस्याश्वः, 'उर्वन्तरिक्षम्' 'स्वस्ति गव्यूतिः' इत्यनयो रासभः।
(१६) 'पृथिव्याः सधस्थात्' 'अग्निस्पुरीष्यम्' इत्यादिद्वयोः, (१७) 'अन्वग्निरुषसाम्' इत्यस्य चाग्निः।
(१८) 'आगत्य वाजी' (१९) 'आक्रम्य वाजिन्' (२०) 'द्यौस्ते पृष्ठम्' (२१) 'उत्क्राम महते' (२२) 'उदक्रमीत्' इत्येषामश्वः।
(२३) 'आ त्वा जिघर्मि' (२४) 'आ विश्वतः' (२५) 'परि वाजपतिः' (२६) 'परि त्वाग्ने' (२७) 'त्वमग्ने' इत्येषामग्निः।
(२८) 'देवस्य त्वा' इत्यस्य सविता, 'पृथिव्याः सधस्थात्' इत्यस्याग्निः।
(२९) 'अपाम्पृष्ठम्' इत्यस्य पुष्करपर्णम्।
(३०) 'शर्म च स्थः' इत्यस्य कृष्णाजिनम्।
(३१) 'संवसाथाम्' इत्यस्य पुष्करपर्णम्।
(३२) 'पुरीष्योसि' 'त्वामग्ने' (३३) 'तमु त्वा दध्यङ्' (३४) 'तमु त्वा पाथ्यः' (३५) 'सीद होतः' (३६) 'नि होता' (३७) 'सꣳसीदस्व' इत्येषामग्निः।
(३८) 'अपो देवीः' इत्यस्यापः।
(३९) 'सन्ते वायुः' इत्यस्य पृथ्वी, 'यो देवानाम्' इत्यस्य वायुः।
(४०) 'सुजातो ज्योतिषा' (४१) 'उदु तिष्ठ' (४२) 'ऊर्ध्व ऊ षु' इत्येषामग्निः।
(४३) 'स जातः' इत्यस्याश्वः।
(४४) 'स्थिरो भव' इत्यस्य रासभः।
(४५) 'शिवो भव' इत्यस्य अजः।

(४६) 'प्रैतु वाजी' इत्यस्य लिङ्गोक्ता, 'वृषाग्निम्' इत्यस्य गर्दभः, 'अग्न आयाहि' (४७) 'ऋतꣳ सत्यम्' 'अग्निम्पुरीष्यम्' इत्येषामग्निः, 'ओषधयः प्रतिमोदध्वम्' इत्यस्यौषधिः, 'व्यस्यन् विश्वा' इत्यस्याग्निः ।
(४८) 'ओषधयः प्रतिगृभ्णीत' इत्यस्यौषधिः ।
(४९) 'वि पाजसा' इत्यस्याग्निः ।
(५०) 'आपो हि ष्ठाः' (५१) 'यो वः' (५२) 'तस्मा अरम्' इत्येषामापः ।
(५३) 'मित्रः सꣳसृज्य' इत्यस्य मित्रः ।
(५४) 'रुद्राः सꣳसृज्य' इत्यस्य रुद्रः ।
(५५) 'सꣳसृष्टा वसुभिः' (५६) 'सिनीवाली' इत्यनयोः सिनीवाली ।
(५७) 'उखाङ्कृणोतु' इत्यस्यादितिः, 'मखस्य शिरोसि' इत्यस्य मृत्पिण्डः ।
(५८) 'वसवस्त्वा' 'रुद्रास्त्वा' 'आदित्यास्त्वा' 'विश्वे त्वा' इत्येषां लिङ्गोक्ता ।
(५९) 'अदित्यै रास्नासि' इत्यस्य रास्ना, 'अदितिष्टे' इत्यस्य उखा, 'कृत्वाय सा' इत्यस्यादितिः ।
(६०) 'वसवस्त्वा' 'रुद्रास्त्वा' 'आदित्यास्त्वा' 'विश्वे त्वा' 'इन्द्रस्त्वा' 'वरुणस्त्वा' 'विष्णुस्त्वा' इत्येषां लिङ्गोक्ता ।
(६१) 'अदितिष्ट्वा' इत्यस्यावटः, 'देवानान्त्वा' 'धिषणास्त्वा' 'वरूत्रीष्ट्वा' 'ग्नास्त्वा' 'जनयस्त्वा' इत्येषामुखा ।
(६२) 'मित्रस्य चर्षणीधृतः' इत्यस्य मित्रः ।
(६३) 'देवस्त्वा' इत्यस्य सविता ।
(६४) 'उत्थाय बृहती' इत्यस्य उखा, 'मित्रैतान्ते' इत्यस्य मित्रः ।
(६५) 'वसवस्त्वा' 'रुद्रास्त्वा' 'आदित्यास्त्वा' 'विश्वे त्वा' (६६) 'आकूतिमग्निम्' 'मनो मेधाम्' 'चित्तं विज्ञातम्' 'वाचो विधृतिम्' 'प्रजापतये मनवे' 'अग्नये वैश्वानराय' (६७) 'विश्वो देवस्य' इत्येषां लिङ्गोक्ता ।
(६८) 'मा सु भित्था' इत्यस्य उखा, 'अग्निश्चेदम्' इत्यस्याग्निः ।
(६९) 'दृꣳहस्व देवि' इत्यस्य उखा ।
(७०) 'द्रुन्नः सर्पिः' (७१) 'परस्या अधि' (७२) 'परमस्याः' (७३) 'यदग्ने कानि' (७४) 'यदत्ति' (७५) 'अहरहः' (७६) 'नाभा पृथिव्याः' (७७) 'याः सेनाः' (७८) 'दꣳष्ट्राभ्यास्मलिम्लून्' (७९) 'ये जनेषु' (८०) 'यो अस्मभ्यम्' (८१) 'सꣳशितम्मे' (८२) 'उदेषाम्बाहू' (८३) 'अन्नपतेन्नस्य' इत्येषामग्निः ॥

छन्दः (१) 'युञ्जानः प्रथमम्' इत्यस्यानुष्टुप्, (२) 'युक्तेन मनसा' इत्यस्य गायत्री, (३) 'युक्त्वाय सविता' इत्यस्यानुष्टुप्, (४) 'युञ्जते मनः' इत्यस्य जगती, (५) 'युजे वाम्' इत्यस्य त्रिष्टुप्, (६) 'यस्य प्रयाणम्' इत्यस्य जगती, (७) 'देव सवितः' इत्यस्य त्रिष्टुप्, (८) 'ऋत्वा स्तोमम्' इत्यस्य गायत्री, 'स्वाहा' इति यजुः, (११) 'हस्त आधाय' इत्यस्यानुष्टुप्, 'आनुष्टुभेन' इति यजुः, (१२) 'प्रतूर्तं वाजिन्' इत्यस्यास्तारपङ्क्तिः, (१३) 'युञ्जाथाꣳ रासभम्' (१४) 'योगेयोगे' इत्यनयोर्गायत्री, (१५) 'प्रतूर्वन्नेहि' इत्यस्य विराड्रूपा त्रिष्टुप्, मध्ये 'उर्वन्तरिक्षं वीहि' इति यजुः, (१७) 'अन्वग्निरुषसाम्' इत्यस्य त्रिष्टुप्, (१८) 'आगत्य वाजी' (१९) 'आक्रम्य वाजिन्' इत्यनयोरनुष्टुप्, (२०) 'द्यौस्ते' इत्यस्य बृहती, (२१) 'उत्क्राम महते' इत्यस्य विराट्, (२२) 'उदक्रमीत्' (२३) 'आ त्वा जिघर्मि' (२४) 'आ विश्वतः' इत्येषां त्रिष्टुप्, (२५) 'परि वाजपतिः' इत्यस्य गायत्री, (२६) 'परि त्वाग्ने' इत्यस्यानुष्टुप्, (२७) 'त्वमग्ने' इत्यस्य जगती, (२९) 'अपाम्पृष्ठम्' इत्यस्य स्वराट्पङ्क्तिः, (३०) 'शर्म च स्थः' (३१) 'संवसाथाम्' इत्यनयोरनुष्टुप्, 'त्वामग्ने' (३३) 'तमु त्वा दध्यङ्' (३४) 'तमु त्वा पाथ्यः' इत्येषां गायत्री, (३५) 'सीद होतः' (३६) 'नि होता' इत्यनयोस्त्रिष्टुप्, (३७) 'सꣳसीदस्व' इत्यस्य बृहती, (३८) 'अपो देवीः' इत्यस्य न्यङ्कुसारिणी, (३९) 'सन्ते' इत्यस्य त्रिष्टुप्, (४०) 'सुजातो ज्योतिषा' इत्यस्यानुष्टुप्, (४१) 'उदु तिष्ठ' इत्यस्य पथ्याबृहती, (४२) 'ऊर्ध्व ऊ षु' इत्यस्योपरिष्टाद्बृहती, (४३) 'स जातः' इत्यस्य त्रिष्टुप्, (४४) 'स्थिरो भव' इत्यस्यानुष्टुबुष्णिग्वा, (४५) 'शिवो भव' इत्यस्य पथ्याबृहती, (४६) 'प्रैतु वाजी' इत्यस्य महापङ्क्तिः, 'अग्न आयाहि' इत्यस्यैकपदा गायत्री, (४७) 'ओषधयः प्रतिमोदध्वम्' इत्यस्य त्रिष्टुप्, (४८) 'ओषधयः प्रतिगृभ्णीत' इत्यस्यानुष्टुप्, (४९) 'वि पाजसा' इत्यस्य त्रिष्टुप्, (५०) 'आपो हि ष्ठाः' (५१) 'यो वः' (५२) 'तस्मा अरम्' इत्येषां गायत्री, (५३) 'मित्रः

सꣳसृज्य' इत्यस्योपरिष्टाद्बृहती, (५४) 'रुद्राः सꣳसृज्य' (५५) 'सꣳसृष्टाम्' (५६) 'सिनीवाली' (५७) 'उखाङ्कृणोतु' इत्येषामनुष्टुप्, (५९) 'कृत्वाय सा' इत्यस्योष्णिक्, (६२) 'मित्रस्य चर्षणीधृतः' इत्यस्य गायत्री, (६३) 'देवस्त्वा' (६४) 'उत्थाय बृहती' इत्यनयोर्बृहती, (६७) 'विश्वो देवस्य' इत्यस्यानुष्टुप्; (६८) 'मा सु भित्था' 'अग्निश्चेदम्' इत्यनयोर्गायत्री, (६९) 'दृꣳहस्व देवि' इत्यस्य त्रिष्टुप्, (७०) 'द्रुन्नः सर्पिः' (७१) 'परस्या अधि' इत्यनयोर्गायत्री, (७२) 'परमस्याः' (७३) 'यदग्ने कानि' (७४) 'यदत्त्युपजिह्विका' इत्येषामनुष्टुप्, (७५) 'अहरहः' (७६) 'नाभा पृथिव्याः' इत्यनयोस्त्रिष्टुप्, (७७) 'याः सेनाः' (७८) 'दꣳष्ट्राभ्याम्मलिम्लून्' (७९) 'यो जनेषु' (८०) 'यो अस्मभ्यम्' (८१) 'सꣳशितम्मे' (८२) 'उदेषाम्बाहू' इत्येषामनुष्टुप्, (८३) 'अन्नपतेन्नस्य' इत्यस्योपरिष्टाद्बृहती ॥ ॥२॥

॥ हरिः ॐ ॥

॥१॥ यु॒ञ्जा॒नः प्प्र॑थ॒मम्मन॑स्त॒त्त्वाय॑ सवि॒ता धिय॑ः । अ॒ग्नेर्ज्ज्योति॑र्न्नि॒चाय्य॑ पृथि॒व्व्याऽ
अद्ध्याभ॑रत् ॥१॥

यु॒क्क्तेन॒ मन॑सा व्व॒यन्दे॒वस्य॑ सवि॒तुः स॒वे । स्व॒ग्ग्र्या॑य॒ शक्क्त्या॑ ॥२॥

यु॒क्क्त्वाय॑ सवि॒ता दे॒वान्त्स्व॑र्य्य॒तो धि॒या दिव॑म् । बृ॒हज्ज्योति॑ः करि॒ष्ष्य॒तः स॑वि॒ता
प्प्रसु॑वाति॒ तान् ॥३॥

यु॒ञ्जते॒ मन॑ऽउ॒त यु॑ञ्जते॒ धियो॒ व्विप्प्रा॒ व्विप्प्र॑स्य बृह॒तो व्वि॑प॒श्चित॑ः । व्वि होत्रा॑ दधे
व्वयुना॒विदेक॒ऽइन्म॒ही दे॒वस्य॑ सवि॒तुः परि॑ष्ट्टुतिः ॥४॥

यु॒जे व्वा॒म्ब्रह्म॑ पू॒र्व्व्यन्नमो॑भि॒र्व्वि श्श्लोक॑ऽएतु प॒त्थ्येव सू॒रेः । शृण्व्वन्तु॒ व्विश्श्वे॑ऽअ॒मृत॑स्य
पु॒त्त्राऽआ ये धामा॑नि दि॒व्व्यानि॑ त॒स्त्थुः ॥५॥

यस्य॑ प्प्र॒याण॒मन्न्व॒न्न्यऽइद्य॒युर्द्दे॒वा दे॒वस्य॑ महि॒मान॒मोज॑सा । यः पार्त्थि॑वानि व्विम॒मे
सऽएत॑शो॒ रजा॑ꣳसि दे॒वः स॑वि॒ता म॑हित्त्व॒ना ॥६॥

देव॑ सवितः॒ प्प्रसु॑व य॒ज्ज्ञम्प्रसु॑व य॒ज्ज्ञप॑तिम्भगा॑य । दि॒व्व्यो ग॑न्ध॒र्व्वः के॑त॒पूः केत॑न्नः
पुनातु व्वा॒चस्प्पति॒र्व्वाच॑न्नः स्वदतु ॥७॥

इ॒मन्नो॑ देव सवितर्य्य॒ज्ज्ञम्प्रण॑य देवा॒व्व्य॑ꣳ सखि॒विद॑ꣳ सत्त्रा॒जित॑न्धन॒जित॑ꣳ स्व॒र्ज्जित॑म् ।
ऋ॒चा स्तोम॒ꣳ सम॑र्द्धय गाय॒त्त्रेण॑ रथन्त॒रम्बृ॒हद्गा॑यत्त्र॒वर्त्त॑नि॒ स्वाहा॑ ॥८॥

दे॒वस्य॑ त्त्वा सवि॒तुः प्प्र॑स॒वे॒ऽश्श्विनो॑र्ब्बा॒हुब्भ्या॑म्पू॒ष्ष्णो हस्त्ता॑ब्भ्याम् । आद॑दे गाय॒त्त्रेण॒
च्छन्द॑साङ्गिर॒स्वत्त्पृ॑थि॒व्व्याः स॒धस्त्था॑द॒ग्ग्निम्पु॑री॒ष्ष्य॒मङ्गिर॒स्वदाभ॑र॒ त्त्रैष्ष्टु॑भेन॒ च्छन्द॑साङ्गिर॒स्वत् ॥९॥

अ॒ब्भ्रिर॑सि॒ नार्य्य॑सि॒ त्त्वया॑ व्व॒यम॒ग्ग्निꣳ श॑केम॒ खनि॑तुꣳ स॒धस्त्थ॒ऽआ । जाग॑तेन॒
च्छन्द॑साङ्गिर॒स्वत् ॥१०॥

हस्त्त॑ऽआ॒धाय॑ सवि॒ता बिब्भ्र॒दब्भ्रि॑ꣳ हिर॒ण्ण्ययी॑म् । अ॒ग्नेर्ज्ज्योति॑र्न्नि॒चाय्य॑ पृथि॒व्व्या
ऽअद्ध्याभ॑र॒दानु॑ष्ष्टुभेन॒ च्छन्द॑साङ्गिर॒स्वत् ॥११॥

॥२॥ प्रतू॑र्त्तँव्वाजि॒न्नाद्र॑व॒ व्वरि॑ष्ठा॒मनु॑ सँ॒व्वत॑म् । दि॒वि ते॒ जन्म॑ पर॒मम॒न्तरि॑क्षे॒ तव॒ नाभि॑÷
पृथि॒व्यामधि॒ योनि॒रित् ॥१२॥

यु॒ञ्जाथा॒ꣳ रास॑भँय्यु॒वम॒स्मिन्न्यामे॑ व्वृषण्ण्वसू ।
अ॒ग्निम्भर॑न्तमस्म॒युम् ॥१३॥

योगे॑योगे त॒व स्त्त॑रँ॒व्वाजे॑वाजे हवामहे । सखा॑य॒ऽइन्द्र॑मू॒तये॑ ॥१४॥

प्र॒तूर्व्व॒न्नेह्य॑व॒क्क्राम॒न्नश॑स्ती रु॒द्रस्य॒ गाण॑पत्त्यम्मयो॒भूरेहि॑ । उ॒र्व्व॒न्तरि॑क्षँ॒व्वीहि स्व॒स्ति-
ग॑व्यूति॒रभ॑यानि कृ॒ण्ण्वन्पू॒ष्ण्णा स॒युजा॑ स॒ह ॥१५॥

पृ॒थि॒व्याः स॒धस्था॑द॒ग्निम्पु॑री॒ष्य॒मङ्गिर॒स्वदाभ॑रा॒ग्निम्पु॑री॒ष्य॒मङ्गिर॒स्वदच्छे॑मो॒ग्नि-
म्पु॑री॒ष्य॒मङ्गिर॒स्वद्भ॑रिष्यामः ॥१६॥

अन्न्व॒ग्निरु॒षसा॒मग्र॑मक्ख्य॒दन्न्वहा॑नि प्प्रथ॒मो जा॒तवे॑दाः ।
अनु॒ सूर्य॑स्य पुरु॒त्रा च॑ र॒श्मीननु॒ द्यावा॑पृथि॒वीऽआत॑तन्थ ॥१७॥

आ॒गत्य॑ व्वा॒ज्यद्ध्वा॑न॒ꣳ सर्व्वा॒ मृधो॒ व्विधू॑नुते ।
अ॒ग्निꣳ स॒धस्थे॑ मह॒ति चक्षु॑षा॒ निचि॑कीषते ॥१८॥

आ॒क्क्रम्य॑ व्वाजिन्पृथि॒वीम॒ग्निमि॑च्छ रु॒चा त्वम् ।
भूम्म्या॑ व्वृ॒त्त्वाय॑ नो ब्रूहि॒ यतः॒ खने॑म॒ तँव्व॒यम् ॥१९॥

द्यौस्ते॑ पृ॒ष्ठम्पृ॑थि॒वी स॒धस्थ॑मा॒त्मान्तरि॑क्षꣳ समु॒द्रो योनिः॑ ।
व्वि॒क्ख्याय॒ चक्षु॑षा॒ त्वम॒भिति॑ष्ठ पृतन्य॒तः ॥२०॥

उत्क्रा॑म मह॒ते सौभ॑गाया॒स्मादा॒स्थाना॑द्द्रविणो॒दा व्वा॑जिन् ।
व्व॒यꣳ स्या॑म सुम॒तौ पृ॑थि॒व्याऽअ॒ग्निङ्खन॑न्तऽउ॒पस्थे॑ऽअस्याः ॥२१॥

उद॑क्क्रमीद्द्रविणो॒दा व्वा॒ज्यर्व्वाकः॒ सुलो॒कꣳ सुकृ॑तम्पृथि॒व्याम् ।
तत॑÷ खनेम सु॒प्प्रती॑कम॒ग्निꣳ स्वो॒ रुहा॑णा॒ऽअधि॒ नाक॑मुत्त॒मम् ॥२२॥

आ त्वा॑ जिघर्म्मि॒ मन॑सा घृ॒तेन॑ प्प्रतिक्षि॒यन्त॒म्भुव॑नानि॒ व्विश्वा॑ ।
पृ॒थुन्ति॑र॒श्चा व्वय॑सा बृ॒हन्तँ॒व्व्यचि॑ष्ठ॒मन्नै॑ रभ॒सन्दृशा॑नम् ॥२३॥

आ व्वि॒श्वतः॑ प्प्र॒त्यञ्चं॑ जिघर्म्म्यर॒क्षसा॒ मन॑सा॒ तज्जु॑षेत ।
मर्य्य॑श्री स्पृह॒यद्व॑र्ण्णोऽअ॒ग्निर्न्नाभि॒मृशे॑ त॒न्वा॒ जर्भु॑राणः ॥२४॥

परि॒ वाज॑पतिः क॒विर॒ग्निर्ह॒व्यान्य॑क्क्रमीत् । दध॒द्रत्ना॑नि दा॒शुषे॑ ॥२५॥

परि॑ त्वाग्ने॒ पुरँ॑व्व॒यँव्विप्प्र॑ꣳ सहस्य धीमहि ।
धृ॒षद्व॑र्ण्णन्दि॒वेदि॑वे ह॒न्तार॑म्भङ्गु॒राव॑ताम् ॥२६॥

त्वम॑ग्ने द्युभि॒स्त्वमा॑शुशु॒क्षणि॒स्त्वम॒द्भ्यस्त्वमश्म॑न॒स्प्पारि॑ ।
त्वँव्वने॑भ्यु॒स्त्वमोष॑धीभ्यु॒स्त्वन्नृ॒णान्नृ॑पते जायसे॒ शुचि॑ः ॥२७॥

॥३॥ दे॒वस्य॑ त्त्वा सवि॒तुः प्प्र॑स॒वेऽश्विनो॑र्ब्बा॒हुभ्या॑म्पू॒ष्णो हस्ता॑भ्याम् । पृथि॒व्याः स॒धस्त्था॑द॒ग्निम्पु॑री॒ष्यमङ्गि॒र॒स्वत्त्ख॑नामि । ज्योति॑ष्म॒न्तन्त्वाग्ने सु॒प्प्रती॑क॒मज॑स्रेण भा॒नुना॒ दीद्य॑तम् । शि॒वम्प्र॒जाभ्यो॒हिꣳस॑न्तम्पृथि॒व्याः स॒धस्त्था॑द॒ग्निम्पु॑री॒ष्य॒मङ्गि॒र॒स्वत्त्ख॑नामः ॥२८॥

अ॒पाम्पृ॒ष्ठम॑सि॒ योनि॑र॒ग्नेः स॑मु॒द्रम॒भितः॒ पिन्व॑मानम् ।
वर्द्ध॑मानो म॒हाँ॥ऽआ च॒ पुष्क॑रे दि॒वो मात्र॑या वरि॒म्णा प्प्र॑थस्व ॥२९॥
शर्म॑ च॒ स्त्थो वर्म॑ च॒ स्त्थोच्छि॑द्रे बहु॒लेऽउ॒भे ।
व्यच॑स्वती॒ सँव्व॑साथाम्भृ॒तम॒ग्निम्पु॑री॒ष्यम् ॥३०॥
सँव्व॑साथाꣳ स्व॒र्व्विदा॑ स॒मीची॒ऽउर॑सा॒ त्त्मना॑ ।
अ॒ग्निम॒न्तर्भ॑रि॒ष्यन्ती॒ ज्योति॑ष्मन्त॒मज॑स्र॒मित् ॥३१॥
पु॒री॒ष्यो॑सि वि॒श्वभ॑रा॒ऽअथ॑र्व्वा त्त्वा प्प्रथ॒मो निर॑मन्थदग्ने ।
त्वाम॑ग्ने॒ पुष्क॑रा॒दध्यथ॑र्व्वा॒ निर॑मन्थत । मू॒र्द्ध्नो विश्व॑स्य वा॒घतः॑ ॥३२॥
तमु॑ त्त्वा द॒ध्यङ्ङृषि॑ः पु॒त्रऽई॑धे॒ऽअथ॑र्व्वणः । वृ॒त्र॒हणं॑म्पुर॒न्द॒रम् ॥३३॥
तमु॑ त्त्वा पा॒त्थ्यो वृषा॒ समी॑धे द॒स्यु॒हन्त॑मम् । ध॒न॒ञ्ज॒यꣳ रणे॑रणे ॥३४॥
सीद॑ होतः॒ स्वऽउ॑ लो॒के चि॑कि॒त्त्वान्त्सा॒दया॑ य॒ज्ञꣳ सु॑कृ॒तस्य॒ योनौ॑ ।
दे॒वा॒वीर्दे॒वान्ह॒विषा॑ यजा॒स्यग्ने॑ बृ॒हद्यज॑माने॒ वयो॑ धाः ॥३५॥
नि होता॑ होतृ॒षद॑ने॒ विदा॑नस्त्त्वे॒षो दी॑दि॒वाँ॥ऽअ॑सदत्त्सु॒दक्ष॑ः ।
अद॑ब्धव्व्रतप्प्रमति॒र्व्वसि॑ष्ठः स॑हस्र॒म्भ॒रः शुचि॑जिह्वोऽअ॒ग्निः ॥३६॥
सꣳसी॑दस्व म॒हाँ॥ऽअ॑सि॒ शोच॑स्व देव॒वीत॑मः ।
वि धू॒मम॑ग्नेऽअरु॒षम्मि॑येद्ध्य सृ॒ज प्प्र॑शस्त द॒र्शत॑म् ॥३७॥

॥४॥ अ॒पो दे॒वीरुप॑ सृज॒ मधु॑मतीरय॒क्ष्माय॑ प्प्र॒जाभ्य॑ः ।
तासा॑मा॒स्त्थाना॑दु॒ज्जिह॑ता॒मोष॑धयः सुपिप्प॒लाः ॥३८॥
सन्ते॑ वा॒युर्म्मा॑त॒रिश्वा॑ दधातूत्ता॒नाया॒ हृद॑यँ॒व्यद्विकं॑स्त्तम् ।
यो दे॒वाना॒ञ्चर॑सि प्प्रा॒णथे॑न॒ कस्मै॑ देव॒ वष॑डस्तु॒ तुभ्य॑म् ॥३९॥
सु॒जा॑तो॒ ज्योति॑षा स॒ह शर्म्म॒ वरू॑थ॒मास॑द॒त्स्वः॑ ।
वासो॑ऽअग्ने वि॒श्वरू॑प॒ꣳ सँव्य॑यस्व विभावसो ॥४०॥

उदु तिष्ठ स्वद्ध्वरावा नो देव्व्या धिया ।
दृशे च भासा बृहता सुशुक्क्वनिराग्ने याहि सुशस्त्तिभिः ॥४१॥
ऊर्द्ध्वऽऊ षु णऽऊतये तिष्ठा देवो न सविता ।
ऊर्द्ध्वो व्वाजस्य सनिता यदञ्जिभिर्व्वाघद्भिर्व्विह्वयामहे ॥४२॥
स जातो गर्ब्भोऽअसि रोदस्योरग्ने चारुर्व्विभृतऽओषधीषु ।
चित्रः शिशुः परि तमाꣳस्यक्तून्प्रमातृब्भ्योऽअधि कनिक्क्रदद्गाः ॥४३॥
स्थिरो भव व्वीड्वङ्गऽआशुर्ब्भव व्वाज्यर्व्वन् ।
पृथुर्ब्भव सुषदस्त्वमग्नेः पुरीषवाहणः ॥४४॥
शिवो भव प्प्रजाब्भ्यो मानुषीब्भ्यस्त्वमङ्गिरः ।
मा द्यावापृथिवीऽअभिशोचीर्म्मान्तरिक्षम्मा व्वनस्प्पतीन् ॥४५॥
प्रैतु व्वाजी कनिक्क्रदन्नानदद्रासभः पत्त्वा । भरन्नग्निम्पुरीष्ष्यम्मा पाद्यायुषः पुरा ।
व्वृषाग्निँव्वृषणम्भरन्नपाङ्गर्ब्भꣳ समुद्रियम् । अग्नऽआयाहि व्वीतये ॥४६॥
ऋतꣳ सत्त्यमृतꣳ सत्त्यमग्निम्पुरीष्ष्यमङ्गिरस्वद्भरामः । ओषधयः प्प्रतिमोदद्ध्वमग्निमेतꣳ
शिवमायन्तमब्भ्यत्र युष्म्माः । व्वयस्यन्विश्श्वाऽअनिराऽअमीवा निषीदन्नो
ऽअप दुर्म्मतिञ्जहि ॥४७॥
ओषधयः प्प्रतिगृब्भ्णीत पुष्प्पवतीः सुपिप्पलाः ।
अयँव्वो गर्ब्भऽऋत्त्वियः प्प्रत्नꣳ सधस्त्थमासदत् ॥४८॥
व्वि पाजसा पृथुना शोशुचानो बाधस्व द्विषो रक्षसोऽअमीवाः ।
सुशर्म्मणो बृहतः शर्म्मणि स्यामग्नेरहꣳ सुहवस्य प्प्रणीतौ ॥४९॥

॥५॥ आपो हि ष्ठा मयोभुवस्ता नऽऊर्ज्जे दधातन । महे रणाय चक्क्षसे ॥५०॥
यो वः शिवतमो रसस्तस्य भाजयतेह नः । उशतीरिव मातरः ॥५१॥
तस्म्माऽअरङ्गमाम वो यस्य क्षयाय जिन्न्वथ । आपो जनयथा च नः ॥५२॥
मित्रः सꣳसृज्ज्य पृथिवीम्भूमिञ्च ज्ज्योतिषा सह ।
सुजातञ्जातवेदसमयक्क्ष्माय त्त्वा सꣳसृजामि प्प्रजाब्भ्यः ॥५३॥
रुद्राः सꣳसृज्ज्य पृथिवीम्बृहज्ज्योतिः समीधिरे ।
तेषाम्भानुरजस्रऽइच्छुक्क्रो देवेषु रोचते ॥५४॥
सꣳसृष्टाँव्वसुभी रुद्रैर्द्धीरैः कर्म्मण्ण्याम्मृदम् ।
हस्त्ताब्भ्याम्मृद्वीङ्कृत्त्वा सिनीवाली कृणोतु ताम् ॥५५॥

सि॒नी॒वा॒ली सु॑कप॒र्द्दा सु॑कुरी॒रा स्वौ॑प॒शा ।
सा तुब्भ्य॑मदिते म॒ह्योखान्द॑धातु॒ हस्त॑योः ॥५६॥
उ॒खाङ्कृ॑णोतु॒ शक्त्या॑ बा॒हुब्भ्या॒मदि॑तिर्द्धि॒या ।
मा॒ता पु॒त्रँय्यथो॒पस्थे॒ साग्निम्बि॑भर्त्तु॒ गर्ब्भ॒ऽआ । म॒खस्य॒ शिरो॑सि ॥५७॥ ॥७॥

व्व॒स॑वस्त्वा कृण्वन्तु गाय॒त्रेण॒ च्छन्द॑साङ्गिर॒स्वद्ध्रु॒वासि॑ पृथि॒व्य॒सि धा॒रया॒ मयि॑ प्प्र॒जाꣳ रा॒यस्प्पोष॑ङ्गौप॒त्त्यꣳ सु॒वीर्य्यꣳ सजा॒तान्यज॑मानाय रु॒द्द्रास्त्वा॑ कृण्वन्तु॒ त्त्रैष्ट्टु॑भेन॒ च्छन्द॑साङ्गिर॒स्वद्ध्रु॒वास्य॒न्तरि॑क्षमसि धा॒रया॒ मयि॑ प्प्र॒जाꣳ रा॒यस्प्पोष॑ङ्गौप॒त्त्यꣳ सु॒वीर्य्यꣳ सजा॒तान्यज॑मानायादि॒त्त्यास्त्वा॑ कृण्वन्तु॒ जाग॑तेन॒ च्छन्द॑साङ्गिर॒स्वद्ध्रु॒वासि॒ द्यौर॑सि धा॒रया॒ मयि॑ प्प्र॒जाꣳ रा॒यस्प्पोष॑ङ्गौप॒त्त्यꣳ सु॒वीर्य्यꣳ सजा॒तान्यज॑माना॒य व्विश्वे॑ त्त्वा दे॒वा व्वै॑श्वान॒राः कृ॑ण्व॒न्त्वानु॑ष्ट्टुभेन॒ च्छन्द॑साङ्गिर॒स्वद्ध्रु॒वासि॒ दिशो॑सि धा॒रया॒ मयि॑ प्प्र॒जाꣳ रा॒यस्प्पोष॑ङ्गौप॒त्त्यꣳ सु॒वीर्य्यꣳ सजा॒तान्यज॑मानाय ॥५८॥

अदि॑त्त्यै॒ रास्ना॒स्यदि॑तिष्ट्टे॒ बिल॑ङ्गृब्भ्णातु । कृ॒त्त्वाय॒ सा म॒हीमु॒खाम्मृ॒न्मयीँ॒य्योनि॑म॒ग्नये॑ । पु॒त्रेब्भ्य॒ः प्प्राय॑च्छ॒ददि॑तिः श्र॒पया॒निति॑ ॥५९॥

व्व॒स॑वस्त्वा धूपयन्तु गाय॒त्रेण॒ च्छन्द॑साङ्गिर॒स्वद्रु॒द्द्रास्त्वा॑ धूपयन्तु॒ त्त्रैष्ट्टु॑भेन॒ च्छन्द॑साङ्गिर॒स्वदा॑दि॒त्त्यास्त्वा॑ धूपयन्तु॒ जाग॑तेन॒ च्छन्द॑साङ्गिर॒स्वद्विश्वे॑ त्त्वा दे॒वा व्वै॑श्वान॒रा धू॑पय॒न्त्वानु॑ष्ट्टुभेन॒ च्छन्द॑साङ्गिर॒स्वदिन्द्र॑स्त्वा धूपयतु॒ व्वरु॑णस्त्वा धूपयतु॒ व्विष्णु॑स्त्वा धूपयतु ॥६०॥

॥६॥ अदि॑तिष्ट्वा दे॒वी व्वि॒श्वदे॑व्यावती पृथि॒व्याः स॒धस्थे॑ऽअङ्गिर॒स्वत्ख॑नत्ववट दे॒वाना॑न्त्वा॒ पत्नी॑र्द्दे॒वीर्व्वि॒श्वदे॑व्यावतीः पृथि॒व्याः स॒धस्थे॑ऽअङ्गिर॒स्वद्द॑धतूखे धि॒षणा॑स्त्वा दे॒वीर्व्वि॒श्वदे॑व्यावतीः पृथि॒व्याः स॒धस्थे॑ऽअङ्गिर॒स्वद॒भीन्ध॑तामुखे॒ व्वरू॑त्रीष्ट्वा दे॒वीर्व्वि॒श्वदे॑व्यावतीः पृथि॒व्याः स॒धस्थे॑ऽअङ्गिर॒स्वच्छ्र॒पय॑न्तूखे॒ ग्नास्त्वा॑ दे॒वीर्व्वि॒श्वदे॑व्यावतीः पृथि॒व्याः स॒धस्थे॑ऽअङ्गिर॒स्वत्प॑चन्तूखे॒ जन॑यस्त्वाच्छिन्नपत्रा दे॒वीर्व्वि॒श्वदे॑व्यावतीः पृथि॒व्याः स॒धस्थे॑ऽअङ्गिर॒स्वत्प॑चन्तूखे ॥६१॥

मि॒त्रस्य॑ चर्षणी॒धृतोवो॑ दे॒वस्य॑ सान॒सि । द्यु॒म्नञ्चि॒त्रश्र॑वस्तमम् ॥६२॥
दे॒वस्त्वा॑ सवि॒तोद्व॑पतु सुपा॒णिः स्व॑ङ्गु॒रिः सु॑बा॒हुरु॒त शक्त्या॑ ।
अव्य॑थमाना पृथि॒व्यामाशा॒ दिश॒ऽआपृ॑ण ॥६३॥
उ॒त्थाय॑ बृह॒ती भ॒वोदु॑ तिष्ठ ध्रु॒वा त्वम् ।
मि॒त्रैतान्त॑ऽउ॒खाम्परि॑ददा॒म्म्यभि॑त्त्याऽए॒षा मा भे॑दि ॥६४॥ 494

व॒सव॑स्त्वाच्छृ॑न्दन्तु गाय॒त्रेण॒ च्छन्द॑साङ्गिर॒स्वद्रु॒द्रास्त्वाच्छृ॑न्दन्तु त्रैष्टु॑भेन॒ च्छन्द॑साङ्गिर॒स्वदा॑दि॒त्यास्त्वाच्छृ॑न्दन्तु जाग॑तेन॒ च्छन्द॑साङ्गिर॒स्वद्विश्श्वे॑ त्त्वा दे॒वा वैश्श्वानरा॒ऽ
आच्छृ॑न्दन्त्वानु॑ष्टुभेन॒ च्छन्द॑साङ्गिर॒स्वत् ॥६५॥

॥७॥ आकू॑तिम॒ग्निम्प्र॒युज॒ꣳ स्वाहा॒ मनो॑ मे॒धाम॒ग्निम्प्र॒युज॒ꣳ स्वाहा॑ चि॒त्तँविज्ज्ञा॑तम॒ग्निम्प्र॒युज॒ꣳ स्वाहा॑ वा॒चो विधृ॑तिम॒ग्निम्प्र॒युज॒ꣳ स्वाहा॑ प्प्र॒जाप॑तये॒ मन॑वे॒ स्वाहा॒ग्नये॑ वैश्श्वान॒राय॒ स्वाहा॑ ॥६६॥

विश्श्वो॑ दे॒वस्य॑ ने॒तुर्म्मर्त्तो॑ वुरीत स॒क्ख्यम् ।
विश्श्वो॑ रा॒यऽइ॑षुद्ध्यति द्यु॒म्नँवृ॑णीत पु॒ष्ष्यसे॒ स्वाहा॑ ॥६७॥
मा सु भि॑त्त्था॒ मा सु रि॑षो॒म्ब॑ धृ॒ष्ण्णु वी॒रय॑स्व॒ सु ।
अ॒ग्निश्श्चे॒दङ्क॑रिष्ष्यथः ॥६८॥
दृꣳह॑स्व देवि पृथिवि स्व॒स्त्तय॑ऽआसु॒री मा॒या स्व॒धया॑ कृ॒तासि॑ । जुष्ट्ट॑न्दे॒वेभ्य॑ऽइ॒दम॑स्त्तु ह॒व्यमरि॑ष्ट्टा॒ त्वमुदि॑हि य॒ज्ज्ञेऽअ॒स्स्मिन् ॥६९॥
द्व॒न्नः स॒र्प्पिरा॑सुतिः प्प्र॒त्नो होता॒ वरे॑ण्ण्यः । सह॑सस्प्पु॒त्त्रोऽअद्भु॑तः ॥७०॥
प॒रस्या॒ऽअधि॑ सँव्वतोऽव॑राँ॥ऽअ॒ब्भ्यात॑र । यत्त्रा॒हमस्स्मि॒ ताँ॥ऽअ॑व ॥७१॥
प॒रमस्याः प॑रा॒वतो॑ रो॒हिद॑श्श्वऽइ॒हाग॑हि ।
पु॒री॒ष्ष्यः पु॑रुप्प्रि॒योग्ने॒ त्वन्त॑रा मृ॒धः ॥७२॥
यद॑ग्ने॒ कानि॒ कानि॑ चि॒दा ते॒ दारू॑णि द॒द्ध्मसि॑ ।
सर्व्व॒न्तद॑स्त्तु ते घृ॒तन्तज्जु॑षस्व यविष्ट्ठ्य ॥७३॥
यदत्त्त्युप॒जिह्वि॑का॒ यद्व॒म्म्रोऽअ॑ति॒सर्प्प॑ति ।
सर्व्व॒न्तद॑स्त्तु ते घृ॒तन्तज्जु॑षस्व यविष्ट्ठ्य ॥७४॥
अह॑रह॒रप्प्र॑यावम्भर॒न्तोश्श्वा॑येव॒ तिष्ट्ठ॑ते घा॒सम॑स्म्मै ।
रा॒यस्प्पोषे॑ण॒ समि॒षा मद॒न्तोग्ने॒ मा ते॒ प्प्रति॑वेशा रिषाम ॥७५॥
नाभा॑ पृथि॒व्व्याः स॑मिधा॒नेऽअ॒ग्नौ रा॒यस्प्पोषा॑य बृह॒ते ह॑वामहे ।
इ॒रम्म॒दम्बृ॒हदु॑क्क्थँय्यज॑त्त्रञ्जेता॑रम॒ग्निम्पृत॑नासु सास॒हिम् ॥७६॥
याः सेना॑ऽअ॒भीत्त्व॑रीराव्व्या॒धिनी॒रुग्ग॑णाऽउ॒त ।
ये स्त्ते॒ना ये च॒ तस्क्क॑रा॒स्त्ताँस्ते॑ऽअ॒ग्नेपि॑दधाम्म्या॒स्ये ॥७७॥
दꣳष्ट्रा॑ब्भ्याम्म॒लिम्म्लू॒ञ्जम्भ्यै॒स्त्तस्क्क॑राँ॥ऽउ॒त ।
हनु॑ब्भ्या॒ꣳ स्त्ते॒नान्भगव॒स्त्ताँस्त्वङ्ख्खा॑द॒ सुखा॑दितान् ॥७८॥

ये जनेषु मलिम्म्लव स्तेनासस्तस्करा वने ।
ये कक्षेष्ष्वघायवस्ताँस्ते दधामि जम्भयोः ॥७९॥
योऽअस्म्मब्भ्यमरातीयाद्यश्च नो द्वेषते जनः ।
निन्दाद्योऽअस्म्मान्धिप्प्साच्च सर्व्वन्तम्मस्म्मसा कुरु ॥८०॥
सꣳशितम्मे ब्रह्म सꣳशितँव्वीर्य्यम्बलम् ।
सꣳशितङ्क्षत्रञ्जिष्ण्णु यस्याहमस्म्मि पुरोहितः ॥८१॥
उदेषाम्बाहूऽअतिरमुद्वर्च्चोऽअथो बलम् ।
क्षिणोमि ब्रह्मणामित्रानुन्नयामि स्वाँ२ऽअहम् ॥८२॥
अन्नपतेन्नस्य नो देह्यनमीवस्य शुष्म्मिणः ।
प्रप्प्र दातारन्तारिषऽऊर्जन्नो धेहि द्विपदे चतुष्प्पदे ॥८३॥

॥ इत्येकादशोऽध्यायः ॥

अथ द्वादशोऽध्यायः

ऋषिः (१) 'दृशानो रुक्मः' इत्यारभ्य (११७) 'अग्निः प्रियेषु' इत्यन्तानां सामान्यतः प्रजापतिः साध्या वा ऋषयः। विशेषतश्च—

(१) 'दृशानो रुक्मः' इत्यस्य वत्सप्रीः, (२) 'नक्तोषासा' इत्यस्य कुत्सः, (३) 'विश्वा रूपाणि' इत्यस्य श्यावाश्वः, (६) 'अक्रन्ददग्निः' इत्यस्य वत्सप्रीः, (११) 'आ त्वा' इत्यस्य ध्रुवः, (१२) 'उदुत्तमम्' इत्यस्य शुनःशेपः, (१३) 'अग्ने बृहत्' इत्यस्य त्रितः, (१४) 'हꣳसः शुचिषद्' इत्यस्य वामदेवः, (१८) 'दिवस्परि' इत्यारभ्य (२९) 'अस्ताव्यग्निः' इत्यन्तानां भालन्दनो वत्सप्रीः, (३०) 'समिधाग्निम्' इत्यस्याङ्गिरसो विरूपाक्षः, (३१) 'उदु त्वा' इत्यस्य तापसः, (३३) 'अक्रन्ददग्निः' इत्यस्य वत्सप्रीः, (३४) 'प्रप्रायमग्निः' इत्यस्य वसिष्ठः, (३६) 'अप्स्वग्ने' इत्यस्य विरूपः, (४२) 'बोधा मे' इत्यस्य दीर्घतमाः, (४३) 'स बोधि' 'विश्वकर्मणे' इत्यनयोः सोमाहुतिः, (४७) 'अयꣳ सो अग्निः' इत्यारभ्य (५१) 'इडामग्ने' इत्यन्तानां विश्वामित्रः, (५२) 'अयन्ते' इत्यस्य भारतौ देवश्रवोदेववातौ, (५५) 'ता अस्य' इत्यस्यैन्द्रः प्रियमेधः, (५६) 'इन्द्रं विश्वा' इत्यस्य माधुच्छन्दसो जेता, (६६) 'निवेशनः सङ्गमनः' इत्यस्य देवगन्धर्वो विश्वावसुः, (६७) 'सीरा युञ्जन्ति' (६८) 'युनक्त सीराः' इत्यनयोः सौम्यो बुधः, (६९) 'शुनꣳ सुफालाः' इत्यारभ्य (७२) 'कामङ्कामदुघे' इत्यन्तानां कुमारहारितः, (७५) 'या ओषधीः' इत्यारभ्य (८९) 'याः फलिनीः' इत्यन्तानामाथर्वणो भिषक्, (९०) 'मुञ्चन्तु मा' इत्यारभ्य (१०१) 'त्वमुत्तमासि' इत्यन्तानामाथर्वणो भिषग्बन्धुश्च, (१०२) 'मा मा हिꣳसीत्' इत्यस्य हिरण्यगर्भः, (१०६) 'अग्ने तव' इत्यारभ्य (१११) 'ऋतावानम्महिषम्' इत्यन्तानां पावकोऽग्निः, (११२) 'आप्यायस्व समेतु' (११३) 'सन्ते पयांसि' (११४) 'आप्यायस्व मदिन्तम' इत्येषां गोतमः, (११५) 'आ ते वत्सः' इत्यस्यावत्सारः, (११६) 'तुभ्यन्ताः' (११७) 'अग्निः प्रियेषु' इत्यनयोर्विरूपः ॥

देवता (१) 'दृशानो रुक्मः' इत्यस्य रुक्मः ।
(२) 'नक्तोषासा समनसा' इत्यस्याग्निः ।
(३) 'विश्वा रूपाणि' इत्यस्य सविता ।

(४) 'सुपर्णोसि' इत्यस्य गरुत्मान् ।

(५) 'विष्णोः० सपत्नहा' 'विष्णोः० अभिमातिहा' 'विष्णोः० अरातीयतः' 'विष्णोः० शत्रूयतः' 'दिशोनु विक्रमस्व' इत्येषां लिङ्गोक्ता ।

(६) 'अक्रन्ददग्निः' (७) 'अग्नेभ्यावर्तिन्' (८) 'अग्ने अङ्गिरः' (९) 'पुनरूर्जा' (१०) 'सह रय्या' (११) 'आ त्वाहार्षम्' इत्येषामग्निः ।

(१२) 'उदुत्तमम्' इत्यस्य वरुणः ।

(१३) 'अग्ने बृहत्' इत्यस्याग्निः ।

(१४) 'हꣳसः शुचिषद्' इत्यस्य सूर्यः ।

(१५) 'सीद त्वम्' (१६) 'अन्तरग्ने' (१७) 'शिवो भूत्वा' (१८) 'दिवस्परि' (१९) 'विद्मा ते' (२०) 'समुद्रे त्वा' (२१) 'अक्रन्ददग्निः' (२२) 'श्रीणामुदारः' (२३) 'विश्वस्य केतुः' (२४) 'उशिक्पावकः' (२५) 'दृशानो रुक्मः' (२६) 'यस्ते अद्य' (२७) 'आ तम्भज' (२८) 'त्वामग्ने' (२९) 'अस्ताव्यग्निः' (३०) 'समिधाग्निम्' (३१) 'उदु त्वा' (३२) 'प्रेदग्ने' (३३) 'अक्रन्ददग्निः' (३४) 'प्रप्रायमग्निः' इत्येषामग्निः ।

(३५) 'आपो देवीः' इत्यस्यापः ।

(३६) 'अप्स्वग्ने' (३७) 'गर्भो असि' (३८) 'प्रसद्य भस्मना' (३९) 'पुनरासद्य' (४०) 'पुनरूर्जा' (४१) 'सह रय्या' (४२) 'बोधा मे' (४३) 'स बोधि' इत्येषामग्निः, 'विश्वकर्मणे स्वाहा' इत्यस्य विश्वकर्मा ।

(४४) 'पुनस्त्वादित्याः' इत्यस्याग्निः ।

(४५) 'अपेत वीत' इत्यस्य लिङ्गोक्ता ।

(४६) 'सञ्ज्ञानमसि' इत्यस्य ऊषः, 'अग्नेर्भस्म' इत्यस्य सिकता, 'चित स्थ' इत्यस्य परिश्रितः ।

(४७) 'अयꣳ सः' (४८) 'अग्ने यत्ते' (४९) 'अग्ने दिवः' (५०) 'पुरीष्यासो अग्नयः' (५१) 'इडामग्ने' (५२) 'अयन्ते' इत्येषामग्निः ।

(५३) 'चिदसि तया' 'परिचिदसि तया' इत्यनयोरिष्टका ।

(५४) 'लोकम्पृण' इत्यस्य लिङ्गोक्ता ।

(५५) 'ता अस्य' इत्यस्यापः ।

(५६) 'इन्द्रं विश्वा' इत्यस्येन्द्रः ।

(५७) 'समितꣳ सङ्कल्पेथाम्' (५८) 'सं वाम्' (५९) 'अग्ने त्वम्' (६०) 'भवतन्नः' इत्येषां द्वावग्नी ।

(६१) 'मातेव पुत्रम्' इत्यस्य उखा ।

(६२) 'असुन्वन्तम्' (६३) 'नमः सु ते' (६४) 'यस्यास्ते' इत्येषां निर्ऋतिः ।

(६५) 'यन्ते देवी' इत्यस्य यजमानः, 'नमो भूत्यै' इत्यस्य भूतिः ।

(६६) 'निवेशनः सङ्गमनः' इत्यस्येन्द्रः ।

(६७) 'सीरा युञ्जन्ति' (६८) 'युनक्त सीराः' इत्यनयोः सीरः ।

(६९) 'शुनꣳ सु फालाः' (७०) 'घृतेन सीता' (७१) 'लाङ्गलम्पवीरवत्' (७२) 'कामङ्कामदुघे' इत्येषां सीता ।

(७३) 'विमुच्यध्वमघ्न्या इत्यस्य अनड्वान् ।

(७४) 'सजूरब्दः' इत्यस्य लिङ्गोक्ता ।

(७५) 'या ओषधीः' (७६) 'शतं वः' (७७) 'ओषधीः प्रतिमोदध्वम्' (७८) 'ओषधीरिति' (७९) 'अश्वत्थे वः' (८०) 'यत्रौषधीः' (८१) 'अश्वावतीम्' (८२) 'उच्छुष्मा ओषधीनाम्' (८३) 'इष्कृतिर्नाम' (८४) 'अति विश्वाः' (८५) 'यदिमाः' (८६) 'यस्यौषधीः' (८७) 'साकं यक्ष्म' (८८) 'अन्या वः' (८९) 'याः फलिनीः' (९०) 'मुञ्चन्तु मा' (९१) 'अवपतन्तीः' (९२) 'या ओषधीः० बह्वीः' (९३) 'या ओषधीः० विष्ठिताः' (९४) 'याश्चेदम्' (९५) 'मा वो रिषत्' (९६) 'ओषधयः समवदन्त' (९७) 'नाशयित्री बलासस्य' (९८) 'त्वाङ्गन्धर्वाः' (९९) 'सहस्व मे' (१००) 'दीर्घायुस्ते' (१०१) 'त्वमुत्तमासि' इत्येषामोषधिः ।

(१०२) 'मा मा हिꣳसीत्' इत्यस्य कः ।

(१०३) 'अभ्यावर्तस्व' (१०४) 'अग्ने यत्ते' इत्यनयोरग्निः ।

(१०५) 'इषमूर्जम्' इत्यस्याशीः ।

(१०६) 'अग्ने तव' (१०७) 'पावकवर्चाः' (१०८) 'ऊर्जोनपात्' (१०९) 'इरज्ज्यन्नग्ने' (११०) 'इष्कर्त्तारमध्वरस्य' (१११) 'ऋतावानम्महिषम्' इत्येषामग्निः ।

(११२) 'आप्यायस्व समेतु' (११३) 'सन्ते पयांसि' (११४) 'आप्यायस्व मदिन्तम' इत्येषां सोमः ।

(११५) 'आ ते वत्सः' (११६) 'तुभ्यन्ताः' (११७) 'अग्निः प्रियेषु' इत्येषामग्निः ॥

छन्दः (१) 'दृशानो रुक्मः' (२) 'नक्तोषासा समनसा' इत्यनयोस्त्रिष्टुप्, (३) 'विश्वा रूपाणि' इत्यस्य जगती, (४) 'सुपर्णोसि' इत्यस्य कृतिः, (६) 'अक्रन्ददग्निः' इत्यस्य त्रिष्टुप्, (७) 'अग्नेभ्यावर्तिन्' इत्यस्योर्ध्वबृहती, (८) 'अग्ने अङ्गिरः' इत्यस्य महाबृहती, (९) 'पुनरूर्जा' (१०) 'सह रय्या' इत्यनयोर्गायत्री, (११) 'आ त्वाहार्षम्' इत्यस्यानुष्टुप्, (१२) 'उदुत्तमम्' (१३) 'अग्ने बृहत' इत्यनयोस्त्रिष्टुप्, (१४) 'हꣳसः शुचिषद्' इत्यस्य जगती, 'बृहत्' इति यजुः, (१५) 'सीद त्वम्' इत्यस्य त्रिष्टुप्, (१६) 'अन्तरग्ने' (१७) 'शिवो भूत्वा' इत्यनयोरनुष्टुप्, (१८) 'दिवस्परि' इत्यारभ्य (२९) 'अस्ताव्यग्निः' इत्यन्तानां त्रिष्टुप्, (३०) 'समिधाग्निम्' इत्यस्य गायत्री, (३१) 'उदु त्वा' (३२) 'प्रेदग्ने' इत्यनयोरनुष्टुप्, (३३) 'अक्रन्ददग्निः' (३४) 'प्रप्रायमग्निः' (३५) 'आपो देवीः' इत्येषां त्रिष्टुप्, (३६) 'अप्स्वग्ने' इत्यस्य गायत्री, (३७) 'गर्भो असि' (३८) 'प्रसद्य भस्मना' (३९) 'पुनरासद्य' इत्येषामनुष्टुप्, (४०) 'पुनरूर्जा' (४१) 'सह रय्या' इत्यनयोर्गायत्री, (४२) 'बोधा मे' इत्यस्य त्रिष्टुप्, (४३) 'स बोधि' इत्यस्य गायत्री, 'विश्वकर्मणे स्वाहा' इति यजुः, (४४) 'पुनस्त्वादित्याः' (४५) 'अपेत वीत' (४७) 'अयꣳ सो अग्निः' (४८) 'अग्ने यत्ते' (४९) 'अग्ने दिवः' इत्येषां त्रिष्टुप्, (५०) 'पुरीष्यासो अग्नयः' इत्यस्यानुष्टुप्, (५१) 'इडामग्ने' इत्यस्य त्रिष्टुप्, (५२) 'अयन्ते' (५४) 'लोकम्पृण' (५५) 'ता अस्य' (५६) 'इन्द्रं विश्वा' इत्येषामनुष्टुप्, (५७) 'समितꣳ सङ्कल्पेथाम्' इत्यस्योष्णिक्, (५८) 'सं वाम्' इत्यस्योपरिष्टाद्बृहती, (५९) 'अग्ने त्वम्' इत्यस्योष्णिक्, (६०) 'भवतन्नः' इत्यस्य पङ्क्तिः, (६१) 'मातेव पुत्रम्' इत्यारभ्य (६५) 'यन्ते' इत्यन्तानां त्रिष्टुप्, 'नमो भूत्यै' इत्यस्यैकपदा विराट्, (६६) 'निवेशनः सङ्गमनः' इत्यस्य त्रिष्टुप्, (६७) 'सीरा युञ्जन्ति' इत्यस्य गायत्री, (६८) 'युनक्त सीराः' (६९) 'शुनꣳ सु फालाः' (७०) 'घृतेन सीता' इत्येषां त्रिष्टुप्, (७१) 'लाङ्गलम्पवीरवत्' इत्यस्य पङ्क्तिः, (७२) 'कामङ्कामदुघे' इत्यस्यानुष्टुप्, (७३) 'विमुच्यध्वम्' इत्यस्य गायत्री, (७५) 'या ओषधीः' इत्यारभ्य (१०१) 'त्वमुत्तमासि' इत्यन्तानामनुष्टुप्, (१०२) 'मा मा हिꣳसीत्' इत्यस्य त्रिष्टुप्, 'अभ्यावर्तस्व' इत्यस्योष्णिक्, (१०४) 'अग्ने यत्ते' इत्यस्य गायत्री, (१०५) 'इषमूर्जम्' इत्यस्य त्रिष्टुप्, (१०६) 'अग्ने तव' (१०७) 'पावकवर्चाः' इत्यनयोर्विष्टारपङ्क्तिः, (१०८) 'ऊर्जोनपात्' (१०९) 'इरज्ज्यन्नग्ने' (११०) 'इष्कर्तारम्' इत्येषां सतोबृहती, (१११) 'ऋतावानम्महिषम्' इत्यस्योपरिष्टाज्ज्योतिः, (११२) 'आप्यायस्व समेतु' इत्यस्य गायत्री, (११३) 'सन्ते पयांसि' इत्यस्य त्रिष्टुप्, (११४) 'आप्यायस्व मदिन्तम' इत्यस्योष्णिक्, (११५) 'आ ते वत्सः' (११६) 'तुभ्यन्ताः' (११७) 'अग्निः प्रियेषु' इत्येषां गायत्री ॥

॥ हरिः ॐ ॥

॥१॥ दृशानो रुक्मऽउर्व्या व्यद्यौद्दुर्म्मर्षमायुः श्रिये रुचानः ।
अग्निरमृतोऽअभवद्वयोभिर्य्यदेनन्द्यौरजनयत्त्सुरेताः ॥१॥
नक्तोषासा समनसा विरूपे धापयेते शिशुमेकꣳ समीची ।
द्यावाक्षामा रुक्मोऽअन्तर्व्विभाति देवाऽअग्निन्धारयन्द्रविणोदाः ॥२॥
विश्वा रूपाणि प्प्रतिमुञ्चते कविः प्प्रासावीद्भद्रन्द्विपदे चतुष्प्पदे ।
वि नाकमक्ख्यत्त्सविता वरेण्ण्योनु प्प्रयाणमुषसो विराजति ॥३॥

सुपर्ण्णोसि गरुत्माँस्त्रिवृत्ते शिरो गायत्रञ्चक्षुर्बृहद्रथन्तरे पक्षौ। स्तोमऽआत्मा च्छन्दाꣳस्यङ्गानि यजूꣳषि नाम। साम ते तनूर्व्वामदेव्यँय्यज्ञायज्ञियम्पुच्छन्धिष्ण्याः शफाः। सुपर्ण्णोसि गरुत्मान्दिवङ्गच्छ स्वः पत ॥४॥

विष्ण्णोः क्रमोसि सपत्नहा गायत्रञ्छन्दऽआरोह पृथिवीमनु विक्रमस्व विष्ण्णोः क्रमोस्यभिमातिहा त्रैष्टुभञ्छन्दऽआरोहान्तरिक्षमनु विक्रमस्व विष्ण्णोः क्रमोस्यरातीयतो हन्ता जागतञ्छन्दऽआरोह दिवमनु विक्रमस्व विष्ण्णोः क्रमोसि शत्रूयतो हन्तानुष्टुभञ्छन्दऽआरोह दिशोनु विक्रमस्व ॥५॥

अक्रन्ददग्नि स्त्तनयन्निव द्यौः क्षामा रेरिहद्वीरुधः समञ्जन्।
सद्यो जज्ज्ञानो वि हीमिद्धोऽअक्ख्यदा रोदसी भानुना भात्त्यन्तः ॥६॥

अग्नेब्भ्यावर्त्तिन्नभि मा निवर्त्तस्वायुषा वर्च्चसा प्प्रजया धनेन।
सन्न्या मेधया रय्या पोषेण ॥७॥

अग्नेऽअङ्गिरः शतन्ते सन्त्वावृतः सहस्रन्तऽउपावृतः।
अधा पोषस्य पोषेण पुनर्न्नो नष्टमाकृधि पुनर्न्नो रयिमाकृधि ॥८॥

पुनरूर्ज्जा निवर्त्तस्व पुनरग्नऽइषायुषा। पुनर्न्नः पाह्यꣳहसः ॥९॥

सह रय्या निवर्त्तस्वाग्ने पिन्वस्व धारया। विश्श्वप्स्न्या विश्श्वतस्प्परि ॥१०॥

आ त्वाहार्षमन्तरभूर्द्ध्रुवस्त्तिष्ठाविचाचलिः।
विशस्त्त्वा सर्व्वा वाञ्छन्तु मा त्वद्राष्ट्रमधिब्भ्रशत् ॥११॥

उदुत्तमँव्वरुण पाशमस्म्मदवाधमँव्वि मद्ध्यमꣳ श्रथाय।
अथा वयमादित्त्य व्रते तवानागसोऽअदितये स्याम ॥१२॥

अग्ग्रे बृहन्नुषसामूर्द्ध्वोऽअस्त्थान्निर्ज्जगन्वान्तमसो ज्योतिषागात्।
अग्निर्ब्भानुना रुशता स्वङ्गऽआ जातो विश्श्वा सद्मान्यप्प्राः ॥१३॥

हꣳसः शुचिषद्वसुरन्तरिक्षसद्धोता वेदिषदतिथिर्द्दुरोणसत्।
नृषद्वरसदृतसद्व्योमसदब्जा गोजाऽऋतजाऽअद्रिजाऽऋतम्बृहत् ॥१४॥

सीद त्वम्मातुरस्याऽउपस्त्थे विश्श्वान्यग्ने वयुनानि विद्वान्।
मैनान्तपसा मार्च्चिषाभिशोचीरन्तरस्याꣳ शुक्रज्योतिर्व्विभाहि ॥१५॥

अन्तरग्ने रुचा त्वमुखायाः सदने स्वे। तस्यास्त्वꣳ हरसा तपञ्जातवेदः शिवो भव ॥१६॥

शिवो भूत्वा मह्यमग्नेऽअथो सीद शिवस्त्वम्।
शिवाः कृत्वा दिशः सर्व्वाः स्वँय्योनिमिहासदः ॥१७॥

॥२॥ दि॒वस्प्परि॑ प्प्रथ॒मञ्ज॑ज्ञेऽअ॒ग्निर॒स्म्मद्द्वि॒तीय॒म्परि॑ जा॒तवे॑दाः ।
तृ॒तीय॑म॒प्प्सु नृ॒मणा॒ऽअज॑स्र॒मिन्धा॑नऽएनञ्जरते स्वा॒धीः ॥१८॥
वि॒द्द्मा ते॑ऽअग्ने त्रे॒धा त्र॒याणि॑ वि॒द्द्मा ते॒ धाम॒ विभृ॑ता पुरु॒त्रा ।
वि॒द्द्मा ते॒ नाम॑ पर॒मङ्गुहा॒ यद्वि॒द्द्मा तमु॒त्त्सँ॒य्यत॑ऽआज॒गन्थ॑ ॥१९॥
स॒मु॒द्द्रे त्त्वा॑ नृ॒मणा॑ऽअ॒प्प्स्व॒न्तर्नृ॒चक्क्षा॑ऽईधे दि॒वोऽअ॑ग्न॒ऽऊध॑न् ।
तृ॒तीये॑ त्त्वा॒ रज॑सि तस्थि॒वाꣳस॑म॒पामु॒पस्त्थे॑ महि॒षाऽअ॑वर्द्धन् ॥२०॥
अक्क्र॑न्दद॒ग्नि स्त॒नय॑न्निव॒ द्यौः क्क्षामा॒ रेरि॑हद्वी॒रुधः॑ सम॒ञ्जन् ।
स॒द्द्यो ज॑ज्ञा॒नो वि ही॑मि॒द्धोऽअक्ख्य॒दा रोद॑सी भा॒नुना॑ भात्त्य॒न्तः ॥२१॥
श्री॒णामु॑दा॒रो ध॒रुणो॑ रयी॒णाम्म॑नी॒षाणा॒म्प्रार्प्प॑णः॒ सोम॑गोपाः ।
वसुः॑ सू॒नुः सह॑सोऽअ॒प्प्सु राजा॒ विभा॒त्त्यग्ग्र॑ऽउ॒षसा॑मिधा॒नः ॥२२॥
विश्श्व॑स्य के॒तुर्भुव॑नस्य॒ गर्ब्भ॒ऽआ रोद॑सीऽअपृणा॒ज्जाय॑मानः ।
वी॒डुञ्चि॑दद्द्रि॑मभिनत्परा॒यञ्जना॒ यद॒ग्निमय॑जन्त॒ पञ्च॑ ॥२३॥
उ॒शिक्क्पा॑व॒कोऽअ॑र॒तिः सु॑मे॒धा मर्त्ते॑ष्व॒ग्निर॒मृतो॒ निधा॑यि ।
इय॑र्त्ति धू॒मम॑रु॒षम्भरि॑भ्रदु॒च्छुक्क्रेण॑ शो॒चिषा॒ द्यामिन॑क्क्षन् ॥२४॥
दृ॒शा॒नो रु॒क्क्मऽउ॒र्व्या व्य॑द्यौद्दु॒र्म्मर्ष॒मायुः॑ श्रि॒ये रु॑चा॒नः ।
अ॒ग्निर॒मृतो॑ऽअभव॒द्वयो॑भि॒र्य्यदे॑न॒न्द्यौरज॑नयत्सु॒रेताः॑ ॥२५॥
यस्ते॑ऽअ॒द्द्य कृ॒णव॑द्भद्रशोचेपू॒पन्दे॑व घृ॒तव॑न्तमग्ने ।
प्र तन्न॑य प्प्र॒तरँ॒व्वस्यो॒ऽअच्छा॒भि सु॒म्नन्दे॒वभ॑क्तँय्यविष्ठ ॥२६॥
आ तम्भ॑ज सौश्श्र॒वसे॑ष्वग्नऽउ॒क्क्थऽउ॑क्क्थ॒ऽआभ॑ज श॒स्यमा॑ने ।
प्रि॒यः सूर्य्ये॑ प्प्रि॒योऽअ॒ग्ना भ॑वा॒त्त्युज्जा॒तेन॑ भि॒नद॒दुज्जनि॑त्त्वैः ॥२७॥
त्वाम॑ग्ने॒ यज॑माना॒ऽअनु॒ द्यून्विश्श्वा॒ वसु॑ दधिरे॒ वार्य्या॑णि ।
त्वया॑ स॒ह द्र॒विण॑मि॒च्छमा॑ना व्र॒जङ्गोम॑न्तमु॒शिजो॒ विव॑व्रुः ॥२८॥
अस्ता॑व्य॒ग्निर्न्न॒राꣳ सु॒शेवो॑ वैश्श्वान॒रऽऋषि॑भिः॒ सोम॑गोपाः ।
अ॒द्वे॒षे द्यावा॑पृथि॒वी हु॑वेम॒ देवा॑ ध॒त्त र॒यिम॒स्म्मे सु॒वीर॑म् ॥२९॥ ॥४॥

॥३॥ स॒मिधा॒ग्निन्दु॑वस्यत घृ॒तैर्ब्बो॑धय॒ताति॑थिम् ।
आस्मि॑न्ह॒व्या जु॑होतन ॥३०॥
उदु॑ त्त्वा॒ विश्श्वे॑ दे॒वाऽअग्ने॒ भर॑न्तु॒ चित्ति॑भिः ।
स नो॑ भव शि॒वस्त्त्वꣳ सु॒प्प्रती॑को वि॒भाव॑सुः ॥३१॥

प्रेदग्ने ज्ज्योतिष्म्मान्याहि शिवेभिरर्च्चिभिष्ट्वम् ।
बृहद्भिर्ब्भानुभिर्ब्भासन्मा हिꣳसीस्तन्न्वा प्प्रजाः ॥३२॥
अक्क्रन्ददग्नि स्त्तनयन्निव द्यौः क्क्षामा रेरिहद्वीरुधः समञ्जन् ।
सद्यो जज्ज्ञानो व्वि हीमिद्धोऽअक्ख्यदा रोदसी भानुना भात्यन्तः ॥३३॥
प्प्रप्प्रायमग्निर्ब्भरतस्य शृण्ण्वे व्वि यत्सूर्य्यो न रोचते बृहद्भाः ।
अभि यः पूरुम्पृतनासु तस्त्थौ दीदाय दैव्व्योऽअतिथिः शिवो नः ॥३४॥
आपो देवीः प्प्रतिगृब्भ्णीत भस्म्मैतत्स्योने कृणुद्ध्वꣳ सुरभाऽउ लोके ।
तस्म्मै नमन्ताञ्जनयः सुपत्नीर्म्मातेव पुत्त्रम्बिभृताप्प्स्वेनत् ॥३५॥
अप्प्स्वग्ने सधिष्ट्टव सौषधीरनुरुद्ध्यसे । गर्ब्भे सञ्जायसे पुनः ॥३६॥
गर्ब्भोऽअस्योषधीनाङ्गर्ब्भो व्वनस्प्पतीनाम् ।
गर्ब्भो व्विश्श्वस्य भूतस्याग्ने गर्ब्भोऽअपामसि ॥३७॥
प्प्रसद्य भस्म्मना योनिमपश्च- पृथिवीमग्ने ।
सꣳसृज्ज्य मातृभिष्ट्वञ्ज्योतिष्म्मान्पुनरासदः ॥३८॥
पुनरासद्य सदनमपश्च पृथिवीमग्ने । शेषे मातुर्य्यथोपस्त्थेन्तरस्याꣳ शिवतमः ॥३९॥
पुनरूर्ज्जा निवर्त्तस्व पुनरग्नऽइषायुषा । पुनर्न्नः पाह्यꣳहसः ॥४०॥
सह रय्या निवर्त्तस्वाग्ने पिन्न्वस्व धारया । व्विश्श्वप्स्न्न्या व्विश्श्वतस्प्परि ॥४१॥
बोधा मेऽअस्य व्वचसो यविष्ठ मꣳहिष्ठस्य प्प्रभृतस्य स्वधावः ।
पीयति त्त्वोऽअनु त्त्वो गृणाति व्वन्दारुष्टे तन्न्वँव्वन्देऽअग्ने ॥४२॥
स बोधि सूरिर्म्मघवा व्वसुपते व्वसुदावन् ।
युयोद्ध्यस्म्मद्द्वेषाꣳसि व्विश्श्वकर्म्मणे स्वाहा ॥४३॥
पुनस्त्त्वादित्त्या रुद्द्रा व्वसवः समिन्धताम्पुनर्ब्ब्रह्माणो व्वसुनीथ यज्ञैः ।
घृतेन त्त्वन्तन्न्वँव्वर्द्धयस्व सत्त्याः सन्तु यजमानस्य कामाः ॥४४॥

॥४॥ अपेत व्वीत व्वि च सर्प्पतातो येत्र स्त्थ पुराणा ये च नूतनाः ।
अदाद्यमोवसानम्पृथिव्व्याऽअक्रन्निमम्पितरो लोकमस्म्मै ॥४५॥
सञ्ज्ञानमसि कामधरणम्म्मयि ते कामधरणम्भूयात् ।
अग्नेर्ब्भस्म्मास्यग्नेः पुरीषमसि चित स्त्थ परिचितऽऊर्द्ध्वचितः श्रयद्ध्वम् ॥४६॥
अयꣳ सोऽअग्निर्य्यस्म्मिन्त्सोममिन्द्रः सुतन्दधे जठरे व्वावशानः ।
सहस्त्रियँव्वाजमत्त्यन्न सप्तिꣳ ससवान्त्सन्त्स्तूयसे जातवेदः ॥४७॥

अग्ने यत्ते दिवि वर्च्चः पृथिव्याँय्यदोषधीष्ष्वप्प्स्वा यजत्र ।
येनान्तरिक्क्षमुर्व्वाततन्थ त्त्वेषः स भानुरर्ण्णवो नृचक्क्षाः ॥४८॥
अग्ने दिवोऽअर्ण्णमच्छा जिगास्यच्छा देवाँ२॥ऽऊचिषे धिष्ण्ण्या ये ।
या रोचने परस्त्तात्त्सूर्य्यस्य याश्श्चावस्तादुपतिष्ठन्तऽआपः ॥४९॥
पुरीष्ष्यासोऽअग्नयः प्प्रावणेभिः सजोषसः ।
जुषन्ताँय्यज्ञमद्द्रुहोऽनमीवाऽइषो महीः ॥५०॥
इडामग्ने पुरुदꣳसꣳ सनिङ्गोः शश्श्वत्तमꣳ हवमानाय साध ।
स्यान्नः सूनुस्त्तनयो व्विजावाग्ने सा ते सुमतिर्ब्भूत्त्वस्म्मे ॥५१॥
अयन्ते योनिर्ऋत्त्वियो यतो जातोऽअरोचथाः ।
तञ्जानन्नग्नऽआरोहाथा नो वर्द्धया रयिम् ॥५२॥
चिदसि तया देवतयाङ्गिरस्वद्ध्रुवा सीद परिचिदसि तया देवतयाङ्गिरस्वद्ध्रुवा सीद ॥५३॥
लोकम्पृण च्छिद्द्रम्पृणाथो सीद द्ध्रुवा त्त्वम् ।
इन्द्राग्नी त्त्वा बृहस्प्पतिरस्म्मिन्य्योनावसीषदन् ॥५४॥
ताऽअस्य सूददोहसः सोमꣳ श्रीणन्ति पृश्नयः ।
जन्मन्देवानाँव्विशस्त्रिष्ष्वारोचने दिवः ॥५५॥
इन्द्रँव्विश्श्वाऽअवीवृधन्त्समुद्द्रव्यचसङ्गिरः ।
रथीतमꣳ रथीनाँव्वाजानाꣳ सत्त्पतिम्पतिम् ॥५६॥
समितꣳ सङ्कल्प्पेथाꣳ सम्प्प्रियौ रोचिष्ण्णू सुमनस्यमानौ ।
इषमूर्ज्जमभि सँव्वसानौ ॥५७॥
सँव्वाम्मनाꣳसि सँव्व्रता सम्मु चित्तान्याकरम् ।
अग्ने पुरीष्ष्याधिपा भव त्त्वन्नऽइषमूर्ज्जँय्यजमानाय धेहि ॥५८॥
अग्ने त्त्वम्पुरीष्ष्यो रयिमान्पुष्ष्टिमाँ२॥ऽअसि ।
शिवाः कृत्त्वा दिशः सर्व्वाः स्वँय्योनिमिहासदः ॥५९॥
भवतन्नः समनसौ सचेतसावरेपसौ ।
मा यज्ञꣳ हिꣳसिष्ष्टम्मा यज्ञपतिञ्जातवेदसौ शिवौ भवतमद्य नः ॥६०॥
मातेव पुत्रम्पृथिवी पुरीष्ष्यमग्निꣳ स्वे योनावभारुखा ।
ताँव्विश्श्वैर्द्देवैर्ऋतुभिः सँव्विदानः प्प्रजापतिर्व्विश्श्वकर्म्मा व्विमुञ्चतु ॥६१॥

॥५॥ असुन्वन्तमयजमानमिच्छ स्तेनस्येत्त्यामन्विहि तस्करस्य ।
अन्यमस्मदिच्छ सा तऽइत्त्या नमो देवि निर्ऋते तुभ्यमस्तु ॥६२॥
नमः सु ते निर्ऋते तिग्मतेजोयस्मयँविचृता बन्धमेतम् ।
यमेन त्वँय्यम्या सँविदानोत्तमे नाकेऽअधिरोहयैनम् ॥६३॥
यस्यास्ते घोरऽआसञ्जुहोम्म्येषाम्बन्धानामवसर्जनाय ।
यान्त्वा जनो भूमिरिति प्रमन्दते निर्ऋतिन्त्वाहम्परिवेद विश्वतः ॥६४॥
यन्ते देवी निर्ऋतिराबबन्ध पाशङ्ग्रीवास्वविचृत्त्यम् ।
तन्ते विष्ष्याम्म्यायुषो न मद्ध्यादथैतम्पितुमद्धि प्रसूतः । नमो भूत्यै येदञ्चकार ॥६५॥
निवेशनः सङ्गमनो वसूनाँविश्वा रूपाभिचष्टे शचीभिः ।
देवऽइव सविता सत्त्यधर्म्मेन्द्रो न तस्त्थौ समरे पथीनाम् ॥६६॥
सीरा युञ्जन्ति कवयो युगा वितन्वते पृथक् । धीरा देवेषु सुम्नया ॥६७॥
युनक्त सीरा वि युगा तनुद्ध्वङ्कृते योनौ वपतेह बीजम् ।
गिरा च श्रुष्टिः सभराऽअसन्नो नेदीयऽइत्सृण्ण्यः पक्वमेयात् ॥६८॥
शुनꣳ सुफाला विकृषन्तु भूमिꣳ शुनङ्कीनाशाऽअभियन्तु वाहैः ।
शुनासीरा हविषा तोशमाना सुपिप्पलाऽओषधीः कर्त्तनास्म्मे ॥६९॥
घृतेन सीता मधुना समज्ज्यताँविश्वैर्देवैरनुमता मरुद्भिः ।
ऊर्ज्जस्वती पयसा पिन्वमानास्म्मान्त्सीते पयसाभ्याववृत्त्स्व ॥७०॥
लाङ्गलम्पवीरवत्सुशेवꣳ सोमपित्सरु ।
तदुद्वपति गामविम्प्रफर्व्यञ्च पीवरीम्प्रस्त्थावद्रथवाहणम् ॥७१॥
कामङ्कामदुघे धुक्ष्व मित्राय वरुणाय च ।
इन्द्रायाश्विभ्याम्पूष्णे प्रजाभ्यऽओषधीभ्यः ॥७२॥
विमुच्यद्ध्वमघ्न्या देवयानाऽअगन्म तमसस्पारमस्य । ज्योतिरापाम ॥७३॥
सजूरब्दोऽअयवोभिः सजूरुषाऽअरुणीभिः । सजोषसावश्विना दꣳसोभिः सजूः
सूरऽएतशेन सजूर्वैश्वानरऽइडया घृतेन स्वाहा ॥७४॥

॥६॥ याऽओषधीः पूर्वा जाता देवेभ्यस्त्रियुगम्पुरा ।
मनै नु बभ्रूणामहꣳ शतन्धामानि सप्त च ॥७५॥
शतँवोऽअम्ब धामानि सहस्रमुत वो रुहः ।
अधा शतक्रत्वो यूयमिमम्मेऽअगदङ्कृत ॥७६॥

ओषधीः प्प्रतिमोदद्ध्वम्पुष्प्पवतीः प्प्रसूवरीः ।
अश्श्वाऽइव सजित्त्वरीर्व्वीरुधः पारयिष्ण्ण्वः ॥७७॥
ओषधीरिति मातरस्तद्वो देवीरुपब्रुवे ।
सनेयमश्श्वङ्गाँव्वासऽआत्त्मानन्तव पूरुष ॥७८॥
अश्श्वत्त्थे वो निषदनम्पर्ण्णे वो व्वसतिष्कृता ।
गोभाजऽइत्त्किलासथ यत्त्सनवथ पूरुषम् ॥७९॥
यत्रौषधीः समग्ग्मत राजानः समिताविव ।
व्विप्प्रः सऽउच्च्यते भिषग्ग्रक्षोहामीवचातनः ॥८०॥
अश्श्वावतीᳫं सोमावतीमूर्ज्जयन्तीमुदोजसम् ।
आवित्त्सि सर्व्वाऽओषधीरस्म्माऽअरिष्ट्टतातये ॥८१॥
उच्छुष्म्माऽओषधीनाङ्गावो गोष्ठादिवेरते ।
धनꣳ सनिष्ष्यन्तीनामात्त्मानन्तव पूरुष ॥८२॥
इष्कृतिर्न्नाम वो माताथो यूयᳫं स्त्थ निष्कृतीः ।
सीराः पतत्रिणी स्त्थन यदामयति निष्कृथ ॥८३॥
अति व्विश्श्वाः परिष्ठा स्तेनऽइव व्व्रजमक्क्रमुः ।
ओषधीः प्प्राचुच्च्यवुर्य्यत्किञ्च तन्वो रपः ॥८४॥
यदिमा व्वाजयन्नहमोषधीर्हस्तऽआदधे ।
आत्त्मा यक्क्ष्मस्य नश्श्यति पुरा जीवगृभो यथा ॥८५॥
यस्यौषधीः प्प्रसर्प्पथाङ्गमङ्गम्परुष्प्परुः ।
ततो यक्क्ष्मँव्विबाधद्ध्वऽउग्ग्रो मद्ध्यमशीरिव ॥८६॥
साकँय्यक्ष्म प्प्रपत चाषेण किकिदीविना ।
साकँव्वातस्य ध्राज्ज्या साकन्नश्श्य निहाकया ॥८७॥
अन्न्या वोऽअन्न्यामवत्त्वन्न्यान्न्यस्याऽउपावत ।
ताः सर्व्वाः सँव्विदानाऽइदम्मे प्प्रावता व्वचः ॥८८॥
याः फलिनीर्य्याऽअफलाऽअपुष्प्पा याश्च्च पुष्प्पिणीः ।
बृहस्प्पतिप्प्रसूतास्ता नो मुञ्चन्त्वꣳहसः ॥८९॥
मुञ्चन्तु मा शपत्थ्यादथो व्वरुण्ण्यादुत ।
अथो यमस्य पड्वीशात्सर्व्वस्म्माद्देवकिल्बिषात् ॥९०॥

अ॒व॒पत॑न्तीरवदन्दि॒वऽओष॑धय॒स्प्परि॑ ।
यञ्जी॒वम॒श्नवा॑महै॒ न स रि॑ष्याति॒ पूरु॑षः ॥९१॥
याऽओष॑धीः॒ सोम॑राज्ञीर्ब्ब॒ह्वीः श॒तवि॑चक्षणाः ।
तासा॑मसि॒ त्वमु॑त्त॒मार॒ङ्कामा॑य॒ शꣳ हृ॒दे ॥९२॥
याऽओष॑धीः॒ सोम॑राज्ञी॒र्व्विष्ठि॑ताः पृथि॒वीमनु॑ ।
बृ॒हस्प्पति॑प्प्रसूताऽअ॒स्यै सन्द॑त्त वी॒र्य्य॑म् ॥९३॥
याश्चे॒दमु॑पशृ॒ण्वन्ति॒ याश्च॑ दू॒रम्परा॑गताः ।
सर्व्वाः॑ स॒ङ्गत्य॑ वीरुधो॒स्यै सन्द॑त्त वी॒र्य्य॑म् ॥९४॥
मा वो॑ रिषत्खनि॒ता यस्म्मै॑ चा॒हङ्खना॑मि वः ।
द्वि॒पाच्चतु॑ष्प्पाद॒स्म्माकꣳ॒ सर्व्व॑मस्त्वनातु॒रम् ॥९५॥
ओष॑धयः॒ सम॑वदन्त॒ सोमे॑न स॒ह राज्ञा॑ ।
यस्म्मै॑ कृ॒णोति॑ ब्राह्म॒णस्तꣳ रा॑जन्पारयामसि ॥९६॥
ना॒श॒यि॒त्री ब॒लास॒स्यार्श॑सऽउप॒चिता॑मसि ।
अथो॑ श॒तस्य॒ यक्ष्मा॑णाम्पाका॒रोर॑सि॒ नाश॑नी ॥९७॥
त्वाङ्ग॑न्ध॒र्व्वाऽअ॑खनँ॒स्त्वामिन्द्र॒स्त्वाम्बृह॒स्प्पति॑ः ।
त्वामो॑षधे॒ सोमो॒ राजा॑ वि॒द्वान्यक्ष्मा॑दमुच्यत ॥९८॥
सह॑स्व मे॒ऽअरा॑तीः॒ सह॑स्व पृतनाय॒तः ।
सह॑स्व॒ सर्व्व॑म्पा॒प्प्मान॒ꣳ सह॑मानास्योषधे ॥९९॥
दी॒र्ग्घायु॑स्तऽओषधे खनि॒ता यस्म्मै॑ च त्वा॒ खना॑म्म्यहम् ।
अथो॒ त्वन्दी॒र्ग्घायु॑र्ब्भू॒त्वा श॒तव॑ल्शा॒ विरो॑हतात् ॥१००॥
त्वमु॑त्त॒मास्यो॑षधे॒ तव॑ वृ॒क्षाऽउप॑स्तयः ।
उप॑स्तिरस्तु॒ सो॒ऽस्म्माकँ॒य्यो॒ऽअ॒स्म्माँ२॥ऽअ॑भि॒दास॑ति ॥१०१॥

॥७॥ मा मा॑ हिꣳसीज्जनि॒ता यः पृ॑थि॒व्या यो वा॒ दिवꣳ॑ स॒त्यध॑र्म्मा॒ व्यान॑ट् ।
यश्चा॒पश्च॒न्द्राः प्प्र॑थ॒मो ज॒जान॒ कस्म्मै॑ दे॒वाय॑ ह॒विषा॑ विधेम ॥१०२॥
अ॒ब्भ्याव॑र्त्तस्व पृथिवि य॒ज्ञेन॒ पय॑सा स॒ह । व॒पान्ते॑ऽअ॒ग्निरि॑षि॒तोऽअ॑रोहत् ॥१०३॥
अग्ने॒ यत्ते॑ शु॒क्रँय्यच्च॒न्द्रँय्यत्पू॒तँय्यच्च॑ य॒ज्ञिय॑म् । तद्दे॒वेब्भ्यो॑ भरामसि ॥१०४॥
इष॒मूर्ज॑म॒हमि॒तऽआद॑मृ॒तस्य॒ योनि॑म्महि॒षस्य॒ धारा॑म् ।
आ मा॒ गोषु॑ विश॒त्वा त॒नूषु॒ जहा॑मि से॒दिमनि॑रा॒मम॑मीवाम् ॥१०५॥

अग्ने॒ तव॒ श्श्रवो॒ व्वयो॒ महि॑ ब्भ्राजन्तेऽअ॒र्च्चयो॑ व्विभावसो ।
बृह॑द्भानो॒ शव॑सा॒ व्वाज॑मु॒क्क्थ्य॒न्दधा॑सि दा॒शुषे॑ कवे ॥१०६॥
पा॒व॒कव॑र्च्चाः शु॒क्क्रव॑र्च्चा॒ऽअनू॑नवर्च्चा॒ऽउदि॑यर्षि भा॒नुना॑ ।
पु॒त्रो मा॒तरा॑ व्वि॒चर॒न्नुपा॑वसि पृ॒णक्क्षि॑ रोद॑सीऽउ॒भे ॥१०७॥
ऊर्ज्जो॑नपाज्जातवेदः सुश॒स्तिभि॒र्म्मन्द॑स्व धी॒तिभि॑र्हि॒तः ।
त्वेऽइषः॑ सन्द॑धु॒ब्भूरि॑वर्प्पसश्चि॒त्रोत॑यो व्वा॒मजा॑ताः ॥१०८॥
इ॒र॒ज्यन्न॑ग्ने प्प्रथयस्व ज॒न्तुभि॑र॒स्मे रायो॑ऽअमर्त्त्य ।
स द॑र्श॒तस्य॒ व्वपु॑षो॒ व्विरा॑जसि पृ॒णक्क्षि॑ सान॒सिङ्क्र॒तुम् ॥१०९॥
इ॒ष्क॒र्त्तार॑मध्व॒रस्य॒ प्प्रचे॑तस॒ङ्क्षय॑न्त॒ꣳ राध॑सो म॒हः ।
रा॒तिँव्वा॒मस्य॑ सु॒भगा॑म्म॒हीमिष॒न्दधा॑सि सान॒सिꣳ र॒यिम् ॥११०॥
ऋ॒तावा॑नम्महि॒षँव्वि॒श्वद॑र्शतम॒ग्निꣳ सु॒म्नाय॑ दधिरे पु॒रो जनाः॑ ।
श्रु॒त्क॑र्ण्णꣳ स॒प्प्रथ॑स्तमन्त्वा गि॒रा दैव्य॒म्मानु॑षा यु॒गा ॥१११॥
आप्प्या॑यस्व॒ समे॑तु ते व्वि॒श्वतः॑ सोम॒ व्वृष्ण्य॑म् । भवा॒ व्वाज॑स्य सङ्ग॒थे ॥११२॥
सन्ते॒ पया॑ꣳसि॒ सम्मु॑ यन्तु॒ व्वाजाः॒ सँव्वृष्ण्या॑न्यभिमाति॒षाहः॑ ।
आ॒प्प्याय॑मानोऽअ॒मृता॑य सोम दि॒वि श्श्रवा॑ꣳस्युत्त॒मानि॑ धिष्ष्व ॥११३॥
आप्प्या॑यस्व मदिन्तम॒ सोम॒ व्विश्वे॑भिर॒ꣳशुभिः॑ ।
भवा॑ नः स॒प्प्रथ॑स्तमः॒ सखा॑ व्वृ॒धे ॥११४॥
आ ते॑ व्व॒त्सो मनो॑ यमत्पर॒माच्चि॑त्स॒धस्था॑त् । अग्ने॒ त्वाङ्का॑मया गि॒रा ॥११५॥
तुभ्य॒न्ताऽअङ्गि॑रस्तम॒ व्विश्वाः॑ सुक्षि॒तयः॒ पृथ॑क् । अग्ने॒ कामा॑य येमिरे ॥११६॥
अ॒ग्निः प्प्रि॒येषु॒ धाम॑सु॒ कामो॑ भू॒तस्य॒ भव्य॑स्य । स॒म्म्राडेको॒ व्विरा॑जति ॥११७॥

॥ इति द्वादशोऽध्यायः ॥

अथ त्रयोदशोऽध्यायः

ऋषिः (१) 'मयि गृह्णामि' इत्यारभ्य (५८) 'इयमुपरि' इत्यन्तानां सामान्यतः प्रजापतिः साध्या वा ऋषयः । विशेषतश्च— (४) 'हिरण्यगर्भः समवर्तत' इत्यस्य हिरण्यगर्भः, (५) 'द्रप्सश्चस्कन्द' इत्यस्य देवश्रवाः, (९) 'कृणुष्व पाजः' इत्यारभ्य (१३) 'ऊर्ध्वो भव' इत्यन्तानां देवा वामदेवश्च, (१४) 'अग्निर्मूर्धा' इत्यस्य विरूपः, (१५) 'भुवो यज्ञस्य' इत्यस्य त्रिशिराः, (२०) 'काण्डात्काण्डात' (२१) 'या शतेन' इत्यनयोरग्निः, (२२) 'यास्ते अग्ने' (२३) 'या वो देवाः' इत्यनयोरिन्द्राग्नी. (२६) 'अषाढासि' इत्यस्य सविता देवा वा, (२७) 'मधु वाताः' (२८) 'मधु नक्तम्' (२९) 'मधुमान्नः' इत्येषां गोतमः, (३२) 'मही द्यौः' (३३) 'विष्णोः कर्माणि' इत्यनयोर्मेधातिथिः, (३६) 'अग्ने

युक्ष्वा' इत्यस्य भरद्वाजः, (३७) 'युक्ष्वा हि' इत्यस्य विरूपः, (४६) 'चित्रन्देवानाम्' इत्यस्याङ्गिरसः कुत्सः, (५२) 'त्वं यविष्ठ' इत्यस्य काव्य उशनाः ॥

देवता (१) 'मयि गृह्णामि' इत्यस्याग्निः ।
(२) 'अपाम्पृष्ठम्' इत्यस्य पुष्करपर्णम् ।
(३) 'ब्रह्म जज्ञानम्' इत्यस्यादित्यः ।
(४) 'हिरण्यगर्भः समवर्तत' इत्यस्य कः ।
(५) 'द्रप्सश्चस्कन्द' इत्यस्यादित्यः ।
(६) 'नमोस्तु सर्पेभ्यः' (७) 'या इषवः' (८) 'ये वामी' इत्येषां सर्पाः ।
(९) 'कृणुष्व पाजः' (१०) 'तव भ्रमासः' (११) 'प्रति स्पशः' (१२) 'उदग्ने तिष्ठ' (१३) 'ऊर्द्ध्वो भव' 'अग्नेष्ट्वा' (१४) 'अग्निर्मूर्धा' इत्येषामग्निः, 'इन्द्रस्य त्वा' इत्यस्येन्द्रः ।
(१५) 'भुवो यज्ञस्य' इत्यस्याग्निः ।
(१६) 'ध्रुवासि' (१७) 'प्रजापतिष्ट्वा' (१८) 'भूरसि' (१९) 'विश्वस्मै प्राणाय' इत्येषां स्वयमातृण्णा ।
(२०) 'काण्डात्काण्डात्' 'या शतेन' इत्यनयोर्दूर्वेष्टका ।
(२२) 'यास्ते' (२३) 'या वो देवाः' इत्यनयोरग्निः ।
(२४) 'विराड्ज्योतिः' 'स्वराड्ज्योतिः' इत्यनयोर्लोकः, 'प्रजापतिष्ट्वा' इत्यस्य विश्वज्योतिः ।
(२५) 'मधुश्च माधवश्च' इत्यस्य ऋतवः ।
(२६) 'अषाढासि' इत्यस्येष्टका ।
(२७) 'मधु वाताः' (२८) 'मधु नक्तम्' (२९) 'मधुमान्नः' इत्येषां विश्वे देवाः ।
(३०) 'अपाङ्गम्भन्' (३१) 'त्रीन्त्समुद्रान्' इत्यनयोः कूर्मः ।
(३२) 'मही द्यौः' इत्यस्य द्यावापृथिव्यौ ।
(३३) 'विष्णोः कर्माणि' इत्यस्य विष्णुः ।
(३४) 'ध्रुवासि' (३५) 'इषे राये' इत्यनयोरुखा ।
(३६) 'अग्ने युक्ष्वा' 'युक्ष्वा हि' इत्यनयोरग्निः ।
(३८) 'सम्यक्स्रवन्ति' (३९) 'ऋचे त्वा' (४०) 'अग्निर्ज्योतिषा' इत्येषां लिङ्गोक्ता ।
(४१) 'आदित्यङ्गर्भम्' (४२) 'वातस्य जूतिम्' (४३) 'अजस्रमिन्दुम्' (४४) 'वरूत्रीन्त्वष्टुः' (४५) 'यो अग्निः' इत्येषामग्निः ।
(४६) 'चित्रन्देवानाम्' इत्यस्य सूर्यः ।
(४७) 'इमम्मा हिꣳसीर्द्विपादम्' (४८) 'इमम्मा हिꣳसीरेकशफम्' (४९) 'इमꣳ साहस्रम्' (५०) 'इममूर्णायुम्' (५१) 'अजो ह्यग्नेः' (५२) 'त्वं यविष्ठ' इत्येषामग्निः ।
(५३) 'अपान्त्वा' इत्यादिपञ्चानाम्, 'अर्णवे त्वा' 'समुद्रे त्वा' 'सरिरे त्वा' इत्येषाम्, 'अपान्त्वा' इत्यादिसप्तानाम्, 'गायत्रेण त्वा' 'त्रैष्टुभेन त्वा' 'जागतेन त्वा' 'आनुष्टुभेन त्वा' 'पाङ्क्तेन त्वा' इत्येषाञ्चेष्टका ।
(५४) 'अयम्पुरः' 'तस्य प्राणः' 'वसन्तः प्राणायनः' 'गायत्री वासन्ती' 'गायत्र्यै गायत्रम्' 'गायत्रादुपांꣳशुः' 'उपांꣳशोस्त्रिवृत्' 'त्रिवृतो रथन्तरम्' 'वसिष्ठ ऋषिः' 'प्रजापतिगृहीतया' (५५) 'अयन्दक्षिणा' 'तस्य मनः' 'ग्रीष्मो मानसः' 'त्रिष्टुब्ग्रैष्मी' 'त्रिष्टुभः स्वारम्' 'स्वारादन्तर्यामः' 'अन्तर्यामात्पञ्चदशः' 'पञ्चदशाद्बृहत्' 'भरद्वाज ऋषिः' 'प्रजापतिगृहीतया' (५६) 'अयम्पश्चात्' 'तस्य चक्षुः' 'वर्षाश्चाक्षुष्यः' 'जगती वार्षी' 'जगत्या ऋक्समम्' 'ऋक्समाच्छुक्रः' 'शुक्रात्सप्तदशः' 'सप्तदशाद्वैरूपम्' 'जमदग्निर्ऋषिः' 'प्रजापतिगृहीतया' (५७) 'इदमुत्तरात्' 'तस्य श्रोत्रम्' 'शरच्छ्रौत्री' 'अनुष्टुप्शारदी' 'अनुष्टुभ ऐडम्' 'ऐडान्मन्थी' 'मन्थिन एकविꣳशः' 'एकविꣳशाद्वैराजम्' 'विश्वामित्र ऋषिः' 'प्रजापतिगृहीतया' (५८) 'इयमुपरि' 'तस्यै वाङ्मात्या' 'हेमन्तो वाच्यः' 'पङ्क्तिर्हैमन्ती' 'पङ्क्त्यै निधनवत्' 'निधनवत आग्रयणः' 'आग्रयणात्त्रिणवत्रयस्त्रिꣳशौ' 'त्रिणवत्रयस्त्रिꣳशाभ्याम्' 'विश्वकर्म ऋषिः' 'प्रजापतिगृहीतया' इत्येषां प्राणभृतः ॥

छन्दः (१) 'मयि गृह्णामि' इत्यस्य ककुप्, (२) 'अपाम्पृष्ठम्' इत्यस्य स्वराट् पङ्क्तिः, (३) 'ब्रह्म जज्ञानम्' (४) 'हिरण्यगर्भः समवर्तत' (५) 'द्रप्सश्चस्कन्द' इत्येषां त्रिष्टुप्, (६) 'नमोस्तु' (७) 'या इषवः' (८) 'ये वामी' इत्येषामनुष्टुप्, (९) 'कृणुष्व पाजः' इत्यारभ्य (१३) 'ऊर्ध्वो भव' इत्यन्तानां त्रिष्टुप्, 'अग्नेष्ट्वा' 'इन्द्रस्य त्वा' इति क्रमेणोपान्त्ययोर्यजुषी, (१४) 'अग्निर्मूर्धा' इत्यस्य गायत्री, (१५) 'भुवो यज्ञस्य' इत्यस्य त्रिष्टुप्, (१६) 'ध्रुवासि' इत्यस्योर्ध्वबृहती, (१७) 'प्रजापतिष्ट्वा' इत्यस्यानुष्टुप्, (१८) 'भूरसि' इत्यस्य प्रस्तारपङ्क्तिः, (२०) 'काण्डात्काण्डात्' (२१) 'या शतेन' (२२) 'यास्ते अग्ने' (२३) 'या वो देवाः' इत्येषामनुष्टुप्, (२७) 'मधु वाता' (२८) 'मधु नक्तम्' (२९) 'मधुमान्नः' इत्येषां गायत्री, (३०) 'अपाङ्गम्भन्' इत्यस्य पङ्क्तिः, (३१) 'त्रीन्त्समुद्रान्' इत्यस्य त्रिष्टुप्, (३२) 'मही द्यौः' (३३) 'विष्णोः कर्माणि' इत्यनयोर्गायत्री, (३४) 'ध्रुवासि' इत्यस्य त्रिष्टुप्, (३५) 'इषे राये' इत्यस्य बृहती, (३६) 'अग्ने युक्ष्वा' (३७) 'युक्ष्वा हि' इत्यनयोर्गायत्री, (३८) 'सम्यक्स्रवन्ति' इत्यस्य त्रिष्टुप्, (३९) 'ऋचे त्वा' इत्यस्य बृहती, (४०) 'अग्निर्ज्योतिषा' इत्यस्योष्णिक्, (४१) 'आदित्यङ्गर्भम्' इत्यारभ्य (५१) 'अजो ह्यग्नेः' इत्यन्तानां त्रिष्टुप्, (४७–५१) 'इमम्मा' इत्यादिपञ्चस्वप्यन्ते द्वे द्वे यजुषी, (५२) 'त्वं यविष्ठ' इत्यस्य गायत्री ॥

॥ हरिः ॐ ॥

॥१॥ मयि॑ गृह्णा॒म्म्यग्ग्रे॑ऽअ॒ग्निꣳ रा॒यस्प्पोषा॑य सुप्प्रजा॒स्त्वाय॑ सु॒वीर्य्या॑य ।
मासु॑ दे॒वताः॑ सचन्ताम् ॥१॥
अ॒पाम्पृ॒ष्ठम॑सि॒ योनि॑र॒ग्ग्नेः स॑मु॒द्रम॒भितः॑ पिन्व॑मानम् ।
वर्द्ध॑मानो म॒हाँ२॥ऽआ च॒ पुष्क॑रे दि॒वो मात्र॑या व॒रिम्म्णा प्प्र॑थस्व ॥२॥ ॥२॥
ब्रह्म॑ जज्ज्ञा॒नम्प्र॑थ॒मम्पु॒रस्ता॒द्वि सी॑म॒तः सु॒रुचो॑ वे॒नऽआ॑वः ।
स बु॒द्ध्न्या॒ऽउप॒माऽअ॑स्य वि॒ष्ट्ठाः स॒तश्च॒ योनि॑मस॑तश्च॒ विवः॑ ॥३॥
हि॒र॒ण्य॒ग॒र्ब्भः सम॑वर्त्त॒ताग्ग्रे॑ भू॒तस्य॑ जा॒तः पति॒रेक॑ऽआसीत् ।
स दा॑धार पृथि॒वीन्द्यामु॒तेमाङ्कस्म्मै॑ दे॒वाय॑ ह॒विषा॑ विधेम ॥४॥
द्र॒प्प्सश्च॑स्कन्द पृथि॒वीमनु॒ द्यामि॒मञ्च॒ योनि॒मनु॒ यश्च॒ पूर्व्वः॑ ।
स॒मा॒नँय्योनि॒मनु॑ स॒ञ्चर॑न्तन्द्र॒प्प्सञ्जु॑हो॒म्म्यनु॑ स॒प्प्त होत्राः॑ ॥५॥
नमो॑स्त्तु स॒र्प्पेब्भ्यो॒ ये के च॑ पृथि॒वीमनु॑ ।
येऽअ॒न्तरि॑क्षे॒ ये दि॒वि तेब्भ्यः॑ स॒र्प्पेब्भ्यो॒ नमः॑ ॥६॥
याऽइष॑वो यातु॒धाना॑नाँ॒य्ये वा॒ वन॒स्प्पती॒ँ२॥रनु॑ ।
ये वा॑व॒टेषु॒ शेर॑ते॒ तेब्भ्यः॑ स॒र्प्पेब्भ्यो॒ नमः॑ ॥७॥
ये वा॒मी रो॑च॒ने दि॒वो ये वा॒ सूर्य्य॑स्य र॒श्म्मिषु॑ ।
येषा॑म॒प्प्सु सद॑स्कृ॒तन्तेब्भ्यः॑ स॒र्प्पेब्भ्यो॒ नमः॑ ॥८॥
कृ॒णु॒ष्ष्व पाजः॒ प्प्रसि॑तिन्न पृ॒त्थ्वीँय्या॒हि राजे॑वाम॑वाँ२॥ऽइभे॑न ।
तृ॒ष्ष्वीमनु॒ प्प्रसि॑तिन्द्रूणा॒नोस्त्ता॑सि॒ विद्ध्य॑ र॒क्षस॒स्त्तपि॑ष्ट्ठैः ॥९॥

तव ब्भ्रमासऽआशुया पतन्त्यनुस्पृश धृषता शोशुचानः ।
तपूꣳष्यग्ने जुह्वा पतङ्गानसन्दितो ब्विसृज ब्विष्वगुल्काः ॥१०॥
प्रति स्प्पशो ब्विसृज तूर्णितमो भवा पायुर्ब्विशोऽअस्याऽअदब्धः ।
यो नो दूरेऽअघशꣳसो योऽअन्त्यग्ने मा किष्ट्टे ब्व्यथिरादधर्षीत् ॥११॥
उदग्ने तिष्ठ प्प्रत्त्यातनुष्ष्व न्न्यमित्राꣳ॥ऽओषतात्तिग्ग्महेते ।
यो नोऽअरातिꣳ समिधान चक्क्रे नीचा तन्धक्ष्यतसन्न शुष्क्कम् ॥१२॥
ऊर्द्ध्वो भव प्प्रतिविद्ध्याद्ध्यस्म्मदाविष्क्कृणुष्ष्व दैव्व्यान्न्यग्ने ।
अव स्त्थिरा तनुहि यातुजूनाञ्जामिमजामिम्प्रमृणीहि शत्रून् ।
अग्नेष्ट्वा तेजसा सादयामि ॥१३॥
अग्निर्म्मूर्द्धा दिवः ककुत्त्पतिः पृथिव्व्याऽअयम् ।
अपाꣳ रेताꣳसि जिन्न्वति । इन्द्द्रस्य त्त्वौजसा सादयामि ॥१४॥
भुवो यज्ज्ञस्य रजसश्च नेता यत्रा नियुद्भिः सचसे शिवाभिः ।
दिवि मूर्द्धानन्दधिषे स्वर्षाञ्जिह्वामग्ने चकृषे हव्व्यवाहम् ॥१५॥

॥२॥ ध्रुवासि धरुणास्तृता ब्विश्श्वकर्म्मणा ।
मा त्त्वा समुद्द्रऽउद्वधीन्मा सुपर्ण्णोऽव्यथमाना पृथिवीन्दृꣳह ॥१६॥
प्रजापतिष्ट्वा सादयत्त्वपाम्पृष्ठे समुद्द्रस्येमन् ।
ब्व्यचस्वतीम्प्रथस्वतीम्प्रथस्व पृथिव्व्यसि ॥१७॥
भूरसि भूमिरस्यदितिरसि ब्विश्श्वधाया ब्विश्श्वस्य भुवनस्य धर्त्री ।
पृथिवीँय्यच्छ पृथिवीन्दृꣳह पृथिवीम्मा हिꣳसीः ॥१८॥
ब्विश्श्वस्म्मै प्प्राणायापानाय ब्व्यानायोदानाय प्प्रतिष्ट्ठायै चरित्राय ।
अग्निष्ट्वाभिपातु मह्ह्या स्वस्त्त्या च्छर्दिषा शन्तमेन तया
देवतयाङ्गिरस्वद्ध्रुवा सीद ॥१९॥
काण्डात्त्काण्डात्प्ररोहन्ती परुषः परुषस्प्परि ।
एवा नो दूर्व्वे प्प्रतनु सहस्स्रेण शतेन च ॥२०॥
या शतेन प्प्रतनोषि सहस्स्रेण ब्विरोहसि ।
तस्यास्त्ते देवीष्ट्टके ब्विधेम हविषा ब्वयम् ॥२१॥
यास्त्तेऽअग्ने सूर्य्ये रुचो दिवमातन्न्वन्ति रश्मिभिः ।
ताभिर्न्नोऽअद्द्य सर्व्वाभी रुचे जनाय नस्कृधि ॥२२॥

या वो देवाः सूर्य्ये रुचो गोष्ष्वश्श्वेषु या रुचः ।
इन्द्राग्ग्नी ताभिः सर्व्वाभी रुचन्नो धत्त बृहस्प्पते ॥२३॥
व्विराड्ज्ज्योतिरधारयत्त्स्वराड्ज्ज्योतिरधारयत् । प्रजापतिष्ट्ट्वा सादयतु पृष्ट्ठे पृथिव्व्या ज्ज्योतिष्म्मतीम् । व्विश्श्वस्म्मै प्प्राणायापानाय व्व्यानाय व्विश्श्वञ्ज्योतिर्य्यच्छ । अग्निष्ट्टेधिपतिस्त्तया देवतयाङ्गिरस्वद्ध्रुवा सीद ॥२४॥
मधुश्च माधवश्च व्वासन्तिकावृतूऽअग्ग्नेरन्तःश्लेषोसि कल्प्पेतान्द्यावापृथिवी कल्प्पन्तामापऽओषधयः कल्प्पन्तामग्ग्नयः पृथङ्मम ज्ज्यैष्ट्ठ्याय सव्व्रताः । येऽअग्ग्नयः समनसोन्तरा द्यावापृथिवीऽइमे । व्वासन्तिकावृतूऽअभिकल्प्पमानाऽइन्द्रमिव देवाऽअभिसँव्विशन्तु तया देवतयाङ्गिरस्वद्ध्रुवे सीदतम् ॥२५॥
अषाढासि सहमाना सहस्वारातीः सहस्व पृतनायतः ।
सहस्रवीर्य्यासि सा मा जिन्न्व ॥२६॥

॥३॥ मधु व्वाताऽऋतायते मधु क्क्षरन्ति सिन्धवः । माद्ध्वीर्न्नः सन्त्वोषधीः ॥२७॥
मधु नक्क्तमुतोषसो मधुमत्त्पार्त्थिवꣳ रजः । मधु द्यौरस्तु नः पिता ॥२८॥
मधुमान्नो व्वनस्प्पतिर्म्मधुमाँ२ऽअस्तु सूर्य्यः । माद्ध्वीर्ग्गावो भवन्तु नः ॥२९॥
अपाङ्गम्भन्त्सीद मा त्त्वा सूर्य्योभिताप्प्सीन्माग्निर्व्वैश्श्वानरः ।
अच्छिन्नपत्राः प्प्रजाऽअनुवीक्क्षस्वानु त्त्वा दिव्व्या व्वृष्टिः सचताम् ॥३०॥
त्रीन्त्समुद्रान्त्समसृपत्त्स्वर्ग्गानपाम्पतिर्व्वृषभऽइष्ट्टकानाम् । ॥५॥
पुरीषँव्वसानः सुकृतस्य लोके तत्र गच्छ यत्र पूर्व्वे परेताः ॥३१॥
मही द्यौः पृथिवी च नऽइमँय्यज्ञम्मिमिक्क्षताम् । पिपृतान्नो भरीमभिः ॥३२॥
व्विष्ण्णोः कर्म्माणि पश्श्यत यतो व्व्रतानि पस्प्पशे । इन्द्रस्य युज्ज्यः सखा ॥३३॥
ध्रुवासि धरुणेतो जज्ज्ञे प्रथममेब्भ्यो योनिब्भ्योऽअधि जातवेदाः ।
स गायत्र्या त्रिष्ट्टुभानुष्ट्टुभा च देवेब्भ्यो हव्व्यँव्वहतु प्प्रजानन् ॥३४॥
इषे राये रमस्व सहसे द्युम्म्नऽऊर्ज्जेऽअपत्त्याय ।
सम्म्राडसि स्वराडसि सारस्वतौ त्त्वोत्त्सौ प्प्रावताम् ॥३५॥
अग्ग्ने युक्क्ष्वा हि ये तवाश्श्वासो देव साधवः । अरँव्वहन्ति मन्न्यवे ॥३६॥
युक्क्ष्वा हि देवहूतमाँ२ऽअश्श्वाँ२ऽअग्ग्ने रथीरिव । नि होता पूर्व्व्यः सदः ॥३७॥
॥४॥ सम्म्यक्क्स्रवन्ति सरितो न धेनाऽअन्तर्हृदा मनसा पूयमानाः ।
घृतस्य धाराऽअभिचाकशीमि हिरण्ण्ययो व्वेतसो मद्ध्येऽअग्ग्नेः ॥३८॥

ऋचे त्वा रुचे त्वा भासे त्वा ज्ज्योतिषे त्वा ।
अभूदिदँव्विश्वस्य भुवनस्य व्वाजिनमग्नेर्व्वैश्वानरस्य च ॥३९॥
अग्निर्ज्ज्योतिषा ज्ज्योतिष्म्मान्रुक्क्मो व्वर्च्चसा व्वर्च्चस्वान् ।
सहस्रदाऽअसि सहस्राय त्वा ॥४०॥
आदित्यङ्गर्ब्भम्पयसा समङ्ग्धि सहस्रस्य प्प्रतिमाँव्विश्वरूपम् ।
परिवृङ्ग्धि हरसा माभिमᳪंस्थाः शतायुषङ्कृणुहि चीयमानः ॥४१॥
व्वातस्य जूतिँव्वरुणस्य नाभिमश्वञ्जज्ञानꣳ सरिरस्य मद्ध्ये ।
शिशुन्नदीनाᳪं हरिमद्रिबुद्ध्नमग्ने मा हिꣳसीः परमे व्योमन् ॥४२॥
अजस्रमिन्दुमरुषम्भुरण्ण्युमग्निमीडे पूर्व्वचित्तिन्नमोभिः ।
स पर्व्वभिर्ऋतुशः कल्प्पमानो गाम्मा हिꣳसीरदितिँव्विराजम् ॥४३॥
व्वरूत्रीन्त्वष्टुर्व्वरुणस्य नाभिमविञ्जज्ञानाᳪं रजसः परस्म्मात् ।
महीᳪं साहस्रीमसुरस्य मायामग्ने मा हिꣳसीः परमे व्योमन् ॥४४॥
योऽअग्निरग्नेरद्ध्यजायत शोकात्त्पृथिव्याऽउत वा दिवस्परि ।
येन प्प्रजा व्विश्वकर्म्मा जजान तमग्ने हेडः परि ते व्वृणक्तु ॥४५॥
चित्रन्देवानामुदगादनीकञ्चक्षुर्म्मित्रस्य व्वरुणस्याग्नेः ।
आप्प्रा द्यावापृथिवीऽअन्तरिक्षꣳ सूर्य्यऽआत्मा जगतस्तस्थुषश्च ॥४६॥

॥५॥ इमम्मा हिꣳसीर्द्विपादम्पशुꣳ सहस्राक्षो मेधाय चीयमानः ।
मयुम्पशुम्मेधमग्ने जुषस्व तेन चिन्न्वानस्तन्न्वो निषीद ।
मयुन्ते शुगृच्छतु यन्द्विष्मस्तन्ते शुगृच्छतु ॥४७॥
इमम्मा हिꣳसीरेकशफम्पशुङ्कनिक्क्रदँव्वाजिनँव्वाजिनेषु ।
गौरमारण्ण्यमनु ते दिशामि तेन चिन्न्वानस्तन्न्वो निषीद ।
गौरन्ते शुगृच्छतु यन्द्विष्मस्तन्ते शुगृच्छतु ॥४८॥
इमꣳ साहस्रꣳ शतधारमुत्त्सँव्व्यच्यमानꣳ सरिरस्य मद्ध्ये । घृतन्दुहानामदितिञ्जनायाग्ने मा हिꣳसीः परमे व्योमन् । गवयमारण्ण्यमनु ते दिशामि तेन चिन्न्वानस्तन्न्वो निषीद । गवयन्ते शुगृच्छतु यन्द्विष्मस्तन्ते शुगृच्छतु ॥४९॥
इममूर्ण्णायुँव्वरुणस्य नाभिन्त्वचम्पशूनान्द्विपदाञ्चतुष्प्पदाम् । त्वष्टुः प्प्रजानाम्प्रथमञ्जनित्रमग्ने मा हिꣳसीः परमे व्योमन् । उष्ट्रमारण्ण्यमनु ते दिशामि तेन चिन्न्वानस्तन्न्वो निषीद । उष्ट्रन्ते शुगृच्छतु यन्द्विष्मस्तन्ते शुगृच्छतु ॥५०॥

अजो ह्व्यग्ग्नेरजनिष्ट्ट शोकात्त्सोऽअपश्श्यज्जनितारमग्ग्रे । तेन देवा देवतामग्ग्रमायँस्तेन रोहमायन्नुप मेद्ध्यासः । शरभमारण्ण्यमनु ते दिशामि तेन चिन्न्वानस्तन्न्वो निषीद । शरभन्ते शुगृच्छतु यन्द्विष्म्मस्तन्ते शुगृच्छतु ॥५१॥

त्वँय्यविष्ट्ठ दाशुषो नॄँः पाहि श्शृणुधी गिरः । रक्क्षा तोकमुत त्त्मना ॥५२॥

॥६॥ अपान्त्वेमन्त्सादयाम्म्यपान्त्वोद्मन्त्सादयाम्म्यपान्त्वा भस्म्मन्त्सादयाम्म्यपान्त्वा ज्ज्योतिषि सादयाम्म्यपान्त्वायने सादयाम्म्यर्ण्णवे त्त्वा सदने सादयामि समुद्द्रे त्त्वा सदने सादयामि सरिरे त्त्वा सदने सादयाम्म्यपान्त्वा क्क्षये सादयाम्म्यपान्त्वा सधिषि सादयाम्म्यपान्त्वा सदने सादयाम्म्यपान्त्वा सधस्त्थे सादयाम्म्यपान्त्वा योनौ सादयाम्म्यपान्त्वा पुरीषे सादयाम्म्यपान्त्वा पाथसि सादयामि गायत्त्रेण त्त्वा च्छन्दसा सादयामि त्त्रैष्ट्टुभेन त्त्वा च्छन्दसा सादयामि जागतेन त्त्वा च्छन्दसा सादयाम्म्यानुष्ट्टुभेन त्त्वा च्छन्दसा सादयामि पाङ्क्तेन त्त्वा च्छन्दसा सादयामि ॥५३॥

॥७॥ अयम्पुरो भुवस्तस्य प्प्राणो भौवायनो व्वसन्तः प्प्राणायनो गायत्त्री व्वासन्ती गायत्त्र्यै गायत्त्रङ्गायत्त्रादुपाꣳशुरुपाꣳशोस्त्रिवृत्त्रिवृतो रथन्तरँव्वसिष्ट्ठऽऋषिः प्प्रजापतिगृहीतया त्त्वया प्प्राणङ्गृह्णामि प्प्रजाब्भ्यः ॥५४॥

अयन्दक्क्षिणा व्विश्श्वकर्म्मा तस्य मनो व्वैश्श्वकर्म्मणङ्ग्रीष्म्मो मानसस्त्रिष्ट्टुब्ग्रैष्म्मी त्त्रिष्ट्टुभः स्वारꣳ स्वारादन्तर्य्यामोऽन्तर्य्यामात्पञ्चदशः पञ्चदशाद्बृहद्भरद्द्वाजऽऋषिः प्प्रजापतिगृहीतया त्त्वया मनो गृह्णामि प्प्रजाब्भ्यः ॥५५॥

अयम्पश्श्चाद्विश्श्वव्यचास्तस्य चक्क्षुर्व्वैश्श्वव्यचसँव्वर्षाश्श्चाक्क्षुष्ष्यो जगती व्वार्षी जगत्त्याऽऋक्क्सममृक्क्समाच्छुक्क्रः शुक्क्रात्सप्तदशः सप्तदशाद्वैरूपञ्जमदग्ग्निर्ऋषिः प्प्रजापतिगृहीतया त्त्वया चक्क्षुर्गृह्णामि प्प्रजाब्भ्यः ॥५६॥

इदमुत्तरात्स्वस्तस्य श्श्रोत्रꣳ सौवꣳ शरच्छ्रौत्त्र्यनुष्ट्टुप्शारद्द्यनुष्ट्टुभऽऐडमैडान्मन्थी मन्थिनऽएकविꣳशऽएकविꣳशाद्वैराजँव्विश्श्वामित्त्रऽऋषिः प्प्रजापतिगृहीतया त्त्वया श्श्रोत्रङ्गृह्णामि प्प्रजाब्भ्यः ॥५७॥

इयमुपरि मतिस्तस्यै व्वाङ्मात्त्या हैमन्तो व्वाच्च्यः पङ्क्तिर्हैमन्ती पङ्क्त्यै निधनवन्निधनवतऽआग्ग्रयणऽआग्ग्रयणात्त्रिणवत्त्रयस्त्रिꣳशौ त्त्रिणवत्त्रयस्त्रिꣳशाब्भ्याꣳ शाक्क्वररैवते व्विश्श्वकर्म्मऽऋषिः प्प्रजापतिगृहीतया त्त्वया व्वाचङ्गृह्णामि प्प्रजाब्भ्यो लोकन्ताऽइन्द्रम् ॥५८॥

गलितमन्त्राः —

लोकम्पृण च्छिद्रम्पृणाथो सीद ध्रुवा त्वम् ।
इन्द्राग्नी त्वा बृहस्पतिरस्मिन्योनावसीषदन् ॥
ताऽअस्य सूददोहसꣳ सोमꣳ श्रीणन्ति पृश्नयः ।
जन्मन्देवानाँविशस्त्रिष्वा रोचने दिवः ॥
इन्द्रँविश्वाऽअवीवृधन्त्समुद्रव्यचसङ्गिरः ।
रथीतमꣳ रथीनाँवाजानाꣳ सत्पतिम्पतिम् ॥

॥ इति त्रयोदशोऽध्यायः ॥

अथ चतुर्दशोऽध्यायः

ऋषिः (१) 'ध्रुवक्षितिर्ध्रुवयोनिः' इत्यारभ्य (३१) 'नवविꣳशत्यास्तुवत' इत्यन्तानां सामान्यतः प्रजापतिः साध्या वा ऋषयः । विशेषतश्च—

(१) 'ध्रुवक्षितिर्ध्रुवयोनिः' इत्यारभ्य (१०) 'अनड्वान्वयः' इत्यन्तानां देवाः । तत्रापि-(७) 'सजूर्ऋतुभिः' इत्यादिपञ्चानां विश्वे देवाः ।

(११) 'इन्द्राग्नी अव्यथमानाम्' इत्यारभ्य (२२) 'यन्त्री राट्' इत्यन्तानामिन्द्राग्नी विश्वकर्मा च ।

(२३) 'आशुस्त्रिवृत्' इत्यारभ्य (३१) 'नवविꣳशत्यास्तुवत' इत्यन्तानामृषयः ।

देवता (१) 'ध्रुवक्षितिर्ध्रुवयोनिः' (२) 'कुलायिनी घृतवती' (३) 'स्वैर्दक्षैः' (४) 'पृथिव्याः पुरीषम्' (५) 'अदित्यास्त्वा' इत्येषामश्विनौ ।

(६) 'शुक्रश्च शुचिश्च' इत्यस्य ऋतवः ।

(७) 'सजूर्ऋतुभिः' इत्यादिपञ्चानां विश्वे देवाः ।

(८) 'प्राणम्मे' 'अपानम्मे' 'व्यानम्मे' 'चक्षुर्मे' 'श्रोत्रम्मे' इत्येषां वायुः, 'अपः पिन्व' 'ओषधीर्जिन्व' 'द्विपादव' 'चतुष्पात्पाहि' 'दिवो वृष्टिम्' इत्येषामापः ।

(९) 'मूर्धा वयः' 'क्षत्रं वयः' 'विष्टम्भो वयः' 'विश्वकर्मा वयः' 'वस्तो वयः' 'वृष्णिर्वयः' 'पुरुषो वयः' 'व्याघ्रो वयः' 'सिꣳहो वयः' 'पष्ठवाड्वयः' 'उक्षा वयः' 'ऋषभो वयः' (१०) 'अनड्वान्वयः' 'धेनुर्वयः' 'त्र्यविर्वयः' 'दित्यवाड्वयः' 'पञ्चाविर्वयः' 'त्रिवत्सो वयः' 'तुर्यवाड्वयः' इत्येषां लिङ्गोक्ता ।

(११) 'इन्द्राग्नी अव्यथमानाम्' इत्यस्येन्द्राग्नी, 'पृष्ठेन द्यावापृथिवी' इत्यस्य स्वयमातृण्णा ।

(१२) 'विश्वकर्मा त्वा' इत्यस्य वायुः ।

(१३) 'राज्ञ्यसि' 'विराडसि' 'सम्राडसि' 'स्वराडसि' 'अधिपत्न्यसि' इत्येषां दिशः ।

वे०मू० चन्द्रभानु शर्मा

(१४) 'विश्वकर्मा त्वा' इत्यस्य वायुः ।

(१५) 'नभश्च नभस्यश्च' (१६) 'इषश्चोर्जश्च' इत्यनयोर्ऋतवः ।

(१७) 'आयुर्मे' 'प्राणम्मे' 'अपानम्मे' 'व्यानम्मे' 'चक्षुर्मे' 'श्रोत्रम्मे' 'वाचम्मे' 'मनो मे' 'आत्मानम्मे' 'ज्योतिर्मे' (१८) 'मा च्छन्दः' 'प्रमा च्छन्दः' 'प्रतिमा च्छन्दः' 'अस्त्रीवयश्छन्दः' 'पङ्क्तिश्छन्दः' 'उष्णिक्छन्दः' 'बृहती च्छन्दः' 'अनुष्टुप्छन्दः' 'विराट् छन्दः' 'गायत्री च्छन्दः' 'त्रिष्टुप् छन्दः' 'जगती च्छन्दः' (१९) 'पृथिवी च्छन्दः' 'अन्तरिक्षञ्छन्दः' 'द्यौश्छन्दः' 'समाश्छन्दः' 'नक्षत्राणि च्छन्दः' 'वाक्छन्दः' 'मनश्छन्दः' 'कृषिश्छन्दः' 'हिरण्यञ्छन्दः' 'गौश्छन्दः' 'अजा च्छन्दः' 'अश्वश्छन्दः' (२०) 'अग्निर्देवता' 'वातो देवता' 'सूर्यो देवता' 'चन्द्रमा देवता'

'वसवो देवता' 'रुद्रा देवता' 'आदित्या देवता' 'मरुतो देवता' 'विश्वे देवा देवता' 'बृहस्पतिर्देवता' 'इन्द्रो देवता' 'वरुणो देवता' इत्येषां लिङ्गोक्ता ।

(२१) 'मूर्धासि' 'ध्रुवासि' 'धर्त्र्यसि' 'आयुषे त्वा' 'वर्चसे त्वा' 'कृष्यै त्वा' 'क्षेमाय त्वा' (२२) 'यन्त्री राट्' 'यन्त्र्यसि' 'ध्रुवासि' 'इषे त्वा' 'ऊर्जे त्वा' 'रय्यै त्वा' 'पोषाय त्वा' इत्येषां प्राणः ।

(२३) 'आशुस्त्रिवृत्' 'भान्तः पञ्चदशः' 'व्योमा सप्तदशः' 'धरुण एकविꣳशः' 'प्रतूर्तिरष्टादशः' 'तपो नवदशः' 'अभीवर्तः सविꣳशः' 'वर्चो द्वाविꣳशः' 'सम्भरणस्त्रयोविꣳशः' 'योनिश्चतुर्विꣳशः' 'गर्भाः पञ्चविꣳशः' 'ओजस्त्रिणवः' 'क्रतुरेकत्रिꣳशः' 'प्रतिष्ठा त्रयस्त्रिꣳशः' 'ब्रध्नस्य विष्टपम्' 'नाकः षट्त्रिꣳशः' 'विवर्तोऽष्टाचत्वारिꣳशः' 'धर्त्रञ्चतुष्टोमः' (२४) 'अग्नेर्भागः' 'इन्द्रस्य भागः' 'नृचक्षसाम्भागः' 'मित्रस्य भागः' (२५) 'वसूनाम्भागः' 'आदित्यानाम्भागः' 'अदित्यै भागः' 'देवस्य सवितुः' (२६) 'यवानाम्भागः' 'ऋभूणाम्भागः' इत्येषां लिङ्गोक्ता ।

(२७) 'सहश्च सहस्यश्च' इत्यस्य ऋतवः ।

(२८) 'एकयास्तुवत' 'तिसृभिरस्तुवत' 'पञ्चभिरस्तुवत' 'सप्तभिरस्तुवत' (२९) 'नवभिरस्तुवत' 'एकादशभिरस्तुवत' 'त्रयोदशभिरस्तुवत' 'पञ्चदशभिरस्तुवत' 'सप्तदशभिरस्तुवत' (३०) 'नवदशभिरस्तुवत' 'एकविꣳशत्यास्तुवत' 'त्रयोविꣳशत्यास्तुवत' 'पञ्चविꣳशत्यास्तुवत' 'सप्तविꣳशत्यास्तुवत' (३१) 'नवविꣳशत्यास्तुवत' 'एकत्रिꣳशत्यास्तुवत' 'त्रयस्त्रिꣳशतास्तुवत' इत्येषां लिङ्गोक्ता ॥

छन्दः (१) 'ध्रुवक्षितिर्ध्रुवयोनिः' इत्यस्य विराट्, (२) 'कुलायिनी घृतवती' (३) 'स्वैर्दक्षैः' (४) 'पृथिव्याः पुरीषम्' (५) 'अदित्यास्त्वा' इत्येषां त्रिष्टुप्, पञ्चस्वप्यन्ते 'अश्विनाध्वर्यू' इति यजुः, (११) 'इन्द्राग्नी अव्यथमानाम्' (२१) 'मूर्धासि' इत्यनयोरनुष्टुप्, (२२) 'यन्त्री राट्' इत्यस्य परोष्णिक् ॥

॥ हरिःॐ ॥

॥१॥ ध्रुवक्क्षितिर्द्ध्रुवयोनिर्द्ध्रुवासि द्ध्रुवँय्योनिमासीद साधुया ।
उक्ख्यस्य केतुम्प्रथमञ्जुषाणाश्श्विनाद्ध्वर्य्यू सादयतामिह त्त्वा ॥१॥

कुलायिनी घृतवती पुरन्धिः स्योने सीद सदने पृथिव्व्याः । अभि त्त्वा रुद्द्रा व्वसवो गृणन्त्विमा ब्ब्रह्म पीपिहि सौभगायाश्श्विनाद्ध्वर्य्यू सादयतामिह त्त्वा ॥२॥

स्वैर्द्दक्षैर्द्दक्षपितेह सीद देवानाꣳ सुम्म्ने बृहते रणाय । पितेवैधि सूनवऽआ सुशेवा स्वावेशा तन्न्वा सँव्विशस्वाश्श्विनाद्ध्वर्य्यू सादयतामिह त्त्वा ॥३॥

पृथिव्व्याः पुरीषमस्यप्प्सो नाम तान्त्वा व्विश्श्वेऽअभिगृणन्तु देवाः । स्तोमपृष्ठा घृतवतीह सीद प्प्रजावदस्म्मे द्द्रविणायजस्वाश्श्विनाद्ध्वर्य्यू सादयतामिह त्त्वा ॥४॥

अदित्त्यास्त्त्वा पृष्ठे सादयाम्म्यन्तरिक्क्षस्य धर्त्रीँव्विष्टम्भनीन्दिशामधिपत्नीम्भुवनानाम् । ऊर्म्मिर्द्द्रप्प्सोऽअपामसि व्विश्श्वकर्म्मा तऽऋषिरश्श्विनाद्ध्वर्य्यू सादयतामिह त्त्वा ॥५॥

शुक्क्रश्च शुचिश्च ग्ग्रैष्म्मावृतूऽअग्ग्नेरन्तःश्श्लेषोसि कल्प्पेतान्द्यावापृथिवी कल्प्पन्तामापऽओषधयः कल्प्पन्तामग्ग्नयः पृथङ्म्मम ज्ज्यैष्ठ्याय सव्व्रताः । येऽअग्ग्नयः

समनसोन्तरा द्यावापृथिवीऽइमे । ग्रैष्म्मावृतूऽअभिकल्प्पमानाऽइन्द्रमिव देवाऽअभि-
सँविशन्तु तया देवतयाङ्गिरस्वद्ध्रुवे सीदतम् ॥६॥
२॥ सजूर्ऋतुभि÷ सजूर्व्विधाभि÷ सजूर्द्देवैः सजूर्द्देवैर्व्वयोनाधैरग्ग्नये त्वा व्वैश्श्वानरायाश्श्वि-
नाद्ध्वर्य्यू सादयतामिह त्वा सजूर्ऋतुभि÷ सजूर्व्विधाभि÷ सजूर्व्वसुभिः सजूर्द्देवैर्व्व-
योनाधैरग्ग्नये त्वा व्वैश्श्वानरायाश्श्विनाद्ध्वर्य्यू सादयतामिह त्वा सजूर्ऋतुभि÷ सजूर्व्वि-
धाभि÷ सजू रुद्रैः सजूर्द्देवैर्व्वयोनाधैरग्ग्नये त्वा व्वैश्श्वानरायाश्श्विनाद्ध्वर्य्यू सादयतामिह
त्वा सजूर्ऋतुभि÷ सजूर्व्विधाभि÷ सजूरादित्त्यैः सजूर्द्देवैर्व्वयोनाधैरग्ग्नये त्वा व्वैश्श्वा-
नरायाश्श्विनाद्ध्वर्य्यू सादयतामिह त्वा सजूर्ऋतुभि÷ सजूर्व्विधाभि÷ सजूर्व्विश्श्वैर्द्देवैः
सजूर्द्देवैर्व्वयोनाधैरग्ग्नये त्वा व्वैश्श्वानरायाश्श्विनाद्ध्वर्य्यू सादयतामिह त्वा ॥७॥
प्राणम्मे पाह्यपानम्मे पाहि व्यानम्मे पाहि चक्क्षुर्म्मऽउर्व्या व्विभाहि श्श्रोत्रम्मे श्श्लो-
कय । अपः पिन्वौषधीर्जिन्व द्विपादव चतुष्प्पात्पाहि दिवो व्वृष्टिमेरय ॥८॥
३॥ मूर्द्धा व्वय÷ प्प्रजापतिश्च्छन्द÷ क्क्षत्रँव्वयो मयन्दञ्छन्दो व्विष्टम्भो व्वयोधिपतिश्च्छन्दो
व्विश्श्वकर्म्मा व्वय÷ परमेष्ट्ठी च्छन्दो बस्त्तो व्वयो व्विवलञ्छन्दो व्वृष्ण्णिर्व्वयो व्विशालञ्छ-
न्दः पुरुषो व्वयस्तन्द्रञ्छन्दो व्याग्घ्रो व्वयोनाधृष्टञ्छन्द÷ सिꣳहो व्वयश्च्छदिश्च्छन्द÷
पष्ट्ठवाड्व्वयो बृहती च्छन्दऽउक्क्षा व्वय÷ ककुप्प्छन्दऽऋषभो व्वय÷ सतोबृहती च्छन्दो-
नड्वान्व्वय÷ ॥९॥

अनड्वान्व्वय÷ पङ्क्तिश्च्छन्दो धेनुर्व्वयो जगती च्छन्दस्त्र्यविर्व्वयस्त्रिष्टुप्प्छन्दो दित्त्यवा-
ड्व्वयो व्विराट्छन्दः पञ्चाविर्व्वयो गायत्री च्छन्दस्त्रिवत्सो व्वयऽउष्ण्णिक्क्छन्दस्तुर्य्यवा-
ड्व्वयोनुष्टुप्प्छन्दो लोकन्ताऽइन्द्रम् ॥१०॥

गलितमन्त्राः —

लोकम्पृण च्छिद्रम्पृणाथो सीद ध्रुवा त्वम् ।
इन्द्राग्ग्नी त्वा बृहस्प्पतिरस्म्मिन्न्योनावसीषदन् ॥
ताऽअस्य सूददोहसः सोमꣳ श्रीणन्ति पृश्नयः ।
जन्मन्देवानाँव्विशस्त्रिष्ष्वा रोचने दिवः ॥
इन्द्रँव्विश्श्वाऽअवीवृधन्त्समुद्रव्यचसङ्गिर÷ ।
रथीतमꣳ रथीनाँव्वाजानाꣳ सत्त्पतिम्पतिम् ॥

४॥ इन्द्राग्ग्नीऽअव्यथमानामिष्टकान्दृꣳहतँयुवम् ।
पृष्ठेन द्यावापृथिवीऽअन्तरिक्क्षञ्च व्विबाधसे ॥११॥

विश्श्वकर्म्मा त्त्वा सादयत्त्वन्तरिक्षस्य पृष्ठे व्व्यचस्वतीम्प्प्रथस्वतीमन्तरिक्षँय्यच्छान्तरिक्षन्दृꣳहान्तरिक्षम्मा हिꣳसीः। विश्श्वस्म्मै प्प्राणायापानाय व्व्यानायोदानाय प्प्रतिष्ठायै चरित्राय। वायुष्ट्वाभिपातु मह्या स्वस्त्या च्छर्दिषा शन्तमेन तया देवतयाङ्गिरस्वद्ध्रुवा सीद ॥१२॥

राज्ञ्यसि प्प्राची दिग्ग्विराडसि दक्षिणा दिक्सम्म्राडसि प्प्रतीची दिक्स्वराडस्युदीची दिगधिपत्न्यसि बृहती दिक् ॥१३॥

विश्श्वकर्म्मा त्त्वा सादयत्त्वन्तरिक्षस्य पृष्ठे ज्ज्योतिष्म्मतीम्। विश्श्वस्म्मै प्प्राणायापानाय व्व्यानाय विश्श्वञ्ज्योतिर्य्यच्छ। वायुष्टेधिपतिस्तया देवतयाङ्गिरस्वद्ध्रुवा सीद ॥१४॥

नभश्श्च नभस्यश्श्च वार्षिकावृतूऽअग्ग्नेरन्तःश्श्लेषोसि कल्प्पेतान्द्यावापृथिवी कल्प्पन्तामापऽओषधयः कल्प्पन्तामग्ग्नयः पृथङ्मम ज्ज्यैष्ठ्याय सव्व्रताः। येऽअग्ग्नयः समनसोन्तरा द्यावापृथिवीऽइमे। वार्षिकावृतूऽअभिकल्प्पमानाऽइन्द्रमिव देवाऽअभिसँव्विशन्तु तया देवतयाङ्गिरस्वद्ध्रुवे सीदतम् ॥१५॥

इषश्श्चोर्ज्जश्श्च शारदावृतूऽअग्ग्नेरन्तःश्श्लेषोसि कल्प्पेतान्द्यावापृथिवी कल्प्पन्तामापऽओषधयः कल्प्पन्तामग्ग्नयः पृथङ्मम ज्ज्यैष्ठ्याय सव्व्रताः। येऽअग्ग्नयः समनसोन्तरा द्यावापृथिवीऽइमे। शारदावृतूऽअभिकल्प्पमानाऽइन्द्रमिव देवाऽअभिसँव्विशन्तु तया देवतयाङ्गिरस्वद्ध्रुवे सीदतम् ॥१६॥

॥५॥ आयुर्म्मे पाहि प्प्राणम्मे पाह्यपानम्मे पाहि व्व्यानम्मे पाहि चक्क्षुर्म्मे पाहि श्श्रोत्रम्मे पाहि वाचम्मे पिन्व मनो मे जिन्वात्त्मानम्मे पाहि ज्ज्योतिर्म्मे यच्छ ॥१७॥

मा च्छन्दः प्प्रमा च्छन्दः प्प्रतिमा च्छन्दोऽअस्त्रीवयश्च्छन्दः पङ्क्तिश्च्छन्दः उष्ष्णिक्छन्दो बृहती च्छन्दोनुष्टुप्प्छन्दो विराट्ट्छन्दो गायत्री च्छन्दस्त्रिष्टुप्प्छन्दो जगती च्छन्दः पृथिवी च्छन्दः ॥१८॥

पृथिवी च्छन्दोन्तरिक्षञ्छन्दो द्यौश्च्छन्दः समाश्च्छन्दो नक्क्षत्राणि च्छन्दो वाक्छन्दो मनश्च्छन्दः कृषिश्च्छन्दो हिरण्ण्यञ्छन्दो गौश्च्छन्दोजा च्छन्दोश्श्वश्च्छन्दः ॥१९॥

अग्ग्निर्द्देवता वातो देवता सूर्य्यो देवता चन्द्रमा देवता वसवो देवता रुद्द्रा देवतादित्त्या देवता मरुतो देवता विश्श्वे देवा देवता बृहस्प्पतिर्द्देवतेन्द्रो देवता वरुणो देवता ॥२०॥

मूर्द्धासि राड्ध्रुवासि धरुणा धर्त्र्यसि धरणी।
आयुषे त्त्वा वर्चसे त्त्वा कृष्ष्यै त्त्वा क्क्षेमाय त्त्वा ॥२१॥

यन्त्री राड्यन्त्र्यसि यमनी ध्रुवासि धरित्री ।
इषे त्वोर्ज्जे त्वा रय्यै त्वा पोषाय त्वा लोकन्ताऽइन्द्रम् ॥२२॥

गलितमन्त्राः —

लोकम्पृण च्छिद्रम्पृणाथो सीद ध्रुवा त्वम् ।
इन्द्राग्नी त्वा बृहस्पतिरस्मिन्योनावसीषदन् ॥
ताऽअस्य सूददोहसः सोमꣳ श्रीणन्ति पृश्नयः ।
जन्मन्देवानाँव्विशस्त्रिष्वा रोचने दिवः ॥
इन्द्रँव्विश्वाऽअवीवृधन्त्समुद्रव्यचसङ्गिरः ।
रथीतमꣳ रथीनाँव्वाजानाꣳ सत्त्पतिम्पतिम् ॥

॥६॥ आशुस्त्रिवृद्भान्तः पञ्चदशो व्योमा सप्तदशो धरुणऽएकविꣳशः प्प्रतूर्त्तिरष्टादशस्त्तपो नवदशोभीवर्त्तः सविꣳशो वर्च्चो द्वाविꣳशः सम्भरणस्त्रयोविꣳशो योनिश्चतुर्विꣳशो गर्भाः पञ्चविꣳशऽओजस्त्रिणवः क्रतुरेकत्रिꣳशः प्प्रतिष्ठा त्रयस्त्रिꣳशो ब्रध्नस्य व्विष्टपञ्चतुस्त्रिꣳशो नाकः षट्त्रिꣳशो व्विवर्त्तोष्टाचत्त्वारिꣳशो धर्त्रञ्चतुष्टोमः ॥२३॥

॥७॥ अग्नेर्भागोसि दीक्षायाऽआधिपत्त्यम्ब्रह्म स्पृतन्त्रिवृत्स्तोमऽइन्द्रस्य भागोसि व्विष्णोराधिपत्त्यङ्क्षत्रꣳ स्पृतम्पञ्चदश स्तोमो नृचक्षसाम्भागोसि धातुराधिपत्त्यञ्जनित्रꣳ स्पृतꣳ सप्तदश स्तोमो मित्रस्य भागोसि व्वरुणस्याधिपत्त्यन्दिवो व्वृष्टिर्व्वात स्पृतऽएकविꣳश स्तोमो व्वसूनाम्भागः ॥२४॥

व्वसूनाम्भागोसि रुद्राणामाधिपत्त्यञ्चतुष्पात्स्पृतञ्चतुर्विꣳश स्तोमऽआदित्त्यानाम्भागोसि मरुतामाधिपत्त्यङ्गर्भा स्पृताः पञ्चविꣳश स्तोमोदित्त्यै भागोसि पूष्णऽआधिपत्त्यमोज स्पृतन्त्रिणव स्तोमो देवस्य सवितुर्भागोसि बृहस्पतेराधिपत्त्यꣳ समीचीर्दिश स्पृताश्चतुष्टोम स्तोमो यवानाम्भागः ॥२५॥

यवानाम्भागोस्ययवानामाधिपत्त्यम्प्रजा स्पृताश्चतुश्चत्त्वारिꣳश स्तोमऽऋभूणाम्भागोसि व्विश्वेषान्देवानामाधिपत्त्यम्भूतꣳ स्पृतन्त्रयस्त्रिꣳश स्तोमः सहश्च ॥२६॥

सहश्च सहस्यश्च हैमन्तिकावृतूऽअग्नेरन्तःश्लेषोसि कल्पेतान्द्यावापृथिवी कल्पन्तामापऽओषधयः कल्पन्तामग्नयः पृथङ्मम ज्यैष्ठ्याय सव्रताः । येऽअग्नयः समनसोन्तरा द्यावापृथिवीऽइमे । हैमन्तिकावृतूऽअभिकल्पमानाऽइन्द्रमिव देवाऽअभिसँव्विशन्तु तया देवतयाङ्गिरस्वद्ध्रुवे सीदतम् ॥२७॥

॥८॥ एकयास्तुवत प्प्रजाऽअधीयन्त प्प्रजापतिरधिपतिरासीत्तिसृभिरस्तुवत ब्ब्रह्मासृज्ज्यत ब्ब्रह्मणस्प्पतिरधिपतिरासीत्पञ्चभिरस्तुवत भूतान्यसृज्ज्यन्त भूतानाम्पतिरधिपतिरासीत्सप्तभिरस्तुवत सप्तऽऋषयोसृज्ज्यन्त धाताधिपतिरासीन्नवभिरस्तुवत ॥२८॥

नवभिरस्तुवत पितरोसृज्ज्यन्तादितिरधिपत्न्यासीदेकादशभिरस्तुवतऽऋतवोसृज्ज्यन्तार्त्तवाऽअधिपतयऽआसँस्त्रयोदशभिरस्तुवत मासाऽअसृज्ज्यन्त सँव्वत्सरोधिपतिरासीत्पञ्चदशभिरस्तुवत क्क्षत्रमसृज्ज्यतेन्द्रोधिपतिरासीत्सप्तदशभिरस्तुवत ग्ग्राम्म्याः पशवोसृज्ज्यन्त बृहस्प्पतिरधिपतिरासीन्नवदशभिरस्तुवत ॥२९॥

नवदशभिरस्तुवत शूद्द्रार्य्यावसृज्ज्येतामहोरात्रेऽअधिपत्नीऽआस्तामेकविꣳशत्यास्तुवतैकशफाः पशवोसृज्ज्यन्त व्वरुणोधिपतिरासीत्त्रयोविꣳशत्यास्तुवत क्क्षुद्द्राः पशवोसृज्ज्यन्त पूषाधिपतिरासीत्पञ्चविꣳशत्यास्तुवतारण्ण्याः पशवोसृज्ज्यन्त व्वायुरधिपतिरासीत्सप्तविꣳशत्यास्तुवत द्यावापृथिवी व्व्यैताँव्वसवो रुद्द्राऽआदित्त्याऽअनुव्व्यायँस्तऽएवाधिपतयऽआसन्नवविꣳशत्यास्तुवत ॥३०॥

नवविꣳशत्यास्तुवत व्वनस्प्पतयोसृज्ज्यन्त सोमोधिपतिरासीदेकत्रिꣳशतास्तुवत प्प्रजाऽअसृज्ज्यन्त यवाश्च्चायवाश्च्चाधिपतयऽआसँस्त्रयस्त्रिꣳशतास्तुवत भूतान्यशाम्म्यन्प्रजापतिः परमेष्ठ्यधिपतिरासील्लोकन्ताऽइन्द्रम् ॥३१॥

गलितमन्त्राः —

लोकम्पृण च्छिद्द्रम्पृणाथो सीद ध्ध्रुवा त्त्वम् ।
इन्द्राग्ग्नी त्त्वा बृहस्प्पतिरस्म्मिन्य्योनावसीषदन् ॥
ताऽअस्य सूददोहसः सोमꣳ श्रीणन्ति पृश्नयः ।
जन्मन्देवानाँव्विशस्त्रिष्ष्वा रोचने दिवः ॥
इन्द्रँव्विश्श्वाऽअवीवृधन्त्समुद्द्रव्यचसङ्गिरः ।
रथीतमꣳ रथीनाँव्वाजानाꣳ सत्त्पतिम्पतिम् ॥

॥ इति चतुर्दशोऽध्यायः ॥

अथ पञ्चदशोऽध्यायः

ऋषिः (१) 'अग्ने जातान्' इत्यारभ्य (६५) 'सहस्रस्य प्रमा' इत्यन्तानां सामान्यतः प्रजापतिः साध्याः परमेष्ठी च ऋषयः ।
विशेषतश्च—
(२१) 'अयमग्निः' इत्यस्य विरूपः, (२४) 'अबोध्यग्निः' इत्यस्य बुधगविष्ठिरौ, (२७) 'जनस्य गोपाः' इत्यस्य

सुतम्भरः, (२९) ‘सखायः सम्’ इत्यस्येषः, (३०) ‘सꣳसमिद्युवसे’ इत्यस्य संवननः, (३१) ‘त्वाश्चित्रश्रवस्तमः’ इत्यस्य प्रस्कण्वः. (३२) ‘एना वः’ इत्यस्य वसिष्ठः. (३५) ‘अग्ने वाजस्य’ इत्यस्य गोतमः. (३८) ‘भद्रो नः’ इत्यस्य सौभरिः. (४१) ‘अग्निन्तम्’ इत्यस्य कुमारवृषौ. (४८) ‘अग्ने त्वम्’ इत्यादित्रयाणां क्रमेण बन्धुः सुबन्धुः श्रुतबन्धुः, (६२) ‘प्रोथदश्वः’ इत्यस्य वसिष्ठः ॥

देवता (१) ‘अग्ने जातान्’ (२) ‘सहसा जातान्’ इत्यनयोरग्निः ।

(३) ‘षोडशी स्तोमः’ ‘चतुश्चत्वारिꣳशः’ इत्यनयोर्लिङ्गोक्ता, ‘अग्नेः पुरीषम्’ इत्यस्येष्टका ।

(४-५) ‘एवश्छन्दः’ इत्यादिछन्दोऽन्तानाश्चत्वारिंशन्मन्त्राणाम्, (६) ‘रश्मिना सत्याय’ ‘प्रेतिना धर्मणा’ ‘अन्वित्या दिवा’ ‘सन्धिनान्तरिक्षेण’ ‘प्रतिधिना पृथिव्या’ ‘विष्टम्भेन वृष्ट्या’ ‘प्रवयाह्ना’ ‘अनुया रात्र्या’ ‘उशिजा वसुभ्यः’ ‘प्रकेतेनादित्येभ्यः’ (७) ‘तन्तुना रायस्पोषेण’ ‘सꣳसर्पेण श्रुताय’ ‘ऐडेनौषधीभिः’ ‘उत्तमेन तनूभिः’ ‘वयोधसाधीतेन’ ‘अभिजिता तेजसा’ (८) ‘प्रतिपदसि’ ‘अनुपदसि’ ‘सम्पदसि’ ‘तेजोसि’ (९) ‘त्रिवृदसि’ ‘प्रवृदसि’ ‘विवृदसि’ ‘सवृदसि’ ‘आक्रमोसि’ ‘सङ्क्रमोसि’ ‘उत्क्रमोसि’ ‘उत्क्रान्तिरसि’ ‘अधिपतिनोर्जा’ (१०) ‘राज्ञ्यसि’ (११) ‘विराडसि’ (१२) ‘सम्राडसि’ (१३) ‘स्वराडसि’ (१४) ‘अधिपत्न्यसि’ (१५) ‘अयम्पुरः’ (१६) ‘अयन्दक्षिणा’ (१७) ‘अयम्पश्चात्’ (१८) ‘अयमुत्तरात्’ (१९) ‘अयमुपरि’ इत्येषाञ्च लिङ्गोक्ता ।

(२०) ‘अग्निर्मूर्धा दिवः’ (२१) ‘अयमग्निः’ (२२) ‘त्वामग्ने’ (२३) ‘भुवो यज्ञस्य’ (२४) ‘अबोध्यग्निः’ (२५) ‘अवोचाम कवये’ (२६) ‘अयमिह’ (२७) ‘जनस्य गोपाः’ (२८) ‘त्वामग्ने’ (२९) ‘सखायः सम्’ (३०) ‘सꣳसमिद्युवसे’ (३१) ‘त्वाश्चित्रश्रवस्तमः’ (३२) ‘एना वः’ (३३) ‘विश्वस्य दूतम्’ (३४) ‘स दुद्रवत्’ (३५) ‘अग्ने वाजस्य’ (३६) ‘स इधानः’ (३७) ‘क्षपो राजन्’ (३८) ‘भद्रो नः’ (३९) ‘भद्रा उत’ (४०) ‘येना समत्सु’ (४१) ‘अग्निन्तम्’ (४२) ‘सो अग्निः’ (४३) ‘उभे सुश्चन्द्र’ (४४) ‘अग्ने तम्’ (४५) ‘अधा हि’ (४६) ‘एभिर्नः’ (४७) ‘अग्निꣳ होतारम्’ (४८) ‘अग्ने त्वम्’ ‘वसुरग्निः’ ‘तन्त्वा’ (४९) ‘येन ऋषयः’ (५०) ‘तम्पत्नीभिः’ (५१) ‘आ वाचः’ (५२) ‘अयमग्निः’ (५३) ‘सम्प्रच्यवध्वम्’ (५४) ‘उद्बुध्यस्वाग्ने’ (५५) ‘येन वहसि’ (५६) ‘अयन्ते’ इत्येषामग्निः ।

(५७) ‘तपश्च तपस्यश्च’ इत्यस्य ऋतवः ।

(५८) ‘परमेष्ठी त्वा’ इत्यस्य सूर्यः ।

(६२) ‘प्रोथदश्वः’ इत्यस्याग्निः ।

(६३) ‘आयोष्ट्वा’ (६४) ‘परमेष्ठी त्वा’ इत्यनयोः स्वयमातृण्णा ।

(६५) ‘सहस्रस्य प्रमा’ ‘सहस्रस्य प्रतिमा’ ‘सहस्रस्योन्मा’ ‘साहस्रोसि ‘सहस्राय त्वा’ इत्येषामग्निः ॥

छन्दः (१) ‘अग्ने जातान्’ (२) ‘सहसा जातान्’ (३) ‘अग्नेः पुरीषम्’ इत्येषां त्रिष्टुप्, (२०) ‘अग्निर्मूर्धा’ (२१) ‘अयमग्निः’ (२२) ‘त्वामग्ने’ इत्येषां गायत्री; (२३) ‘भुवो यज्ञस्य’ (२४) ‘अबोध्यग्निः’ (२५) ‘अवोचाम कवये’ इत्येषां त्रिष्टुप्, (२६) ‘अयमिह’ (२७) ‘जनस्य गोपाः’ (२८) ‘त्वामग्ने’ इत्येषां जगती, (२९) ‘सखायः सम्’ (३०) ‘सꣳसमिद्युवसे’ (३१) ‘त्वाश्चित्रश्रवस्तमः’ इत्येषामनुष्टुप्, (३२) ‘एना वः’ (३३) ‘विश्वस्य दूतम्’ (३४) ‘स दुद्रवन्’ इत्येषां बार्हतः प्रगाथः, (३५) ‘अग्ने वाजस्य’ (३६) ‘स इधानः’ (३७) ‘क्षपो राजन्’ इत्येषामुष्णिक्, (३८) ‘भद्रो नः’ (३९) ‘भद्रा उत’ (४०) ‘येना समत्सु’ इत्येषां काकुभः प्रगाथः, (४१) ‘अग्निन्तम्’ (४२) ‘सो अग्निः’ (४३) ‘उभे सुश्चन्द्र’ इत्येषां पङ्क्तिः, (४४) ‘अग्ने तमद्य’ (४५) ‘अधा ह्यग्ने’ (४६) ‘एभिर्नः’ इत्येषां पदपङ्क्तिः, (४७) ‘अग्निꣳ होतारम्’ इत्यस्यातिच्छन्दाः, (४८) ‘अग्ने त्वम्’ ‘वसुरग्निः’ ‘तन्त्वा’ इत्येषां द्विपदा विराट्, (४९) ‘येन ऋषयः’ इत्यारभ्य (५४) ‘उद्बुध्यस्व’ इत्यन्तानां त्रिष्टुप्, (५५) ‘येन वहसि’ (५६) ‘अयन्ते’ इत्यनयोरनुष्टुप्, (६२) ‘प्रोथदश्वः’ इत्यस्य त्रिष्टुप् ॥

॥ हरिः३ॐ ॥

॥१॥ अग्ने॑ जा॒तान्प्रणु॑दा नः स॒पत्ना॒न्प्रत्यजा॑तान्नुद जातवेदः ।
अधि॑ नो ब्रूहि सु॒मना॒ऽअहे॑डँ॒स्तव॑ स्याम॒ शर्म्मँ॑स्त्रि॒वरू॑थऽउ॒द्भौ ॥१॥
सह॑सा जा॒तान्प्रणु॑दा नः स॒पत्ना॒न्प्रत्यजा॑ताञ्जातवेदो नुदस्व ।
अधि॑ नो ब्रूहि सुमन॒स्यमा॑नो व्व॒यꣳ स्या॑म॒ प्प्रणु॑दा नः स॒पत्ना॑न् ॥२॥
षो॒ड॒शी स्तोम॒ऽओजो॒ द्रवि॑णञ्चतु॒श्चत्त्वारि॒ꣳश स्तोमो॒ व्वर्च्चो॒ द्रवि॑णम् । अ॒ग्नेः पुरी॑षमस्य॒प्प्सो॒ नाम॒ तान्त्वा॒ व्विश्श्वे॒ऽअ॒भिगृ॑णन्तु दे॒वाः । स्तोम॑पृष्ठा घृ॒तव॑ती॒ह सी॑द प्प्र॒जाव॑द॒स्म्मे द्रवि॒णाय॑जस्व ॥३॥
ए॒वश्च्छन्दो॒ व्वरि॑व॒श्च्छन्द॑ः श॒म्भूश्च्छन्द॑ः परि॒भूश्च्छन्द॒ऽआ॒च्छच्छन्दो॒ मन॒श्च्छन्दो॒ व्व्यच॒श्च्छन्द॒ः सिन्धु॒श्च्छन्द॑ः समु॒द्रश्च्छन्द॑ः सरि॒रञ्छन्द॑ः क॒कुप्प्छन्द॑स्त्रिक॒कुप्प्छन्द॑ः का॒व्यञ्छन्दो॑ऽअङ्कु॒पञ्छन्दो॒क्षर॑पङ्क्ति॒श्च्छन्द॑ः प॒दप॑ङ्क्ति॒श्च्छन्दो॑ व्विष्ट्टा॒रप॑ङ्क्ति॒श्च्छन्द॑ः क्षु॒रो ब्भ्रज॒श्च्छन्द॒ऽआ॒च्छच्छन्द॑ः प्प्र॒च्छच्छन्द॑ः ॥४॥
आ॒च्छच्छन्द॑ः प्प्र॒च्छच्छन्द॑ः सँ॒यच्छन्दो॑ व्वि॒यच्छन्दो॑ बृ॒हच्छन्दो॑ रथन्त॒रञ्छन्दो॑ निका॒यश्च्छन्दो॑ व्विव॒धश्च्छन्दो॒ गिर॒श्च्छन्दो॒ ब्भ्रज॒श्च्छन्द॑ः सꣳस्तु॒प्प्छन्दो॑नुष्टु॒प्प्छन्द॒ऽए॒वश्च्छन्दो॒ व्वरि॑व॒श्च्छन्दो॒ व्वय॒श्च्छन्दो॑ व्वय॒स्कृच्छन्दो॒ व्विष्प॑र्द्धा॒श्च्छन्दो॑ व्विशा॒लञ्छन्द॑श्च्छ॒दिश्च्छन्दो॑ दूरोह॒णञ्छन्द॑स्त्त॒न्द्रञ्छन्दो॑ऽअङ्का॒ङ्कञ्छन्द॑ः ॥५॥

॥२॥ र॒श्म्मिना॑ स॒त्त्याय॑ स॒त्त्यञ्जि॑न्व॒ प्प्रेति॑ना॒ धर्म्म॑णा॒ धर्म्म॑ञ्जिन्वान्वि॑त्त्या दि॒वा दिव॑ञ्जिन्व स॒न्धिना॒न्तरि॑क्क्षेणा॒न्तरि॑क्क्षञ्जिन्व प्प्रति॒धिना॑ पृथि॒व्या पृ॑थि॒वीञ्जि॑न्व व्विष्ट्ट॒म्भेन॒ व्वृष्ट्या॒ व्वृष्टि॑ञ्जिन्व प्प्र॒वयाह्नाह॑र्ज्जिन्वानु॒या रात्र्या॒ रात्री॑ञ्जिन्वो॒शिजा॒ व्वसु॑ब्भ्यो॒ व्वसू॑ञ्जिन्व प्प्रके॒तेना॑दि॒त्त्येब्भ्य॑ऽआदि॒त्त्याञ्जि॑न्व॒ तन्तु॑ना रा॒यः ॥६॥
तन्तु॑ना रा॒यस्प्पोषे॑ण रा॒यस्प्पोष॑ञ्जिन्व सꣳस॒र्प्पेण॑ श्श्रु॒ताय॑ श्श्रु॒तञ्जि॑न्वै॒डेनौष॑धीभि॒रोष॑धीर्ज्जिन्वोत्त॒मेन॑ त॒नूभि॑स्त्त॒नूञ्जि॑न्व व्वयो॒धसाधी॑ते॒नाधी॒तञ्जि॑न्वाभि॒जिता॒ तेज॑सा॒ तेजो॑ जिन्व ॥७॥
प्र॒ति॒पद॑सि प्प्रति॒पदे॑ त्त्वानु॒पद॑स्यनु॒पदे॑ त्त्वा स॒म्पद॑सि स॒म्पदे॑ त्त्वा॒ तेजो॑सि॒ तेज॑से त्त्वा त्रि॒वृद॑सि ॥८॥
त्रि॒वृद॑सि त्रि॒वृते॑ त्त्वा प्प्र॒वृद॑सि प्प्र॒वृते॑ त्त्वा व्वि॒वृद॑सि व्वि॒वृते॑ त्त्वा स॒वृद॑सि स॒वृते॑ त्त्वाक्क्र॒मो॑स्याक्क्र॒माय॑ त्त्वा सङ्क्र॒मो॑सि सङ्क्र॒माय॑ त्त्वोत्क्र॒मो॑स्युत्क्र॒माय॒ त्त्वोत्क्रा॑न्तिर॒स्युत्क्रा॑न्त्यै॒ त्त्वाधि॑पतिनो॒र्ज्जोर्ज्ज॑ञ्जिन्व ॥९॥

॥३॥ रा॒ज्ञ्य॑सि॒ प्प्राची॒ दिग्ग्व॒स॑वस्त्ते दे॒वाऽअधि॑पतयो॒ग्ग्निर्हे॑ती॒नाम्प्प्र॑तिध॒र्त्ता त्त्रि॒वृत्त्वा॒ स्त्तोम॑ः पृथि॒व्याᳪं श्र॑यत्त्वाज्ज्य॑मु॒क्क्थमव्य॑थायै स्त्तभ्नातु रथन्त॒रᳪं साम॒ प्प्रति॑ष्ठित्त्याऽअ॒न्तरि॑क्क्ष॒ऽऋष॑यस्त्त्वा प्प्रथम॒जा दे॒वेषु॑ दि॒वो मात्र॑या व्वरि॒म्म्णा प्प्रथ॑न्तु व्विध॒र्त्ता चा॒यमधि॑पतिश्च॒ ते त्त्वा॒ सर्व्वे॑ सँव्विदा॒ना नाक॑स्य पृ॒ष्ठे स्व॒र्ग्गे लो॒के यज॑मानञ्च सादयन्तु ॥१०॥

व्वि॒राड॑सि॒ दक्क्षि॑णा॒ दिग्ग्रु॒द्द्रास्त्ते॑ दे॒वाऽअधि॑पतय॒ऽइन्द्रो॑ हेती॒नाम्प्प्र॑तिध॒र्त्ता प॑ञ्चद॒शस्त्त्वा॒ स्त्तोम॑ः पृथि॒व्याᳪं श्र॑यतु॒ प्प्रऽउ॑गमु॒क्क्थमव्य॑थायै स्त्तभ्नातु बृ॒हत्त्साम॒ प्प्रति॑ष्ठित्त्याऽअ॒न्तरि॑क्क्ष॒ऽऋष॑यस्त्त्वा प्प्रथम॒जा दे॒वेषु॑ दि॒वो मात्र॑या व्वरि॒म्म्णा प्प्रथ॑न्तु व्विध॒र्त्ता चा॒यमधि॑पतिश्च॒ ते त्त्वा॒ सर्व्वे॑ सँव्विदा॒ना नाक॑स्य पृ॒ष्ठे स्व॒र्ग्गे लो॒के यज॑मानञ्च सादयन्तु ॥११॥

स॒म्म्राड॑सि प्प्र॒तीची॒ दिगा॑दि॒त्त्यास्त्ते॑ दे॒वाऽअधि॑पतयो॒ व्वरु॑णो हेती॒नाम्प्प्र॑तिध॒र्त्ता स॑प्प्तद॒शस्त्त्वा॒ स्त्तोम॑ः पृथि॒व्याᳪं श्र॑यतु म॒रुत्त्व॒तीय॑मु॒क्क्थमव्य॑थायै स्त्तभ्नातु व्वैरू॒पᳪं साम॒ प्प्रति॑ष्ठित्त्याऽअ॒न्तरि॑क्क्ष॒ऽऋष॑यस्त्त्वा प्प्रथम॒जा दे॒वेषु॑ दि॒वो मात्र॑या व्वरि॒म्म्णा प्प्रथ॑न्तु व्विध॒र्त्ता चा॒यमधि॑पतिश्च॒ ते त्त्वा॒ सर्व्वे॑ सँव्विदा॒ना नाक॑स्य पृ॒ष्ठे स्व॒र्ग्गे लो॒के यज॑मानञ्च सादयन्तु ॥१२॥

स्व॒राड॒स्युदी॑ची॒ दिङ्म्म॒रुत॑स्त्ते दे॒वाऽअधि॑पतय॒ः सोमो॑ हेती॒नाम्प्प्र॑तिध॒र्त्तैक॑वि॒ᳪंशस्त्त्वा॒ स्त्तोम॑ः पृथि॒व्याᳪं श्र॑यतु॒ निष्क्केव॒ल्ल्यमु॒क्क्थमव्य॑थायै स्त्तभ्नातु व्वैरा॒जᳪं साम॒ प्प्रति॑ष्ठित्त्याऽअ॒न्तरि॑क्क्ष॒ऽऋष॑यस्त्त्वा प्प्रथम॒जा दे॒वेषु॑ दि॒वो मात्र॑या व्वरि॒म्म्णा प्प्रथ॑न्तु व्विध॒र्त्ता चा॒यमधि॑पतिश्च॒ ते त्त्वा॒ सर्व्वे॑ सँव्विदा॒ना नाक॑स्य पृ॒ष्ठे स्व॒र्ग्गे लो॒के यज॑मानञ्च सादयन्तु ॥१३॥

अधि॑पत्त्न्यसि बृह॒ती दिग्ग्विश्श्वे॑ ते दे॒वाऽअधि॑पतयो॒ बृह॒स्प्पति॑र्हेती॒नाम्प्प्र॑तिध॒र्त्ता त्त्रि॑णवत्त्रयस्त्त्रि॒ᳪंशौ त्त्वा॒ स्त्तोमौ॑ पृथि॒व्याᳪं श्र॑यतां॒ व्वैश्श्वदेवाग्ग्निमारु॒तेऽउ॒क्क्थेऽअव्य॑थायै स्त्तभ्नीताᳪं शाक्क्वररैव॒ते साम॑नी॒ प्प्रति॑ष्ठित्त्याऽअ॒न्तरि॑क्क्ष॒ऽऋष॑यस्त्त्वा प्प्रथम॒जा दे॒वेषु॑ दि॒वो मात्र॑या व्वरि॒म्म्णा प्प्रथ॑न्तु व्विध॒र्त्ता चा॒यमधि॑पतिश्च॒ ते त्त्वा॒ सर्व्वे॑ सँव्विदा॒ना नाक॑स्य पृ॒ष्ठे स्व॒र्ग्गे लो॒के यज॑मानञ्च सादयन्तु ॥१४॥

॥४॥ अ॒यम्पु॒रो हरि॑केश॒ः सूर्य्य॑रश्मि॒स्तस्य॑ रथगृ॒त्सश्च॒ रथौ॑जाश्च सेनानीग्ग्राम॒ण्ण्यौ॑ । पु॒ञ्जि॒कस्त्थ॒ला च॑ क्क्रतु॒स्त्थ॒ला चा॑प्प्सर॒सौ द॒ङ्क्ष्णव॑ः प॒शवो॑ हे॒तिः पौरु॑षेयो व्व॒धः

प्प्रहेतिस्त्तेब्भ्यो नमोऽअस्त्तु ते नोवन्तु ते नो मृडयन्तु ते यन्द्विष्म्मो यश्च नो द्वेष्टि तमेषाञ्जम्भे दद्ध्मः ॥१५॥

अयन्दक्षिणा विश्वकर्म्मा तस्य रथस्वनश्च रथेचित्रश्च सेनानीग्ग्रामण्ण्यौ। मेनका च सहजन्या चाप्प्सरसौ यातुधाना हेती रक्षाꣳसि प्प्रहेतिस्त्तेब्भ्यो नमोऽअस्त्तु ते नोवन्तु ते नो मृडयन्तु ते यन्द्विष्म्मो यश्च नो द्वेष्टि तमेषाञ्जम्भे दद्ध्मः ॥१६॥

अयम्पश्चाद्विश्वव्यचास्त्तस्य रथप्प्रोतश्चासमरथश्च सेनानीग्ग्रामण्ण्यौ। प्रम्म्लोचन्ती चानुम्म्लोचन्ती चाप्प्सरसौ व्याग्घ्रा हेतिः सर्प्पाः प्प्रहेतिस्त्तेब्भ्यो नमोऽअस्त्तु ते नोवन्तु ते नो मृडयन्तु ते यन्द्विष्म्मो यश्च नो द्वेष्टि तमेषाञ्जम्भे दद्ध्मः ॥१७॥

अयमुत्तरात्त्सँय्यद्वसुस्त्तस्य ताक्क्ष्यश्चारिष्टनेमिश्च सेनानीग्ग्रामण्ण्यौ। विश्वाची च घृताची चाप्प्सरसावापो हेतिर्व्वातः प्प्रहेतिस्त्तेब्भ्यो नमोऽअस्त्तु ते नोवन्तु ते नो मृडयन्तु ते यन्द्विष्म्मो यश्च नो द्वेष्टि तमेषाञ्जम्भे दद्ध्मः ॥१८॥

अयमुपर्य्यर्व्वाग्ग्वसुस्त्तस्य सेनजिच्च सुषेणश्च सेनानीग्ग्रामण्ण्यौ। उर्व्वशी च पूर्व्वचित्तिश्चाप्प्सरसाववस्प्फूर्जन्हेतिर्व्विद्युत्प्रहेतिस्त्तेब्भ्यो नमोऽअस्त्तु ते नोवन्तु ते नो मृडयन्तु ते यन्द्विष्म्मो यश्च नो द्वेष्टि तमेषाञ्जम्भे दद्ध्मः ॥१९॥

॥५॥ अग्निर्म्मूर्द्धा दिवः ककुत्पतिः पृथिव्याऽअयम्। अपाꣳ रेताꣳसि जिन्वति ॥२०॥
अयमग्निः सहस्रिणो वाजस्य शतिनस्प्पतिः। मूर्द्धा कवी रयीणाम् ॥२१॥
त्वामग्ने पुष्कराद्ध्यथर्व्वा निरमन्थत। मूर्द्ध्नो विश्वस्य वाघतः ॥२२॥
भुवो यज्ञस्य रजसश्च नेता यत्रा नियुद्भिः सचसे शिवाभिः।
दिवि मूर्द्धानन्दधिषे स्वर्षाञ्जिह्वामग्ने चकृषे हव्यवाहम् ॥२३॥
अबोद्ध्यग्निः समिधा जनानाम्प्रति धेनुमिवायतीमुषासम्।
यह्वाऽइव प्प्र वयामुज्जिहानाः प्प्र भानवः सिस्रते नाकमच्छ ॥२४॥
अवोचाम कवये मेद्ध्याय वचो वन्दारु वृषभाय वृष्ण्णे।
गविष्ठिरो नमसा स्त्तोममग्नौ दिवीव रुक्ममुरुव्यञ्चमश्श्रेत् ॥२५॥
अयमिह प्प्रथमो धायि धातृभिर्होता यजिष्ठोऽअद्ध्वरेष्वीड्यः।
यमप्नवानो भृगवो विरुरुचुर्व्वनेषु चित्रँव्विभ्वँव्विशेविशे ॥२६॥
जनस्य गोपाऽअजनिष्ट जागृविरग्निः सुदक्षः सुविताय नव्यसे।
घृतप्प्रतीको बृहता दिविस्पृशा द्युमद्विभाति भरतेब्भ्यः शुचिः ॥२७॥

त्वाम॑ग्ने॒ऽअङ्गि॑रसो॒ गुहा॑ हि॒तमन्व॑विन्दञ्छिश्रिया॒णँव्वने॑वने ।
स जा॑यसे म॒त्थ्यमा॑नः॒ सहो॑ म॒हत्त्वामा॑हुः॒ सह॑सस्प्पु॒त्रम॑ङ्गिरः ॥२८॥
सखा॑यः॒ सँव्वः॑ स॒म्म्यञ्च॒मिष॒ꣳ स्तोम॑ञ्चा॒ग्नये॑ ।
व्वर्षि॑ष्ट्ठाय क्क्षिती॒नामू॒र्ज्जो नप्प्त्रे॒ सह॑स्वते ॥२९॥
स॒ꣳस॒मिद्यु॑वसे व्वृषन्नग्ने॒ व्विश्श्वान्य॒र्य्यऽआ ।
इ॒डस्प्प॒दे समि॑द्ध्यसे॒ स नो॒ व्वसू॒न्याभ॑र ॥३०॥
त्वाञ्चि॒त्रश्श्र॑वस्तम॒ हव॑न्ते व्वि॒क्क्षु ज॒न्तवः॑ ।
शो॒चिष्क्के॑शम्पुरुप्प्रि॒याग्ने॑ ह॒व्याय॒ व्वोढ॑वे ॥३१॥
ए॒ना वो॑ऽअ॒ग्निन्नम॑सो॒र्ज्जो नपा॑त॒माहु॑वे ।
प्प्रि॒यञ्चेति॑ष्ठमर॒तिꣳ स्व॑द्ध्व॒रँव्विश्श्व॑स्य दू॒तम॒मृत॑म् ॥३२॥
व्विश्श्व॑स्य दू॒तम॒मृत॒व्विश्श्व॑स्य दू॒तम॒मृत॑म् ।
स यो॑जतेऽअरु॒षा व्वि॒श्श्वभो॑जसा॒ स दु॑द्द्रव॒त्स्वा॑हुतः ॥३३॥
स दु॑द्द्रव॒त्स्वा॑हुतः॒ स दु॑द्द्रव॒त्स्वा॑हुतः ।
सु॒ब्रह्मा॑ य॒ज्ञः सु॒शमी॒ व्वसू॑नान्दे॒वꣳ राधो॒ जना॑नाम् ॥३४॥
अग्ने॒ व्वाज॑स्य॒ गोम॑त॒ऽईशा॑नः सहसो यहो । अ॒स्मे धे॑हि जातवेदो॒ महि॒ श्श्रवः॑ ॥३५॥
सऽइ॑धा॒नो व्वसु॑ष्क॒विर॒ग्निरी॒डेन्यो॑ गि॒रा । रे॒वद॒स्म्मभ्य॑म्पुर्व्वणीक दीदिहि ॥३६॥
क्ष॒पो रा॑जन्नु॒त त्मनाग्ने॒ व्वस्तो॑रु॒तोषसः॑ । स ति॑ग्ग्मजम्भ र॒क्क्षसो॑ द॒ह प्प्रति॑ ॥३७॥
भ॒द्रो नो॑ऽअ॒ग्निराहु॑तो भ॒द्रा रा॒तिः सु॑भग भ॒द्रोऽअ॑द्ध्व॒रः । भ॒द्राऽउ॒त प्प्रश॑स्तयः ॥३८॥
भ॒द्राऽउ॒त प्प्रश॑स्तयो भ॒द्रम्मनः॑ कृणुष्व व्वृत्र॒तूर्य्ये॑ । येना॑ स॒मत्त्सु॑ सा॒सहः॑ ॥३९॥
येना॑ स॒मत्त्सु॑ सा॒सहो॒व॑ स्त्थि॒रा त॑नु॒हि भूरि॒ शर्द्ध॑ताम् । व्व॒नेमा॑ तेऽअ॒भिष्टि॑भिः ॥४०॥
अ॒ग्निन्तम्म॑न्ये॒ यो व्वसु॒रस्तँय्यँय्यन्ति धे॒नवः॑ ।
अस्त॒मर्व॑न्तऽआ॒शवोस्त॒न्नित्त्या॑सो व्वा॒जिन॒ऽइष॒ꣳ स्तो॒तृभ्य॒ऽआभ॑र ॥४१॥
सोऽअ॒ग्निर्य्यो व्वसु॑र्गृ॒णे सँय्यमा॒यन्ति॑ धे॒नवः॑ ।
समर्व॑न्तो रघु॒द्द्रुवः॒ सꣳ सु॑जा॒तासः॑ सू॒रय॒ऽइष॒ꣳ स्तो॒तृभ्य॒ऽआभ॑र ॥४२॥
उ॒भे सु॑श्चन्द्र स॒र्प्पिषो॒ दर्व्वी॑ श्श्रीणीषऽआ॒सनि॑ ।
उ॒तो न॒ऽउत्त्पु॑पूर्य्या॒ऽउ॒क्क्थेषु॑ शवसस्प्पत॒ऽइष॒ꣳ स्तो॒तृभ्य॒ऽआभ॑र ॥४३॥
अग्ने॒ तम॒द्याश्श्वन्न स्तोमैः॒ क्क्रतु॒न्न भ॒द्रꣳ हृ॑दि॒स्पृश॑म् । ऋ॒द्ध्यामा॑ त॒ऽओहैः॑ ॥४४॥
अधा॒ ह्यग्ने॒ क्क्रतो॑र्भ॒द्रस्य॒ दक्क्ष॑स्य सा॒धोः । र॒थीर्ऋ॒तस्य॑ बृह॒तो ब॒भूथ॑ ॥४५॥

एभिर्न्नोऽअर्क्कैर्ब्भवा नोऽअर्व्वाङ्क्स्वर्ण्ण ज्ज्योतिः ।
अग्ने व्विश्वेभिः सुमनाऽअनीकैः ॥४६॥
अग्निꣳ होतारम्मन्न्ये दास्वन्तँव्वसुꣳ सूनुꣳ सहसो जातवेदसँव्विप्प्रन्न जातवेदसम् ।
यऽऊर्द्ध्वया स्वद्ध्वरो देवो देवाच्च्या कृपा । घृतस्य व्विब्भ्राष्ट्टिमनुवष्ट्टि शोचिषाजुह्वानस्य सर्प्पिषः ॥४७॥
अग्ने त्वन्नोऽअन्तमऽउत त्राता शिवो भवा वरूथ्थ्यः । वसुरग्निर्व्वसुश्श्रवाऽअच्छा
नक्षि द्द्युमत्तमꣳ रयिन्दाः । तन्त्वा शोचिष्ठ दीदिवः सुम्नाय नूनमीमहे
सखिब्भ्यः ॥४८॥

॥६॥ येनऽऋषयस्तपसा सत्रमायन्निन्धानाऽअग्निꣳ स्वराभरन्तः ।
तस्मिन्नहन्निदधे नाकेऽअग्निँय्यमाहुर्म्मनव स्तीर्ण्णबर्हिषम् ॥४९॥
तम्पत्नीभिरनुगच्छेम देवाः पुत्रैर्ब्भ्रातृभिरुत वा हिरण्ण्यैः ।
नाकङ्गृब्भ्णानाः सुकृतस्य लोके तृतीये पृष्ठेऽअधि रोचने दिवः ॥५०॥
आ वाचो मद्ध्यमरुहद्भुरण्ण्युरयमग्निः सत्पतिश्चेकितानः ।
पृष्ठे पृथिव्व्या निहितो दविद्द्युतदधस्पदङ्कृणुताँय्ये पृतन्न्यवः ॥५१॥
अयमग्निर्व्वीरतमो वयोधाः सहस्रियो द्द्योततामप्प्रयुच्छन् ।
व्विब्भ्राजमानः सरिरस्य मद्ध्यऽउपप्प्रयाहि दिव्व्यानि धाम ॥५२॥
सम्प्रच्च्यवद्ध्वमुप सम्प्रयाताग्ने पथो देवयानान्कृणुद्ध्वम् ।
पुनः कृण्ण्वाना पितरा युवानान्न्वाताꣳसीत्त्वयि तन्तुमेतम् ॥५३॥
उद्बुद्ध्यस्वाग्ने प्प्रतिजागृहि त्वमिष्टापूर्त्ते सꣳसृजेथामयञ्च ।
अस्म्मिन्त्सधस्थेऽअद्ध्युत्तरस्म्मिन्व्विश्वे देवा यजमानश्च सीदत ॥५४॥
येन वहसि सहस्रँय्येनाग्ने सर्व्ववेदसम् । तेनेमँय्यज्ञन्नो नय स्वर्द्देवेषु गन्तवे ॥५५॥
अयन्ते योनिर्ऋत्त्वियो यतो जातोऽअरोचथाः ।
तञ्जानन्नग्नऽआरोहाथा नो वर्द्धया रयिम् ॥५६॥

॥७॥ तपश्च तपस्यश्च शैशिरावृतूऽअग्नेरन्तःश्लेषोसि कल्प्पेतान्द्यावापृथिवी कल्प्पन्तामापऽओषधयः कल्प्पन्तामग्नयः पृथङ्मम ज्ज्यैष्ठ्याय सव्व्रताः । येऽअग्नयः समनसोन्तरा द्यावापृथिवीऽइमे । शैशिरावृतूऽअभिकल्प्पमानाऽइन्द्रमिव देवाऽअभिसँव्विशन्तु तया देवतयाङ्गिरस्वद्ध्रुवे सीदतम् ॥५७॥

परमेष्ट्ठी त्त्वा सादयतु दिवस्पृष्ट्ठे ज्ज्योतिष्ष्मतीम्। व्विश्श्वस्म्मै प्प्राणायापानाय व्व्यानाय व्विश्श्वञ्ज्योतिर्य्यच्छ। सूर्य्यस्त्तेधिपतिस्त्तया देवतयाङ्गिरस्वद्ध्रुवा सीद ॥५८॥
लोकम्पृण च्छिद्द्रम्पृणाथो सीद द्ध्रुवा त्त्वम्।
इन्द्राग्ग्नी त्त्वा बृहस्प्पतिरस्म्मिन्य्योनावसीषदन् ॥५९॥
ताऽअस्य सूददोहसः सोमꣳ श्रीणन्ति पृश्श्नयः।
जन्म्मन्देवानाँव्विशस्त्रिष्ष्वा रोचने दिवः ॥६०॥ वे०मू० चन्द्रभानु शर्मा
इन्द्रँव्विश्श्वाऽअवीवृधन्त्समुद्द्रव्व्यचसङ्गिरः।
रथीतमꣳ रथीनाँव्वाजानाꣳ सत्त्पतिम्पतिम् ॥६१॥
प्रोथदश्श्वो न यवसेविष्ष्यन्न्यदा महः सँव्वरणाद्व्व्यस्त्थात्।
आदस्य व्वातोऽअनुवाति शोचिरध स्म्म ते व्व्रजनङ्कृष्ष्णमस्त्ति ॥६२॥
आयोष्ट्वा सदने सादयाम्म्यवतश्च्छायायाꣳ समुद्द्रस्य हृदये।
रश्म्मीवतीम्भास्वतीमा या द्याम्भास्या पृथिवीमोर्व्वन्तरिक्क्षम् ॥६३॥
परमेष्ट्ठी त्त्वा सादयतु दिवस्पृष्ट्ठे व्व्यचस्वतीम्प्रथस्वतीन्दिवँय्यच्छ दिवन्दꣳह दिवम्मा हिꣳसीः। व्विश्श्वस्म्मै प्प्राणायापानाय व्व्यानायोदानाय प्प्रतिष्ट्ठायै चरित्त्राय। सूर्य्यस्त्त्वाभिपातु मह्या स्वस्त्त्या च्छर्दिषा शन्तमेन तया देवतयाङ्गिरस्वद्ध्रुवे सीदतम् ॥६४॥
सहस्रस्य प्प्रमासि सहस्रस्य प्प्रतिमासि सहस्रस्योन्म्मासि साहस्रोसि सहस्राय त्त्वा ॥६५॥

॥ इति पञ्चदशोऽध्यायः ॥

अथ षोडशोऽध्यायः

ऋषिः (१) 'नमस्ते रुद्र' इत्यारभ्य (६६) 'नमोस्तु रुद्रेभ्यः' इत्यन्तानां सामान्यतः परमेष्ठी देवाः प्रजापतिर्वा ऋषयः।
विशेषतश्च—
(१५) 'मा नो महान्तम्' (१६) 'मा नस्तोके' (४८) 'इमा रुद्राय' इत्येषां कुत्सः ॥

देवता (१) 'नमस्ते रुद्र' (२) 'या ते' (३) 'यामिषुम्' (४) 'शिवेन वचसा' (५) 'अध्यवोचत्' (६) 'असौ यस्ताम्रः' (७) 'असौ योवसर्पति' (८) 'नमोस्तु नीलग्रीवाय' (९) 'प्रमुञ्च धन्वनः' (१०) 'विज्यन्धनुः' (११) 'या ते' (१२) 'परि ते' (१३) 'अवतत्य धनुः' (१४) 'नमस्त आयुधाय' (१५) 'मा नो महान्तम्' (१६) 'मा नस्तोके' इत्येषामेको रुद्रः।
(१७) 'नमो हिरण्यबाहवे' (१८) 'नमो बभ्लुशाय' (१९) 'नमो रोहिताय' (२०) 'नमः कृत्स्नायतया' (२१) 'नमो वञ्चते' (२२) 'नम उष्णीषिणे' (२३) 'नमो विसृजद्भ्यः' (२४) 'नमः सभाभ्यः' (२५) 'नमो गणेभ्यः'

(२६) 'नमः सेनाभ्यः' (२७) 'नमस्तक्षभ्यः' (२८) 'नमः श्वभ्यः' (२९) 'नमः कपर्दिने' (३०) 'नमो ह्रस्वाय' (३१) 'नम आशवे' (३२) 'नमो ज्येष्ठाय' (३३) 'नमः सोभ्याय' (३४) 'नमो वन्याय' (३५) 'नमो बिल्मिने' (३६) 'नमो धृष्णवे' (३७) 'नमः स्रुत्याय' (३८) 'नमः कूप्याय' (३९) 'नमो वात्याय' (४०) 'नमः शृङ्गवे' (४१) 'नमः शम्भवाय' (४२) 'नमः पार्याय' (४३) 'नमः सिकत्याय' (४४) 'नमो व्रज्याय' (४५) 'नमः शुष्क्याय' (४६) 'नमः पर्णाय' इत्येषां तिस्रोऽशीतयो रुद्राः, 'नमो वः किरिकेभ्यः' 'नमो विचिन्वत्केभ्यः' 'नमो विक्षिणत्केभ्यः' 'नम आनिर्हतेभ्यः' इत्येषामग्निवायुसूर्या बहवो रुद्राश्च ।

(४७) 'द्रापे अन्धसस्पते' (४८) 'इमा रुद्राय' (४९) 'या ते' (५०) 'परि नः' (५१) 'मीढुष्टम शिवतम' (५२) 'विकिरिद्र विलोहित' (५३) 'सहस्राणि सहस्रशः' इत्येषामेको रुद्रः ।

(५४) 'असङ्ख्याता सहस्राणि' (५५) 'अस्मिन् महति' (५६) 'नीलग्रीवाः शितिकण्ठा दिवम्' (५७) 'नीलग्रीवाः शितिकण्ठाः शर्वाः' (५७) 'ये वृक्षेषु' (५९) 'ये भूतानाम्' (६०) 'ये पथाम्' (६१) 'ये तीर्थानि' (६२) 'येन्नेषु' (६३) 'य एतावन्तः' (६४) 'नमोस्तु रुद्रेभ्यो ये दिवि' (६५) 'नमोस्तु रुद्रेभ्यो येन्तरिक्षे' (६६) 'नमोस्तु रुद्रेभ्यो ये पृथिव्याम्' इत्येषां बहवो रुद्राः ।

छन्दः (१) 'नमस्ते रुद्र' इत्यस्य गायत्री, (२) 'या ते' (३) 'यामिषुम्' (४) 'शिवेन वचसा' इत्येषामनुष्टुप्, (५) 'अध्यवोचत्' (६) 'असौ यस्ताम्रः' (७) 'असौ योवसर्पति' इत्येषां पङ्क्तिः, (८) 'नमोस्तु नीलग्रीवाय' इत्यारभ्य (१४) 'नमस्त आयुधाय' इत्यन्तानामनुष्टुप्, (१५) 'मा नो महान्तम्' (१६) 'मा नस्तोके' इत्यनयोर्जगती, (४७) 'द्रापे अन्धसस्पते' इत्यस्योपरिष्टाद्बृहती, (४८) 'इमा रुद्राय' इत्यस्य जगती, (४९) 'या ते' इत्यस्यानुष्टुप्, (५०) 'परि नः' (५१) 'मीढुष्टम शिवतम' इत्यनयोस्त्रिष्टुप्, (५२) 'विकिरिद्र विलोहित' (५३) (५३) 'सहस्राणि सहस्रशः' इत्यनयोरनुष्टुप्, (५४) 'असङ्ख्याता सहस्राणि' इत्यारभ्य (६३) 'य एतावन्तः' इत्यन्तानामनुष्टुप् ॥

॥ हरिःॐ ॥

॥१॥ नम॑स्ते रुद्र म॒न्यव॑ऽउ॒तो त॒ऽइष॑वे॒ नम॑ः । बा॒हुभ्या॑मु॒त ते॒ नम॑ः ॥१॥
या ते॑ रुद्र शि॒वा त॒नूरघो॒रापा॑पकाशिनी ।
तया॑ नस्त॒न्वा॒ शन्त॑मया॒ गिरि॑शन्ता॒भिचा॑कशीहि ॥२॥
यामि॑षु॒ङ्गिरिशन्त॒ हस्ते॑ बि॒भर्ष्यस्त॑वे ।
शि॒वाङ्गि॑रित्र॒ ताङ्कु॑रु मा हि॑ꣳसी॒ः पुरु॑षञ्ज॒गत् ॥३॥
शि॒वेन॒ वच॑सा त्वा॒ गिरि॒शाच्छा॑ वदामसि ।
यथा॑ नः॒ सर्व॒मिज्जग॑दय॒क्ष्मꣳ सु॒मना॒ऽअस॑त् ॥४॥
अध्य॑वोचदधिव॒क्ता प्र॑थ॒मो दैव्यो॑ भि॒षक् ।
अहीँ॑श्च॒ सर्वा॑ञ्ज॒म्भय॒न्त्सर्वा॑श्च यातुधा॒न्यो॒धराची॒ः परा॑सुव ॥५॥
अ॒सौ यस्ता॒म्रोऽअ॑रु॒णऽउ॒त ब॒भ्रुः सु॑म॒ङ्गल॑ः ।
ये चै॑नꣳ रु॒द्राऽअ॒भितो॑ दि॒क्षु श्रि॒ताः स॑हस्र॒शोवै॑षा॒ꣳ हेड॑ऽईमहे ॥६॥
अ॒सौ यो॑व॒सर्प्प॑ति॒ नील॑ग्ग्रीवो॒ विलो॑हितः ।
उ॒तैन॑ङ्गो॒पाऽअ॑दृश्रन्नदृ॑श्रन्नुदहा॒र्य्य॑ः स दृ॒ष्टो मृ॑डयाति नः ॥७॥

नमोस्तु नीलग्ग्रीवाय सहस्राक्षाय मीढुषे ।
अथो येऽअस्य सत्त्वानोहन्तेब्भ्योकरन्नमः ॥८॥
प्रमुञ्च धन्न्वनस्त्वमुभयोरार्त्न्योर्ज्ज्याम् । याश्च ते हस्तऽइषवꣳ परा ता भगवो वप ॥९॥
विज्ज्यन्धनुः कपर्दिनो विशल्ल्यो बाणवाँ२॥ऽउत ।
अनेशन्नस्य याऽइषवऽआभुरस्य निषङ्गधिः ॥१०॥
या ते हेतिर्म्मीढुष्टम हस्ते बभूव ते धनुः ।
तयास्म्मान्विश्श्वतस्त्वमयक्ष्मया परिभुज ॥११॥
परि ते धन्न्वनो हेतिरस्म्मान्वृणक्तु विश्श्वतः ।
अथो यऽइषुधिस्तवारेऽअस्म्मन्निधेहि तम् ॥१२॥
अवतत्त्य धनुष्ट्वꣳ सहस्राक्ष शतेषुधे ।
निशीर्य्य शल्ल्यानाम्मुखा शिवो नः सुमना भव ॥१३॥
नमस्तऽआयुधायानातताय धृष्ण्णवे ।
उभाब्भ्यामुत ते नमो बाहुब्भ्यान्तव धन्न्वने ॥१४॥
मा नो महान्तमुत मा नोऽअर्ब्भकम्मा नऽउक्षन्तमुत मा नऽउक्षितम् ।
मा नो वधीः पितरम्मोत मातरम्मा नः प्प्रियास्तन्न्वो रुद्र रीरिषः ॥१५॥
मा नस्तोके तनये मा नऽआयुषि मा नो गोषु मा नोऽअश्श्वेषु रीरिषः ।
मा नो वीरान्रुद्र भामिनो वधीर्हविष्म्मन्तः सदमित्त्वा हवामहे ॥१६॥

॥२॥ नमो हिरण्ण्यबाहवे सेनान्न्ये दिशाञ्च पतये नमो नमो वृक्षेब्भ्यो हरिकेशेब्भ्यः पशूनाम्पतये नमो नमः शष्प्पिञ्जराय त्त्विषीमते पथीनाम्पतये नमो नमो हरिकेशायोपवीतिने पुष्ट्टानाम्पतये नमो नमो बब्भ्लुशाय ॥१७॥

नमो बब्भ्लुशाय व्याधिनेन्नानाम्पतये नमो नमो भवस्य हेत्त्यै जगताम्पतये नमो नमो रुद्रायाततायिने क्षेत्त्राणाम्पतये नमो नमः सूतायाहन्त्यै वनानाम्पतये नमो नमो रोहिताय ॥१८॥

नमो रोहिताय स्थपतये वृक्षाणाम्पतये नमो नमो भुवन्तये वारिवस्कृतायौषधीनाम्पतये नमो नमो मन्त्रिणे वाणिजाय कक्षाणाम्पतये नमो नमऽउच्चैर्ग्घोषायाक्क्रन्दयते पत्तीनाम्पतये नमो नमः कृत्स्नायतया ॥१९॥

नमः कृत्स्नायतया धावते सत्त्वनाम्पतये नमो नमः सहमानाय निव्याधिनऽआव्या-

धिनीनाम्पतये नमो नमो निषङ्गिणे ककुभाय स्तेनानाम्पतये नमो नमो निचेर
परिचरायारण्ण्यानाम्पतये नमो नमो वञ्चते ॥२०॥

नमो वञ्चते परिवञ्चते स्तायूनाम्पतये नमो नमो निषङ्गिणऽइषुधिमते तस्कराणा- ॥५॥
म्पतये नमो नमः सृकायिभ्यो जिघांꣳसद्भ्यो मुष्ण्णताम्पतये नमो नमोसिम-
द्भ्यो नक्तञ्चरद्भ्यो विकृन्तानाम्पतये नमः ॥२१॥

॥३॥ नमऽउष्ण्णीषिणे गिरिचराय कुलुञ्चानाम्पतये नमो नमऽइषुमद्भ्यो धन्न्वायिभ्यश्च
वो नमो नमऽआतन्न्वानेभ्यः प्प्रतिदधानेभ्यश्च वो नमो नमऽआयच्छद्भ्योस्य-
द्भ्यश्च वो नमो नमो विसृजद्भ्यः ॥२२॥

नमो विसृजद्भ्यो विद्ध्यद्भ्यश्च वो नमो नमः स्वपद्भ्यो जाग्रद्भ्यश्च वो नमो
नमꣳ शयानेभ्यऽआसीनेभ्यश्च वो नमो नमस्तिष्ठद्भ्यो धावद्भ्यश्च वो नमो
नमः सभाभ्यः ॥२३॥

नमः सभाभ्यः सभापतिभ्यश्च वो नमो नमोश्श्वेभ्योश्श्वपतिभ्यश्च वो नमो नमऽ
आव्याधिनीभ्यो विविद्ध्यन्तीभ्यश्च वो नमो नमऽउगणाभ्यस्तृꣳहतीभ्यश्च वो नमो ॥६॥
नमो गणेभ्यः ॥२४॥

नमो गणेभ्यो गणपतिभ्यश्च वो नमो नमो व्रातेभ्यो व्रातपतिभ्यश्च वो नमो नमो
गृत्सेभ्यो गृत्सपतिभ्यश्च वो नमो नमो विरूपेभ्यो विश्श्वरूपेभ्यश्च वो नमो
नमꣳ सेनाभ्यः ॥२५॥

नमꣳ सेनाभ्यꣳ सेनानिभ्यश्च वो नमो नमो रथिभ्योऽअरथेभ्यश्च वो नमो नमः
क्षत्तृभ्यः सङ्ग्रहीतृभ्यश्च वो नमो नमो महद्भ्योऽअर्भकेभ्यश्च वो नमः ॥२६॥

॥४॥ नमस्तक्षभ्यो रथकारेभ्यश्च वो नमो नमꣳ कुलालेभ्यꣳ कर्म्मारेभ्यश्च वो नमो
नमो निषादेभ्यः पुञ्जिष्ठेभ्यश्च वो नमो नमः श्वनिभ्यो मृगयुभ्यश्च वो नमो ॥७॥
नमꣳ श्वभ्यः ॥२७॥

नमꣳ श्वभ्यꣳ श्वपतिभ्यश्च वो नमो नमो भवाय च रुद्राय च नमः शर्वाय ॥८॥
च पशुपतये च नमो नीलग्ग्रीवाय च शितिकण्ठाय च नमः कपर्द्दिने ॥२८॥

नमः कपर्द्दिने च व्व्युप्तकेशाय च नमः सहस्राक्षाय च शतधन्न्वने च नमो
गिरिशयाय च शिपिविष्टाय च नमो मीढुष्टमाय चेषुमते च नमो ह्रस्वाय ॥२९॥

नमो ह्रस्वाय च वामनाय च नमो बृहते च वर्षीयसे च नमो वृद्धाय च सवृधे च
नमोग्ग्र्याय च प्प्रथमाय च नमऽआशवे ॥३०॥

नम॑ऽआ॒शवे॑ चाजि॒राय॑ च॒ नमः॒ शीग्घ्र्या॑य च॒ शीब्भ्या॑य च॒ नम॒ऽऊर्म्म्या॑य चावस्व॒न्या॑य च॒ नमो॑ नादे॒याय॑ च द्वी॒प्प्या॑य च ॥३१॥

॥५॥ नमो॑ ज्ज्ये॒ष्ठाय॑ च कनि॒ष्ठाय॑ च॒ नम॑ः पूर्व॒जाय॑ चापर॒जाय॑ च॒ नमो॑ मद्ध्य॒माय॑ चापग॒ल्भाय॑ च॒ नमो॑ जघ॒न्या॑य च बु॒द्ध्न्या॑य च॒ नमः॒ सोब्भ्या॑य ॥३२॥

नमः॒ सोब्भ्या॑य च प्प्रतिस॒र्य्या॑य च॒ नमो॒ याम्म्या॑य च॒ क्षेम्म्या॑य च॒ नमः॒ श्लोक्क्या॑य चावसा॒न्या॑य च॒ नम॑ऽउर्व॒र्य्या॑य च॒ खल्क्या॑य च॒ नमो॒ वन्न्या॑य ॥३३॥

नमो॒ वन्न्या॑य च॒ कक्क्ष्या॑य च॒ नम॑ः श्र॒वाय॑ च प्प्रतिश्श्र॒वाय॑ च॒ नम॑ऽआ॒शुषे॑णाय चा॒शुर॑थाय च॒ नमः॒ शूरा॑य चावभे॒दिने॑ च॒ नमो॑ बि॒ल्म्मिने॑ ॥३४॥

नमो॑ बि॒ल्म्मिने॑ च कव॒चिने॑ च॒ नमो॑ व॒र्म्मिणे॑ च वरू॒थिने॑ च॒ नम॑ः श्रु॒ताय॑ च श्श्रुतसे॒नाय॑ च॒ नमो॑ दुन्दु॒भ्या॑य चाहन॒न्या॑य च॒ नमो॑ धृ॒ष्ण्णवे॑ ॥३५॥

नमो॑ धृ॒ष्ण्णवे॑ च प्प्रमृ॒शाय॑ च॒ नमो॑ निष॒ङ्गिणे॑ चेषुधि॒मते॑ च॒ नम॑स्ती॒क्ष्णेष॑वे चायु॒धिने॑ च॒ नम॑ः स्वायु॒धाय॑ च सु॒धन्व॑ने च ॥३६॥

॥६॥ नमः॒ स्स्रुत्या॑य च॒ पथ्या॑य च॒ नमः॒ काट्ट्या॑य च॒ नीप्प्या॑य च॒ नमः॒ कुल्ल्या॑य च सर॒स्या॑य च॒ नमो॑ नादे॒याय॑ च वैश॒न्ताय॑ च॒ नमः॒ कूप्प्या॑य ॥३७॥

नमः॒ कूप्प्या॑य चाव॒ट्ट्या॑य च॒ नमो॒ वीद्ध्र्या॑य चात॒प्प्या॑य च॒ नमो॒ मेग्घ्या॑य च विद्यु॒त्त्या॑य च॒ नमो॒ वर्ष्ष्या॑य चाव॒र्ष्ष्याय॑ च॒ नमो॒ वात्त्या॑य ॥३८॥

नमो॒ वात्त्या॑य च॒ रेष्ष्म्या॑य च॒ नमो॑ वास्त॒व्व्या॑य च वास्तु॒पाय॑ च॒ नमः॒ सोमा॑य च रु॒द्राय॑ च॒ नम॑स्ता॒म्म्राय॑ चारु॒णाय॑ च॒ नम॑ः श॒ङ्ग्वे॑ ॥३९॥

नम॑ः श॒ङ्ग्वे॑ च पशु॒पत॑ये च॒ नम॑ऽउ॒ग्ग्राय॑ च भी॒माय॑ च॒ नमो॑ग्ग्रेव॒धाय॑ च दूरेव॒धाय॑ च॒ नमो॑ ह॒न्त्रे च॒ हनी॑यसे च॒ नमो॑ वृ॒क्षेब्भ्यो॒ हरि॑केशेब्भ्यो॒ नम॑स्ता॒राय॑ ॥४०॥

॥७॥ नम॑ः शम्भ॒वाय॑ च मयोभ॒वाय॑ च॒ नम॑ः शङ्क॒राय॑ च मयस्क॒राय॑ च॒ नम॑ः शि॒वाय॑ च शि॒वत॑राय च ॥४१॥

॥८॥ नमः॒ पार्य्या॑य चावा॒र्य्या॑य च॒ नम॑ः प्प्र॒तर॑णाय चो॒त्तर॑णाय च॒ नम॒स्तीर्त्थ्या॑य च॒ कूल्ल्या॑य च॒ नमः॒ शष्प्प्या॑य च॒ फेन्न्या॑य च॒ नम॑ः सिक॒त्त्या॑य ॥४२॥

नम॑ः सिक॒त्त्या॑य च प्रवा॒ह्या॑य च॒ नम॑ः किꣳशि॒लाय॑ च क्षय॒णाय॑ च॒ नम॑ः कप॒र्द्दिने॑ च पुल॒स्तये॑ च॒ नम॑ऽइरि॒ण्ण्या॑य च प्प्रप॒थ्या॑य च॒ नमो॒ व्रज्ज्या॑य ॥४३॥

नमो॒ व्रज्ज्या॑य च॒ गोष्ठ्या॑य च॒ नम॒स्तल्प्प्या॑य च॒ गेह्या॑य च॒ नमो॑ हृद॒य्या॑य च निवे॒ष्प्या॑य च॒ नमः॒ काट्ट्या॑य च गह्वरे॒ष्ठाय॑ च॒ नमः॒ शुष्क्क्या॑य ॥४४॥

नम॒ः शुष्क्क्या॑य च हरित्त्या॒य च॒ नम॑ः पाᳪंसव्या॒य च रज॒स्या॒य च॒ नमो॒ लोप्प्या॑य चोल॒प्प्या॒य च॒ नम॒ऽऊर्व्व्या॑य च॒ सूर्व्व्या॑य च॒ नम॑ः प॒र्ण्णाय॑ ॥४५॥

नम॑ः प॒र्ण्णाय॑ च पर्ण्णश॒दाय॑ च॒ नम॑ऽउद्गु॒रमा॑णाय चाभिघ्न॒ते च॒ नम॑ऽआखिद॒ते च॑ प्प्रखिद॒ते च॒ नम॑ऽइषुकृद्भ्यो॑ धनु॒ष्कृद्भ्य॑श्च वो॒ नमो॒ नमो॑ वः किरि॒केभ्भ्यो॑ दे॒वाना॒ᳪं हृद॑येभ्भ्यो॒ नमो॑ व्विचिन्व॒त्केभ्भ्यो॒ नमो॑ व्विक्षिण॒त्केभ्भ्यो॒ नम॑ऽआनिर्ह॒तेभ्भ्य॑ः ॥४६॥

॥९॥ द्रापे॒ऽअन्ध॑सस्प्पते॒ दरि॑द्र॒ नील॑लोहित ।
आ॒साम्प्र॒जाना॑मे॒षाम्प॑शू॒नाम्मा भेर्म्मा रोङ्मो च॑ नः॒ किञ्च॒नाम॑मत् ॥४७॥
इ॒मा रु॒द्राय॑ त॒वसे॑ कप॒र्दिने॑ क्ष॒यद्वी॑राय॒ प्प्रभ॑रामहे म॒तीः ।
यथा॒ शम॑सद्द्वि॒पदे॒ चतु॑ष्प्पदे॒ व्विश्व॑म्पु॒ष्टङ्ग्रामे॑ऽअ॒स्मिन्न॑नातुरम् ॥४८॥
या ते॑ रुद्र शि॒वा त॒नूः शि॒वा व्वि॒श्वाहा॑ भेष॒जी ।
शि॒वा रु॒तस्य॑ भेष॒जी तया॑ नो मृड जी॒वसे॑ ॥४९॥
परि॑ नो रु॒द्रस्य॑ हे॒तिर्व्वृ॑णक्तु॒ परि॑ त्त्वे॒षस्य॑ दुर्म्म॒तिर॑घा॒योः ।
अव॑ स्थि॒रा म॒घव॑द्भ्यस्तनुष्व॒ मीढ्व॑स्तो॒काय॒ तन॑याय मृड ॥५०॥
मीढु॑ष्टम॒ शिव॑तम शि॒वो न॑ः सु॒मना॑ भव ।
प॒र॒मे व्वृ॒क्षऽआयु॑धन्नि॒धाय॒ कृत्तिं॒व्वसा॑न॒ऽआच॑र॒ पिना॑कम्बिभ्र॒दाग॑हि ॥५१॥
व्विकि॑रिद्र॒ व्विलो॑हित॒ नम॑स्तेऽअस्तु भगवः ।
यास्ते॑ स॒हस्र॑ᳪं हे॒तयो॒ऽन्यम॒स्मन्निव॑पन्तु॒ ताः ॥५२॥
स॒हस्रा॑णि सहस्र॒शो बा॒ह्वोस्तव॑ हे॒तयः॑ ।
तासा॒मीशा॑नो भगवः परा॒चीना॒ मुखा॑ कृधि ॥५३॥
अस॑ङ्ख्याता स॒हस्रा॑णि॒ ये रु॒द्राऽअधि॒ भूम्म्या॑म् ।
तेषा॑ᳪं सहस्रयोज॒नेव॒ धन्वा॑नि तन्मसि ॥५४॥
अ॒स्मिन्म॑ह॒त्त्य॑र्ण्ण॒वे॑ऽन्तरि॑क्षे भ॒वाऽअधि॑ ।
तेषा॑ᳪं सहस्रयोज॒नेव॒ धन्वा॑नि तन्मसि ॥५५॥
नील॑ग्ग्रीवाः शितिक॒ण्ठा दिव॑ᳪं रु॒द्राऽउप॑श्रिताः ।
तेषा॑ᳪं सहस्रयोज॒नेव॒ धन्वा॑नि तन्मसि ॥५६॥
नील॑ग्ग्रीवाः शितिक॒ण्ठाः श॒र्वाऽअ॒धः क्ष॑माच॒राः ।
तेषा॑ᳪं सहस्रयोज॒नेव॒ धन्वा॑नि तन्मसि ॥५७॥

ये वृक्क्षेषु शष्प्पिञ्जरा नीलग्ग्रीवा विलोहिताः ।
तेषाꣳ सहस्रयोजनेव धन्न्वानि तन्न्मसि ॥५८॥
ये भूतानामधिपतयो विशिखासः कपर्द्दिनः ।
तेषाꣳ सहस्रयोजनेव धन्न्वानि तन्न्मसि ॥५९॥
ये पथाम्पथिरक्क्षयऽऐलबृदाऽआयुर्य्युधः ।
तेषाꣳ सहस्रयोजनेव धन्न्वानि तन्न्मसि ॥६०॥
ये तीर्त्थानि प्प्रचरन्ति सृकाहस्त्ता निषङ्गिणः ।
तेषाꣳ सहस्रयोजनेव धन्न्वानि तन्न्मसि ॥६१॥
येन्नेषु विविद्ध्यन्ति पात्त्रेषु पिबतो जनान् ।
तेषाꣳ सहस्रयोजनेव धन्न्वानि तन्न्मसि ॥६२॥
यऽएतावन्तश्च भूयाꣳसश्च दिशो रुद्द्रा वितस्त्थिरे ।
तेषाꣳ सहस्रयोजनेव धन्न्वानि तन्न्मसि ॥६३॥
नमोस्तु रुद्द्रेब्भ्यो ये दिवि येषाँवर्षमिषवः । तेब्भ्यो दश प्प्राचीर्दश दक्क्षिणा दश प्प्रतीचीर्दशोदीचीर्दशोर्द्ध्वाः । तेब्भ्यो नमोऽअस्त्तु ते नोवन्तु ते नो मृडयन्तु ते यन्द्विष्म्मो यश्च नो द्वेष्ट्टि तमेषाञ्जम्भे दद्ध्मः ॥६४॥
नमोस्तु रुद्द्रेब्भ्यो येन्तरिक्क्षे येषाँवातऽइषवः । तेब्भ्यो दश प्प्राचीर्दश दक्क्षिणा दश प्प्रतीचीर्दशोदीचीर्दशोर्द्ध्वाः । तेब्भ्यो नमोऽअस्त्तु ते नोवन्तु ते नो मृडयन्तु ते यन्द्विष्म्मो यश्च नो द्वेष्ट्टि तमेषाञ्जम्भे दद्ध्मः ॥६५॥
नमोस्तु रुद्द्रेब्भ्यो ये पृथिव्व्याँय्येषामन्नमिषवः । तेब्भ्यो दश प्प्राचीर्दश दक्क्षिणा दश प्प्रतीचीर्दशोदीचीर्दशोर्द्ध्वाः । तेब्भ्यो नमोऽअस्त्तु ते नोवन्तु ते नो मृडयन्तु ते यन्द्विष्म्मो यश्च नो द्वेष्ट्टि तमेषाञ्जम्भे दद्ध्मः ॥६६॥

॥ इति षोडशोऽध्यायः ॥

अथ सप्तदशोऽध्यायः

ऋषिः (१) 'अश्मन्नूर्जम्' इत्यारभ्य (९९) 'धामन्ते' इत्यन्तानां सामान्यतः प्रजापतिः साध्या वा ऋषयः । विशेषतश्च— (८) 'अग्ने पावक' इत्यस्य वसूयवः, (९) 'स नः पावक' इत्यस्य मेधातिथिः, (१०) 'पावकया यः' इत्यस्य भरद्वाजः, (११) 'नमस्ते हरसे' इत्यस्य ऋषिसुता लोपामुद्रा, (१६) 'अग्निस्तिग्मेन' इत्यस्य भरद्वाजः, (१७) 'य इमाः' इत्यारभ्य (३२) 'विश्वकर्मा हि' इत्यन्तानां भौवनो विश्वकर्मा, (३३) 'आशुः शिशानः' इत्यारभ्य (४४) 'अमीषाञ्चित्तम्' इत्यन्तानामप्रतिरथः, (५३) 'उदु त्वा' इत्यस्य तापसः, (५९) 'विमान

एषः' इत्यस्य विश्वावसुः, (६०) 'उक्षा समुद्रः' इत्यस्याप्रतिरथः, (६१) 'इन्द्रं विश्वाः' इत्यस्य माधुच्छन्दसो जेता, (६२) 'देवहूर्यज्ञः' इत्यस्य विधृतिः, (७०) 'नक्तोषासा समनसा' इत्यस्य कुत्सः, (७४) 'ताꣳ सवितुः' इत्यस्य कण्वः, (७५) 'विधेम ते' इत्यस्य गृत्समदः, (७६) 'प्रेद्धो अग्ने' इत्यस्य वसिष्ठः, (७९) 'सप्त ते' इत्यस्य सप्तर्षयः, (८८) 'घृतम्मिमिक्षे' इत्यस्य गृत्समदः, (८९) 'समुद्रादूर्मिः' इत्यस्य वामदेवः ॥

देवता (१) 'अश्मन्नूर्जम्' इत्यस्य मरुतः, 'अश्मँस्ते' इत्यस्याश्मा, 'मयि ते' इत्यस्याशीः, 'यन्द्विष्मः' इत्यस्य शुक् ।

(२) 'इमा मे' (३) 'ऋतव स्थ' (४) 'समुद्रस्य त्वा' (५) 'हिमस्य त्वा' (६) 'उपज्मन्नुप' (७) 'अपामिदम्' (८) 'अग्ने पावक' (९) 'स नः पावक' (१०) 'पावकया यः' (११) 'नमस्ते हरसे' (१२) 'नृषदे वेट्' 'अप्सुषदे वेट्' 'बर्हिषदे वेट्' 'वनसदे वेट्' 'स्वर्विदे वेट्' इत्येषामग्निः ।

(१३) 'ये देवा देवानाम्' (१४) 'ये देवा देवेषु' इत्यनयोः प्राणः ।

(१५) 'प्राणदा अपानदाः' (१६) 'अग्निस्तिग्मेन' इत्यनयोरग्निः ।

(१७) 'य इमा' (१८) 'किꣳ स्विदासीत्' (१९) 'विश्वतश्चक्षुः' (२०) 'किꣳ स्विद्वनम्' (२१) 'या ते' (२२) 'विश्वकर्मन्हविषा' (२३) 'वाचस्पतिं विश्वकर्माणम्' (२४) 'विश्वकर्मन्हविषा' (२५) 'चक्षुषः पिता' (२६) 'विश्वकर्मा विमनाः' (२७) 'यो नः' (२८) 'त आयजन्त' (२९) 'परो दिवा' (३०) 'तमिद्गर्भम्' (३१) 'न तम्' (३२) 'विश्वकर्मा हि' इत्येषां विश्वकर्मा ।

(३३) 'आशुः शिशानः' (३४) 'सङ्क्रन्दनेनानिमिषेण' (३५) 'स इषुहस्तैः' (३६) 'बृहस्पते परिदीया' (३७) 'बलविज्ञाय स्थविरः' (३८) 'गोत्रभिदङ्गोविदम्' (३९) 'अभि गोत्राणि' (४०) 'इन्द्र आसाम्' (४१) 'इन्द्रस्य वृष्णः' (४२) 'उद्धर्षय मघवन्' (४३) 'अस्माकमिन्द्रः' (४४) 'अमीषाञ्चित्तम्' इत्येषामिन्द्रः ।

(४५) 'अवसृष्टा परापत' इत्यस्येषुः ।

(४६) 'प्रेता जयता' इत्यस्य योद्धारः ।

(४७) 'असौ या' इत्यस्य मरुतः ।

(४८) 'यत्र वाणाः' (४९) 'मर्माणि ते' इत्यनयोर्लिङ्गोक्ता ।

(५०) 'उदेनमुत्तराम्' इत्यस्याग्निः ।

(५१) 'इन्द्रेमम्' इत्यस्येन्द्रः ।

(५२) 'यस्य कुर्मः' इत्यस्य लिङ्गोक्ता ।

(५३) 'उदु त्वा' इत्यस्याग्निः ।

(५४) 'पञ्च दिशः' इत्यस्य दिशः ।

(५५) 'समिद्धे अग्नौ' (५६) 'दैव्याय धर्त्रे' इत्यनयोरग्निः ।

(५७) 'वीतꣳ हविः' इत्यस्य हविर्यज्ञश्च ।

(५८) 'सूर्यरश्मिर्हरिकेशः' इत्यस्याग्निः ।

(५९) 'विमान एषः' (६०) 'उक्षा समुद्रः' इत्यनयोरादित्यः ।

(६१) 'इन्द्रं विश्वाः' इत्यस्येन्द्रः ।

(६२) 'देवहूर्यज्ञः' इत्यस्य यज्ञः ।

(६३) 'वाजस्य मा' इत्यस्येन्द्रः ।

(६४) 'उद्ग्राभञ्च' इत्यस्येन्द्राग्नी ।

(६५) 'क्रमध्वमग्निना' (६६) 'प्राचीमनु' (६७) 'पृथिव्या अहम्' (६८) 'स्वर्यन्तः' (६९) 'अग्ने प्रेहि' (७०) 'नक्तोषासा समनसा' (७१) 'अग्ने सहस्राक्ष' (७२) 'सुपर्णोसि' (७३) 'आजुह्वानः सुप्रतीकः' इत्येषामग्निः ।

(७४) 'ताꣳ सवितुः' इत्यस्य सविता ।

(७५) 'विधेम ते' इत्यस्य त्रिस्थानोऽग्निः ।

(७६) 'प्रेद्धो अग्ने' (७७) 'अग्ने तमद्य' इत्यनयोरग्निः ।

(७८) 'चित्तिञ्जुहोमि' इत्यस्य विश्वकर्मा ।
(७९) 'सप्त ते' इत्यस्याग्निः ।
(८०) 'शुक्रज्योतिश्च' (८१) 'ईदृङ्' (८२) 'ऋतश्च' (८३) 'ऋतजिच्च' (८४) 'ईदृक्षास एतादृक्षासः' (८५) 'स्वतवाँश्च' (८६) 'इन्द्रन्दैवीः' इत्येषां मरुतः ।
(८७) 'इमꣳ स्तनम्' (८८) 'घृतम्मिमिक्षे' (८९) 'समुद्रादूर्मिः' (९०) 'वयन्नाम' (९१) 'चत्वारि शृङ्गा' (९२) 'त्रिधा हितम्' (९३) 'एता अर्षन्ति' (९४) 'सम्यक्स्रवन्ति' (९५) 'सिन्धोरिव' (९६) 'अभिप्रवन्त' (९७) 'कन्या इव' (९८) 'अभ्यर्षत सुष्टुतिम्' (९९) 'धामन्ते' इत्येषामग्निः ।

छन्दः (३) 'ऋतव स्थ' इत्यस्य बृहती पङ्क्तिर्वा, (४) 'समुद्रस्य त्वा' (५) 'हिमस्य त्वा' इत्यनयोर्गायत्री, (६) 'उपज्मन्नुप' इत्यस्य जगती त्रिष्टुब्वा, (७) 'अपामिदम्' इत्यस्य बृहती, (८) 'अग्ने पावक' (९) 'स नः पावक' इत्यनयोर्गायत्री, (१०) 'पावकया यः' इत्यस्य जगती, (११) 'नमस्ते हरसे' इत्यस्य बृहती, (१३) 'ये देवा देवानाम्' (१४) 'ये देवा देवेषु' इत्यनयोर्जगती, (१५) 'प्राणदा अपानदाः' इत्यस्य बृहती पङ्क्तिर्वा, (१६) 'अग्निस्तिग्मेन' इत्यस्य गायत्री, (१७) 'य इमा' इत्यारभ्य (४४) 'अमीषाञ्चित्तम्' इत्यन्तानां त्रिष्टुप्, (४५) 'अवसृष्टा परापत' (४६) 'प्रेता जयता' इत्यनयोरनुष्टुप्, (४७) 'असौ या' इत्यस्य त्रिष्टुप्, (४८) 'यत्र बाणाः' इत्यस्य पङ्क्तिः, (४९) 'मर्माणि ते' इत्यस्य त्रिष्टुप्, (५०) 'उदेनमुत्तराम्' इत्यारभ्य (५३) 'उदु त्वा' इत्यन्तानामनुष्टुप्, (५४) 'पञ्च दिशः' (५५) 'समिद्धे अग्नौ' इत्यनयोस्त्रिष्टुप्, (५६) 'दैव्याय धर्त्रे' इत्यस्य पङ्क्तिर्बृहती वा, (५७) 'वीतꣳ हविः' इत्यस्य बृहती, (५८) 'सूर्यरश्मिर्हरिकेशः' (५९) 'विमान एषः' (६०) 'उक्षा समुद्रः' इत्येषां त्रिष्टुप्, (६१) 'इन्द्रं विश्वाः' इत्यारभ्य (६५) 'क्रमध्वमग्निना' इत्यन्तानामनुष्टुप्, (६६) 'प्राचीमनु' इत्यस्य त्रिष्टुप्, (६७) 'पृथिव्या अहम्' इत्यस्य पिपीलिकमध्या बृहती, (६८) 'स्वर्यन्तः' इत्यस्यानुष्टुप्, (६९) 'अग्ने प्रेहि' (७०) 'नक्तोषासा समनसा' इत्यनयोस्त्रिष्टुप्, (७१) 'अग्ने सहस्राक्ष' इत्यस्य विराट्, (७२) 'सुपर्णोसि गरुत्मान्' इत्यस्य पङ्क्तिः, (७३) 'आजुह्वानः सुप्रतीकः' (७४) 'ताꣳ सवितुः' (७५) 'विधेम ते' इत्येषां त्रिष्टुप्, (७६) 'प्रेद्धो अग्ने' इत्यस्य विराट्, (७७) 'अग्ने तम्' इत्यस्य पदपङ्क्तिः, (७८) 'चित्तिञ्जुहोमि' इत्यस्यातिजगती, (७९) 'सप्त ते' इत्यस्य त्रिष्टुप्, (८०) 'शुक्रज्योतिश्च' इत्यस्योष्णिक्, (८१) 'ईदृङ्' (८२) 'ऋतश्च' इत्यनयोर्गायत्री, (८३) 'ऋतजिच्च' इत्यस्योष्णिक्, (८४) 'ईदृक्षास एतादृक्षासः' इत्यस्य जगती, (८५) 'स्वतवाँश्च' इत्यस्य गायत्र्युष्णिग्वा, (८७) 'इमꣳ स्तनम्' इत्यारभ्य (९९) 'धामन्ते' इत्यन्तानां त्रिष्टुप् ॥

॥ हरिः ॐ ॥

॥१॥ अश्म्म॒न्नूर्ज्ज॒म्पर्व्व॑ते शिश्श्रिया॒णाम॒द्भ्यऽओष॑धीभ्यो॒ वन॒स्प्पति॑भ्यो॒ऽअधि॒ सम्भृ॑त॒म्पय॑ः । तान्न॒ऽइष॒मूर्ज्ज॑न्धत्त मरुतः सꣳररा॒णाऽअश्म्मँ॑स्ते॒ क्क्षुन्मयि॑ त॒ऽऊर्ग्ग्यन्द्वि॒ष्मस्तन्ते॒ शुगृ॑च्छतु ॥१॥

इ॒मा मे॑ऽअग्न॒ऽइष्ट॑का धे॒नव॑ः स॒न्त्वेका॑ च॒ दश॑ च॒ दश॑ च श॒तञ्च॑ श॒तञ्च॑ स॒हस्र॑ञ्च स॒हस्र॑ञ्चा॒युत॑ञ्चा॒युत॑ञ्च नि॒युत॑ञ्च नि॒युत॑ञ्च प्प्र॒युत॑ञ्चार्ब्बु॑दञ्च॒ न्य॑र्ब्बुदञ्च समु॒द्रश्च॒ मद्ध्य॑ञ्चान्त॑श्च परा॒र्द्धश्चै॒ता मे॑ऽअग्न॒ऽइष्ट॑का धे॒नव॑ः सन्त्व॒मु॒त्रामु॒ष्म्मिँल्लो॒के ॥२॥

ऋ॒तव॑ स्स्थऽऋता॒वृध॑ऽऋतु॒ष्ठा स्स्थ॑ऽऋता॒वृध॑ः ।
घृ॒त॒श्श्चुतो॑ मधु॒श्श्चुतो॑ वि॒राजो॒ नाम॑ काम॒दु॒घा॒ऽअक्क्षी॑यमाणाः ॥३॥

स॒मु॒द्रस्य॑ त्वाव॑क॒याग्ग्ने॒ परि॑व्वयामसि । पा॒व॒कोऽअ॒स्म्मब्भ्य॑ꣳ शि॒वो भ॑व ॥४॥

हिमस्य त्वा जरायुणाग्ने परिव्ययामसि । पावकोऽअस्म्मब्भ्यꣳ शिवो भव ॥५॥
उप ज्ज्मन्नुप वेतसेवतर नदीष्ष्वा । अग्ने पित्तमपामसि मण्डूकि ताभिरागहि सेमन्नो
यज्ज्ञम्पावकवर्ण्णꣳ शिवङ्कृधि ॥६॥
अपामिदन्न्ययनꣳ समुद्द्रस्य निवेशनम् ।
अन्न्याँस्तेऽअस्म्मत्तपन्तु हेतयः पावकोऽअस्म्मब्भ्यꣳ शिवो भव ॥७॥
अग्ने पावक रोचिषा मन्द्रया देव जिह्वया । आ देवान्वक्षि यक्षि च ॥८॥
स नः पावक दीदिवोग्ने देवाँ२॥ऽइहावह । उप यज्ज्ञꣳ हविश्च नः ॥९॥
पावकया यश्चितयन्त्या कृपा क्षामन्रुरुचऽउषसो न भानुना ।
तूर्व्वन्न यामन्नेतशस्य नू रणऽआ यो घृणे न ततृषाणोऽअजरः ॥१०॥

॥२॥ नमस्ते हरसे शोचिषे नमस्तेऽअस्त्वर्च्चिषे ।
अन्न्याँस्तेऽअस्म्मत्तपन्तु हेतयः पावकोऽअस्म्मब्भ्यꣳ शिवो भव ॥११॥
नृषदे वेडप्प्सुषदे वेड्बर्हिषदे वेड्वनसदे वेट्स्वर्व्विदे वेट् ॥१२॥
ये देवा देवानाँय्यज्ज्ञिया यज्ज्ञियानाꣳ सँव्वत्सरीणमुप भागमासते ।
अहुतादो हविषो यज्ज्ञेऽअस्म्मिन्त्स्वयम्पिबन्तु मधुनो घृतस्य ॥१३॥
ये देवा देवेष्ष्वधि देवत्त्वमायन्न्ये ब्रह्म्मणः पुरऽएतारोऽअस्य ।
येब्भ्यो नऽऋते पवते धाम किञ्चन न ते दिवो न पृथिव्याऽअधि स्नुषु ॥१४॥
प्राणदाऽअपानदा व्यानदा वर्च्चोदा वरिवोदाः ।
अन्न्याँस्तेऽअस्म्मत्तपन्तु हेतयः पावकोऽअस्म्मब्भ्यꣳ शिवो भव ॥१५॥

॥३॥ अग्निस्तिग्ग्मेन शोचिषा यासद्विश्श्वन्न्यत्त्रिणम् । अग्निर्न्नो वनते रयिम् ॥१६॥
यऽइमा विश्श्वा भुवनानि जुह्वदृषिर्होता न्न्यसीदत्पिता नः ।
सऽआशिषा द्रविणमिच्छमानः प्प्रथमच्छदवराँ२॥ऽआविवेश ॥१७॥
किꣳ स्विदासीदधिष्ठानमारम्भणङ्कतमत्स्वित्कथासीत् ।
यतो भूमिञ्जनयन्विश्श्वकर्म्मा वि द्यामौर्ण्णोन्महिना विश्श्वचक्षाः ॥१८॥
विश्श्वतश्चक्षुरुत विश्श्वतोमुखो विश्श्वतोबाहुरुत विश्श्वतस्प्पात् ।
सम्बाहुब्भ्यान्धमति सम्पतत्त्रैर्द्यावाभूमी जनयन्देवऽएकः ॥१९॥
किꣳ स्विद्वनङ्कऽउ स वृक्क्षऽआस यतो द्यावापृथिवी निष्टतक्क्षुः ।
मनीषिणो मनसा पृच्छतेदु तद्यदध्यतिष्ठद्भुवनानि धारयन् ॥२०॥

य ते धामानि परमाणि यावमा या मद्ध्यमा व्विश्श्वकर्म्मन्नुतेमा ।
शिक्क्षा सखिब्भ्यो हविषि स्वधावः स्वयँय्यजस्व तन्न्वँव्वृधानः ॥२१॥
व्विश्श्वकर्म्मन्हविषा व्वावृधानः स्वयँय्यजस्व पृथिवीमुत द्याम् ।
मुह्यन्त्वन्न्येऽअभितः सपत्त्नाऽइहास्म्माकम्मघवा सूरिरस्त्तु ॥२२॥
व्वाचस्प्पतिँव्विश्श्वकर्म्माणमूतये मनोजुवँव्वाजेऽअद्या हुवेम ।
स नो व्विश्श्वानि हवनानि जोषद्विश्श्वशम्भूरवसे साधुकर्म्मा ॥२३॥
व्विश्श्वकर्म्मन्हविषा व्वर्द्धनेन त्रातारमिन्द्रमकृणोरवद्ध्यम् ।
तस्म्मै व्विशः समनमन्त पूर्व्वीरयमुग्ग्रो व्विहव्यो यथासत् ॥२४॥

॥४॥ चक्क्षुषः पिता मनसा हि धीरो घृतमेनेऽअजनन्नम्नमाने ।
यदेदन्ताऽअददृहन्त पूर्व्वऽआदिद्द्यावापृथिवीऽअप्प्रथेताम् ॥२५॥
व्विश्श्वकर्म्मा व्विमनाऽआद्विहाया धाता व्विधाता परमोत सन्दृक् ।
तेषामिष्ट्टानि समिषा मदन्ति यत्रा सप्तऽऋषीन्परऽएकमाहुः ॥२६॥
यो नः पिता जनिता यो व्विधाता धामानि व्वेद भुवनानि व्विश्श्वा ।
यो देवानान्नामधाऽएकऽएव तꣳ सम्प्रश्नम्भुवना यन्त्यन्न्या ॥२७॥
तऽआयजन्त द्रविणꣳ समस्म्माऽऋषयः पूर्व्वे जरितारो न भूना ।
असूर्त्ते सूर्त्ते रजसि निषत्ते ये भूतानि समकृण्ण्वन्निमानि ॥२८॥
परो दिवा परऽएना पृथिव्व्या परो देवेभिरसुरैर्य्यदस्त्ति ।
कꣳ स्विद्गर्ब्भम्प्रथमन्दध्रऽआपो यत्र देवाः समपश्श्यन्त पूर्व्वे ॥२९॥
तमिद्गर्ब्भम्प्रथमन्दध्रऽआपो यत्र देवाः समगच्छन्त व्विश्श्वे ।
अजस्य नाभावद्ध्येकमर्प्पितँय्यस्म्मिन्विश्श्वानि भुवनानि तस्त्थुः ॥३०॥
न तँव्विदाथ यऽइमा जजानान्न्यद्युष्म्माकमन्तरम्बभूव ।
नीहारेण प्प्रावृता जल्प्प्या चासुतृपऽउक्त्थशासश्चरन्ति ॥३१॥
व्विश्श्वकर्म्मा ह्यजनिष्ट्ट देवऽआदिद्गन्धर्व्वोऽअभवद्द्वितीयः ।
तृतीयः पिता जनितौषधीनामपाङ्गर्ब्भँव्यदधात्पुरुत्रा ॥३२॥
॥५॥ आशुः शिशानो वृषभो न भीमो घनाघनः क्क्षोभणश्चर्षणीनाम् ।
सङ्क्रन्दनोनिमिषऽएकवीरः शतꣳ सेनाऽअजयत्त्साकमिन्द्रः ॥३३॥
सङ्क्रन्दनेनानिमिषेण जिष्ण्णुना युत्त्कारेण दुश्च्यवनेन धृष्ण्णुना ।
तदिन्द्रेण जयत तत्सहद्ध्वँय्युधो नरऽइषुहस्त्तेन व्वृष्ण्णा ॥३४॥

सऽइषुहस्त्तैः स निषङ्गिभिर्व्वशी सꣳस्रष्ट्टा स युधऽइन्द्रो गणेन ।
सꣳसृष्ट्टजित्त्सोमपा बाहुशर्द्ध्युग्ग्रधन्न्वा प्प्रतिहिताभिरस्त्ता ॥३५॥
बृहस्प्पते परिदीया रथेन रक्षोहा मित्राँ२॥ऽअपबाधमानः । ॥६॥
प्रभञ्जन्त्सेनाः प्प्रमृणो युधा जयन्नस्म्माकमेद्ध्यविता रथानाम् ॥३६॥
बलविज्ज्ञाय स्त्थविरः प्प्रवीरः सहस्वान्व्वाजी सहमानऽउग्ग्रः ।
अभिवीरोऽअभिसत्त्वा सहोजा जैत्त्रमिन्द्र रथमातिष्ठ गोवित् ॥३७॥
गोत्त्रभिदङ्गोविदँव्वज्ज्रबाहुञ्जयन्तमज्म प्प्रमृणन्तमोजसा ।
इमꣳ सजाताऽअनु वीरयद्ध्वमिन्द्रꣳ सखायोऽअनु सꣳरभद्ध्वम् ॥३८॥
अभि गोत्त्राणि सहसा गाहमानोदयो वीरः शतमन्न्युरिन्द्रः ।
दुश्च्यवनः पृतनाषाडयुद्ध्योस्म्माकꣳ सेनाऽअवतु प्प्र युत्त्सु ॥३९॥
इन्द्रऽआसान्नेता बृहस्प्पतिर्द्दक्षिणा यज्ज्ञः पुरऽएतु सोमः ।
देवसेनानामभिभञ्जतीनाञ्जयन्तीनाम्मरुतो यन्त्वग्ग्रम् ॥४०॥
इन्द्रस्य वृष्ण्णो वरुणस्य राज्ञऽआदित्त्यानाम्मरुताꣳ शर्द्धऽउग्ग्रम् ।
महामनसाम्भुवनच्च्यवानाङ्घोषो देवानाञ्जयतामुदस्त्थात् ॥४१॥
उद्धर्षय मघवन्नायुधान्न्युत्त्सत्त्वनाम्मामकानाम्मनाꣳसि ।
उद्वृत्रहन्न्वाजिनाँव्वाजिनान्न्युद्रथानाञ्जयताँय्यन्तु घोषाः ॥४२॥
अस्म्माकमिन्द्रः समृतेषु द्ध्वजेष्ष्वस्म्माकँय्याऽइषवस्त्ता जयन्तु ।
अस्म्माकँव्वीराऽउत्तरे भवन्त्वस्म्माँ२॥ऽउ देवाऽअवता हवेषु ॥४३॥
अमीषाञ्चित्तम्प्रतिलोभयन्ती गृहाणाङ्गान्न्यप्प्वे परेहि ।
अभि प्प्रेहि निर्द्दह हृत्त्सु शोकैरन्धेनामित्त्रास्त्तमसा सचन्ताम् ॥४४॥
अवसृष्ट्टा परापत शरव्व्ये ब्रह्म्मसꣳशिते ।
गच्छामित्त्रान्प्रपद्यस्व मामीषाङ्कञ्चनोच्छिषः ॥४५॥
प्रेता जयता नरऽइन्द्रो वः शर्म्म यच्छतु ।
उग्ग्रा वः सन्तु बाहवोनाधृष्ष्या यथासथ ॥४६॥
असौ या सेना मरुतः परेषामभ्येति नऽओजसा स्प्पर्द्धमाना ।
ताङ्गूहत तमसापव्व्रतेन यथामीऽअन्न्योऽअन्न्यन्न जानन् ॥४७॥
यत्र बाणाः सम्पतन्ति कुमारा विशिखाऽइव ।
तन्नऽइन्द्रो बृहस्प्पतिरदितिः शर्म्म यच्छतु विश्वाहा शर्म्म यच्छतु ॥४८॥

मर्म्मा॑णि ते॒ वर्म्म॑णा च्छादयामि॒ सोम॑स्त्वा॒ राजा॒मृते॒नानु॑वस्ताम् ।
उ॒रोर्व्वरी॑यो॒ वरु॑णस्ते कृणोतु॒ जय॑न्तु॒न्त्वानु॑ दे॒वा म॑दन्तु ॥४९॥

॥६॥ उदे॑नमुत्त॒रान्न॑याग्ने॑ घृ॒तेना॑हुत । रा॒यस्पोषे॑ण॒ सꣳसृ॑ज प्र॒जया॑ च ब॒हुङ्कृ॑धि ॥५०॥
इन्द्रे॒मम्प्र॑त॒रान्न॑य सजा॒ताना॑मसद्व॒शी ।
समे॑नं॒वर्च्च॑सा सृज दे॒वाना॒म्भाग॒दाऽअ॑सत् ॥५१॥
यस्य॑ कु॒र्म्मो गृ॒हे ह॒विस्तम॑ग्ने व॒र्द्धया॒ त्वम् ।
तस्म्मै॑ दे॒वाऽअधि॑ब्ब्रवन्न॒यञ्च॒ ब्रह्म॑ण॒स्पति॑ः ॥५२॥
उदु॑ त्वा॒ विश्वे॑ दे॒वाऽअग्ने॒ भर॑न्तु॒ चित्ति॑भिः ।
स नो॑ भव शि॒वस्त्वꣳ सु॒प्रती॑को वि॒भाव॑सुः ॥५३॥
पञ्च॒ दिशो॒ दैवी॑र्य॒ज्ञम॑वन्तु दे॒वीरपाम॑तिन्दुर्म्म॒तिम्बाध॑मानाः ।
रा॒यस्पोषे॑ य॒ज्ञप॑तिमा॒भज॑न्ती रा॒यस्पोषे॒ऽअधि॑ य॒ज्ञोऽअ॑स्थात् ॥५४॥
समि॑द्धेऽअ॒ग्नावधि॑ मामहा॒नऽउ॒क्थप॑त्र॒ऽईड्यो॑ गृभी॒तः ।
त॒प्तङ्घ॒र्म्मम्प॑रि॒गृह्या॑यजन्तो॒र्जा यद्य॒ज्ञमय॑जन्त दे॒वाः ॥५५॥
दै॒व्याय॑ ध॒र्त्रे जोष्ट्रे॑ दे॒वश्रीः श्रीम॑नाः श॒तप॑याः ।
प॒रि॒गृह्य॑ दे॒वा य॒ज्ञमा॑यन्दे॒वा दे॒वेभ्यो॑ऽअध्व॒र्य्यन्तो॑ऽअस्थुः ॥५६॥
वी॒तꣳ ह॒विः श॑मि॒तꣳ श॑मि॒ता य॒जध्यै॑ तु॒रीयो॑ य॒ज्ञो यत्र॑ ह॒व्यमेति॑ ।
ततो॑ वा॒काऽआ॒शिषो॑ नो जुषन्ताम् ॥५७॥
सू॒र्य्यर॑श्मि॒र्हरि॑केशः पु॒रस्ता॑त्सवि॒ता ज्योति॒रुद॑याँ२॥ऽअज॑स्रम् ।
तस्य॑ पू॒षा प्र॑स॒वे या॑ति वि॒द्वान्त्स॒म्पश्य॒न्विश्वा॒ भुव॑नानि गो॒पाः ॥५८॥
वि॒मान॑ऽए॒ष दि॒वो मद्ध्य॑ऽआस्तऽआपप्रि॒वान्रोद॑सीऽअ॒न्तरि॑क्षम् ।
स वि॒श्वाची॑र॒भिच॑ष्टे घृ॒ताची॑रन्त॒रा पूर्व्व॒मप॑रञ्च के॒तुम् ॥५९॥
उ॒क्षा स॑मु॒द्रोऽअ॑रु॒णः सु॑प॒र्ण्णः पूर्व्व॑स्य॒ योनि॑म्पि॒तुरावि॑वेश ।
मद्ध्ये॑ दि॒वो निहि॑तः॒ पृश्नि॒रश्मा॒ विच॑क्रमे॒ रज॑सस्पा॒त्यन्तौ॑ ॥६०॥
इन्द्रं॒विश्वा॑ऽअवीवृधन्त्समु॒द्रव्य॑चस॒ङ्गिर॑ः ।
र॒थीत॑मꣳ र॒थीनां॒वाजा॑ना॒ꣳ सत्प॑ति॒म्पति॑म् ॥६१॥
दे॒व॒हूर्य॒ज्ञऽआ च॑ वक्षत्सुम्न॒हूर्य॒ज्ञऽआ च॑ वक्षत् ।
यक्ष॑द॒ग्निर्दे॒वो दे॒वाँ२॥ऽआ च॑ वक्षत् ॥६२॥

व्वाजस्य मा प्प्रसवऽउद्ग्ग्राभेणोदग्ग्रभीत् ।
अधा सपत्नानिन्द्रो मे निग्ग्राभेणाधराँ२ऽअकः ॥६३॥
उद्ग्ग्राभञ्च निग्ग्राभञ्च ब्रह्म देवाऽअवीवृधन् ।
अधा सपत्नानिन्द्राग्ग्नी मे व्विषूचीनान्व्यस्यताम् ॥६४॥

॥७॥ क्क्रमद्ध्वमग्ग्निना नाकमुक्ख्यᳲ हस्तेषु बिब्भ्रतः ।
दिवस्पृष्ठꣳ स्वर्ग्गत्वा मिश्श्रा देवेभिराद्ध्वम् ॥६५॥
प्राचीमनु प्प्रदिशम्प्प्रेहि व्विद्वानग्ग्नेरग्ग्ने पुरोऽअग्ग्निर्ब्भवेह ।
व्विश्श्वाऽआशा दीद्यानो व्विभाह्यूर्ज्जन्नो धेहि द्विपदे चतुष्प्पदे ॥६६॥
पृथिव्व्याऽअहमुदन्तरिक्क्षमारुहमन्तरिक्क्षाद्दिवमारुहम् ।
दिवो नाकस्य पृष्ठात्स्वर्ज्ज्योतिरगामहम् ॥६७॥
स्वर्य्यन्तो नापेक्क्षन्तऽआ द्याꣳ रोहन्ति रोदसी ।
यज्ञँय्ये व्विश्श्वतोधारᳲ सुविद्वाꣳसो व्वितेनिरे ॥६८॥
अग्ग्ने प्प्रेहि प्प्रथमो देवयताञ्चक्क्षुर्द्देवानामुत मर्त्त्यानाम् ।
इयक्क्षमाणा भृगुभिः सजोषाः स्वर्य्यन्तु यजमानाः स्वस्ति ॥६९॥
नक्तोषासा समनसा व्विरूपे धापयेते शिशुमेकᳲ समीची ।
द्यावाक्क्षामा रुक्क्मोऽअन्तर्व्विभाति देवाऽअग्ग्निन्धारयन्द्रविणोदाः ॥७०॥
अग्ग्ने सहस्राक्क्ष शतमूर्द्धञ्छतन्ते प्प्राणाः सहस्रँव्व्यानाः ।
त्वᳲ साहस्रस्य रायऽईशिषे तस्म्मै ते व्विधेम व्वाजाय स्वाहा ॥७१॥
सुपर्ण्णोसि गरुत्मान्पृष्ठे पृथिव्व्याः सीद ।
भासान्तरिक्क्षमापृण ज्ज्योतिषा दिवमुत्तभान तेजसा दिशऽउद्दृᳲह ॥७२॥
आजुह्वानः सुप्प्रतीकः पुरस्तादग्ग्ने स्वँय्योनिमासीद साधुया ।
अस्म्मिन्त्सधस्थेऽअद्ध्युत्तरस्म्मिन्व्विश्श्वे देवा यजमानश्च सीदत ॥७३॥
ताꣳ सवितुर्व्वरेण्ण्यस्य चित्रामाहँव्वृणे सुमतिँव्विश्श्वजन्न्याम् ।
यामस्य कण्ण्वोऽअदुहत्प्प्रपीनाꣳ सहस्रधाराम्पयसा महीङ्गाम् ॥७४॥
व्विधेम ते परमे जन्म्मन्नग्ग्ने व्विधेम स्तोमैरवरे सधस्थे ।
यस्म्माद्योनेरुदारिथा यजे तम्प्र त्वे हवीꣳषि जुहुरे समिद्धे ॥७५॥
प्रेद्धोऽअग्ग्ने दीदिहि पुरो नोजस्रया सूर्म्म्या यविष्ठ ।
त्वाꣳ शश्श्वन्तऽउपयन्ति व्वाजाः ॥७६॥

अग्ने तमद्याश्वन्न स्तोमैः क्रतुन्न भद्रꣳ हृदिस्पृशम् । ऋद्ध्यामा तऽओहैः ॥७७॥
चित्तिञ्जुहोमि मनसा घृतेन यथा देवाऽइहागमन्वीतिहोत्राऽऋतावृधः ।
पत्ये व्विश्वस्य भूमनो जुहोमि व्विश्वकर्म्मणे व्विश्वाहादाभ्यꣳ हविः ॥७८॥
सप्त तेऽअग्ने समिधः सप्त जिह्वाः सप्तऽऋषयः सप्त धाम प्प्रियाणि ।
सप्त होत्राः सप्तधा त्वा यजन्ति सप्त योनीरापृणस्व घृतेन स्वाहा ॥७९॥

॥८॥ शुक्रज्ज्योतिश्च चित्रज्ज्योतिश्च सत्त्यज्ज्योतिश्च ज्ज्योतिष्म्माँश्च ।
शुक्रश्चऽऋतपाश्चात्त्यꣳहाः ॥८०॥
ईदृङ्चान्यादृङ् सदृङ्च प्प्रतिसदृङ् । मितश्च सम्मितश्च सभराः ॥८१॥
ऋतश्च सत्त्यश्च ध्रुवश्च धरुणश्च । धर्त्ता च व्विधर्त्ता च व्विधारयः ॥८२॥
ऋतजिच्च सत्त्यजिच्च सेनजिच्च सुषेणश्च । अन्तिमित्रश्च दूरेऽअमित्रश्च गणः ॥८३॥
ईदृक्षासऽएतादृक्षासऽऊ षु णः सदृक्षासः प्प्रतिसदृक्षासऽएतन ।
मितासश्च सम्मितासो नोऽअद्य सभरसो मरुतो यज्ञेऽअस्मिन् ॥८४॥
स्वतवाँश्च प्प्रघासी च सान्तपनश्च गृहमेधी च । क्रीडी च शाकी चोज्जेषी ॥८५॥
इन्द्रन्दैवीर्व्विशो मरुतोनुवर्त्मानोभवन्यथेन्द्रन्दैवीर्व्विशो मरुतोनुवर्त्मानोभवन् ।
एवमिमँय्यजमानन्दैवीश्च व्विशो मानुषीश्चानुवर्त्मानो भवन्तु ॥८६॥

॥९॥ इमꣳ स्तनमूर्ज्जस्वन्तन्धयापाम्प्रपीनमग्ने सरिरस्य मद्ध्ये ।
उत्त्सञ्जुषस्व मधुमन्तमर्व्वन्त्समुद्रियꣳ सदनमाविशस्व ॥८७॥
घृतम्मिमिक्षे घृतमस्य योनिर्घृते श्रितो घृतम्म्वस्य धाम ।
अनुष्ष्वधमावह मादयस्व स्वाहाकृतँव्वृषभ वक्षि हव्यम् ॥८८॥
समुद्रादूर्म्मिर्म्मधुमाँ२॥ऽउदारदुपाꣳशुना सममृतत्त्वमानट् ।
घृतस्य नाम गुह्यँय्यदस्ति जिह्वा देवानाममृतस्य नाभिः ॥८९॥
व्वयन्नाम प्प्रब्रवामा घृतस्यास्मिन्यज्ञे धारयामा नमोभिः ।
उप ब्रह्मा शृणवच्छस्यमानञ्चतुःशृङ्गोवमीद्गौरऽएतत् ॥९०॥
चत्त्वारि शृङ्गा त्रयोऽअस्य पादा द्वे शीर्षे सप्त हस्तासोऽअस्य ।
त्रिधा बद्धो व्वृषभो रोरवीति महो देवो मर्त्त्याँ२॥ऽआविवेश ॥९१॥
त्रिधा हितम्पणिभिर्ग्गुह्यमानङ्गवि देवासो घृतमन्वविन्दन् ।
इन्द्रऽएकꣳ सूर्य्यऽएकञ्जजान व्वेनादेकꣳ स्वधया निष्टतक्षुः ॥९२॥

एताऽअर्षन्ति हृद्यात्समुद्राच्छतव्व्रजा रिपुणा नावचक्षे ।
घृतस्य धाराऽअभिचाकशीमि हिरण्ययो व्वेतसो मध्यऽआसाम् ॥९३॥
सम्म्यक्स्रवन्ति सरितो न धेनाऽअन्तर्हृदा मनसा पूयमानाः ।
एतेऽअर्षन्त्यूर्म्मयो घृतस्य मृगाऽइव क्षिपणोरीषमाणाः ॥९४॥
सिन्धोरिव प्प्राध्वने शूघनासो व्वातप्प्रमियः पतयन्ति यह्वाः ।
घृतस्य धाराऽअरुषो न व्वाजी काष्ठा भिन्दन्नूर्म्मिभिः पिन्वमानः ॥९५॥
अभिप्प्रवन्त समनेव योषाः कल्याण्य÷ स्मयमानासोऽअग्निम् ।
घृतस्य धाराः समिधो नसन्त ता जुषाणो हर्य्यति जातवेदाः ॥९६॥
कन्याऽइव व्वहतुमेतवाऽउऽअञ्ज्यञ्जानाऽअभिचाकशीमि ।
यत्र सोम÷ सूयते यत्र यज्ञो घृतस्य धाराऽअभि तत्पवन्ते ॥९७॥
अब्भ्यर्षत सुष्टुतिङ्गव्यमाजिमस्म्मासु भद्रा द्रविणानि धत्त ।
इमँय्यज्ञन्नयत देवता नो घृतस्य धारा मधुमत्पवन्ते ॥९८॥
धामन्ते व्विश्श्वम्भुवनमधिश्श्रितमन्तःसमुद्रे हृद्यन्तरायुषि ।
अपामनीके समिथे यऽआभृतस्तमश्श्याम मधुमन्तन्तऽऊर्म्मिम् ॥९९॥

॥ इति सप्तदशोऽध्यायः ॥

अथाष्टादशोऽध्यायः

ऋषिः (१) 'वाजश्च मे' इत्यारभ्य (७७) 'त्वं यविष्ठय' इत्यन्तानां सामान्यतः प्रजापतिः साध्या वा ऋषयः । विशेषतश्च—
(१) 'वाजश्च मे' इत्यारभ्य (२९) 'स्तोमश्च' इत्यन्तानां देवाः, (३१) 'विश्वे अद्य' इत्यस्य धानाको लुशः, (४६) 'यास्ते' (४७) 'या वः' इत्यनयोरिन्द्राग्नी, (४९) 'तत्त्वा यामि' इत्यस्य शुनःशेपः, (५६) 'इष्टो यज्ञः' (५७) 'इष्टो अग्निः' इत्यनयोर्गालवः, (५८) 'यदाकूदात्' इत्यारभ्य (६५) 'यत्र धाराः' इत्यन्तानां विश्वकर्मा, (६६) 'अग्निरस्मि' इत्यस्य भारतौ देवश्रवोदेववातौ ।
(६८) 'वार्त्रहत्याय शवसे' इत्यारभ्य (७४) 'अश्याम तम्' इत्यन्तानामिन्द्रस्तत्रापि—(६८) 'वार्त्रहत्याय शवसे' (६९) 'सहदानुम्पुरुहूत' इत्यनयोर्विश्वामित्रः, (७०) 'वि न इन्द्र' इत्यस्य भारद्वाजः शासः, (७१) 'मृगो न' इत्यस्यैन्द्रो जयः, (७३) 'पृष्टो दिवि' इत्यस्य कुत्सः, (७४) 'अश्याम तम्' इत्यस्य भरद्वाजः, (७५) 'वयन्ते' इत्यस्य कात्य उत्कीलः, (७७) 'त्वं यविष्ठ' इत्यस्य काव्य उशनाः ॥

देवता (१) 'वाजश्च मे' (२) 'प्राणश्च मे' (३) 'ओजश्च मे' (४) 'ज्यैष्ठयश्च मे' (५) 'सत्यश्च मे' (६) 'ऋतश्च मे' (७) 'यन्ता च मे' (८) 'शश्च मे' (९) 'ऊर्क्च मे' (१०) 'रयिश्च मे' (११) 'वित्तश्च मे' (१२) 'व्रीहयश्च मे' (१३) 'अश्मा च मे' (१४) 'अग्निश्च मे' (१५) 'वसु च मे' (१६) 'अग्निश्च मे' (१७) 'मित्रश्च मे' (१८) 'पृथिवी च मे' (१९) 'अंशुश्च मे' (२०) 'आग्रयणश्च मे' (२१) 'स्रुचश्च मे' (२२) 'अग्निश्च मे' (२३) 'व्रतश्च मे' (२४) 'एका च मे' (२५) 'चतस्रश्च मे' (२६) 'त्र्यविश्च मे' (२७) 'पष्ठवाट् च मे' (२८) 'वाजाय स्वाहा' (२९) 'आयुर्यज्ञेन' इत्येषामग्निः ।

(३०) 'वाजस्य नु' इत्यस्य पृथिवी, 'तस्याम्नो देवः' इत्यस्य सविता ।

(३१) 'विश्वे अद्य' इत्यस्य विश्वे देवाः ।

(३२) 'वाजो नः सप्त' (३३) 'वाजो नो अद्य' (३४) 'वाजः पुरस्तात्' इत्येषामन्नम् ।

(३५) 'सम्मा सृजामि' (३६) 'पयः पृथिव्याम्' इत्यनयोरग्निः ।

(३७) 'देवस्य त्वा' इत्यस्य सविता, 'सरस्वत्यै वाचः' इत्यस्य लिङ्गोक्ता ।

(३८) 'ऋताषाडृतधामा' (३९) 'सꣳहितो विश्वसामा' (४०) 'सुषुम्णः सूर्यरश्मिः' (४१) 'इषिरो विश्वव्यचा' (४२) 'भुज्युः सुपर्णः' (४३) 'प्रजापतिर्विश्वकर्मा' इत्येषाम्, 'स न इदम्' इत्यादिषण्णां च गन्धर्वाप्सरसः ।

(४४) 'स नो भुवनस्य' इत्यस्य प्रजापतिः ।

(४५) 'समुद्रोसि' 'मारुतोसि' 'अवस्यूरसि' इत्येषां वायुः ।

(४६) 'यास्ते' (४७) 'या वः' (४८) 'रुचन्नः' इत्येषामग्निः ।

(४९) 'तत्त्वा यामि' इत्यस्य वरुणः ।

(५०) 'स्वर्ण घर्मः' 'स्वर्णार्कः' 'स्वर्ण शुक्रः' 'स्वर्ण ज्योतिः' 'स्वर्ण सूर्यः' (५१) 'अग्निं युनज्मि' (५२) 'इमौ ते' (५३) 'इन्दुर्दक्षः' (५४) 'दिवो मूर्धा' (५५) 'विश्वस्य मूर्धन्' इत्येषामग्निः ।

(५६) 'इष्टो यज्ञः' इत्यस्य यजमानः ।

(५७) 'इष्टो अग्निः' (५८) 'यदाकूतात्' (५९) 'एतꣳ सधस्थ' इत्येषामग्निः ।

(६०) 'एतञ्जानाथ' इत्यस्याग्निर्देवा वा ।

(६१) 'उद्बुध्यस्वाग्ने' (६२) 'येन वहसि' (६३) 'प्रस्तरेण परिधिना' (६४) 'यद्दत्तम्' (६५) 'यत्र धाराः' (६६) 'अग्निरस्मि' इत्येषामग्निः ।

(६७) 'ऋचो नामास्मि' इत्यस्यात्मा, 'ये अग्नयः' (६८) 'वार्त्रहत्याय शवसे' (६९) 'सहदानुम्पुरुहूत' (७०) 'वि न इन्द्र' (७१) 'मृगो न' (७२) 'वैश्वानरो नः' (७३) 'पृष्टो दिवि' (७४) 'अश्याम तम्' (७५) 'वयन्ते' इत्येषामग्निः ।

(७६) 'धामच्छदग्निः' इत्यस्य विश्वे देवाः ।

(७७) 'त्वं यविष्ठ' इत्यस्याग्निः ॥

छन्दः (३०) 'वाजस्य नु' इत्यस्यातिजगती, (३१) 'विश्वे अद्य' इत्यस्य त्रिष्टुप्, (३२) 'वाजो नः सप्त' इत्यस्यानुष्टुप्, (३३) 'वाजो नो अद्य' (३४) 'वाजः पुरस्तात्' इत्यनयोस्त्रिष्टुप्, (३५) 'सम्मा' (३६) 'पयः पृथिव्याम्' इत्यनयोर्विराट्, (४४) 'स नः' इत्यस्य प्रस्तारपङ्क्तिः, (४६) 'यास्ते' (४७) 'या वः' (४८) 'रुचन्नः' इत्येषामनुष्टुप्, (४९) 'तत्त्वा यामि' (५१) 'अग्निं युनज्मि' (५२) 'इमौ ते' इत्येषां त्रिष्टुप्, (५३) 'इन्दुर्दक्षः' इत्यस्य पङ्क्तिः, (५४) 'दिवो मूर्धा' इत्यस्य परोष्णिक्, (५५) 'विश्वस्य मूर्धन्' इत्यस्य जगती महापदपङ्क्तिः, (५६) 'इष्टो यज्ञो' इत्यस्योष्णिक्, (५७) 'इष्टो अग्निः' इत्यस्य गायत्री, (५८) 'यदाकूतात्' इत्यस्य जगती, (५९) 'एतꣳ सधस्थ' (६०) 'एतञ्जानाथ' (६१) 'उ ध्यस्वाग्ने' इत्येषां त्रिष्टुप्, (६२) 'येन वहसि' इत्यारभ्य (६५) 'यत्र धाराः' इत्यन्तानामनुष्टुप्, (६६) 'अग्निरस्मि' इत्यस्य त्रिष्टुप्, (६७) 'ये अग्नयः' इत्यस्यानुष्टुप्, (६८) 'वार्त्रहत्याय शवसे' इत्यस्य गायत्री, (६९) 'सहदानुम्पुरुहूत' इत्यस्य त्रिष्टुप्, (७०) 'वि न इन्द्र' इत्यस्यानुष्टुप्, (७१) 'मृगो न' इत्यस्य त्रिष्टुप्, (७२) 'वैश्वानरो नः' इत्यस्य गायत्री, (७३) 'पृष्टो दिवि' (७४) 'अश्याम तम्' (७५) 'वयन्ते' इत्येषां त्रिष्टुप्, (७६) 'धामच्छदग्निः' इत्यस्यानुष्टुप्, (७७) 'त्वं यविष्ठ' इत्यस्य गायत्री ॥

॥ हरिः ॐ ॥

॥१॥ वाज॑श्च मे प्प्रस॒वश्च॑ मे॒ प्प्रय॑तिश्च मे॒ प्प्रसि॑तिश्च मे धी॒तिश्च॑ मे॒ क्रतु॑श्च मे॒ स्वर॑श्च मे॒
श्श्लोक॑श्च मे श्श्रु॒वश्च॑ मे॒ श्श्रुति॑श्च मे॒ ज्ज्योति॑श्च मे॒ स्व॒श्च मे य॒ज्ञेन॑ कल्प्पन्ताम् ॥१॥

प्राणश्च मेपानश्च मे व्व्यानश्च मेसुश्च मे चित्तञ्च मऽआधीतञ्च मे व्वाक्च मे मनश्च मे चक्क्षुश्च मे श्श्रोत्रञ्च मे दक्क्षश्च मे बलञ्च मे यज्ञेन कल्प्पन्ताम् ॥२॥

ओजश्च मे सहश्च मऽआत्त्मा च मे तनूश्च मे शर्म्म च मे व्वर्म्म च मेङ्गानि च मेस्त्थीनि च मे परूᳬंषि च मे शरीराणि च मऽआयुश्च मे जरा च मे यज्ञेन कल्प्पन्ताम् ॥३॥

ज्यैष्ठ्यञ्च मऽआधिपत्त्यञ्च मे मन्न्युश्च मे भामश्च मेमश्च मेम्भश्च मे जेमा च मे महिमा च मे व्वरिमा च मे प्प्रथिमा च मे व्वर्षिमा च मे द्राघिमा च मे व्वृद्धञ्च मे व्वृद्धिश्च मे यज्ञेन कल्प्पन्ताम् ॥४॥

सत्त्यञ्च मे श्श्रद्धा च मे जगच्च मे धनञ्च मे व्विश्श्वञ्च मे महश्च मे क्क्रीडा च मे मोदश्च मे जातञ्च मे जनिष्ष्यमाणञ्च मे सूक्तञ्च मे सुकृतञ्च मे यज्ञेन कल्प्पन्ताम् ॥५॥

ऋतञ्च मेमृतञ्च मेयक्ष्मञ्च मेनामयच्च मे जीवातुश्च मे दीर्ग्घायुत्त्वञ्च मेनमित्रञ्च मेभयञ्च मे सुखञ्च मे शयनञ्च मे सूषाश्च मे सुदिनञ्च मे यज्ञेन कल्प्पन्ताम् ॥६॥

यन्ता च मे धर्त्ता च मे क्क्षेमश्च मे धृतिश्च मे व्विश्श्वञ्च मे महश्च मे सँव्विच्च मे ज्ञात्रञ्च मे सूश्च मे प्प्रसूश्च मे सीरञ्च मे लयश्च मे यज्ञेन कल्प्पन्ताम् ॥७॥

॥२॥ शञ्च मे मयश्च मे प्प्रियञ्च मेनुकामश्च मे कामश्च मे सौमनसश्च मे भगश्च मे द्रविणञ्च मे भद्रञ्च मे श्श्रेयश्च मे व्वसीयश्च मे यशश्च मे यज्ञेन कल्प्पन्ताम् ॥८॥

॥३॥ ऊर्क्च मे सूनृता च मे पयश्च मे रसश्च मे घृतञ्च मे मधु च मे सग्ग्धिश्च मे सपीतिश्च मे कृषिश्च मे व्वृष्टिश्च मे जैत्रञ्च मऽऔद्भिद्यञ्च मे यज्ञेन कल्प्पन्ताम् ॥९॥

रयिश्च मे रायश्च मे पुष्टञ्च मे पुष्टिश्च मे व्विभु च मे प्प्रभु च मे पूर्ण्णञ्च मे पूर्ण्णतरञ्च मे कुयवञ्च मेक्क्षितञ्च मेन्नञ्च मेक्क्षुच्च मे यज्ञेन कल्प्पन्ताम् ॥१०॥

व्वित्तञ्च मे व्वेद्यञ्च मे भूतञ्च मे भविष्ष्यच्च मे सुगञ्च मे सुपत्थ्यञ्च मऽऋद्धञ्च मऽऋद्धिश्च मे क्लृप्तञ्च मे क्लृप्तिश्च मे मतिश्च मे सुमतिश्च मे यज्ञेन कल्प्पन्ताम् ॥११॥

व्व्रीहयश्च मे यवाश्च मे माषाश्च मे तिलाश्च मे मुद्गाश्च मे खल्ल्वाश्च मे प्प्रियङ्गवश्च मेणवश्च मे श्श्यामाकाश्च मे नीवाराश्च मे गोधूमाश्च मे मसूराश्च मे यज्ञेन कल्प्पन्ताम् ॥१२॥

॥४॥ अश्म्मा च मे मृत्तिका च मे गिरयश्च मे पर्व्वताश्च मे सिकताश्च मे व्वनस्प्पतयश्च

मे॒ हिर॑ण्ण्यश्च॒ मेय॑श्च मे श्श्या॒मश्च॑ मे लो॒हश्च॑ मे॒ सीस॑श्च मे॒ त्रपु॑ च मे य॒ज्ञेन॑
कल्पन्ताम् ॥१३॥

अ॒ग्निश्च॑ म॒ऽआप॑श्च मे वी॒रुध॑श्च म॒ऽओष॑धयश्च मे कृष्ट्टप॒च्च्याश्च॑ मेकृष्ट्टप॒च्च्याश्च॑
मे ग्ग्रा॒म्म्याश्च॑ मे प॒शव॑ऽआर॒ण्ण्याश्च॑ मे वि॒त्तञ्च॑ मे॒ वित्ति॑श्च मे भू॒तञ्च॑ मे॒ भूति॑श्च मे
य॒ज्ञेन॑ कल्पन्ताम् ॥१४॥

वसु॑ च मे वस॒तिश्च॑ मे॒ कर्म्म॑ च मे॒ शक्ति॑श्च॒ मेर्त्थ॑श्च म॒ऽएम॑श्च मऽइ॒त्त्या च॑ मे॒
गति॑श्च मे य॒ज्ञेन॑ कल्पन्ताम् ॥१५॥

॥५॥ अ॒ग्निश्च॑ म॒ऽइन्द्र॑श्च मे॒ सोम॑श्च म॒ऽइन्द्र॑श्च मे सवि॒ता च॑ म॒ऽइन्द्र॑श्च मे॒ सर॑स्वती
च म॒ऽइन्द्र॑श्च मे पू॒षा च॑ म॒ऽइन्द्र॑श्च मे॒ बृह॒स्स्पति॑श्च म॒ऽइन्द्र॑श्च मे य॒ज्ञेन॑ कल्पन्ताम् ॥१६॥

मि॒त्रश्च॑ म॒ऽइन्द्र॑श्च मे॒ वरु॑णश्च म॒ऽइन्द्र॑श्च मे धा॒ता च॑ म॒ऽइन्द्र॑श्च मे॒ त्वष्ट्टा॑ च
म॒ऽइन्द्र॑श्च मे म॒रुत्त॑श्च म॒ऽइन्द्र॑श्च मे॒ विश्श्वे॑ च मे दे॒वाऽइन्द्र॑श्च मे य॒ज्ञेन॑ कल्पन्ताम् ॥१७॥

पृ॒थि॒वी च॑ म॒ऽइन्द्र॑श्च मे॒न्तरि॑क्क्षञ्च म॒ऽइन्द्र॑श्च मे॒ द्यौश्च॑ म॒ऽइन्द्र॑श्च मे॒ समा॑श्च म॒ऽ
इन्द्र॑श्च मे॒ नक्क्षत्त्राणि च म॒ऽइन्द्र॑श्च मे॒ दिश॑श्च म॒ऽइन्द्र॑श्च मे य॒ज्ञेन॑ कल्पन्ताम् ॥१८॥

॥६॥ अ॒ꣳशुश्च॑ मे र॒श्मिश्च॒ मेदा॑ब्भ्यश्च॒ मेधि॑पतिश्च म॒ऽउपा॒ꣳशुश्च॑ मेन्तर्य्या॒मश्च॑
म॒ऽऐन्द्रवाय॒वश्च॑ मे मैत्रावरु॒णश्च॑ म॒ऽआश्श्वि॒नश्च॑ मे प्प्रतिप्प्र॒स्त्थान॑श्च मे शु॒क्रश्च॑ मे
म॒न्थी च॑ मे य॒ज्ञेन॑ कल्पन्ताम् ॥१९॥

आ॒ग्ग्र॒य॒णश्च॑ मे वैश्श्वदे॒वश्च॑ मे ध्रु॒वश्च॑ मे वैश्श्वान॒रश्च॑ म॒ऽऐन्द्रा॒ग्नश्च॑ मे म॒हावैश्श्वदे॑वश्च मे मरुत्व॒तीया॑श्च मे॒ निष्क्के॑वल्ल्यश्च मे सावि॒त्रश्च॑ मे सारस्व॒तश्च॑ मे पात्नीव॒तश्च॑
मे हारियो॒जनश्च॑ मे य॒ज्ञेन॑ कल्पन्ताम् ॥२०॥

स्रु॒च॑श्च मे चम॒साश्च॑ मे वाय॒व्व्यानि च मे द्रोणकल॒शश्च॑ मे॒ ग्ग्रावा॑णश्च मेधि॒षव॑णे
च मे पूत॒भृच्च॑ म॒ऽआधव॒नीय॑श्च मे॒ वेदि॑श्च मे ब॒र्हिश्च॑ मेवभृ॒थश्च॑ मे स्वगाका॒रश्च॑
मे य॒ज्ञेन॑ कल्पन्ताम् ॥२१॥

अ॒ग्निश्च॑ मे घ॒र्म्मश्च॑ मे॒र्क्कश्च॑ मे॒ सूर्य्य॑श्च मे प्प्रा॒णश्च॑ मेश्श्वमे॒धश्च॑ मे पृथि॒वी च॒ मेदि॑तिश्च
मे॒ दिति॑श्च मे॒ द्यौश्च॑ मेङ्गु॒लय॒ः शक्क्व॑रयो॒ दिश॑श्च मे य॒ज्ञेन॑ कल्पन्ताम् ॥२२॥

व्रतञ्च मऽऋतवश्च मे तपश्च मे सँवत्सरश्च मेहोरात्रेऽऊर्वष्ठीवे बृहद्रथन्तरे च मे यज्ञेन कल्प्पन्ताम् ॥२३॥

॥७॥ एका च मे तिस्रश्च मे तिस्रश्च मे पञ्च च मे पञ्च च मे सप्त च मे सप्त च मे नव च मे नव च मऽएकादश च मऽएकादश च मे त्रयोदश च मे त्रयोदश च मे पञ्चदश च मे पञ्चदश च मे सप्तदश च मे सप्तदश च मे नवदश च मे नवदश च मऽएकविꣳशतिश्च मऽएकविꣳशतिश्च मे त्रयोविꣳशतिश्च मे त्रयोविꣳशतिश्च मे पञ्चविꣳशतिश्च मे पञ्चविꣳशतिश्च मे सप्तविꣳशतिश्च मे सप्तविꣳशतिश्च मे नवविꣳशतिश्च मे नवविꣳशतिश्च मऽएकत्रिꣳशच्च मऽएकत्रिꣳशच्च मे त्रयस्त्रिꣳशच्च मे यज्ञेन कल्प्पन्ताम् ॥२४॥

चतस्रश्च मेष्टौ च मेष्टौ च मे द्वादश च मे द्वादश च मे षोडश च मे षोडश च मे विꣳशतिश्च मे विꣳशतिश्च मे चतुर्विꣳशतिश्च मे चतुर्विꣳशतिश्च मेष्टाविꣳशतिश्च मेष्टाविꣳशतिश्च मे द्वात्रिꣳशच्च मे द्वात्रिꣳशच्च मे षट्त्रिꣳशच्च मे षट्त्रिꣳशच्च मे चत्त्वारिꣳशच्च मे चत्त्वारिꣳशच्च मे चतुश्चत्त्वारिꣳशच्च मे चतुश्चत्त्वारिꣳशच्च मेष्टाचत्त्वारिꣳशच्च मे यज्ञेन कल्प्पन्ताम् ॥२५॥

त्र्यविश्च मे त्र्यवी च मे दित्त्यवाट्च मे दित्त्यौही च मे पञ्चाविश्च मे पञ्चावी च मे त्रिवत्सश्च मे त्रिवत्सा च मे तुर्य्यवाट्च मे तुर्य्यौही च मे यज्ञेन कल्प्पन्ताम् ॥२६॥

पष्ठवाट्च मे पष्ठौही च मऽउक्षा च मे वशा च मऽऋषभश्च मे वेहच्च मेनड्वाँश्च मे धेनुश्च मे यज्ञेन कल्प्पन्ताम् ॥२७॥

॥८॥ वाजाय स्वाहा प्प्रसवाय स्वाहापिजाय स्वाहा क्क्रतवे स्वाहा वसवे स्वाहाहर्प्पतये स्वाहाह्ने मुग्ग्धाय स्वाहा मुग्ग्धाय वैनꣳशिनाय स्वाहा विनꣳशिनऽआन्त्यायनाय स्वाहान्त्याय भौवनाय स्वाहा भुवनस्य पतये स्वाहाधिपतये स्वाहा प्प्रजापतये स्वाहा । इयन्ते राण्ण्मित्राय यन्तासि यमनऽऊर्ज्जे त्वा वृष्ट्यै त्वा प्प्रजानान्त्वाधिपत्त्याय ॥२८॥

आयुर्य्यज्ञेन कल्प्पताम्प्प्राणो यज्ञेन कल्प्पताञ्चक्षुर्य्यज्ञेन कल्प्पताꣳ श्श्रोत्रँय्यज्ञेन कल्प्पताँव्वाग्ग्यज्ञेन कल्प्पताम्मनो यज्ञेन कल्प्पतामात्मा यज्ञेन कल्प्पताम्ब्रह्मा यज्ञेन कल्प्पताञ्ज्योतिर्य्यज्ञेन कल्प्पताꣳ स्वर्य्यज्ञेन कल्प्पताम्पृष्ठँय्यज्ञेन कल्प्पताँय्यज्ञो यज्ञेन कल्प्पताम् । स्तोमश्च यजुश्चऽऋक्च साम च बृहच्च

रथन्तरञ्च। स्वर्द्देवाऽअगन्मामृताऽअभूम प्प्रजापतेः प्प्रजाऽअभूम वेट्ट्स्वाहा ॥२९॥

॥९॥ व्वाजस्य नु प्प्रसवे मातरम्महीमदितिन्नाम व्वचसा करामहे ।
यस्यामिदँव्विश्श्वम्भुवनमाविवेश तस्यान्नो देवः सविता धर्म्मँ साविषत् ॥३०॥
व्विश्श्वेऽअद्य मरुतो व्विश्श्वऽऊती व्विश्श्वे भवन्त्वग्नयः समिद्धाः ।
व्विश्श्वे नो देवाऽअवसागमन्तु व्विश्श्वमस्तु द्रविणँव्वाजोऽअस्म्मे ॥३१॥
व्वाजो नः सप्त प्प्रदिशश्चतस्रो वा परावतः ।
व्वाजो नो व्विश्श्वैर्द्देवैर्द्धनसाताविहावतु ॥३२॥
व्वाजो नोऽअद्य प्प्रसुवाति दानँव्वाजो देवाँ॥ऽऋतुभिः कल्प्पयाति ।
व्वाजो हि मा सर्व्ववीरञ्जजान व्विश्श्वाऽआशा व्वाजपतिर्ज्जयेयम् ॥३३॥
व्वाजः पुरस्तादुत मद्ध्यतो नो व्वाजो देवान्हविषा वर्द्धयाति ।
व्वाजो हि मा सर्व्ववीरञ्चकार सर्व्वाऽआशा व्वाजपतिर्ब्भवेयम् ॥३४॥
सम्मा सृजामि पयसा पृथिव्व्याः सम्मा सृजाम्म्यद्भिरोषधीभिः ।
सोहँव्वाजꣳ सनेयमग्ने ॥३५॥
पयः पृथिव्व्याम्पयऽओषधीषु पयो दिव्व्यन्तरिक्षे पयो धाः ।
पयस्वतीः प्प्रदिशः सन्तु मह्यम् ॥३६॥
देवस्य त्वा सवितुः प्प्रसवेऽश्विनोर्ब्बाहुभ्याम्पूष्णो हस्त्ताभ्याम् ।
सरस्वत्त्यै व्वाचो यन्तुर्य्यन्त्रेणाग्नेः साम्म्राज्ज्येनाभिषिञ्चामि ॥३७॥

॥१०॥ ऋताषाडृतधामाग्निर्ग्गन्धर्व्वस्तस्यौषधयोप्प्सरसो मुदो नाम ।
स नऽइदम्ब्रह्म क्षत्रम्पातु तस्म्मै स्वाहा व्वाट्ताभ्यः स्वाहा ॥३८॥
सꣳहितो व्विश्श्वसामा सूर्य्यो गन्धर्व्वस्तस्य मरीचयोप्प्सरसऽआयुवो नाम ।
स नऽइदम्ब्रह्म क्षत्रम्पातु तस्म्मै स्वाहा व्वाट्ताभ्यः स्वाहा ॥३९॥
सुषुम्म्णः सूर्य्यरश्म्मिश्चन्द्रमा गन्धर्व्वस्तस्य नक्षत्राण्यप्प्सरसो भेकुरयो नाम ।
स नऽइदम्ब्रह्म क्षत्रम्पातु तस्म्मै स्वाहा व्वाट्ताभ्यः स्वाहा ॥४०॥ 494
इषिरो व्विश्श्वव्व्यचा व्वातो गन्धर्व्वस्तस्यापोऽअप्प्सरसऽऊर्ज्जो नाम ।
स नऽइदम्ब्रह्म क्षत्रम्पातु तस्म्मै स्वाहा व्वाट्ताभ्यः स्वाहा ॥४१॥
भुज्युः सुपर्ण्णो यज्ञो गन्धर्व्वस्तस्य दक्षिणाऽअप्प्सरस स्तावा नाम ।
स नऽइदम्ब्रह्म क्षत्रम्पातु तस्म्मै स्वाहा व्वाट्ताभ्यः स्वाहा ॥४२॥

प्र॒जाप॑तिर्व्वि॒श्श्वक॑र्म्मा॒ मनो॑ गन्ध॒र्व्वस्त्तस्य॑ऽऋक्क्सा॒मान्य॑प्प्स॒रस॒ऽएष्ट्ट॑यो॒ नाम॑ ।
स न॑ऽइ॒दम्ब्रह्म॑ क्क्ष॒त्रम्पा॑तु॒ तस्मै॒ स्वाहा॒ वाट्ताभ्य॒ः स्वाहा॑ ॥४३॥
स नो॑ भुवनस्य पते प्प्रजापते॒ यस्य॑ त॒ऽउपरि॑ गृ॒हा यस्य॑ वे॒ह ।
अ॒स्म्मै ब्रह्म॑णे॒स्म्मै क्क्ष॒त्राय॒ महि॒ शर्म्म॑ यच्छ॒ स्वाहा॑ ॥४४॥
स॒मु॒द्रोसि॒ नभ॑स्वाना॒र्द्रदा॑नु॒ः शम्भूर्म्म॑यो॒भूर॒भि मा॑ वाहि॒ स्वाहा॑ मारु॒तोसि म॒रुता॑ङ्ग॒णः शम्भूर्म्म॑यो॒भूर॒भि मा॑ वाहि॒ स्वाहा॑व॒स्यूर॑सि॒ दुव॑स्वाञ्छम्भूर्म्म॑यो॒भूर॒भि मा॑ वाहि॒ स्वाहा॑ ॥४५॥
यास्त्ते॑ऽअग्ने॒ सूर्य्ये॒ रुचो॒ दिव॑मात॒न्वन्ति॑ र॒श्मिभि॑÷ ।
ता॒भिर्न्नो॑ऽअ॒द्य सर्व्वा॑भी रु॒चे जना॑य नस्कृधि ॥४६॥
या वो॑ देवा॒ः सूर्य्ये॒ रुचो॒ गोष्वश्श्वे॑षु॒ या रुच॑÷ ।
इन्द्रा॑ग्नी॒ ताभि॒ः सर्व्वा॑भी॒ रुच॑न्नो धत्त बृहस्प्पते ॥४७॥
रुच॑न्नो धेहि ब्राह्म॒णेषु॒ रुच॒ꣳ राज॑सु नस्कृधि ।
रुचँ॒व्विश्श्ये॑षु शू॒द्रेषु॒ मयि॑ धेहि रु॒चा रुच॑म् ॥४८॥
तत्त्वा॑ यामि॒ ब्रह्म॑णा॒ वन्द॑मान॒स्त्तदा शा॑स्त्ते॒ यज॑मानो ह॒विर्ब्भि॑÷ ।
अहे॑डमानो वरुणे॒ह बो॒द्ध्युरु॑शꣳस॒ मा न॒ऽआयु॒ः प्प्रमो॑षीः ॥४९॥
स्व॒र्ण्ण घ॒र्म्मः स्वाहा॒ स्व॒र्ण्णार्क्कः स्वाहा॒ स्व॒र्ण्ण शु॒क्रः स्वाहा॒ स्व॒र्ण्ण ज्ज्योति॒ः स्वाहा॒ स्व॒र्ण्ण सूर्य्य॒ः स्वाहा॑ ॥५०॥

॥११॥ अ॒ग्निँय्यु॑नज्मि॒ शव॑सा घृ॒तेन॑ दि॒व्यꣳ सु॑प॒र्ण्णँव्वय॑सा बृ॒हन्त॑म् ।
तेन॑ व॒यङ्ग॑मेम ब्र॒ध्नस्य॑ वि॒ष्ट्टप॒ꣳ स्वो॒ रुहा॑णा॒ऽअधि॒ नाक॑मुत्त॒मम् ॥५१॥
इ॒मौ ते॑ प॒क्क्षाव॒जरौ॑ पत॒त्रिणौ॒ याभ्या॒ꣳ रक्षा॑ꣳस्यप॒हꣳस्य॑ग्ने ।
ताभ्या॑म्पतेम सु॒कृता॑मु लो॒कँय्यत्र॒ऽऋष॑यो ज॒ग्ग्मुः प्प्र॑थम॒जाः पु॑रा॒णाः ॥५२॥
इन्दु॒र्द्दक्क्ष॑÷ श्ये॒नऽऋ॒तावा॒ हिर॑ण्ण्यपक्क्षः शकु॒नो भु॑र॒ण्ण्युः ।
म॒हान्त्स॒धस्त्थे॑ ध्रु॒वऽआनि॑षत्तो॒ नम॑स्त्तेऽअस्त्तु॒ मा मा॑ हिꣳसीः ॥५३॥
दि॒वो मू॒र्द्धासि॑ पृथि॒व्या नाभि॑रू॒र्ग्ग॒पामोष॑धीनाम् ।
वि॒श्श्वायु॒ः शर्म्म॑ स॒प्प्रथा॒ नम॑स्प्प॒थे ॥५४॥
वि॒श्श्वस्य॑ मू॒र्द्धन्नधि॑तिष्ट्ठसि श्श्रि॒तः स॑मु॒द्रे ते॒ हृद॑यम॒प्प्स्वायु॑र॒पो द॑त्तोद॒धिम्भि॑न्त ।
दि॒वस्प्प॒र्ज्जन्या॑द॒न्तरि॑क्क्षात्त्पृथि॒व्यास्त्ततो॑ नो॒ वृष्ट्ट्या॑व ॥५५॥
इ॒ष्ट्टो य॒ज्ज्ञो भृग्गु॑भिराशी॒र्द्दा वसु॑भिः । तस्य॑ न॒ऽइ॒ष्ट्टस्य॑ प्प्री॒तस्य॒ द्रवि॑णे॒हाग॑मेः ॥५६॥

इष्टोऽअग्निराहुतः पिपर्त्तु नऽइष्टꣳ हविः । स्वगेदन्देवेभ्यो नमः ॥५७॥

॥१२॥ यदाकूतात्समसुस्रोद्धृदो वा मनसो वा सम्भृतञ्चक्षुषो वा ।
तदनु प्प्रेत सुकृतामु लोकँय्यत्रऽऋषयो जग्मुः प्प्रथमजाः पुराणाः ॥५८॥
एतꣳ सधस्थ परि ते ददामि यमावहाच्छेवधिञ्जातवेदाः ।
अन्वागन्ता यज्ञपतिर्वोऽअत्र तꣳ स्म जानीत परमे व्व्योमन् ॥५९॥
एतञ्जानाथ परमे व्व्योमन्देवाः सधस्था व्विद रूपमस्य ।
यदागच्छात्पथिभिर्द्देवयानैरिष्टापूर्त्ते कृणवाथाविरस्मै ॥६०॥
उद्बुध्यस्वाग्ने प्प्रतिजागृहि त्वमिष्टापूर्त्ते सꣳसृजेथामयञ्च ।
अस्मिन्त्सधस्थेऽअद्ध्युत्तरस्मिन्विश्वे देवा यजमानश्च सीदत ॥६१॥
येन व्वहसि सहस्रँय्येनाग्ने सर्व्ववेदसम् ।
तेनेमँय्यज्ञन्नो नय स्वर्द्देवेषु गन्तवे ॥६२॥
प्रस्तरेण परिधिना स्रुचा व्वेद्या च बर्हिषा ।
ऋचेमँय्यज्ञन्नो नय स्वर्द्देवेषु गन्तवे ॥६३॥
यद्दत्तँय्यत्परादानँय्यत्पूर्त्तँय्याश्च दक्षिणाः ।
तदग्निर्व्वैश्वकर्म्मणः स्वर्द्देवेषु नो दधत् ॥६४॥ वे॰मू॰ चन्द्रभानु शर्मा
यत्र धाराऽअनपेता मधोर्घृतस्य च याः ।
तदग्निर्व्वैश्वकर्म्मणः स्वर्द्देवेषु नो दधत् ॥६५॥
अग्निरस्मि जन्मना जातवेदा घृतम्मे चक्षुरमृतम्मऽआसन् ।
अर्कस्त्रिधातू रजसो व्विमानोजस्रो घर्म्मो हविरस्मि नाम ॥६६॥
ऋचो नामास्मि यजूꣳषि नामास्मि सामानि नामास्मि । येऽअग्नयः
पाञ्चजन्याऽअस्याम्पृथिव्यामधि । तेषामसि त्वमुत्तमः प्प्र नो जीवातवे सुव ॥६७॥

॥१३॥ व्वार्त्रहत्याय शवसे पृतनाषाह्याय च । इन्द्र त्वावर्त्तयामसि ॥६८॥
सहदानुम्पुरुहूत क्षियन्तमहस्तमिन्द्र सम्पिणक्कुणारुम् ।
अभि वृत्रँव्वर्द्धमानम्पियारुमपादमिन्द्र तवसा जघन्थ ॥६९॥
व्वि नऽइन्द्र मृधो जहि नीचा यच्छ पृतन्यतः ।
योऽअस्माँ॥ऽअभिदासत्यधरङ्गमया तमः ॥७०॥
मृगो न भीमः कुचरो गिरिष्ठाः परावतऽआजगन्था परस्याः ।
सृकꣳ सꣳशाय पविमिन्द्र तिग्मँव्वि शत्रून्ताढि व्वि मृधो नुदस्व ॥७१॥

व्वैश्श्वानरो नऽऊतयऽआप्प्रयातु परावतः । अग्निर्नः सुष्टुतीरुप ॥७२॥
पृष्ट्टो दिवि पृष्ट्टोऽअग्निः पृथिव्व्याम्पृष्ट्टो व्विश्श्वाऽओषधीराविवेश ।
व्वैश्श्वानरः सहसा पृष्ट्टोऽअग्निः स नो दिवा स रिषस्प्पातु नक्तम् ॥७३॥
अश्श्याम तङ्काममग्ग्ने तवोतीऽअश्श्याम रयिꣳ रयिवः सुवीरम् ।
अश्श्याम व्वाजमभि व्वाजयन्तोऽश्श्याम द्द्युम्नमजराजरन्ते ॥७४॥
व्वयन्तेऽअद्द्य ररिमा हि काममुत्त्तानहस्त्ता नमसोपसद्द्य ।
यजिष्ट्ठेन मनसा यक्क्षि देवानस्स्रेधता मन्म्मना व्विप्प्रोऽअग्ग्ने ॥७५॥
धामच्छदग्निरिन्द्रो ब्रह्म्मा देवो बृहस्प्पतिः ।
सचेतसो व्विश्श्वे देवा यज्ञम्प्रावन्तु नः शुभे ॥७६॥
त्वँय्यविष्ट्ठ दाशुषो नॄँः पाहि शृणुधी गिरः । रक्षा तोकमुत त्त्मना ॥७७॥

॥ इत्यष्टादशोऽध्यायः ॥

अथैकोनविंशोऽध्यायः

ऋषिः (१) 'स्वाद्वीन्त्वा' इत्यारभ्य (९५) 'तेजः पशूनाम्' इत्यन्तानां सामान्यतः प्रजापतिरश्विनौ सरस्वती च ऋषयः । विशेषतश्च—

(२) 'परीतो षिञ्चता' इत्यस्य भारद्वाजः, (३) 'वायोः पूतः' इत्यादिद्वयोः (४) 'पुनाति ते' इत्यस्य चाभूतिः, (६) 'कुविदङ्ग यवमन्तः' इत्यस्य काक्षीवतः सुकीर्तिः, (१०) 'या व्याघ्रम्' इत्यस्य हैमवर्चिः, (३८) 'अग्न आयूꣳषि' इत्यस्य वैखानसः प्रजापतिः, (४९) 'उदीरतामवर' इत्यारभ्य (६१) 'अग्निष्वात्तानृतुमतः' इत्यन्तानां शङ्खः, (७२) 'सोमो राजा' इत्यारभ्य (७९) 'दृष्ट्वा परिस्रुतः' इत्यन्तानामिन्द्रः ॥

देवता (१) 'स्वाद्वीन्त्वा' इत्यस्य सुरासोमः, 'सोमोसि' 'अश्विभ्याम्पच्यस्व' 'सरस्वत्यै पच्यस्व' 'इन्द्राय सुत्राम्णे' इत्येषां सूर्यः ।

(२) 'परीतो षिञ्चता' इत्यस्य (३) 'वायोः पूतः' इत्यादिद्वयोः (४) 'पुनाति ते' इत्यस्य च सोमः ।

(५) 'ब्रह्म क्षत्रम्' इत्यस्य सुरासोमः ।

(६) 'कुविदङ्ग यवमन्तः' 'उपयाम० अश्विभ्याम्' 'एष ते योनिः' इत्येषां पयोग्रहः ।

(७) 'नाना हि' इत्यस्य सुरासोमः ।

(८) 'उपयाम० आश्विनम्' इत्यस्य सुरा, 'एष ते योनिः' इत्यस्य सुराग्रहः ।

(९) 'तेजोसि' 'वीर्यमसि' 'बलमसि' इत्येषां पयः, 'ओजोसि' 'मन्युरसि' 'सहोसि' इत्येषां सुरा ।

(१०) 'या व्याघ्रम्' इत्यस्य विषूचिका ।

(११) 'यदापिपेष' इत्यस्याग्निः, 'सम्पृच स्थ' इत्यस्य पयोग्रहाः, 'विपृच स्थ' इत्यस्य सुराग्रहाः ।

(१२) 'देवा यज्ञम्' (१३) 'दीक्षायै रूपम्' (१४) 'आतिथ्यरूपम्' (१५) 'सोमस्य रूपम्' (१६) 'आसन्दी रूपम्' (१७) 'वेद्या वेदिः' (१८) 'हविर्धानं यत्' (१९) 'प्रैषेभिः प्रैषान्' (२०) 'पशुभिः पशून्' (२१) 'धानाः करम्भः' (२२) 'धानानां रूपम्' (२३) 'पयसो रूपम्' (२४) 'आश्रावयेति' (२५) 'अर्धऋचैरुक्थानाम्' (२६) 'अश्विभ्याम्प्रातःसवनम्' (२७) 'वायव्यैर्वायव्यान्' (२८) 'यजुर्भिराप्यन्ते' (२९) 'इडाभिर्भक्षान्' (३०) 'व्रतेन दीक्षाम्' (३१) 'एतावद्रूपम्' इत्येषां सोमः ।

(३२) 'सुरावन्तम्बर्हिषदम्' (३३) 'यस्ते रसः' (३४) 'यमश्विंना' (३५) 'यदत्र रिप्तम्' इत्येषामश्विसरस्वतीन्द्राः ।

(३६) 'पितृभ्यः स्वधायिभ्यः' 'पितामहेभ्यः स्वधायिभ्यः' 'प्रपितामहेभ्यः स्वधायिभ्यः' 'अक्षन्पितरः' 'अमीमदन्त
पितरः' 'अतीतृपन्त पितरः' 'पितरः शुन्धध्वम्' इत्येषां (३७) 'पुनन्तु मा' इत्यादिद्वयोश्च पितरः ।

(३८) 'अग्न आयूꣳषि' इत्यस्याग्निः ।

(३९) 'पुनन्तु मा' इत्यस्य लिङ्गोक्ता ।

(४०) 'पवित्रेण पुनीहि' इत्यस्याग्निः ।

(४१) 'यत्ते पवित्रम्' इत्यस्याग्निर्ब्रह्म वा, 'ब्रह्म तेन' इत्यस्य ब्रह्म ।

(४२) 'पवमानः सः' इत्यस्य सोमः ।

(४३) 'उभाभ्यान्देव' इत्यस्य सविता ।

(४४) 'वैश्वदेवी पुनती' इत्यस्य विश्वे देवाः ।

(४५) 'ये समानाः समनसः पितरः' इत्यस्य पितरः ।

(४६) 'ये समानाः समनसो जीवाः' इत्यस्य यजमानाशीः ।

(४७) 'द्वे सृती' इत्यस्य देवयानपितृयाणौ ।

(४८) 'इदꣳ हविः' इत्यस्य यजमानाशीः ।

(४९) 'उदीरतामवरे' (५०) 'अङ्गिरसो नः' (५१) 'ये नः' (५२) 'त्वꣳ सोम प्रचिकितः' (५३) 'त्वया हि' (५४)
'त्वꣳ सोम पितृभिः' (५५) 'बर्हिषदः पितरः' (५६) 'आहम्पितृन्' (५७) 'उपहूताः पितरः' (५८) 'आयन्तु नः'
(५९) 'अग्निष्वात्ताः पितरः' (६०) 'ये अग्निष्वात्ताः' (६१) 'अग्निष्वात्तानृतुमतः' (६२) 'आच्या जानु' (६३) 'आ-
सीनासो अरुणीनाम्' (६४) 'यमग्ने' (६५) 'यो अग्निः' (६६) 'त्वमग्ने' (६७) 'ये चेह' (६८) 'इदम्पितृभ्यः'
(६९) 'अधा यथा' (७०) 'उशन्तस्त्वा' इत्येषां पितरः ।

(७१) 'अपाम्फेनेन' इत्यस्येन्द्रः ।

(७२) 'सोमो राजामृतम्' (७३) 'अद्भ्यः क्षीरम्' (७४) 'सोममद्भ्यः' (७५) 'अन्नात्परिस्रुतः' (७६) 'रेतो मूत्रम्'
(७७) 'दृष्ट्वा रूपे' (७८) 'वेदेन रूपे' (७९) 'दृष्ट्वा परिस्रुतः' इत्येषां ग्रहाः ।

(८०) 'सीसेन तन्त्रम्' (८१) 'तदस्य रूपम्' (८२) 'तदश्विना' (८३) 'सरस्वती मनसा' (८४) 'पयसा शुक्रम्' (८५)
'इन्द्रः सुत्रामा' (८६) 'आन्त्राणि स्थालीः' (८७) 'कुम्भो वनिष्ठुः' (८८) 'मुखꣳ सदस्य' (८९) 'अश्विभ्याञ्चक्षुः'
(९०) 'अविर्न' (९१) 'इन्द्रस्य रूपम्' (९२) 'आत्मन्नुपस्थे' (९३) 'अङ्गान्यात्मन्' (९४) 'सरस्वती
योन्याम्' (९५) 'तेजः पशूनाम्' इत्येषामश्विसरस्वतीन्द्राः ॥

छन्दः (१) 'स्वाद्वीन्त्वा' इत्यस्यानुष्टुप्, (२) 'परीतो षिञ्चता' इत्यस्य बृहती, (३) 'वायोः पूतः' इत्यादिद्वयोः (४) 'पुनाति
ते' इत्यस्य च गायत्री, (५) 'ब्रह्म क्षत्रम्' (६) 'कुविदङ्ग यवमन्तः' इत्यनयोस्त्रिष्टुप्, (७) 'नाना हि' इत्यस्य
जगती, (१०) 'या व्याघ्रम्' इत्यस्यानुष्टुप् (११) 'यदापिपेष' इत्यस्य बृहती, (१२) 'देवा यज्ञम्' इत्यारभ्य
(३१) 'एतावद्रूपम्' इत्यन्तानामनुष्टुप्, (३२) 'सुरावन्तम्बर्हिषदम्' इत्यारभ्य (३५) 'यदत्र' इत्यन्तानां
त्रिष्टुप्, (३७) 'पुनन्तु मा' इत्यादिद्वयोरनुष्टुप्, (३८) 'अग्न आयूꣳषि' इत्यस्य गायत्री, (३९) 'पुनन्तु मा'
इत्यस्यानुष्टुप्, (४०) 'पवित्रेण पुनीहि' इत्यारभ्य (४३) 'उभाभ्यान्देव' इत्यन्तानां गायत्री, (४४) 'वैश्वदेवी
पुनती' इत्यस्य त्रिष्टुप्, (४५) 'ये समानाः' इत्यादिद्वयोरनुष्टुप्, (४७) 'द्वे सृती' इत्यस्य त्रिष्टुप्, (४८)
'इदꣳ हविः' इत्यस्याष्टिः, (४९) 'उदीरतामवरे' इत्यारभ्य (५८) 'आयन्तु नः' इत्यन्तानां त्रिष्टुप्, (५९)
'अग्निष्वात्ताः पितरः' इत्यस्य जगती, (६०) 'ये अग्निष्वात्ताः' इत्यारभ्य (६३) 'आसीनासो अरुणीनाम्'
इत्यन्तानां त्रिष्टुप्, (६४) 'यमग्ने' (६५) 'यो अग्निः' इत्यनयोरनुष्टुप्, (६६) 'त्वमग्ने' इत्यारभ्य (६९) 'अधा
यथा' इत्यन्तानां त्रिष्टुप्, (७०) 'उशन्तस्त्वा' इत्यस्यानुष्टुप्, (७१) 'अपाम्फेनेन' इत्यस्य गायत्री, (७२)
'सोमो राजा' (७३) 'अद्भ्यः क्षीरम्' (७४) 'सोममद्भ्यः' इत्येषां महाबृहती, (७५) 'अन्नात्परिस्रुतः'
इत्यस्यातिजगती, (७६) 'रेतो मूत्रम्' (७७) 'दृष्ट्वा रूपे' इत्यनयोरतिशक्वरी, (७८) 'वेदेन रूपे' इत्यस्य
महाबृहती, (७९) 'दृष्ट्वा परिस्रुतः' इत्यस्यातिजगती, (८०) 'सीसेन तन्त्रम्' इत्यारभ्य (९५) 'तेजः पशूनाम्'
इत्यन्तानां जगती ॥

॥ हरिः ॐ ॥

॥१॥ स्वाद्वीन्त्वा स्वादुना तीव्रान्तीव्रेणामृताममृतेन। मधुमतीम्मधुमता सृजामि सꣳ
सोमेन। सोमोस्यश्विभ्भ्याम्पच्यस्व सरस्वत्यै पच्यस्वेन्द्राय सुत्राम्णे पच्यस्व ॥१॥
परीतो षिञ्चता सुतꣳ सोमो यऽउत्तमꣳ हविः।
दधन्वा यो नर्य्योऽअप्प्स्वन्तरासुषाव सोममद्रिभिः ॥२॥
वायोः पूतः पवित्रेण प्प्रत्यङ्क्सोमोऽअतिद्द्रुतः। इन्द्रस्य युज्युः सखा। वायोः
पूतः पवित्रेण प्प्राङ्क्सोमोऽअतिद्द्रुतः। इन्द्रस्य युज्युः सखा ॥३॥
पुनाति ते परिस्रुतꣳ सोमꣳ सूर्य्यस्य दुहिता। वारेण शश्वता तना ॥४॥
ब्रह्म क्षत्रम्पवते तेजऽइन्द्रियꣳ सुरया सोमः सुतऽआसुतो मदाय।
शुक्रेण देव देवताः पिपृग्धि रसेनान्नँय्यजमानाय धेहि ॥५॥
कुविदङ्ग यवमन्तो यवञ्चिद्यथा दान्त्यनुपूर्वं वियूय। इहेहैषाङ्कृणुहि भोजनानि ये
बर्हिषो नमऽउक्तिँय्यजन्ति। उपयामगृहीतोस्यश्विभ्भ्यान्त्वा सरस्वत्यै त्वेन्द्राय
त्वा सुत्राम्णऽएष ते योनिस्तेजसे त्वा वीर्य्याय त्वा बलाय त्वा ॥६॥
नाना हि वान्देवहितꣳ सदस्कृतम्मा सꣳसृक्षाथाम्परमे व्योमन्। सुरा त्वमसि
शुष्मिणी सोमऽएष मा मा हिꣳसीः स्वाँय्योनिमाविशन्ती ॥७॥
उपयामगृहीतोस्याश्विनन्तेजः सारस्वतँवीर्य्यमैन्द्रम्बलम्।
एष ते योनिर्म्मोदाय त्वानन्दाय त्वा महसे त्वा ॥८॥
○ तेजोसि तेजो मयि धेहि वीर्य्यमसि वीर्य्यम्मयि धेहि बलमसि बलम्मयि धेह्यो-
जोस्योजो मयि धेहि मन्युरसि मन्युम्मयि धेहि सहोसि सहो मयि धेहि ॥९॥
या व्याघ्रँविषूचिकोभौ वृकञ्च रक्षति।
श्येनम्पतत्रिणꣳ सिꣳहꣳ सेमम्पात्वꣳहसः ॥१०॥
यदापिपेष मातरम्पुत्रः प्प्रमुदितो धयन्।
एतत्तदग्ग्नेऽअनृणो भवाम्म्यहतौ पितरौ मया।
सम्पृच स्थ सम्मा भद्रेण पृङ्क्त विपृच स्थ वि मा पाप्मना पृङ्क्त ॥११॥

॥२॥ देवा यज्ञमतन्वत भेषजम्भिषजाश्विना।
वाचा सरस्वती भिषगिन्द्रायेन्द्रियाणि दधतः ॥१२॥
दीक्षायै रूपꣳ शष्प्पाणि प्प्रायणीयस्य तोक्मानि।
क्रयस्य रूपꣳ सोमस्य लाजाः सोमाꣳशवो मधु ॥१३॥

आतिथ्यरूपम्मासरम्महावीरस्य नग्नहु÷ ।
रूपमुपसदामेतत्तिस्रो रात्रीः सुरासुता ॥१४॥
सोमस्य रूपङ्क्रीतस्य परिस्रुत्परिषिच्यते ।
अश्विब्भ्यान्दुग्धम्भेषजमिन्द्रायैन्द्रꣳ सरस्वत्त्या ॥१५॥
आसन्दी रूपꣳ राजासन्द्यै वेद्यै कुम्भी सुराधानी ।
अन्तरऽउत्तरवेद्या रूपङ्कारोतरो भिषक् ॥१६॥
वेद्या वेदिः समाप्प्यते बर्हिषा बर्हिरिन्द्रियम् ।
यूपेन यूपऽआप्प्यते प्प्रणीतोऽअग्निरग्निना ॥१७॥
हविर्द्धानँय्यदश्विनाग्नीध्रँय्यत्सरस्वती ।
इन्द्रायैन्द्रꣳ सदस्कृतम्पत्नीशालङ्गार्हपत्त्यः ॥१८॥
प्रैषेभि÷ प्प्रैषानाप्प्नोत्त्याप्प्रीभिराप्प्रीर्य्यज्ञस्य ।
प्रयाजेभिरनुयाजान्वषट्कारेभिराहुतीः ॥१९॥
पशुभि÷ पशूनाप्प्नोति पुरोडाशैर्हवीꣳष्या ।
छन्दोभिः सामिधेनीर्य्याज्याभिर्वषट्कारान् ॥२०॥
धानाः करम्भः सक्तवः परीवापः पयो दधि ।
सोमस्य रूपꣳ हविषऽआमिक्षा वाजिनम्मधु ॥२१॥
धानानाꣳ रूपङ्कुवलम्परीवापस्य गोधूमाः ।
सक्तूनाꣳ रूपम्बदरमुपवाकाः करम्भस्य ॥२२॥
पयसो रूपँय्यद्यवा दध्नो रूपङ्कर्कन्धूनि ।
सोमस्य रूपँव्वाजिनꣳ सौम्म्यस्य रूपमामिक्षा ॥२३॥
आश्श्रावयेति स्तोत्रियाः प्प्रत्त्याश्श्रावोऽअनुरूपः ।
यजेति धाय्यारूपम्प्रगाथा येयजामहाः ॥२४॥
अर्द्धऽऋचैरुक्थानाꣳ रूपम्पदैराप्प्नोति निविद÷ ।
प्रणवैः शस्त्राणाꣳ रूपम्पयसा सोमऽआप्प्यते ॥२५॥
अश्विब्भ्याम्प्रातःसवनमिन्द्रेणैन्द्रम्माद्ध्यन्दिनम् ।
वैश्श्वदेवꣳ सरस्वत्त्या तृतीयमाप्तꣳ सवनम् ॥२६॥
वायव्यैर्व्वायव्यान्याप्प्नोति सतेन द्रोणकलशम् ।
कुम्भीब्भ्यामम्भृणौ सुते स्त्थालीभि स्त्थालीराप्प्नोति ॥२७॥

यजुर्भिराप्प्यन्ते ग्ग्रहा ग्ग्रहै स्तोमाश्च विष्ट्टुतीः ।
छन्दोभिरुक्क्थाशस्त्राणि साम्म्नावभृथऽआप्प्यते ॥२८॥
इडाभिर्ब्भक्क्षानाप्प्नोति सूक्क्तवाकेनाशिषः ।
शँय्युना पत्क्नीसँय्याजान्त्समिष्ट्टयजुषा सꣳस्त्थाम् ॥२९॥
व्व्रतेन दीक्क्षामाप्प्नोति दीक्क्षयाप्प्नोति दक्क्षिणाम् ।
दक्क्षिणा श्श्रद्धामाप्प्नोति श्श्रद्धया सत्त्यमाप्प्यते ॥३०॥
एतावद्द्रूपँय्यज्ज्ञस्य यद्देवैर्ब्ब्रह्मणा कृतम् ।
तदेतत्त्सर्व्वमाप्प्नोति यज्ज्ञे सौत्त्रामणी सुते ॥३१॥

॥३॥ सुरावन्तम्बर्हिषदꣳ सुवीरँय्यज्ज्ञꣳ हिन्न्वन्ति महिषा नमोभिः ।
दधानाः सोमन्दिवि देवतासु मदेमेन्द्रँय्यजमानाः स्वर्क्काः ॥३२॥
यस्ते रसः सम्भृतऽओषधीषु सोमस्य शुष्म्मः सुरया सुतस्य ।
तेन जिन्न्व यजमानम्मदेन सरस्वतीमश्श्विनाविन्द्रमग्ग्निम् ॥३३॥
यमश्श्विना नमुचेरासुरादधि सरस्वत्त्यसुनोदिन्द्रियाय । ॥४॥
इमन्तꣳ शुक्क्रम्मधुमन्तमिन्दुꣳ सोमꣳ राजानमिह भक्क्षयामि ॥३४॥
यदत्त्र रिप्प्तꣳ रसिनः सुतस्य यदिन्द्रोऽअपिबच्छचीभिः ।
अहन्तदस्य मनसा शिवेन सोमꣳ राजानमिह भक्क्षयामि ॥३५॥
पितृब्भ्यः स्वधायिब्भ्यः स्वधा नमः पितामहेब्भ्यः स्वधायिब्भ्यः स्वधा नमः
प्प्रपितामहेब्भ्यः स्वधायिब्भ्यः स्वधा नमः । अक्क्षन्न्पितरोमीमदन्त पितरोतीतृपन्त पितरः पितरः शुन्धद्ध्वम् ॥३६॥
पुनन्तु मा पितरः सोम्म्यासः पुनन्तु मा पितामहाः पुनन्तु प्प्रपितामहाः ।
पवित्त्रेण शतायुषा । पुनन्तु मा पितामहाः पुनन्तु प्प्रपितामहाः । पवित्त्रेण शतायुषा विश्श्वमायुर्व्यश्नवै ॥३७॥
अग्ग्नऽआयूꣳषि पवसऽआसुवोर्ज्जमिषञ्च नः । आरे बाधस्व दुच्छुनाम् ॥३८॥
पुनन्तु मा देवजनाः पुनन्तु मनसा धियः ।
पुनन्तु विश्श्वा भूतानि जातवेदः पुनीहि मा ॥३९॥
पवित्त्रेण पुनीहि मा शुक्क्रेण देव दीद्द्यत् । अग्ग्ने क्क्रत्त्वा क्क्रतूँ१॥रनु ॥४०॥
यत्ते पवित्त्रमर्च्चिष्ष्यग्ग्ने विततमन्तरा । ब्रह्म तेन पुनातु मा ॥४१॥
पवमानः सोऽअद्य नः पवित्त्रेण विचर्षणिः । यः पोता स पुनातु मा ॥४२॥

उभाब्भ्यान्देव सवितः पवित्त्रेण सवेन च । माम्पुनीहि विश्श्वतः ॥४३॥
वैश्श्वदेवी पुनती देव्व्यागाद्यस्यामिमा बह्व्यस्तन्न्वो वीतपृष्ठाः ।
तया मदन्तः सधमादेषु वयꣳ स्याम पतयो रयीणाम् ॥४४॥
ये समानाः समनसः पितरो यमराज्ज्ये ।
तेषाँल्लोकः स्वधा नमो यज्ञो देवेषु कल्प्पताम् ॥४५॥
ये समानाः समनसो जीवा जीवेषु मामकाः ।
तेषाꣳ श्रीर्म्मयि कल्प्पतामस्मिँल्लोके शतꣳ समाः ॥४६॥
द्वे सृतीऽअश्शृणवम्पितॄणामहन्देवानामुत मर्त्त्यानाम् ।
ताब्भ्यामिदँव्विश्श्वमेजत्त्समेति यदन्तरा पितरम्मातरञ्च ॥४७॥
इदꣳ हविः प्प्रजननम्मेऽअस्त्तु दशवीरꣳ सर्व्वगणꣳ स्वस्त्तये ।
आत्त्मसनि प्प्रजासनि पशुसनि लोकसन्न्यभयसनि ।
अग्निः प्प्रजाम्बहुलाम्मे करोत्त्वन्नम्पयो रेतोऽअस्म्मासु धत्त ॥४८॥

॥४॥ उदीरतामवरऽउत्त्परासऽउन्म्मद्ध्यमाः पितरः सोम्म्यासः ।
असुँय्यऽईयुरवृकाऽऋतज्ज्ञास्त्ते नोवन्तु पितरो हवेषु ॥४९॥
अङ्गिरसो नः पितरो नवग्ग्वाऽअथर्व्वाणो भृगवः सोम्म्यासः ।
तेषाँव्वयꣳ सुमतौ यज्ज्ञियानामपि भद्द्रे सौमनसे स्याम ॥५०॥
ये नः पूर्व्वे पितरः सोम्म्यासोनूहिरे सोमपीथँव्वसिष्ठाः ।
तेभिर्य्यमः सꣳरराणो हवीꣳष्ष्युशन्नुशद्भिः प्प्रतिकाममत्त्तु ॥५१॥
त्वꣳ सोम प्प्रचिकितो मनीषा त्त्वꣳ रजिष्ठमनुनेषि पन्थाम् ।
तव प्प्रणीती पितरो नऽइन्दो देवेषु रत्नमभजन्त धीराः ॥५२॥
त्वया हि नः पितरः सोम पूर्व्वे कर्म्माणि चक्क्रुः पवमान धीराः ।
वन्वन्नवातः परिधीँ१॥रपोर्ण्णु वीरेभिरश्श्वैर्म्मघवा भवा नः ॥५३॥
त्वꣳ सोम पितृभिः सँव्विदानोनु द्यावापृथिवीऽआततन्थ ।
तस्म्मै तऽइन्दो हविषा विधेम वयꣳ स्याम पतयो रयीणाम् ॥५४॥
बर्हिषदः पितरऽऊत्त्यर्व्वागिमा वो हव्या चकृमा जुषद्ध्वम् ।
तऽआगतावसा शन्तमेनाथा नः शँय्योररपो दधात ॥५५॥
आहम्पितॄन्त्सुविदत्राँ२॥ऽअवित्त्सि नपातञ्च विक्क्रमणञ्च विष्ष्णोः ।
बर्हिषदो ये स्वधया सुतस्य भजन्त पित्त्वस्तऽइहागमिष्ठाः ॥५६॥

उपहूताः पितरः सोम्म्यासो बर्हिष्ष्येषु निधिषु प्प्रियेषु ।
तऽआगमन्तु तऽइह श्श्रुवन्त्वधिब्ब्रुवन्तु तेवन्त्वस्मान् ॥५७॥
आयन्तु नः पितरः सोम्म्यासोग्ग्निष्ष्वात्ताः पथिभिर्द्देवयानैः ।
अस्मिन्न्यज्ञे स्वधया मदन्तोधिब्ब्रुवन्तु तेवन्त्वस्मान् ॥५८॥ ॥६॥
अग्निष्ष्वात्ताः पितरऽएह गच्छत सदःसदः सदत सुप्प्रणीतयः ।
अत्ता हवीꣳषि प्प्रयतानि बर्हिष्ष्यथा रयिꣳ सर्व्ववीरन्दधातन ॥५९॥
येऽअग्निष्ष्वात्ता येऽअनग्निष्ष्वात्ता मद्ध्ये दिवः स्वधया मादयन्ते ।
तेब्भ्यः स्वराडसुनीतिमेताँय्यथावशन्तन्न्वङ्कल्प्पयाति ॥६०॥
अग्निष्ष्वात्तानृतुमतो हवामहे नाराशꣳसे सोमपीथँय्यऽआशुः ।
ते नो व्विप्प्रासः सुहवा भवन्तु व्वयꣳ स्याम पतयो रयीणाम् ॥६१॥

॥५॥ आच्च्या जानु दक्क्षिणतो निषद्द्येमँय्यज्ञमभिगृणीत व्विश्श्वे ।
मा हिꣳसिष्ट पितरः केनचिन्नो यद्वऽआगः पुरुषता कराम ॥६२॥
आसीनासोऽअरुणीनामुपस्त्थे रयिन्धत्त दाशुषे मर्त्त्याय ।
पुत्त्रेब्भ्यः पितरस्तस्य व्वस्वः प्प्रयच्छत तऽइहोर्ज्जन्दधात ॥६३॥
यमग्ने कव्यवाहन त्वञ्चिन्मन्न्यसे रयिम् ।
तन्नो गीर्ब्भिः श्रवाय्यन्देवत्रा पनया युजम् ॥६४॥
योऽअग्निः कव्यवाहनः पितॄन्यक्षदृतावृधः ।
प्रेदु हव्यानि व्वोचति देवेब्भ्यश्च पितृब्भ्यऽआ ॥६५॥
त्वमग्नऽईडितः कव्यवाहनावाड्ढव्यानि सुरभीणि कृत्वी ।
प्रादाः पितृब्भ्यः स्वधया तेऽअक्षन्नद्धि त्वन्देव प्प्रयता हवीꣳषि ॥६६॥
ये चेह पितरो ये च नेह याँश्च व्विद्द्म याँ२ऽउ च न प्प्रविद्द्म ।
त्वँव्वेत्थ यति ते जातवेदः स्वधाभिर्य्यज्ञꣳ सुकृतञ्जुषस्व ॥६७॥
इदम्पितृब्भ्यो नमोऽअस्त्वद्य ये पूर्व्वासो यऽउपरासऽईयुः । ॥७
ये पार्थिवे रजस्या निषत्ता ये वा नूनꣳ सुवृजनासु व्विक्षु ॥६८॥
अधा यथा नः पितरः परासः प्प्रत्नासोऽअग्नऽऋतमाशुषाणाः ।
शुचीदयन्दीधितिमुक्थशासः क्षामा भिन्दन्तोऽअरुणीरपव्व्रन् ॥६९॥
उशन्तस्त्वा निधीमह्युशन्तः समिधीमहि ।
उशन्नुशतऽआवह पितॄन्हविषेऽअत्तवे ॥७०॥

अ॒पाम्फेने॑न॒ नमु॑चे॒ः शिर॑ऽइ॒न्द्रोद॑वर्त्तयः ।
विश्वा॒ यदज॑य॒ स्पृध॑ः ॥७१॥

॥६॥ सोमो॒ राजा॒मृत॑ꣳ सु॒तऽऋ॑जी॒षेणा॑जहान्मृ॒त्युम् ।
ऋ॒तेन॑ स॒त्त्यमि॑न्द्रि॒यँवि॒पान॑ꣳ शु॒क्रमन्ध॑स॒ऽइन्द्र॑स्येन्द्रि॒यमि॒दम्पयो॒मृत॒म्मधु॑ ॥७२॥
अ॒द्भ्यः क्षी॒रँव्य॑पिबत्क्रु॒ङ्ङा॑ङ्गिर॒सो धि॒या ।
ऋ॒तेन॑ स॒त्त्यमि॑न्द्रि॒यँवि॒पान॑ꣳ शु॒क्रमन्ध॑स॒ऽइन्द्र॑स्येन्द्रि॒यमि॒दम्पयो॒मृत॒म्मधु॑ ॥७३॥
सोम॑म॒द्भ्यो व्य॑पिब॒च्छन्द॑सा ह॒ꣳसः शु॑चि॒षत् ।
ऋ॒तेन॑ स॒त्त्यमि॑न्द्रि॒यँवि॒पान॑ꣳ शु॒क्रमन्ध॑स॒ऽइन्द्र॑स्येन्द्रि॒यमि॒दम्पयो॒मृत॒म्मधु॑ ॥७४॥
अन्ना॑त्परि॒स्रुतो॒ रस॒म्ब्रह्म॑णा॒ व्य॑पिबत्क्ष॒त्रम्पयः॒ सोम॑म्प्र॒जाप॑तिः ।
ऋ॒तेन॑ स॒त्त्यमि॑न्द्रि॒यँवि॒पान॑ꣳ शु॒क्रमन्ध॑स॒ऽइन्द्र॑स्येन्द्रि॒यमि॒दम्पयो॒मृत॒म्मधु॑ ॥७५॥
रेतो॒ मूत्रँ॒विज॑हाति॒ योनि॑म्प्रवि॒शदि॑न्द्रि॒यम् ।
गब्भो॑ ज॒रायु॒णावृ॑त॒ऽउल्ब॑ञ्जहाति॒ जन्म॑ना ।
ऋ॒तेन॑ स॒त्त्यमि॑न्द्रि॒यँवि॒पान॑ꣳ शु॒क्रमन्ध॑स॒ऽइन्द्र॑स्येन्द्रि॒यमि॒दम्पयो॒मृत॒म्मधु॑ ॥७६॥
दृ॒ष्ट्वा रू॒पे व्याक॑रोत्सत्त्यानृ॒ते प्प्र॒जाप॑तिः ।
अश्श्र॑द्धा॒मनृ॒तेद॑धाच्छ्र॒द्धाꣳ स॒त्त्ये प्प्र॒जाप॑तिः ।
ऋ॒तेन॑ स॒त्त्यमि॑न्द्रि॒यँवि॒पान॑ꣳ शु॒क्रमन्ध॑स॒ऽइन्द्र॑स्येन्द्रि॒यमि॒दम्पयो॒मृत॒म्मधु॑ ॥७७॥
वेदे॑न रू॒पे व्य॑पिबत्सुतासु॒तौ प्प्र॒जाप॑तिः ।
ऋ॒तेन॑ स॒त्त्यमि॑न्द्रि॒यँवि॒पान॑ꣳ शु॒क्रमन्ध॑स॒ऽइन्द्र॑स्येन्द्रि॒यमि॒दम्पयो॒मृत॒म्मधु॑ ॥७८॥
दृ॒ष्ट्वा परि॒स्रुतो॒ रस॑ꣳ शु॒क्रेण॑ शु॒क्रँव्य॑पिबत्पयः॒ सोम॑म्प्र॒जाप॑तिः ।
ऋ॒तेन॑ स॒त्त्यमि॑न्द्रि॒यँवि॒पान॑ꣳ शु॒क्रमन्ध॑स॒ऽइन्द्र॑स्येन्द्रि॒यमि॒दम्पयो॒मृत॒म्मधु॑ ॥७९॥

॥७॥ सीसे॑न॒ तन्त्र॒म्मन॑सा मनी॒षिण॑ऽऊर्ण्णासू॒त्रेण॑ क॒वयो॑ वयन्ति ।
अ॒श्विना॑ य॒ज्ञꣳ स॑वि॒ता सर॑स्वती॒न्द्र॑स्य रू॒पँव॑रुणो भिष॒ज्यन् ॥८०॥
तद॑स्य रू॒पम॒मृत॒ꣳ शची॑भिस्ति॒स्रो द॑धुर्दे॒वताः॑ सꣳररा॒णाः ।
लोमा॑नि॒ शष्प्पै॑र्ब्बहु॒धा न तोक्म॑भि॒स्त्वग॑स्य मा॒ꣳसम॑भव॒न्न ला॒जाः ॥८१॥
तद॒श्विना॑ भि॒षजा॑ रु॒द्रव॑र्त्तनी॒ सर॑स्वती वयति॒ पेशो॒ऽअन्त॑रम् ।
अस्त्थि॑ म॒ज्जान॒म्मास॑रैः कारो॒तरे॑ण॒ दध॑तो॒ गवा॑न्त्व॒चि ॥८२॥

सरस्वती मनसा पेशलँव्वसु नासत्त्याब्भ्याँव्वयति दर्शतँव्वपुः ।
रसम्परिस्रुता न रोहितन्नग्नहुर्द्धीरस्त्तसरन्न व्वेम ॥८३॥
पयसा शुक्रममृतञ्जनित्रꣳ सुरया मूत्राज्जनयन्त रेतः ।
अपामतिन्दुर्म्मतिम्बाधमानाऽऊवद्ध्यँव्वातꣳ सब्ब्वन्तदारात् ॥८४॥
इन्द्रः सुत्रामा हृदयेन सत्त्यम्पुरोडाशेन सविता जजान ।
यकृत्क्लोमानँव्वरुणो भिषज्ज्यन्मतस्ने व्वायव्व्यैर्न्न मिनाति पित्तम् ॥८५॥
आन्त्राणि स्त्थालीर्म्मधु पिन्न्वमाना गुदाः पात्राणि सुदुघा न धेनुः ।
श्येनस्य पत्रन्न प्प्लीहा शचीभिरासन्दी नाभिरुदरन्न माता ॥८६॥
कुम्भो व्वनिष्ठुर्ज्जनिता शचीभिर्य्यस्मिन्नग्ग्रे योन्न्याङ्गर्ब्भोऽअन्तः ।
प्लाशिर्व्व्यक्तः शतधारऽउत्त्सो दुहे न कुम्भी स्वधाम्पितृब्भ्यः ॥८७॥
मुखꣳ सदस्य शिरऽइत्त्सतेन जिह्वा पवित्रमश्श्विनासन्त्सरस्वती ।
चप्पन्न पायुर्ब्भिषगस्य व्वालो व्वस्तिर्न्न शेपो हरसा तरस्वी ॥८८॥
अश्श्विब्भ्याञ्चक्षुरमृतङ्ग्रहाब्भ्याञ्छागेन तेजो हविषा शृतेन ।
पक्ष्माणि गोधूमैः कुवलैरुतानि पेशो न शुक्रमसितँव्वसाते ॥८९॥
अविर्न्न मेषो नसि व्वीर्य्याय प्प्राणस्य पन्थाऽअमृतो ग्ग्रहाब्भ्याम् ।
सरस्वत्युपवाकैर्व्व्यानन्नस्यानि बर्हिर्ब्बदरैर्ज्जजान ॥९०॥
इन्द्रस्य रूपमृषभो बलाय कर्ण्णाब्भ्याꣳ श्रोत्रममृतङ्ग्रहाब्भ्याम् ।
यवा न बर्हिर्ब्भ्रुवि केसराणि कर्क्कन्धु जज्ञे मधु सारघम्मुखात् ॥९१॥
आत्त्मन्नुपस्त्थे न व्वृकस्य लोम मुखे श्म्मश्श्रूणि न व्व्याग्घ्रलोम ।
केशा न शीर्षन्न्यशसे श्श्रियै शिखा सिꣳहस्य लोम त्त्विषिरिन्द्रियाणि ॥९२॥
अङ्गान्न्यात्त्मन्भिषजा तदश्श्विनात्त्मानमङ्गैः समधात्त्सरस्वती ।
इन्द्रस्य रूपꣳ शतमानमायुश्श्चन्द्रेण ज्योतिरमृतन्दधानाः ॥९३॥
सरस्वती योन्न्याङ्गर्ब्भमन्तरश्श्विब्भ्याम्पत्नी सुकृतम्बिभर्त्ति ।
अपाꣳ रसेन व्वरुणो न साम्म्नेन्द्रꣳ श्श्रियै जनयन्नप्प्सु राजा ॥९४॥
तेजः पशूनाꣳ हविरिन्द्रियावत्परिस्रुता पयसा सारघम्मधु ।
अश्श्विब्भ्यान्दुग्धम्भिषजा सरस्वत्या सुतासुताब्भ्याममृतः सोमऽइन्दुः ॥९५॥

॥ इत्येकोनविंशोऽध्यायः ॥

अथ विंशोऽध्यायः

ऋषिः (१) 'क्षत्रस्य योनिः' इत्यारभ्य (९०) 'अश्विना पिबताम्' इत्यन्तानां सामान्यतः प्रजापतिरश्विनौ सरस्वती च ऋषयः। विशेषतश्च—

(२) 'निषसाद धृतव्रतः' इत्यस्य वरुणः शुनःशेपश्च, (२१) 'उद्वयन्तमसः' इत्यस्य प्रस्कण्वः, (२४) 'अभ्यादधामि' (२५) 'यत्र ब्रह्म' (२६) 'यत्रेन्द्रश्च' इत्येषामाश्वतराश्विः, (२९) 'धानावन्तङ्करम्भिणम्' इत्यस्य विश्वामित्रः, (३०) 'बृहदिन्द्राय' इत्यस्य नृमेधपुरुषमेधौ, (३२) 'यो भूतानाम्' इत्यस्य कौण्डिन्यो नारायणः, (३६) 'समिद्ध इन्द्रः' इत्यारभ्य (४६) 'स्तोकानामिन्दुम्' इत्यन्तानामङ्गिरसः, (४७) 'आ यातु' इत्यस्य वामदेवः, (५०) 'त्रातारमिन्द्रम्' इत्यस्य गर्गः, (५३) 'आ मन्द्रैः' इत्यस्य विश्वामित्रः, (५४) 'एवेदिन्द्रम्' इत्यस्य वसिष्ठः, (५५) 'समिद्धो अग्निः' इत्यारभ्य (६९) 'तमिन्द्रम्' इत्यन्तानां विदर्भिः, (८१) 'गोमदू षु' (८२) 'न यत्परः' (८३) 'ता न आ' इत्येषां गृत्समदः, (८४) 'पावका नः' इत्यारभ्य (८९) 'इन्द्रायाहि' इत्यन्तानां मधुच्छन्दाः॥

देवता (१) 'क्षत्रस्य योनिः' इत्यस्यासन्दी, 'मा त्वा' इत्यस्य कृष्णाजिनम्।
(२) 'निषसाद धृतव्रतः' इत्यस्य वरुणः, 'मृत्योः पाहि' 'विद्योत्पाहि' इत्यनयो रुक्मौ।
(३) 'देवस्य त्वा' इत्यस्य सविता, 'अश्विनोर्भैषज्येन' 'सरस्वत्यै भैषज्येन' 'इन्द्रस्येन्द्रियेण' इत्येषां लिङ्गोक्ता।
(४) 'कोसि कतमः' इत्यस्य प्रजापतिः।
(५) 'शिरो मे' (६) 'जिह्वा मे' (७) 'बाहू मे' (८) 'पृष्टीर्मे' (९) 'नाभिर्मे' इत्येषामिन्द्रशरीरावयवाः।
(१०) 'प्रति क्षत्रे' इत्यस्य विश्वे देवाः।
(११) 'त्रया देवाः' (१२) 'प्रथमा द्वितीयैः' इत्यनयोर्विश्वे देवाः।
(१३) 'लोमानि प्रयतिः' इत्यस्य लिङ्गोक्ता।
(१४) 'यद्देवाः' इत्यस्याग्निः।
(१५) 'यदि दिवा' इत्यस्य वायुः।
(१६) 'यदि जाग्रत्' इत्यस्य सूर्यः।
(१७) 'यद्ग्रामे' इत्यस्य लिङ्गोक्ता।
(१८) 'यदापो अघ्न्या' इत्यस्य वरुणः, 'अवभृथ निचुम्पुण' इत्यस्य यज्ञः।
(१९) 'समुद्रे ते' 'सुमित्रिया नः' (२०) 'द्रुपदादिव' इत्येषामापः।
(२१) 'उद्वयन्तमसः' इत्यस्य सूर्यः।
(२२) 'अपो अद्य' इत्यस्याग्निः।
(२३) 'एधोसि' 'समिदसि' इत्यनयोः समित्, 'समाववर्ति' इत्यस्याग्निः, 'वैश्वानरज्योतिः' इत्यस्य वैश्वानरः।
(२४) 'अभ्यादधामि' (२५) 'यत्र ब्रह्म' (२६) 'यत्रेन्द्रः' इत्येषामग्निः।
(२७) 'अᳫंशुना ते' इत्यस्य सूर्यः।
(२८) 'सिञ्चन्ति परि' इत्यस्य सूर्य इन्द्रो वा।
(२९) 'धानावन्तङ्करम्भिणम्' (३०) 'बृहदिन्द्राय' (३१) 'अध्वर्यो अद्रिभिः' इत्येषामिन्द्रः।
(३२) 'यो भूतानाम्' (३३) 'उपयाम० अश्विभ्याम्' 'एष ते योनिः' इत्येषां ग्रहः।
(३४) 'प्राणपा मे' (३५) 'अश्विनकृतस्य' इत्यनयोर्लिङ्गोक्ता।
(३६) 'समिद्ध इन्द्रः' इत्यस्येध्मः।
(३७) 'नराशᳫंसः प्रति' इत्यस्य तनूनपान्नराशंसो वा।
(३८) 'ईडितो देवैः' इत्यस्येडः।
(३९) 'जुषाणो बर्हिः' इत्यस्य बर्हिः।

(४०) 'इन्द्रन्दुरः' इत्यस्य द्वारः ।
(४१) 'उषासानक्ता बृहती' इत्यस्योषासानक्ता ।
(४२) 'दैव्या मिमाना' इत्यस्य दैव्यौ होतारौ ।
(४३) 'तिस्रो देवीः' इत्यस्य तिस्रो देव्यः ।
(४४) 'त्वष्टा दधत्' इत्यस्य त्वष्टा ।
(४५) 'वनस्पतिरवसृष्टः' इत्यस्य वनस्पतिः ।
(४६) 'स्तोकानामिन्दुम्' इत्यस्य स्वाहाकृतयः ।
(४७) 'आ यातु' (४८) 'आ न इन्द्रो दूरात्' (४९) 'आ न इन्द्रो हरिभिः' (५०) 'त्रातारमिन्द्रम्' (५१) 'इन्द्रः सुत्रामा' (५२) 'तस्य वयम्' (५३) 'आ मन्द्रैः' (५४) 'एवेदिन्द्रम्' इत्येषामिन्द्रः ।
(५५) 'समिद्धो अग्निः' (५६) 'तनूपा भिषजा' (५७) 'इन्द्रायेन्दुम्' (५८) 'आजुह्वाना सरस्वती' (५९) 'अश्विना नमुचेः' (६०) 'कवष्यो न' (६१) 'उषासानक्तम्' (६२) 'पातन्नः' (६३) 'तिस्रस्त्रेधा' (६४) 'अश्विना भेषजम्' (६५) 'ऋतुथेन्द्रः' (६६) 'गोभिर्न' इत्येषामश्विसरस्वतीन्द्राः, (६७) 'अश्विना हविः' (६८) 'यमश्विना' (६९) 'तमिन्द्रम्' इत्येषां प्रत्येकमश्विसरस्वतीन्द्राः ।
(७०) 'य इन्द्रः' (७१) 'सविता वरुणः' (७२) 'वरुणः क्षत्रम्' इत्येषां प्रत्येकमिन्द्रसवितृवरुणाः ।
(७३) 'अश्विना गोभिः' (७४) 'ता नासत्या' (७५) 'ता भिषजा' (७६) 'युवꣳ सुरामम्' (७७) 'पुत्रमिव' इत्येषां प्रत्येकमश्विसरस्वतीन्द्राः ।
(७८) 'यस्मिन्नश्वासः' (७९) 'अहाव्यग्ने' इत्यनयोरग्निः ।
(८०) 'अश्विना तेजसा' इत्यस्याश्विसरस्वतीन्द्राः ।
(८१) 'गोमदू षु' (८२) 'न यत्परः' (८३) 'ता न' इत्येषामश्विनौ ।
(८४) 'पावका नः' (८५) 'चोदयित्री सूनृतानाम्' (८६) 'महो अर्णः' इत्येषां सरस्वती ।
(८७) 'इन्द्रायाहि चित्रभानो' (८८) 'इन्द्रायाहि धियेषितः' (८९) 'इन्द्रायाहि तूतुजानः' इत्येषामिन्द्रः ।
(९०) 'अश्विना पिबताम्' इत्यस्याश्विसरस्वतीन्द्राः ।

छन्दः (१) 'क्षत्रस्य योनिः' इत्यस्य द्विपदा गायत्री, (२) 'निषसाद धृतव्रतः' (४) 'कोसि कतमः' इत्यनयोर्गायत्री, (५) 'शिरो मे' (६) 'जिह्वा मे' इत्यनयोरनुष्टुप्, (७) 'बाहू मे' इत्यस्य गायत्री, (८) 'पृष्टीर्मे' इत्यस्यानुष्टुप्, (९) 'नाभिर्मे' इत्यस्य महापङ्क्तिः, (११) 'त्रया देवाः' इत्यस्य पङ्क्तिः, (१३) 'लोमानि प्रयतिः' इत्यस्यानुष्टुप्, (१४) 'यद्देवाः' (१५) 'यदि दिवा' (१६) 'यदि जाग्रत्' इत्येषामनुष्टुप्, (१९) 'समुद्रे ते' इत्यस्य द्विपदा विराट्, (२०) 'द्रुपदादिव' (२१) 'उद्वयन्तमसः' इत्यनयोरनुष्टुप्, (२२) 'अपो अद्य' इत्यस्य पङ्क्तिः, (२३) 'समाववर्ति' इत्यस्य गायत्री, (२४) 'अभ्यादधामि' इत्यारभ्य (२८) 'सिञ्चन्ति परि' इत्यन्तानामनुष्टुप्, (२९) 'धानावन्तङ्करम्भिणम्' इत्यस्य गायत्री, (३०) 'बृहदिन्द्राय' इत्यस्य बृहती, (३१) 'अध्वर्यो अद्रिभिः' इत्यस्य गायत्री, (३२) 'यो भूतानाम्' इत्यस्य पङ्क्तिः, (३४) 'प्राणपा मे' इत्यस्यानुष्टुप्, (३५) 'अश्विनकृतस्य ते' इत्यस्योपरिष्टाद्बृहती, (३६) 'समिद्ध इन्द्रः' इत्यारभ्य (५२) 'तस्य वयम्' इत्यन्तानां त्रिष्टुप्, (५३) 'आ मन्द्रैः' इत्यस्य बृहती, (५४) 'एवेदिन्द्रम्' इत्यस्य त्रिष्टुप्, (५५) 'समिद्धो अग्निः' इत्यारभ्य (७६) 'युवꣳ सुरामम्' इत्यन्तानामनुष्टुप्, (७७) 'पुत्रमिव' इत्यस्य त्रिष्टुप्; (७८) 'यस्मिन्नश्वासः' इत्यस्य जगती, (७९) 'अहाव्यग्ने' इत्यस्य त्रिष्टुप्, (८०) 'अश्विना तेजसा' इत्यस्यानुष्टुप्, (८१) 'गोमदू षु' इत्यारभ्य (८९) 'इन्द्रायाहि' इत्यन्तानां गायत्री, (९०) 'अश्विना पिबताम्' इत्यस्यानुष्टुप् ॥

॥ हरिःॐ ॥

॥१॥ क्ष॒त्रस्य॒ योनि॑रसि क्ष॒त्रस्य॒ नाभि॑रसि ।
मा त्वा॑ हिꣳसी॒न्मा मा॑ हिꣳसीः ॥१॥

निष॑साद धृ॒तव्र॑तो॒ वरु॑णः प॒स्त्या᳕स्वा ।
साम्म्रा॑ज्याय सु॒क्क्रतुः॑ । मृत्त्योः पा॑हि वि॒द्द्योत्त्पा॑हि ॥२॥
दे॒वस्य॑ त्त्वा सवि॒तुः प्प्र॑स॒वे᳕श्विनो॑र्ब्बा॒हुभ्या॒म्पूष्ण्णो हस्ता॑भ्याम् ।
अ॒श्विनो॒र्भैष॑ज्ज्येन॒ तेज॑से ब्रह्मवर्च्च॒साया॒भिषि॑ञ्चामि॒ सर॑स्वत्त्यै॒ भैष॑ज्ज्येन वी॒र्य्या᳕या॒-
न्नाद्या॑या॒भिषि॑ञ्चा॒मीन्द्र॑स्येन्द्रि॒येण॒ बला॑य श्श्रि॒यै यश॑से॒भिषि॑ञ्चामि ॥३॥
को॑सि क॒त॒मो॑सि॒ कस्म्मै॑ त्त्वा॒ काय॑ त्त्वा । सुश्श्लो॑क॒ सुम॑ङ्गल॒ सत्त्य॑राजन् ॥४॥
शिरो॑ मे॒ श्श्रीर्य्य॒शो॒ मुख॒न्त्विषिः॒ केशा॑श्च॒ श्म्मश्श्रू॑णि ।
राजा॑ मे प्प्रा॒णोऽअ॒मृत॑ꣳ स॒म्म्राट्चक्षु॑र्व्वि॒राट्छ्रोत्र॑म् ॥५॥
जि॒ह्वा मे॑ भ॒द्रँव्वाङ्म॒हो मनो॑ म॒न्न्युः स्व॒राड्भाम॑ः ।
मोदाः॑ प्प्रमो॒दाऽअ॒ङ्गुली॒रङ्गा॑नि मि॒त्रम्मे॒ सहः॑ ॥६॥
बा॒हू मे॒ बल॑मिन्द्रि॒यꣳ हस्तौ॑ मे॒ कर्म्म॑ वी॒र्य्य᳕म् आ॒त्मा क्ष॒त्रमुरो॒ मम॑ ॥७॥
पृष्टीर्म्मे॑ रा॒ष्ट्रमु॒द॒रमꣳसौ॑ ग्ग्री॒वाश्च॒ श्श्रोणी॑ ।
ऊ॒रूऽअ॑र॒त्नी जानु॑नी॒ वि॒शो मेङ्गा॑नि स॒र्व्वतः॑ ॥८॥
नाभि॑र्म्मे चि॒त्तँव्वि॒ज्ञान॑म्पा॒युर्म्मेप॑चिति॒र्भ॒सत् ।
आ॒न॒न्द॒न॒न्दावा॒ण्डौ मे॒ भगः॒ सौभा॑ग्ग्यम्पसः॑ ।
जङ्घा॑भ्याम्प॒द्द्भ्यान्धर्म्मो॑स्मि वि॒शि राजा॒ प्प्रति॑ष्ठितः ॥९॥
प्रति॑ क्ष॒त्रे प्प्रति॑तिष्ठामि रा॒ष्ट्रे प्प्रत्त्यश्श्वे॑षु॒ प्प्रति॑तिष्ठामि॒ गोषु॑ ।
प्र॒त्त्यङ्गे॑षु॒ प्प्रति॑तिष्ठाम्म्या॒त्मन्प्रति॒ प्प्रा॒णेषु॒ प्प्रति॑तिष्ठामि पु॒ष्टे प्प्रति॒ द्यावा॑-
पृथि॒व्योः प्प्रति॑तिष्ठामि य॒ज्ञे ॥१०॥
त्र॒या दे॒वाऽएका॑दश त्त्रयस्त्रि॒ꣳशाः सु॒राध॑सः ।
बृह॒स्प्पति॑पुरोहिता दे॒वस्य॑ सवि॒तुः स॒वे । दे॒वा दे॒वैर॑वन्तु मा ॥११॥
○ प्र॒थ॒मा द्वि॒तीयै॑र्द्वि॒तीया॑स्तृ॒तीयै॑स्तृ॒तीयाः॑ स॒त्त्येन॑ स॒त्त्यँय्य॒ज्ञेन॑ य॒ज्ञो यजु॑र्भि॒र्य्य-
जूꣳ॑षि साम॑भिः॒ साम॑न्यृ॒ग्ग्भिर्ऋ॒चः॑ पु॒रोनुवा॒क्क्या᳕भिः॑ पु॒रोनुवा॒क्क्या᳕ या॒ज्ज्या᳕भि-
र्य्याज्ज्या᳕ वषट्का॒रैर्व्वषट्का॒राऽआहु॑तिभि॒राहु॑तयो मे॒ कामा॒न्त्सम॑र्द्धयन्तु॒ भूः स्वाहा॑ ॥१२॥
लोमा॑नि॒ प्प्रय॑ति॒र्म्मम॒ त्त्वङ्म॒ऽआन॑ति॒राग॑तिः ।
मा॒ꣳसम्म॒ऽउप॑नति॒र्व्वस्स्व॒स्थि म॒ज्जा म॒ऽआन॑तिः ॥१३॥

॥२॥ यद्दे॑वा दे॒व॒हेड॑न॒न्दे॒वा॑सश्चकृ॒मा व॒यम् ।
अ॒ग्निर्म्मा॒ त॒स्मादे॒न॑सो॒ विश्श्वा॑न्मुञ्च॒त्त्वꣳह॑सः ॥१४॥

यदि॒ दिवा॒ यदि॒ नक्त॒मेना॑ꣳसि चकृ॒मा व॒यम् ।
वा॒युर्म्मा॒ तस्म्मा॒देन॑सो॒ विश्श्वा॑न्मुञ्च॒त्त्वꣳह॑सः ॥१५॥
यदि॒ जाग्ग्रद्यदि॒ स्वप्न॒ऽएना॑ꣳसि चकृ॒मा व॒यम् ।
सूर्य्यो॑ मा॒ तस्म्मा॒देन॑सो॒ विश्श्वा॑न्मुञ्च॒त्त्वꣳह॑सः ॥१६॥
यद्ग्रामे॒ यदर॑ण्ण्ये॒ यत्स॒भायाँ॒य्यदि॑न्द्रि॒ये ।
यच्छूद्रे॒ यद॒र्य्ये॒ यदेन॑श्चकृ॒मा व॒यँय्यदेक॒स्याधि॒धर्म्म॑णि॒ तस्या॑व॒यज॑नमसि ॥१७॥
यदापो॑ऽअ॒घ्न्याऽइति॒ वरु॒णेति॒ शपा॑महे॒ ततो॑ वरुण नो मुञ्च ।
अव॑भृथ निचुम्पुण निचे॒रुर॑सि निचु॒म्पु॒णः ।
अव॑ दे॒वैर्द्दे॒वकृ॑त॒मेनो॑य॒क्क्ष्यव॒ मर्त्त्यै॒र्म्मर्त्त्य॑कृतम्पुरु॒राव्ण्णो॑ देव रि॒षस्प्पा॑हि ॥१८॥
स॒मु॒द्रे ते॒ हृद॑यम॒प्प्स्व॒न्तः सन्त्वा॑ विश॒न्त्वोष॑धीरु॒ताप॑ः । सु॒मि॒त्त्रि॒या न॒ऽआप॒ऽओष॑धयः सन्तु दुर्म्मित्त्रि॒यास्त॒स्म्मै सन्तु॒ यो॒ऽस्म्मान्द्वेष्टि॒ यञ्च॑ व॒यन्द्वि॒ष्म्मः ॥१९॥
द्रु॒प॒दादि॑व मुमुचा॒नः स्वि॒न्नः स्ना॒तो मला॑दिव ।
पू॒तम्प॒वित्त्रे॑णे॒वाज्ज्य॒माप॑ः शुन्धन्तु॒ मैन॑सः ॥२०॥
उद्व॒यन्तम॑स॒स्प्पर॒ि स्वः॒ पश्श्य॑न्त॒ऽउत्त॑रम् ।
दे॒वन्दे॑व॒त्रा सूर्य्य॒मग॑न्म॒ ज्ज्योति॑रु॒त्त॒मम् ॥२१॥
अ॒पोऽअ॒द्यान्व॑चारिषꣳ॒ रसे॑न॒ सम॑सृक्ष्महि ।
पय॑स्वानग्न॒ऽआग॑मन्तम्मा॒ सꣳसृ॑ज॒ वर्च्च॑सा प्प्र॒जया॑ च॒ धने॑न च ॥२२॥
ए॒धो॒स्येधिषी॒महि॑ स॒मिद॑सि॒ तेजो॑सि॒ तेजो॒ मयि॑ धेहि ।
स॒मा॑ववर्त्ति पृथि॒वी सम॒ुषाः सम॒ु सूर्य्यः॑ । सम॒ु विश्श्व॑मि॒दञ्जग॑त् ।
वै॒श्श्वा॒न॒रज्ज्योति॑र्ब्भूयासँ॒व्वि॒भून्कामा॒न्व्य॑श्श्नवै॒ भूः स्वाहा॑ ॥२३॥

॥३॥ अ॒भ्याद॑धामि स॒मिध॒मग्ने॑ व्रतपते॒ त्वयि॑ ।
व्र॒तञ्च॑ श्श्र॒द्धाञ्चोपै॑मी॒न्धे त्वा॑ दीक्षि॒तोऽअ॒हम् ॥२४॥
यत्र॒ ब्रह्म॑ च क्क्ष॒त्रञ्च॑ स॒म्म्य॒ञ्चौ॒ चर॑तः स॒ह ।
तँल्लो॒कम्पु॒ण्ण्यम्प्रज्ज्ञे॑षँ॒य्यत्र॑ दे॒वाः स॒हाग्ग्निना॑ ॥२५॥
यत्रेन्द्र॑श्च वा॒युश्च॑ स॒म्म्य॒ञ्चौ॒ चर॑तः स॒ह ।
तँल्लो॒कम्पु॒ण्ण्यम्प्रज्ज्ञे॑षँ॒य्यत्र॑ से॒दिर्न्न वि॒द्यते॑ ॥२६॥
अ॒ꣳशुना॑ ते॒ऽअ॒ꣳशुः पृ॒च्च्यता॒म्परु॑षा॒ परु॑ः ।
ग॒न्धस्ते॒ सोम॑मवतु॒ मदा॑य॒ रसो॒ऽअच्च्यु॑तः ॥२७॥

सि॒ञ्चन्ति॒ परि॑षिञ्च॒न्त्यु॒त्सि॑ञ्चन्ति पु॒नन्ति॑ च ।
सु॒रायै॑ ब॒ब्भ्र्वै॒ मदे॑ कि॒न्त्वो व॑दति कि॒न्त्वः ॥२८॥
धा॒नाव॑न्तङ्कर॒म्भिण॑मपू॒पव॑न्तमु॒क्थिन॑म् । इन्द्र॑ प्प्रा॒तर्जु॑षस्व नः ॥२९॥
बृ॒हदिन्द्रा॑य गायत॒ मरु॑तो वृत्र॒हन्त॑मम् ।
येन॒ ज्ज्योति॒रज॑नयन्नृता॒वृधो॑ दे॒वन्दे॒वाय॒ जागृ॑वि ॥३०॥
अ॒द्ध्वर्य्यो॒ऽअद्रि॑भिः सु॒तꣳ सोम॑म्प॒वित्र॒ऽआन॑य । पु॒नी॒हीन्द्रा॑य॒ पात॑वे ॥३१॥

॥४॥ यो भू॒ताना॒मधि॑पति॒र्य्यस्म्मिँ॑ल्लो॒काऽअधि॑श्श्रि॒ताः ।
यऽई॒शे म॑ह॒तो म॒हाँस्तेन॑ गृह्णामि॒ त्वाम॒हम्मयि॑ गृह्णामि॒ त्वाम॒हम् ॥३२॥
उ॒प॒या॒मगृ॑हीतोस्य॒श्विब्भ्या॑न्त्वा॒ सर॑स्वत्यै॒ त्वेन्द्रा॑य त्वा सु॒त्राम्म्ण॑ऽए॒ष ते॒ योनि॑र॒श्विब्भ्या॑न्त्वा॒
सर॑स्वत्यै॒ त्वेन्द्रा॑य त्वा सु॒त्राम्म्णे॑ ॥३३॥
प्रा॒ण॒पा मे॑ऽअपान॒पाश्च॑क्षु॒ष्प्पाः श्श्रो॑त्र॒पाश्च॑ मे ।
वा॒चो मे॑ वि॒श्वभे॑षजो॒ मन॑सोसि वि॒लाय॑कः ॥३४॥
अ॒श्विन॑कृतस्य ते॒ सर॑स्वतिकृत॒स्येन्द्रे॑ण सु॒त्राम्म्णा॑ कृ॒तस्य॑ ।
उप॑हूत॒ऽउप॑हूतस्य भक्षयामि ॥३५॥

॥५॥ समि॑द्ध॒ऽइन्द्र॑ऽउ॒षसा॒मनी॑के पुरो॒रुचा॑ पूर्व्व॒कृद्वा॑वृधा॒नः ।
त्रि॒भिर्द्दे॒वैस्त्रि॒ꣳशता॒ वज्ज्र॑बाहुर्ज्ज॒घान॑ वृ॒त्रँव्वि दुरो॑ व॒वार ॥३६॥
नरा॒शꣳसः॒ प्प्रति॒ शूरो॑ मिमा॑न॒स्तनू॒नपा॒त्प्रति॑ य॒ज्ज्ञस्य॒ धाम॑ ।
गोभि॑र्व्व॒पावा॒न्मधु॑ना सम॒ञ्जन्हिर॑ण्ण्यैश्च॒न्द्री य॑जति॒ प्प्रचे॑ताः ॥३७॥
ई॒डि॒तो दे॒वैर्हरि॑वाँ२॥ऽअभि॒ष्टिरा॒जुह्वा॑नो ह॒विषा॒ शर्द्ध॑मानः ।
पु॒र॒न्द॒रो गो॑त्र॒भिद्वज्ज्र॑बाहु॒राया॑तु य॒ज्ज्ञमुप॑ नो जुषा॒णः ॥३८॥
जु॒षा॒णो ब॒र्हिर्हरि॑वान्न॒ऽइन्द्रः॒ प्प्रा॒चीन॑ꣳ सीदत्प्प्र॒दिशा॑ पृथि॒व्व्याः ।
उ॒रु॒प्प्रथाः॒ प्प्रथ॑मानꣳ स्यो॒नमा॑दि॒त्यैर॒क्तँव्वसु॑भिः स॒जोषाः॑ ॥३९॥
इन्द्र॒न्दुरः॑ क॒वष्ष्यो॒ धाव॑माना॒ वृषा॑णँय्यन्तु॒ जन॑यः सु॒पत्नीः॑ ।
द्वारो॑ दे॒वीर॒भितो॒ विश्श्र॑यन्ताꣳ सु॒वीरा॑ वी॒रम्प्प्रथ॑माना॒ महो॑भिः ॥४०॥
उ॒षासा॒नक्ता॑ बृह॒ती बृ॒हन्त॒म्पय॑स्वती सु॒दुघे॒ शूर॒मिन्द्र॑म् ।
तन्तु॑न्त॒तम्पेश॑सा सँ॒व्वय॑न्ती दे॒वाना॑न्दे॒वँय्य॑जतः सुरु॒क्मे ॥४१॥
दैव्व्या॒ मिमा॑ना॒ मनु॑षः पुरु॒त्रा होता॑रा॒विन्द्र॑म्प्प्रथ॒मा सु॒वाचा॑ ।
मू॒र्द्धन्य॒ज्ज्ञस्य॒ मधु॑ना॒ दधा॑ना प्प्रा॒चीन॒ञ्ज्योति॑र्ह॒विषा॑ वृधातः ॥४२॥

तिस्रो देवीर्हविषा वर्द्धमानाऽइन्द्रञ्जुषाणा जनयो न पत्नीः ।
अच्छिन्नन्तन्तुम्पयसा सरस्वतीडा देवी भारती विश्वतूर्त्तिः ॥४३॥
त्वष्टा दधच्छुष्ममिन्द्राय वृष्णेपाकोचिष्टुर्य्यशसे पुरूणि ।
वृषा यजन्वृषणम्भूरिरेता मूर्द्धन्यज्ञस्य समनक्तु देवान् ॥४४॥
वनस्पतिरवसृष्टो न पाशैस्त्मन्या समञ्जञ्छमिता न देवः ।
इन्द्रस्य हव्यैर्जठरम्पृणानः स्वदाति यज्ञम्मधुना घृतेन ॥४५॥
स्तोकानामिन्दुम्प्रति शूरऽइन्द्रो वृषायमाणो वृषभस्तुराषाट् ।
घृतप्रुषा मनसा मोदमानाः स्वाहा देवाऽअमृता मादयन्ताम् ॥४६॥

॥६॥ आयात्विन्द्रोवसऽउप नऽइह स्तुतः सधमादस्तु शूरः ।
वावृधानस्तविषीर्य्यस्य पूर्व्वीर्द्यौर्न्न क्षत्रमभिभूति पुष्यात् ॥४७॥
आ नऽइन्द्रो दूरादा नऽआसादभिष्टिकृदवसे यासदुग्रः ।
ओजिष्ठेभिर्नृपतिर्वज्ज्रबाहुः सङ्गे समत्सु तुर्वणिः पृतन्यून् ॥४८॥
आ नऽइन्द्रो हरिभिर्य्यात्वच्छार्वाचीनोवसे राधसे च ।
तिष्ठाति वज्ज्री मघवा विरप्शीमँय्यज्ञमनु नो वाजसातौ ॥४९॥
त्रातारमिन्द्रमवितारमिन्द्रꣳ हवेहवे सुहवꣳ शूरमिन्द्रम् ।
ह्वयामि शक्रम्पुरुहूतमिन्द्रꣳ स्वस्ति नो मघवा धात्विन्द्रः ॥५०॥
इन्द्रः सुत्रामा स्ववाँ॥ऽअवोभिः सुमृडीको भवतु विश्ववेदाः ।
बाधतान्द्वेषोऽअभयङ्कृणोतु सुवीर्य्यस्य पतयः स्याम ॥५१॥
तस्य वयꣳ सुमतौ यज्ञियस्यापि भद्रे सौमनसे स्याम ।
स सुत्रामा स्ववाँ॥ऽइन्द्रोऽअस्मेऽआराच्चिद्द्वेषः सनुतर्य्युयोतु ॥५२॥
आ मन्द्रैरिन्द्र हरिभिर्य्याहि मयूररोमभिः । ॥८॥
मा त्वा केचिन्नियमन्विन्न पाशिनोति धन्वेव ताँ॥ऽइहि ॥५३॥
एवेदिन्द्रँवृषणँवज्ज्रबाहुँवसिष्ठासोऽअभ्यर्च्चन्त्यर्क्कैः ।
स न स्तुतो वीरवद्धातु गोमद्यूयम्पात स्वस्तिभिः सदा नः ॥५४॥

॥७॥ समिद्धोऽअग्निरश्विना तप्तो घर्म्मो विराट्सुतः ।
दुहे धेनुः सरस्वती सोमꣳ शुक्रमिहेन्द्रियम् ॥५५॥
तनूपा भिषजा सुतेश्विनोभा सरस्वती ।
मद्ध्वा रजाꣳसीन्द्रियमिन्द्राय पथिभिर्वहान् ॥५६॥

इन्द्रायेन्दुꣳ सरस्वती नराशꣳसेन नग्नहुम् ।
अधातामश्विना मधु भेषजम्भिषजा सुते ॥५७॥
आजुह्वाना सरस्वतीन्द्रायेन्द्रियाणि वीर्य्यम् ।
इडाभिरश्विनाविषꣳ समूर्जꣳ सꣳ रयिन्दधुः ॥५८॥
अश्विना नमुचेः सुतꣳ सोमꣳ शुक्रम्परिस्रुता ।
सरस्वती तमाभरद्बर्हिषेन्द्राय पातवे ॥५९॥
कवष्यो न व्यचस्वतीरश्विभ्यान्न दुरो दिशः ।
इन्द्रो न रोदसीऽउभे दुहे कामान्त्सरस्वती ॥६०॥
उषासानक्तमश्विना दिवेन्द्रꣳ सायमिन्द्रियैः ।
सञ्जानाने सुपेशसा समञ्जाते सरस्वत्या ॥६१॥
पातन्नोऽअश्विना दिवा पाहि नक्तꣳ सरस्वति ।
दैव्या होतारा भिषजा पातमिन्द्रꣳ सचा सुते ॥६२॥
तिस्रस्त्रेधा सरस्वत्यश्विना भारतीडा ।
तीव्रम्परिस्रुता सोममिन्द्राय सुषुवुर्म्मदम् ॥६३॥
अश्विना भेषजम्मधु भेषजन्नः सरस्वती ।
इन्द्रे त्वष्टा यशः श्रियꣳ रूपꣳरूपमधुः सुते ॥६४॥
ऋतुथेन्द्रो वनस्पतिः शशमानः परिस्रुता ।
कीलालमश्विभ्याम्मधु दुहे धेनुः सरस्वती ॥६५॥
गोभिर्न्न सोममश्विना मासरेण परिस्रुता ।
समधातꣳ सरस्वत्या स्वाहेन्द्रे सुतम्मधु ॥६६॥

॥८॥ अश्विना हविरिन्द्रियन्नमुचेर्द्धिया सरस्वती ।
आ शुक्रमासुराद्वसु मघमिन्द्राय जभ्रिरे ॥६७॥
यमश्विना सरस्वती हविषेन्द्रमवर्द्धयन् ।
स बिभेद वलम्मघन्नमुचावासुरे सचा ॥६८॥
तमिन्द्रम्पशवः सचाश्विनोभा सरस्वती ।
दधानाऽअभ्यनूषत हविषा यज्ञऽइन्द्रियैः ॥६९॥
यऽइन्द्रऽइन्द्रियन्दधुः सविता वरुणो भगः ।
स सुत्रामा हविष्पतिर्य्यजमानाय सश्चत ॥७०॥

स॒वि॒ता वरु॑णो॒ दध॒द्यज॑मानाय दा॒शुषे॑ ।
आद॑त्त॒ नमु॑चे॒र्वसु॑ सु॒त्रामा॒ बल॑मिन्द्रि॒यम् ॥७१॥
वरु॑णः क्ष॒त्रमि॑न्द्रि॒यम्भगे॑न सवि॒ता श्रिय॑म् ।
सु॒त्रामा॒ यश॑सा॒ बल॒न्दधा॑ना य॒ज्ञमा॑शत ॥७२॥
अ॒श्विना॒ गोभि॑रिन्द्रि॒यमश्वे॑भिर्वी॒र्य्य॒म्बल॑म् ।
ह॒विषेन्द्र॒ꣳ सर॑स्वती॒ यज॑मानमवर्द्धयन् ॥७३॥
ता नास॑त्त्या सु॒पेश॑सा॒ हिर॑ण्यवर्त्तनी॒ नरा॑ ।
सर॑स्वती ह॒विष्म्म॑ती॒न्द्र कर्म्म॑सु नोवत ॥७४॥
ता भि॒षजा॑ सु॒कर्म्म॑णा॒ सा सु॒दुघा॒ सर॑स्वती ।
स वृ॑त्र॒हा श॒तक्क्र॑तु॒रिन्द्रा॑य दधु॒रिन्द्रि॒यम् ॥७५॥
यु॒वꣳ सु॒राम॑मश्विना॒ नमु॑चावासु॒रे सचा॑ । वि॒पि॒पा॒नाः स॑रस्वती॒न्द्रङ्कर्म्म॑स्वावत ॥७६॥
पु॒त्रमि॑व पि॒तरा॑व॒श्विनो॒भेन्द्रा॒वथुः॒ काव्यै॑र्द॒ꣳसना॑भिः ।
यत्त्सु॒रामँ॒व्यपि॑बः॒ शची॑भिः॒ सर॑स्वती त्वा मघवन्न॒भिष्ण॑क् ॥७७॥
यस्मि॒न्नश्वा॑सऽऋष॒भास॑ऽउ॒क्षणो॑ व॒शा मे॒षाऽअ॑वसृ॒ष्टास॒ऽआहु॑ताः ।
कीला॒लपे॒ सोम॑पृष्ठाय वे॒धसे॑ हृ॒दा म॒तिञ्ज॑नय॒ चारु॑म॒ग्नये॑ ॥७८॥
अहा॑व्यग्ने ह॒विरा॒स्ये॑ ते स्रु॒चीव॑ घृ॒तञ्च॒म्वीव॒ सोमः॑ ।
वा॒ज॒सनि॒ꣳ र॒यिम॒स्मे सु॒वीर॑म्प्रश॒स्तन्धे॑हि य॒शस॑म्बृ॒हन्त॑म् ॥७९॥

॥९॥ अ॒श्विना॒ तेज॑सा॒ चक्षुः॑ प्रा॒णेन॒ सर॑स्वती वी॒र्य्य॑म् ।
वा॒चेन्द्रो॒ बले॒नेन्द्रा॑य दधु॒रिन्द्रि॒यम् ॥८०॥
गोम॑दू॒ षु णा॑स॒त्त्याश्वा॑वद्यातमश्विना । व॒र्त्ती रु॑द्रा नृ॒पाय्य॑म् ॥८१॥
न यत्परो॒ नान्त॑रऽआद॒धर्ष॑द्वृषण्वसू । दुःश॒ꣳसो॒ मर्त्त्यो॑ रि॒पुः ॥८२॥
ता न॒ऽआवो॑ढमश्विना र॒यिम्पि॒शङ्ग॑सन्दृशम् । धिष्ण्ण्या॑ वरिवो॒विद॑म् ॥८३॥
पा॒व॒का नः॒ सर॑स्वती॒ वाजे॑भिर्वा॒जिनी॑वती । य॒ज्ञँव॑ष्टु धि॒याव॑सुः ॥८४॥
चो॒द॒यि॒त्री सू॒नृता॑नाञ्चे॒त॑न्ती सुमती॒नाम् । य॒ज्ञन्द॑धे॒ सर॑स्वती ॥८५॥
म॒होऽअर्ण्णः॒ सर॑स्वती॒ प्रचे॑तयति के॒तुना॑ । धियो॒ विश्वा॒ विरा॑जति ॥८६॥
इन्द्राया॑हि चित्रभानो सु॒ताऽइ॒मे त्वा॒यवः॑ । अण्वी॑भि॒स्तना॑ पू॒तासः॑ ॥८७॥
इन्द्राया॑हि धि॒येषि॒तो विप्र॑जूतः सु॒ताव॑तः । उप॒ ब्रह्मा॑णि वा॒घतः॑ ॥८८॥
इन्द्राया॑हि॒ तूतु॑जान॒ऽउप॒ ब्रह्मा॑णि हरिवः । सु॒ते द॑धिष्व न॒श्चनः॑ ॥८९॥

अश्विना पिबताम्मधु सरस्वत्या सजोषसा ।
इन्द्रः सुत्रामा वृत्रहा जुषन्ताᳬं सोम्म्यम्मधु ॥९०॥

॥ इति विंशोऽध्यायः ॥

॥ इति पूर्वविंशतिः ॥

॥ अथोत्तरविंशतिः ॥

अथैकविंशोऽध्यायः

ऋषिः (१) 'इमम्मे' इत्यारभ्य (६१) 'त्वामद्य' इत्यन्तानां सामान्यतः प्रजापतिरश्विनौ सरस्वती च ऋषयः ।
विशेषतश्च—
(१) 'इमम्मे' (२) 'तत्त्वा यामि' इत्यनयोः शुनःशेपः, (३) 'त्वन्नः' (४) 'स त्वम्' इत्यनयोर्वामदेवः, (६) 'सुत्रामाणम्पृथिवीम्' इत्यस्य गयः प्लातः, (८) 'आ नः' इत्यस्य विश्वामित्रः, (९) 'प्र बाहवा' (१०) 'शन्नः' (११)
७६॥ 'वाजेवाजे' इत्येषां वसिष्ठः, (१२) 'समिद्धो अग्निः' इत्यारभ्य (२२) 'स्वाहा यज्ञम्' इत्यन्तानां स्वस्त्यात्रेयः ॥

देवता (१) 'इमम्मे' (२) 'तत्त्वा यामि' इत्यनयोर्वरुणः ।
(३) 'त्वन्नः' (४) 'स त्वम्' इत्यनयोरग्नीवरुणौ ।
(५) 'महीमू षु' (६) 'सुत्रामाणम्पृथिवीम्' इत्यनयोरदितिः ।
(७) 'सुनावमारुहेयम्' इत्यस्य स्वर्ग्या नौः ।
(८) 'आ नः' (९) 'प्र बाहवा' इत्यनयोर्मित्रावरुणौ ।
(१०) 'शन्नः' (११) 'वाजेवाजे' इत्यनयोरश्वः ।
(१२) 'समिद्धो अग्निः' इत्यस्येध्मः ।
(१३) 'तनूनपाच्छुचिव्रतः' इत्यस्य तनूनपान्नराशंसो वा ।
(१४) 'इडाभिरग्निः' इत्यस्येडः ।
(१५) 'सुबर्हिरग्निः' इत्यस्य बर्हिः ।
(१६) 'दुरो देवीः' इत्यस्य द्वारः ।
(१७) 'उषे यह्वी' इत्यस्योषासानक्ता ।
(१८) 'दैव्या होतारा' इत्यस्य दैव्यौ होतारौ ।
(१९) 'तिस्र इडा' इत्यस्य तिस्रो देव्यः ।
(२०) 'त्वष्टा तुरीपः' इत्यस्य त्वष्टा ।
(२१) 'शमिता नः' इत्यस्य वनस्पतिः ।
(२२) 'स्वाहा यज्ञम्' इत्यस्य स्वाहाकृतयः ।
(२३) 'वसन्तेन ऋतुना' (२४) 'ग्रीष्मेण ऋतुना' (२५) 'वर्षाभिर्ऋतुना' (२६) 'शारदेन ऋतुना' (२७) 'हेमन्तेन ऋतुना' (२८) 'शैशिरेण ऋतुना' इत्येषां लिङ्गोक्ता ।
(२९) 'होता यक्षत्समिधाग्निम्' (३०) 'होता यक्षत्तनूनपात्' (३१) 'होता यक्षन्नराशᳬंसम्' (३२) 'होता यक्षदिडेडितः' (३३) 'होता यक्षद्बर्हिः' (३४) 'होता यक्षद्दुरः' (३५) 'होता यक्षत्सुपेशसा' (३६) 'होता यक्षद्दैव्या' (३७) 'होता यक्षत्तिस्रः' (३८) 'होता यक्षत्सुरेतसम्' (३९) 'होता यक्षद्वनस्पतिम्' (४०) 'होता यक्षदग्निम्' इत्येषामश्विसरस्वतीन्द्राः ।
(४१) 'होता यक्षदश्विनौ' 'होता यक्षत्सरस्वतीम्' 'होता यक्षदिन्द्रम्' (४२) 'होता यक्षदश्विनौ सरस्वतीम्' (४३) 'होता यक्षदश्विनौ छागस्य' (४४) 'होता यक्षत्सरस्वतीम्' (४५) 'होता यक्षदिन्द्रम्' इत्येषां लिङ्गोक्ता ।

(४६) 'होता यक्षद्वनस्पतिम्' इत्यस्य यूपः ।
(४७) 'होता यक्षदग्निम्' इत्यस्य स्विष्टकृदग्निः ।
(४८) 'देवम्बर्हिः' (४९) 'देवीर्द्वारः' (५०) 'देवी उषासौ' (५१) 'देवी जोष्ट्री' (५२) 'देवी ऊर्जाहुती' (५३) 'देवा देवानाम्' (५४) 'देवीस्तिस्रः' (५५) 'देव इन्द्रः' (५६) 'देवो देवैः' (५७) 'देवम्बर्हिः' (५८) 'देवो अग्निः' इत्येषामश्विसरस्वतीन्द्राः ।
(५९) 'अग्निमद्य' (६०) 'सूपस्था अद्य' (६१) 'त्वामद्य' इत्येषां लिङ्गोक्ता ।

छन्दः (१) 'इमम्मे' इत्यस्य गायत्री, (२) 'तत्त्वा यामि' इत्यारभ्य (६) 'सुत्रामाणम्पृथिवीम्' इत्यन्तानां त्रिष्टुप्, (७) 'सुनावमारुहेयम्' (८) 'आ नः' इत्यनयोर्गायत्री, (९) 'प्र बाहवा' इत्यस्य त्रिष्टुप्, (१०) 'शन्नः' इत्यस्य विराट्, (११) 'वाजेवाजे' इत्यस्य त्रिष्टुप्, (१२) 'समिद्धो अग्निः' इत्यारभ्य (२८) 'शैशिरेण ऋतुना' इत्यन्तानामनुष्टुप् ॥

॥ हरिःॐ ॥

॥१॥ इमम्मे वरुण श्श्रुधी हवमद्या च मृडय । त्वामवस्युराचके ॥१॥
तत्त्वा यामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानो हविर्भिः ।
अहेडमानो वरुणेह बोध्युरुशꣳस मा नऽआयुः प्प्रमोषीः ॥२॥
त्वन्नोऽअग्ने वरुणस्य विद्वान्देवस्य हेडोऽअवयासिसीष्ठाः ।
यजिष्ठो वह्नितमः शोशुचानो विश्वा द्वेषाꣳसि प्प्रमुमुग्ध्यस्म्मत् ॥३॥
स त्वन्नोऽअग्नेवमो भवोती नेदिष्ठोऽअस्याऽउषसो व्युष्टौ ।
अवयक्ष्व नो वरुणꣳ रराणो वीहि मृडीकꣳ सुहवो नऽएधि ॥४॥
महीमू षु मातरꣳ सुव्रतानामृतस्य पत्नीमवसे हुवेम ।
तुविक्षत्रामजरन्तीमुरूचीꣳ सुशर्म्माणमदितिꣳ सुप्प्रणीतिम् ॥५॥
सुत्रामाणम्पृथिवीन्द्यामनेहसꣳ सुशर्म्माणमदितिꣳ सुप्प्रणीतिम् ।
दैवीन्नावꣳ स्वरित्रामनागसमस्रवन्तीमारुहेमा स्वस्तये ॥६॥
सुनावमारुहेयमस्रवन्तीमनागसम् । शतारित्राꣳ स्वस्तये ॥७॥
आ नो मित्रावरुणा घृतैर्ग्गव्यूतिमुक्षतम् । मद्ध्वा रजाꣳसि सुक्रतू ॥८॥
प्र बाहवा सिसृतञ्जीवसे नऽआ नो गव्यूतिमुक्षतङ्घृतेन ।
आ मा जने श्श्रवयतँय्युवाना श्श्रुतम्मे मित्रावरुणा हवेमा ॥९॥ ॥३॥
शन्नो भवन्तु वाजिनो हवेषु देवताता मितद्द्रवः स्वर्क्काः ।
जम्भयन्तोहिँवृकꣳ रक्षाꣳसि सनेम्म्यस्म्मद्युयवन्नमीवाः ॥१०॥
वाजेवाजेवत वाजिनो नो धनेषु विप्प्राऽअमृताऽऋतज्ज्ञाः ।
अस्य मद्ध्वः पिबत मादयद्ध्वन्तृप्प्ता यात पथिभिर्द्देवयानैः ॥११॥
॥२॥ समिद्धोऽअग्निः समिधा सुसमिद्धो वरेण्ण्यः ।
गायत्री च्छन्दऽइन्द्रियन्त्र्यविर्ग्गौर्व्वयो दधुः ॥१२॥

तनूनपाच्छुचिव्व्रतस्त्तनूपाश्च सरस्वती ।
उष्ष्णिहा च्छन्दऽइन्द्रियन्दित्त्यवाड्गौर्व्वयो दधुः ॥१३॥
इडाभिरग्निरीड्यः सोमो देवोऽअमर्त्त्यः ।
अनुष्टुप्प्छन्दऽइन्द्रियम्पञ्चाविर्ग्गौर्व्वयो दधुः ॥१४॥
सुबर्हिरग्निः पूषण्ण्वान्त्स्तीर्ण्णबर्हिरमर्त्त्यः ।
बृहती च्छन्दऽइन्द्रियन्त्रिवत्सो गौर्व्वयो दधुः ॥१५॥
दुरो देवीर्द्दिशो महीर्ब्रह्मा देवो बृहस्प्पतिः ।
पङ्क्तिश्च्छन्दऽइहेन्द्रियन्तुर्य्यवाड्गौर्व्वयो दधुः ॥१६॥
उषे यह्वी सुपेशसा व्विश्वे देवाऽअमर्त्त्याः ।
त्रिष्टुप्प्छन्दऽइहेन्द्रियम्पष्ठवाड्गौर्व्वयो दधुः ॥१७॥
दैव्या होतारा भिषजेन्द्रेण सयुजा युजा ।
जगती च्छन्दऽइन्द्रियमनड्वान्गौर्व्वयो दधुः ॥१८॥
तिस्रऽइडा सरस्वती भारती मरुतो व्विशः ।
व्विराट्छन्दऽइहेन्द्रियन्धेनुर्ग्गौर्न्न व्वयो दधुः ॥१९॥
त्वष्टा तुरीपोऽअद्भुतऽइन्द्राग्नी पुष्टिवर्द्धना ।
द्विपदा च्छन्दऽइन्द्रियमुक्षा गौर्न्न व्वयो दधुः ॥२०॥
शमिता नो व्वनस्प्पतिः सविता प्प्रसुवन्भगम् ।
ककुप्प्छन्दऽइहेन्द्रियँव्वशा व्वेहद्व्वयो दधुः ॥२१॥
स्वाहा यज्ञँव्वरुणः सुक्षत्रो भेषजङ्करत् ।
अतिच्छन्दाऽइन्द्रियम्बृहदृषभो गौर्व्वयो दधुः ॥२२॥

॥३॥ व्वसन्तेनऽऋतुना देवा व्वसवस्त्रिवृता स्त्तुताः ।
रथन्तरेण तेजसा हविरिन्द्रे व्वयो दधुः ॥२३॥
ग्रीष्म्मेणऽऋतुना देवा रुद्राः पञ्चदशे स्त्तुताः ।
बृहता यशसा बलꣳ हविरिन्द्रे व्वयो दधुः ॥२४॥
व्वर्षाभिर्ऋतुनादित्त्या स्त्तोमे सप्तदशे स्त्तुताः ।
व्वैरूपेण व्विशौजसा हविरिन्द्रे व्वयो दधुः ॥२५॥
शारदेनऽऋतुना देवाऽएकविꣳशऽऋभवे स्त्तुताः ।
व्वैराजेन श्श्रिया श्श्रियꣳ हविरिन्द्रे व्वयो दधुः ॥२६॥

हेमन्तेनऽऋतुना देवास्त्रिणवे मरुत स्तुताः ।
बलेन शक्वरीः सहो हविरिन्द्रे वयो दधुः ॥२७॥
शैशिरेणऽऋतुना देवास्त्रयस्त्रिꣳशेमृता स्तुताः ।
सत्त्येन रेवतीः क्षत्रꣳ हविरिन्द्रे वयो दधुः ॥२८॥

॥४॥ होता यक्षत्त्समिधाग्निमिडस्पदेश्विनेन्द्रꣳ सरस्वतीमजो धूम्रो न गोधूमैः कुवलैर्ब्भेषजम्मधु शष्पैर्न्न तेजऽइन्द्रियम्पयः सोमः परिस्रुता घृतम्मधु व्यन्त्वाज्यस्य होतर्य्यज ॥२९॥

होता यक्षत्तनूनपात्त्सरस्वतीमविर्म्मेषो न भेषजम्पथा मधुमता भरन्नश्विनेन्द्राय वीर्य्यम्बदरैरुपवाकाभिर्ब्भेषजन्तोक्मभिः पयः सोमः परिस्रुता घृतम्मधु व्यन्त्वाज्यस्य होतर्य्यज ॥३०॥

होता यक्षन्नराशꣳसन्न नग्नहुम्पतिꣳ सुरया भेषजम्मेषः सरस्वती भिषग्ग्रथो न चन्द्र्यश्विनोर्व्वपाऽइन्द्रस्य वीर्य्यम्बदरैरुपवाकाभिर्भेषजन्तोक्मभिः पयः सोमः परिस्रुता घृतम्मधु व्यन्त्वाज्यस्य होतर्य्यज ॥३१॥

होता यक्षदिडेडितऽआजुह्वानः सरस्वतीमिन्द्रम्बलेन वर्द्धयन्नृषभेण गवेन्द्रियमश्विनेन्द्राय भेषजँय्यवैः कर्कन्धुभिर्म्मधु लाजैर्न्न मासरम्पयः सोमः परिस्रुता घृतम्मधु व्यन्त्वाज्यस्य होतर्य्यज ॥३२॥ ॥५॥

होता यक्षद्बर्हिरूर्णम्म्रदा भिषङ्नासत्त्या भिषजाश्विनाश्वा शिशुमती भिषग्ग्धेनुः सरस्वती भिषग्ग्दुहऽइन्द्राय भेषजम्पयः सोमः परिस्रुता घृतम्मधु व्यन्त्वाज्यस्य होतर्य्यज ॥३३॥

होता यक्षद्दुरो दिशः कवष्यो न व्यचस्वतीरश्विभ्यान्न दुरो दिशऽइन्द्रो न रोदसी दुघे दुहे धेनुः सरस्वत्त्यश्विनेन्द्राय भेषजꣳ शुक्रन्न ज्योतिरिन्द्रियम्पयः सोमः परिस्रुता घृतम्मधु व्यन्त्वाज्यस्य होतर्य्यज ॥३४॥

होता यक्षत्त्सुपेशसोषे नक्तन्दिवाश्विना समञ्जाते सरस्वत्त्या त्त्विषिमिन्द्रे न भेषजꣳ श्येनो न रजसा हृदा श्रिया न मासरम्पयः सोमः परिस्रुता घृतम्मधु व्यन्त्वाज्यस्य होतर्य्यज ॥३५॥

होता यक्षद्दैव्या होतारा भिषजाश्विनेन्द्रन्न जागृवि दिवा नक्तन्न भेषजैः शूषꣳ सरस्वती भिषक्सीसेन दुहऽइन्द्रियम्पयः सोमः परिस्रुता घृतम्मधु व्यन्त्वाज्यस्य होतर्य्यज ॥३६॥

होता यक्षत्तिस्रो देवीर्न्न भेषजन्त्रयस्त्रिधातवोपसो रूपमिन्द्रे हिरण्ययमश्विनेडा न भारती व्वाचा सरस्वती महऽइन्द्राय दुहऽइन्द्रियम्पयः सोमः परिस्रुता घृतम्मधु व्यन्त्वाज्यस्य होतर्य्यज ॥३७॥

होता यक्षत्सुरेतसमृषभन्नर्य्यापसन्त्वष्टारमिन्द्रमश्विना भिषजन्न सरस्वतीमोजो न जूतिरिन्द्रियँव्वृको न रभसो भिषग्ग्यशः सुरया भेषजꣳ श्रिया न मासरम्पयः सोमः परिस्रुता घृतम्मधु व्यन्त्वाज्यस्य होतर्य्यज ॥३८॥

होता यक्षद्वनस्पतिꣳ शमितारꣳ शतक्रतुम्भीमन्न मन्युꣳ राजानँव्याघ्रन्नमसाश्विना भामꣳ सरस्वती भिषगिन्द्राय दुहऽइन्द्रियम्पयः सोमः परिस्रुता घृतम्मधु व्यन्त्वाज्यस्य होतर्य्यज ॥३९॥

होता यक्षदग्निꣳ स्वाहाज्यस्य स्तोकानाꣳ स्वाहा मेदसाम्पृथक्स्वाहा च्छागमश्विभ्याꣳ स्वाहा मेषꣳ सरस्वत्यै स्वाहऽऋषभमिन्द्राय सिꣳहाय सहसऽइन्द्रियꣳ स्वाहाग्निन्न भेषजꣳ स्वाहा सोममिन्द्रियꣳ स्वाहेन्द्रꣳ सुत्रामाणꣳ सवितारँव्वरुणम्भिषजाम्पतिꣳ स्वाहा व्वनस्पतिम्प्प्रियम्पाथो न भेषजꣳ स्वाहा देवाऽआज्यपा जुषाणोऽअग्निर्ब्भेषजम्पयः सोमः परिस्रुता घृतम्मधु व्यन्त्वाज्यस्य होतर्य्यज ॥४०॥

॥५॥ होता यक्षदश्विनौ च्छागस्य व्वपाया मेदसो जुषेताꣳ हविर्होतर्य्यज। होता यक्षत्सरस्वतीम्मेषस्य व्वपाया मेदसो जुषताꣳ हविर्होतर्य्यज। होता यक्षदिन्द्रमृषभस्य व्वपाया मेदसो जुषताꣳ हविर्होतर्य्यज ॥४१॥

होता यक्षदश्विनौ सरस्वतीमिन्द्रꣳ सुत्रामाणमिमे सोमाः सुरामाणश्च्छागैर्न्न मेषैर्ऋषभैः सुताः शष्पैर्न्न तोक्मभिर्ल्लाजैर्म्महस्वन्तो मदा मासरेण परिष्कृताः शुक्राः पयस्वन्तोमृताः प्प्रस्थिता वो मधुश्च्युतस्तानश्विना सरस्वतीन्द्रः सुत्रामा वृत्रहा जुषन्ताꣳ सोम्म्यम्मधु पिबन्तु मदन्तु व्यन्तु होतर्य्यज ॥४२॥

होता यक्षदश्विनौ च्छागस्य हविषऽआत्तामद्य मद्ध्यतो मेदऽउद्भृतम्पुरा द्वेषोभ्यः पुरा पौरुषेय्या गृभो घस्तान्नूनङ्घासेऽअज्राणाँय्यवसप्प्रथमानाꣳ सुमत्क्षराणाꣳ शतरुद्रियाणामग्निष्वात्तानाम्पीवोपवसनानाम्पार्श्वतः श्रोणितः शितामतऽउत्सादतोङ्गादङ्गादवत्तानाङ्करतऽएवाश्विना जुषेताꣳ हविर्होतर्य्यज ॥४३॥

होता यक्षत्सरस्वतीम्मेषस्य हविषऽआवयदद्य मद्ध्यतो मेदऽउद्भृतम्पुरा द्वेषोभ्यः पुरा पौरुषेय्या गृभो घसन्नूनङ्घासेऽअज्राणाँय्यवसप्प्रथमानाꣳ सुमत्क्ष-

राणाꣳ शतरुद्रियाणामग्निष्वात्तानाम्पीवोपवसनानाम्पार्श्वतः श्रोणितः शितामुतऽउत्त्सादतोऽङ्गादङ्गादवत्तानाङ्करद्देवꣳ सरस्वती जुषताꣳ हविर्होतर्य्यज ॥४४॥

होता यक्षदिन्द्रमृषभस्य हविषऽआवयदद्य मद्ध्यतो मेदऽउद्भृतम्पुरा द्वेषोब्भ्यः पुरा पौरुषेय्या गृभो घसन्नूनङ्घासेऽअज्ज्राणाँय्यवसप्प्रथमानाꣳ सुमत्त्क्षराणाꣳ शतरुद्रियाणामग्निष्वात्तानाम्पीवोपवसनानाम्पार्श्वतः श्रोणितः शितामुतऽउत्त्सादतोऽङ्गादङ्गादवत्तानाङ्करद्देवमिन्द्रो जुषताꣳ हविर्होतर्य्यज ॥४५॥

होता यक्षद्वनस्प्पतिमभि हि पिष्टतमया रभिष्ठया रशनयाधित । यत्राश्विनोश्च्छागस्य हविषः प्प्रिया धामानि यत्र सरस्वत्या मेषस्य हविषः प्प्रिया धामानि यत्रेन्द्रस्यऽऋषभस्य हविषः प्प्रिया धामानि यत्राग्नेः प्प्रिया धामानि यत्र सोमस्य प्प्रिया धामानि यत्रेन्द्रस्य सुत्राम्म्णः प्प्रिया धामानि यत्र सवितुः प्प्रिया धामानि यत्र वरुणस्य प्प्रिया धामानि यत्र वनस्प्पतेः प्प्रिया पाथाꣳसि यत्र देवानामाज्यपानाम्प्रिया धामानि यत्राग्नेर्होतुः प्प्रिया धामानि तत्रैतान्प्रस्तुत्त्येवोपस्तुत्त्येवोपावस्रक्षद्रभीयसऽइव कृत्त्वी करद्देवन्देवो वनस्प्पतिर्जुषताꣳ हविर्होतर्य्यज ॥४६॥

होता यक्षदग्निꣳ स्विष्टकृतमयाडग्निरश्विनोश्च्छागस्य हविषः प्प्रिया धामान्ययाट्सरस्वत्या मेषस्य हविषः प्प्रिया धामान्ययाडिन्द्रस्यऽऋषभस्य हविषः प्प्रिया धामान्ययाडग्नेः प्प्रिया धामान्ययाट्सोमस्य प्प्रिया धामान्ययाडिन्द्रस्य सुत्राम्म्णः प्प्रिया धामान्ययाट्सवितुः प्प्रिया धामान्ययाड्वरुणस्य प्प्रिया धामान्ययाड्वनस्प्पतेः प्प्रिया पाथाꣳस्ययाड्देवानामाज्यपानाम्प्रिया धामानि यक्षदग्नेर्होतुः प्प्रिया धामानि यक्षत्त्स्वम्महिमानमायजतामेज्याऽइषः कृणोतु सोऽअद्ध्वरा जातवेदा जुषताꣳ हविर्होतर्य्यज ॥४७॥

॥६॥ देवम्बर्हिः सरस्वती सुदेवमिन्द्रेऽअश्विना ।
तेजो न चक्षुरक्ष्योर्ब्बर्हिषा दधुरिन्द्रियँव्वसुवने व्वसुधेयस्य व्यन्तु यज ॥४८॥
देवीर्द्वारोऽअश्विना भिषजेन्द्रे सरस्वती ।
प्राणन्न व्वीर्य्यन्नसि द्वारो दधुरिन्द्रियँव्वसुवने व्वसुधेयस्य व्यन्तु यज ॥४९॥
देवीऽउषासावश्विना सुत्रामेन्द्रे सरस्वती ।
बलन्न व्वाचमास्यऽउषाब्भ्यान्दधुरिन्द्रियँव्वसुवने व्वसुधेयस्य व्यन्तु यज ॥५०॥

देवी जोष्ट्री सरस्वत्त्यश्श्विनेन्द्रमवर्द्धयन् ।
श्रोत्रन्न कर्ण्णयोर्ग्यशो जोष्ट्रीब्भ्यान्दधुरिन्द्रियँव्वसुवने व्वसुधेयस्य व्यन्तु यज ॥५१॥

देवीऽऊर्जाहुती दुघे सुदुघेन्द्रे सरस्वत्त्यश्श्विना भिषजावतः ।
शुक्रन्न ज्योति स्तनयोराहुती धत्तऽइन्द्रियँव्वसुवने व्वसुधेयस्य व्यन्तु यज ॥५२॥

देवा देवानाम्भिषजा होताराविन्द्रमश्श्विना ।
व्वषट्कारैः सरस्वती त्त्विषिन्न हृदये मतिꣳ होतृब्भ्यान्दधुरिन्द्रियँव्वसुवने व्वसुधेयस्य व्यन्तु यज ॥५३॥

देवीस्तिस्रस्तिस्रो देवीरश्श्विनेडा सरस्वती ।
शूषन्न मद्ध्ये नाब्भ्यामिन्द्राय दधुरिन्द्रियँव्वसुवने व्वसुधेयस्य व्यन्तु यज ॥५४॥

देवऽइन्द्रो नराशꣳसस्त्रिवरूथः सरस्वत्त्यश्श्विब्भ्यामीयते रथः ।
रेतो न रूपममृतञ्जनित्रमिन्द्राय त्वष्टा दधदिन्द्रियाणि व्वसुवने व्वसुधेयस्य व्यन्तु यज ॥५५॥

देवो देवैर्व्वनस्प्पतिर्हिरण्ण्यपर्ण्णोऽअश्श्विब्भ्याꣳ सरस्वत्त्या सुपिप्पलऽइन्द्राय पच्यते मधु । ओजो न जूतिरृषभो न भामँव्वनस्प्पतिर्न्नो दधदिन्द्रियाणि व्वसुवने व्वसुधेयस्य व्यन्तु यज ॥५६॥

देवम्बर्हिर्व्वारितीनामद्ध्वरे स्तीर्ण्णमश्श्विब्भ्यामूर्ण्णम्म्रदाः सरस्वत्त्या स्योनमिन्द्र ते सदः । ईशायै मन्न्युꣳ राजानम्बर्हिषा दधुरिन्द्रियँव्वसुवने व्वसुधेयस्य व्यन्तु यज ॥५७॥

देवोऽअग्निः स्विष्टकृद्देवान्न्यक्षद्यथायथꣳ होताराविन्द्रमश्श्विना व्वाचा व्वाचꣳ सरस्वतीमग्निꣳ सोमꣳ स्विष्टकृत्स्विष्टऽइन्द्रः सुत्रामा सविता व्वरुणो भिषगिष्टो देवो व्वनस्प्पतिः स्विष्टा देवाऽआज्ज्यपाः स्विष्टोऽअग्निरग्निना होता होत्रे स्विष्टकृद्यशो न दधदिन्द्रियमूर्जमपचितिꣳ स्वधाँव्वसुवने व्वसुधेयस्य व्यन्तु यज ॥५८॥

अग्निमद्द्य होतारमवृणीतायँय्यजमानः पचन्पक्तीः पचन्पुरोडाशान्बध्नन्नश्श्विब्भ्याञ्छागꣳ सरस्वत्त्यै मेषमिन्द्रायऽऋषभꣳ सुन्न्वन्नश्श्विब्भ्याꣳ सरस्वत्त्याऽइन्द्राय सुत्राम्म्णे सुरासोमान्त्सूपस्त्थाऽअद्द्य ॥५९॥

सूपस्त्थाऽअद्द्य देवो व्वनस्प्पतिरभवदश्श्विब्भ्याञ्छागेन सरस्वत्त्यै मेषेणेन्द्रायऽऋषभेणाक्षँस्तान्न्मेदस्तः प्प्रति पचताग्गृभीषतावीवृधन्त पुरोडाशैरपुरश्श्विना सरस्वतीन्द्रः सुत्रामा सुरासोमाँस्त्वामद्द्य ॥६०॥

त्वामुद्यऽऋषऽआर्षेयऽऋषीणान्नपादवृणीतायँयजमानो बहुभ्यऽआ सङ्गतेभ्यऽएष मे देवेषु वसु वार्य्यायक्ष्यतऽइति ता या देवा देव दानान्यदुस्तान्यस्म्माऽआ च शास्स्वा च गुरस्वेषितश्च होतरसि भद्द्रवाच्च्याय प्प्रेषितो मानुषः सूक्तवाकाय सूक्ता ब्रूहि ॥६१॥

॥ इत्येकविंशोऽध्यायः ॥

अथ द्वाविंशोऽध्यायः

षिः (१) 'तेजोसि' इत्यारभ्य (३४) 'एकस्मै स्वाहा' इत्यन्तानां सामान्यतः प्रजापतिर्ऋषिः । विशेपतश्च—
(२) 'इमामगृभ्णन्' इत्यस्य संवत्सरो यज्ञपुरुषः, (९) 'तत्सवितुः' इत्यस्य विश्वामित्रः, (१०) 'हिरण्यपाणिमूतये' इत्यस्य मेधातिथिः, (१५) 'अग्निंथं स्तोमेन' इत्यस्य सुतम्भरः, (१६) 'स हव्यवाट्' इत्यस्य विश्वामित्रः, (१७) 'अग्निन्दूतम्' इत्यस्य विरूपः, (१८) 'अजीजनो हि' इत्यस्य त्र्यरुणत्रसदस्यू, (२१) 'विश्वो देवस्य' इत्यस्य स्वस्त्यात्रेयः ॥

वता (१) 'तेजोसि' इत्यस्य सौवर्णनिष्कम्, 'देवस्य त्वा' इत्यस्य सविता ।
(२) 'इमामगृभ्णन्' इत्यस्य रशना ।
(३) 'अभिधा असि' (४) 'स्वगा त्वा' इत्यनयोर्लिङ्गोक्ता, 'ब्रह्मन्नश्वम्' इत्यस्य ब्रह्मा, 'तम्बधान' इत्यस्याध्वर्युः ।
(५) 'प्रजापतये त्वा' 'इन्द्राग्निभ्यान्त्वा' 'वायवे त्वा' 'विश्वेभ्यस्त्वा' 'सर्वेभ्यस्त्वा' इत्येषां लिङ्गोक्ता, 'यो अर्वन्तम्' इत्यस्याश्वः, 'परो मर्तः' इत्यस्य (६) 'अग्नये स्वाहा' इत्यादिस्वाहान्तानां दशानाञ्च लिङ्गोक्ता ।
(७) 'हिङ्काराय स्वाहा' इत्यादिस्वाहान्तानाञ्चतुर्विंशतिसंख्यकानाम्, (८) 'यते स्वाहा' इत्यादिस्वाहान्तानाम्पञ्चविंशतिसंख्यकानाञ्चाश्वव्यापाराः ।
(९) 'तत्सवितुः' (१०) 'हिरण्यपाणिम्' (११) 'देवस्य चेततः' (१२) 'सुष्टुतिंथं सुमतीवृधः' (१३) 'रातिंथं सत्पतिम्' (१४) 'देवस्य सवितुः' इत्येषां सविता ।
(१५) 'अग्निंथं स्तोमेन' (१६) 'स हव्यवाट्' (१७) 'अग्निन्दूतम्' इत्येषामग्निः ।
(१८) 'अजीजनो हि' इत्यस्य पवमानः ।
(१९) 'विभूर्मात्रा' इत्यस्याश्वः, 'देवा आशापालाः' इत्यस्य देवाः, 'इह रन्तिः' 'इह रमताम्' 'इह धृतिः' 'इह स्वधृतिः' इत्येषामग्निः ।
(२०) 'काय स्वाहा' (२१) 'विश्वो देवस्य' (२२) 'आ ब्रह्मन्' (२३) 'प्राणाय स्वाहा' (२४) 'प्राच्यै दिशे' (२५) 'अद्भ्यः स्वाहा' (२६) 'वाताय स्वाहा' (२७) 'अग्नये स्वाहा' (२८) 'नक्षत्रेभ्यः स्वाहा' (२९) 'पृथिव्यै स्वाहा' (३०) 'असवे स्वाहा' (३१) 'मधवे स्वाहा' (३२) 'वाजाय स्वाहा' (३३) 'आयुर्यज्ञेन' (३४) 'एकस्मै स्वाहा' इत्येषां लिङ्गोक्ता ॥

दः (२) 'इमामगृभ्णन्' इत्यस्य त्रिष्टुप्, (५) 'यो अर्वन्तम्' 'परो मर्त्यः' इत्यनयोः (९) 'तत्सवितुः' इत्यारभ्य (१५) 'अग्निन्दूतम्' इत्यन्तानाञ्च गायत्री, (१८) 'अजीजनो हि' इत्यस्य पिपीलिकमध्या कृतिरनुष्टुप्, (२१) 'विश्वो देवस्य' इत्यस्यानुष्टुप् ॥

॥ हरिः ॐ ॥

॥ तेजोसि शुक्क्रममृतमायुष्प्पाऽआयुर्म्मे पाहि ।
देवस्य त्वा सवितुः प्प्रसवेश्विनोर्ब्बाहुभ्याम्पूष्णो हस्ताभ्यामाददे ॥१॥

इमामगृभ्णन्रशनामृतस्य पूर्व्वऽआयुषि व्विदथेषु कव्व्या ।
सा नोऽअस्मिन्त्सुतऽआबभूवऽऋतस्य सामन्त्सरमारपन्ती ॥२॥
अभिधाऽअसि भुवनमसि यन्तासि धर्त्ता ।
स त्वमग्निँव्वैश्वानरꣳ सप्प्रथसङ्गच्छ स्वाहाकृतः ॥३॥
स्वगा त्वा देवेब्भ्यः प्प्रजापतये ब्रह्मन्नश्श्वम्भन्त्स्यामि देवेब्भ्यः प्प्रजापतये तेन राध्यासम् । तम्बधान देवेब्भ्यः प्प्रजापतये तेन राध्नुहि ॥४॥
प्रजापतये त्वा जुष्ट्टम्प्रोक्षामीन्द्राग्निब्भ्यान्त्वा जुष्ट्टम्प्रोक्षामि व्वायवे त्वा जुष्ट्टम्प्रोक्षामि व्विश्श्वेब्भ्यस्त्वा देवेब्भ्यो जुष्ट्टम्प्रोक्षामि सर्व्वेब्भ्यस्त्वा देवेब्भ्यो जुष्ट्टम्प्रोक्षामि । योऽअर्व्वन्तञ्जिघाꣳसति तमब्भ्यमीति व्वरुणः । परो मर्त्तः परः श्वा ॥५॥

॥२॥ अग्नये स्वाहा सोमाय स्वाहापाम्मोदाय स्वाहा सवित्रे स्वाहा व्वायवे स्वाहा व्विष्ण्णवे स्वाहेन्द्राय स्वाहा बृहस्प्पतये स्वाहा मित्राय स्वाहा व्वरुणाय स्वाहा ॥६॥

॥३॥ हिङ्काराय स्वाहा हिङ्कृताय स्वाहा क्रन्दते स्वाहावक्रन्दाय स्वाहा प्प्रोथते स्वाहा प्प्रप्प्रोथाय स्वाहा गन्धाय स्वाहा घ्राताय स्वाहा निविष्टाय स्वाहोपविष्टाय स्वाहा सन्दिताय स्वाहा व्वल्गते स्वाहासीनाय स्वाहा शयानाय स्वाहा स्वपते स्वाहा जाग्रते स्वाहा कूजते स्वाहा प्प्रबुद्धाय स्वाहा व्विजृम्भमाणाय स्वाहा व्विचृत्ताय स्वाहा सꣳहानाय स्वाहोपस्स्थिताय स्वाहायनाय स्वाहा प्प्रायणाय स्वाहा ॥७॥

यते स्वाहा धावते स्वाहोद्द्रावाय स्वाहोद्द्रुताय स्वाहा शूकाराय स्वाहा शूकृताय स्वाहा निषण्णाय स्वाहोत्त्थिताय स्वाहा जवाय स्वाहा बलाय स्वाहा व्विवर्त्तमानाय स्वाहा व्विवृत्ताय स्वाहा व्विधून्वानाय स्वाहा व्विधूताय स्वाहा शुश्श्रूषमाणाय स्वाहा शृण्वते स्वाहेक्षमाणाय स्वाहेक्षिताय स्वाहा व्वीक्षिताय स्वाहा निमेषाय स्वाहा यदत्ति तस्म्मै स्वाहा यत्पिबति तस्म्मै स्वाहा यन्मूत्रङ्करोति तस्म्मै स्वाहा कुर्व्वते स्वाहा कृताय स्वाहा ॥८॥

॥४॥ तत्सवितुर्व्वरेण्ण्यम्भर्ग्गो देवस्य धीमहि । धियो यो नः प्प्रचोदयात् ॥९॥
हिरण्ण्यपाणिमूतये सवितारमुपह्वये । स चेत्ता देवता पदम् ॥१०॥
देवस्य चेततो महीम्प्र सवितुर्हवामहे । सुमतिꣳ सत्त्यराधसम् ॥११॥
सुष्टुतिꣳ सुमतीवृधो रातिꣳ सवितुरीमहे । प्र देवाय मतीविदे ॥१२॥
रातिꣳ सत्त्पतिम्महे सवितारमुपह्वये । आसवन्देववीतये ॥१३॥

दे॒वस्य॑ सवि॒तुर्म्म॒तिमा॑स॒वँव्वि॒श्श्वदे॑व्व्यम् । धि॒या भर्ग॑म्मनामहे ॥१४॥
अ॒ग्निꣳ स्तोमे॑न बोधय समिधा॒नोऽअम॑र्त्त्यम् । ह॒व्या दे॒वेषु॑ नो दधत् ॥१५॥
स ह॑व्य॒वाडम॑र्त्त्यऽउ॒शिग्दू॒तश्चनो॑हितः । अ॒ग्निर्द्धि॒या सम॑ृण्ण्वति ॥१६॥
अ॒ग्निन्दू॒तम्पु॒रो द॑धे हव्य॒वाह॒मुप॑ब्ब्रुवे । दे॒वाँ२॥ऽआसा॑दयादि॒ह ॥१७॥
अजी॑जनो॒ हि प॑वमान॒ सूर्य्यँव्वि॒धारे॒ शक्म॑ना॒ पय॑÷ ।
गोजी॑रया॒ रꣳह॑माणः॒ पुर॑न्ध्या ॥१८॥

॥५॥ व्वि॒भूर्म्मा॒त्रा प्प्र॒भूः पि॒त्राश्श्वो॑सि॒ हयो॒स्यत्त्यो॑सि॒ मयो॒स्यर्व्वा॑सि॒ सप्ति॑रसि व्वा॒ज्ज्य॑सि॒ व्वृषा॑सि नृ॒मणा॑ऽअसि । ययु॒र्न्नामा॑सि॒ शिशु॒र्न्नामा॑स्यादि॒त्त्यानाम्पत्त्वा॒न्विहि॒ दे॒वाऽआशापालाऽए॒तन्दे॒वेब्भ्योश्श्व॒म्मेधा॑य॒ प्प्रोक्षि॑तꣳ रक्षते॒ह रन्ति॑रि॒ह रम॑तामि॒ह धृति॑रि॒ह स्वधृ॑तिः॒ स्वाहा॑ ॥१९॥

॥६॥ काय॒ स्वाहा॒ कस्म्मै॒ स्वाहा॑ कत॒मस्म्मै॒ स्वाहा॒ स्वाहा॒धिमाधी॑ताय॒ स्वाहा॒ मन॑÷ प्प्र॒जाप॑तये॒ स्वाहा॑ चि॒त्तँव्विज्ञा॑ता॒यादि॑त्त्यै॒ स्वाहादि॑त्त्यै म॒ह्यै स्वाहादि॑त्त्यै सुमृडी॒कायै॒ स्वाहा॒ सर॑स्वत्त्यै॒ स्वाहा॒ सर॑स्वत्त्यै पाव॒कायै॒ स्वाहा॒ सर॑स्वत्त्यै बृह॒त्त्यै स्वाहा॑ पू॒ष्ण्णे स्वाहा॑ पू॒ष्ण्णे प्प्र॑प॒थ्थ्याय॒ स्वाहा॑ पू॒ष्ण्णे न॒रन्धि॑षाय॒ स्वाहा॒ त्वष्ट्ट्रे॒ स्वाहा॒ त्वष्ट्ट्रे॒ तु॒रीपा॑य॒ स्वाहा॒ त्वष्ट्ट्रे॑ पुरु॒रूपा॑य॒ स्वाहा॒ व्विष्ण्ण॑वे॒ स्वाहा॒ व्विष्ण्ण॑वे निभूय॒पाय॒ स्वाहा॒ व्विष्ण्ण॑वे शिपिव्वि॒ष्ट्टाय॒ स्वाहा॑ ॥२०॥

व्विश्श्वो॑ दे॒वस्य॑ ने॒तुर्म्मर्त्तो॑ व्वुरीत स॒क्ख्यम् ।
व्विश्श्वो॑ रा॒यऽइ॑षुद्ध्यति द्यु॒म्नँव्वृ॑णीत पु॒ष्ष्यसे॒ स्वाहा॑ ॥२१॥

॥७॥ आ ब्रह्म॑न्ब्राह्म॒णो ब्र॑ह्मवर्च॒सी जा॑यता॒मा रा॒ष्ट्रे रा॑ज॒न्य॒÷ शूर॑ऽइष॒व्योऽतिव्या॒धी म॑हार॒थो जा॑यता॒न्दोग्ग्ध्री॑ धे॒नुर्व्वोढा॑न॒ड्वाना॒शुः सप्ति॒ः पुर॑न्धि॒र्य्योषा॑ जि॒ष्ण्णू र॑थे॒ष्ठाः स॒भेयो॒ युवास्य॒ यज॑मानस्य व्वी॒रो जा॑यतान्निका॒मेनि॑कामे नः प॒र्ज्जन्यो॑ व्वर्षतु॒ फल॑वत्त्यो न॒ऽओष॑धयः पच्च्यन्ताँय्योगक्क्षे॒मो न॑÷ कल्प्पताम् ॥२२॥

॥८॥ प्रा॒णाय॒ स्वाहा॑पा॒नाय॒ स्वाहा॑ व्व्या॒नाय॒ स्वाहा॒ चक्क्षु॑षे॒ स्वाहा॒ श्श्रोत्रा॑य॒ स्वाहा॑ व्वा॒चे स्वाहा॒ मन॑से॒ स्वाहा॑ ॥२३॥

॥९॥ प्राच्च्यै॑ दि॒शे स्वाहा॒र्व्वाच्च्यै॑ दि॒शे स्वाहा॒ दक्षि॑णायै दि॒शे स्वाहा॒र्व्वाच्च्यै॑ दि॒शे स्वाहा॑ प्प्र॒तीच्च्यै॑ दि॒शे स्वाहा॒र्व्वाच्च्यै॑ दि॒शे स्वाहोदी॑च्च्यै दि॒शे स्वाहा॒र्व्वाच्च्यै॑ दि॒शे स्वाहो॒र्द्ध्वायै॑ दि॒शे स्वाहा॒र्व्वाच्च्यै॑ दि॒शे स्वाहावा॑च्च्यै दि॒शे स्वाहा॒र्व्वाच्च्यै॑ दि॒शे स्वाहा॑ ॥२४॥

॥१०॥ अ॒द्भ्यः स्वाहा॑ वा॒र्ब्भ्यः स्वाहो॑द॒काय॒ स्वाहा॒ तिष्ठ॑न्तीब्भ्य॒ः स्वाहा॒ स्रव॑न्तीब्भ्य॒ः स्वाहा॒ स्यन्द॑मानाब्भ्य॒ः स्वाहा॒ कूप्प्या॑ब्भ्य॒ः स्वाहा॒ सूद्या॑ब्भ्य॒ः स्वाहा॒ धार्य्या॑ब्भ्य॒ः स्वाहा॑र्ण्ण॒वाय॒ स्वाहा॑ समु॒द्राय॒ स्वाहा॑ सरि॒राय॒ स्वाहा॑ ॥२५॥

॥११॥ वाता॑य॒ स्वाहा॑ धू॒माय॒ स्वाहा॒ब्भ्राय॒ स्वाहा॑ मे॒घाय॒ स्वाहा॑ वि॒द्योत॑मानाय॒ स्वाहा॑ स्त्त॒नय॑ते॒ स्वाहा॑व॒स्प्फूर्ज्ज॑ते॒ स्वाहा॒ वर्ष॑ते॒ स्वाहा॑व॒वर्ष॑ते॒ स्वाहो॒ग्ग्रँव्वर्ष॑ते॒ स्वाहा॑ शी॒ग्घ्रँव्वर्ष॑ते॒ स्वाहो॑द्गृ॒ह्ण॒ते स्वाहो॑द्गृहीताय॒ स्वाहा॑ प्प्रुष्ण॒ते स्वाहा॑ शीका॒यते॒ स्वाहा॒ प्प्रुष्ष्वा॑ब्भ्य॒ः स्वाहा॑ ह्रादु॒नीब्भ्य॒ः स्वाहा॑ नीहा॒राय॒ स्वाहा॑ ॥२६॥

॥१२॥ अ॒ग्ग्नये॒ स्वाहा॒ सोमा॑य॒ स्वाहेन्द्रा॑य॒ स्वाहा॑ पृथि॒व्व्यै स्वाहा॒न्तरि॑क्क्षाय॒ स्वाहा॑ दि॒वे स्वाहा॑ दि॒ग्ग्भ्यः स्वाहाशा॑ब्भ्य॒ः स्वाहो॒र्व्व्यै दि॒शे स्वाहा॒र्वाच्च्यै॑ दि॒शे स्वाहा॑ ॥२७॥

॥१३॥ नक्ष॑त्त्रेब्भ्य॒ः स्वाहा॑ नक्ष॒त्त्रिये॑ब्भ्य॒ः स्वाहा॑होरा॒त्त्रेब्भ्य॒ः स्वाहा॑र्द्धमा॒सेब्भ्य॒ः स्वाहा॒ मासे॑ब्भ्य॒ः स्वाहऽऋ॒तुब्भ्य॒ः स्वाहा॑र्त्त॒वेब्भ्य॒ः स्वाहा॑ सँव्वत्स॒राय॒ स्वाहा॒ द्यावा॑पृथि॒वीब्भ्या॒ꣳ स्वाहा॑ च॒न्द्राय॒ स्वाहा॒ सूर्य्या॑य॒ स्वाहा॑ र॒श्मिब्भ्य॒ः स्वाहा॒ वसु॑ब्भ्य॒ः स्वाहा॑ रु॒द्रेब्भ्य॒ः स्वाहा॑दि॒त्त्येब्भ्य॒ः स्वाहा॑ म॒रुद्भ्य॒ः स्वाहा॒ विश्वे॑ब्भ्यो दे॒वेब्भ्य॒ः स्वाहा॒ मूले॑ब्भ्य॒ः स्वाहा॒ शाखा॑ब्भ्य॒ः स्वाहा॒ वन॒स्प्पति॑ब्भ्य॒ः स्वाहा॒ पुष्प्पे॑ब्भ्य॒ः स्वाहा॒ फले॑ब्भ्य॒ः स्वाहौष॑धीब्भ्य॒ः स्वाहा॑ ॥२८॥

॥१४॥ पृथि॒व्व्यै स्वाहा॒न्तरि॑क्क्षाय॒ स्वाहा॑ दि॒वे स्वाहा॒ सूर्य्या॑य॒ स्वाहा॑ च॒न्द्राय॒ स्वाहा॒ नक्ष॑त्त्रेब्भ्य॒ः स्वाहा॒द्भ्यः स्वाहौष॑धीब्भ्य॒ः स्वाहा॒ वन॒स्प्पति॑ब्भ्य॒ः स्वाहा॑ परिप्प्ल॒वेब्भ्य॒ः स्वाहा॑ चराच॒रेब्भ्य॒ः स्वाहा॑ सरीसृ॒पेब्भ्य॒ः स्वाहा॑ ॥२९॥

॥१५॥ अस॑वे॒ स्वाहा॒ वस॑वे॒ स्वाहा॑ वि॒भुवे॒ स्वाहा॒ विव॑स्वते॒ स्वाहा॑ गण॒श्श्रिये॒ स्वाहा॑ ग॒णप॑तये॒ स्वाहा॑भि॒भुवे॒ स्वाहाधि॑पतये॒ स्वाहा॑ शू॒षाय॒ स्वाहा॑ सꣳस॒र्प्पा॑य॒ स्वाहा॑ च॒न्द्राय॒ स्वाहा॒ ज्योति॑षे॒ स्वाहा॑ मलि॒म्म्लु॒चाय॒ स्वाहा॒ दिवा॑ प॒तय॑ते॒ स्वाहा॑ ॥३०॥

॥१६॥ मध॑वे॒ स्वाहा॒ माध॑वाय॒ स्वाहा॑ शु॒क्राय॒ स्वाहा॒ शुच॑ये॒ स्वाहा॒ नभ॑से॒ स्वाहा॑ नभ॒स्या᳚य॒ स्वाहे॒षाय॒ स्वाहो॒र्ज्जा॑य॒ स्वाहा॒ सह॑से॒ स्वाहा॑ सह॒स्या᳚य॒ स्वाहा॒ तप॑से॒ स्वाहा॑ तप॒स्या᳚य॒ स्वाहा॑ꣳहसस्प्प॒तये॒ स्वाहा॑ ॥३१॥

॥१७॥ वाजा॑य॒ स्वाहा॑ प्प्रस॒वाय॒ स्वाहा॑पि॒जाय॒ स्वाहा॒ क्रत॑वे॒ स्वाहा॒ स्व॒÷ स्वाहा॑ मू॒र्द्ध्ने स्वाहा॑ व्व्यश्नु॒विने॒ स्वाहान्त्या॑य॒ स्वाहान्त्या॑य भौव॒नाय॒ स्वाहा॒ भुव॑नस्य॒ पत॑ये॒ स्वाहाधि॑पतये॒ स्वाहा॑ प्प्र॒जाप॑तये॒ स्वाहा॑ ॥३२॥

॥१८॥ आयु॑र्य॒ज्ञेन॑ कल्पता॒ᳪं॒ स्वाहा॑ प्प्रा॒णो य॒ज्ञेन॑ कल्पता॒ᳪं॒ स्वाहा॑पा॒नो य॒ज्ञेन॑ कल्पता॒ᳪं॒ स्वाहा॑ व्या॒नो य॒ज्ञेन॑ कल्पता॒ᳪं॒ स्वाहो॑दा॒नो य॒ज्ञेन॑ कल्पता॒ᳪं॒ स्वाहा॑ समा॒नो य॒ज्ञेन॑ कल्पता॒ᳪं॒ स्वाहा॒ चक्षु॑र्य॒ज्ञेन॑ कल्पता॒ᳪं॒ स्वाहा॒ श्श्रोत्रँ॑य॒ज्ञेन॑ कल्पता॒ᳪं॒ स्वाहा॒ वाग्य॒ज्ञेन॑ कल्पता॒ᳪं॒ स्वाहा॒ मनो॑ य॒ज्ञेन॑ कल्पता॒ᳪं॒ स्वाहा॒त्मा य॒ज्ञेन॑ कल्पता॒ᳪं॒ स्वाहा॑ ब्र॒ह्मा य॒ज्ञेन॑ कल्पता॒ᳪं॒ स्वाहा॒ ज्योति॑र्य॒ज्ञेन॑ कल्पता॒ᳪं॒ स्वाहा॒ स्व॑र्य॒ज्ञेन॑ कल्पता॒ᳪं॒ स्वाहा॑ पृ॒ष्ठँय॒ज्ञेन॑ कल्पता॒ᳪं॒ स्वाहा॑ य॒ज्ञो य॒ज्ञेन॑ कल्पता॒ᳪं॒ स्वाहा॑ ॥३३॥

॥१९॥ एक॑स्मै॒ स्वाहा॒ द्वाभ्या॒ᳪं॒ स्वाहा॑ श॒ताय॒ स्वाहैक॑शताय॒ स्वाहा॒ व्यु॒ष्ट्यै॒ स्वाहा॑ स्व॒र्गाय॒ स्वाहा॑ ॥३४॥

॥ इति द्वाविंशोऽध्यायः ॥

अथ त्रयोविंशोऽध्यायः

ऋषिः (१) ‘हिरण्यगर्भः समवर्तत’ इत्यारभ्य (६५) ‘प्रजापते न’ इत्यन्तानां सामान्यतः प्रजापतिर्ऋषिः। विशेषतश्च—
(१) ‘हिरण्यगर्भः समवर्तत’ (३) ‘यः प्राणतः’ इत्यनयोर्हिरण्यगर्भः, (५) ‘युञ्जन्ति ब्रध्नम्’ इत्यस्य मधुच्छन्दाः,
(३२) ‘दधिक्राव्णो अकारिषम्’ इत्यस्य वामदेव्यो दधिक्रावा, (६५) ‘प्रजापते न’ इत्यस्य हिरण्यगर्भः ॥

देवता (१) ‘हिरण्यगर्भः समवर्तत’ इत्यस्य कः ।
(२) ‘उपयाम० प्रजापतये’ इत्यस्य प्रजापतिः, ‘एष ते योनिः’ इत्यस्य ग्रहः, ‘यस्ते’ इत्यस्य देवाः ।
(३) ‘यः प्राणतः’ इत्यस्य कः ।
(४) ‘उपयाम० प्रजापतये’ इत्यस्य प्रजापतिः, ‘एष ते योनिः’ इत्यस्य ग्रहः, ‘यस्ते’ इत्यस्य देवाः ।
(५) ‘युञ्जन्ति ब्रध्नम्’ इत्यस्यादित्यः ।
(६) ‘युञ्जन्त्यस्य’ (७) ‘यद्वातः’ इत्यनयोरश्वः ।
(८) ‘वसवस्त्वा’ ‘रुद्रास्त्वा’ ‘आदित्यास्त्वा’ इत्येषां लिङ्गोक्ता, ‘भूर्भुवः स्वः’ इत्यस्य क्रमेणाग्निवायुसूर्याः, ‘लाजी३ञ्छाची३न्’ इत्यस्याश्वः ।
(९) ‘कः स्वित्’ (१०) ‘सूर्य एकाकी’ (११) ‘का स्वित’ (१२) ‘द्यौरासीत’ इत्येषां होता ब्रह्मा च ।
(१३) ‘वायुष्ट्वा’ ‘एष स्यः’ ‘ब्रह्मा कृष्णश्च’ ‘नमोग्नये’ इत्येषां लिङ्गोक्ता ।
(१४) ‘सᳪंशितो रश्मिना’ (१५) ‘स्वयं वाजिन्’ (१६) ‘न वा उ (१७) ‘अग्निः पशुः’ ‘वायुः पशुः’ ‘सूर्यः पशुः’ इत्येषामश्वः ।
(१८) ‘प्राणाय स्वाहा’ ‘अपानाय स्वाहा’ ‘व्यानाय स्वाहा’ इत्येषां लिङ्गोक्ता, ‘अम्बे अम्बिके’ इत्यस्याश्वः ।
(१९-२०) ‘गणानान्त्वा’ ‘प्रियाणान्त्वा’ ‘निधीनान्त्वा’ ‘आहमजानि’ इत्येषां लिङ्गोक्ता, ‘स्वर्गे लोके’ ‘वृषा वाजी’ (२१) ‘उत्सक्थ्या अवगुदम्’ इत्येषामश्वः ।
(२२) ‘यकासकौ शकुन्तिका’ (२३) ‘यकोसकौ शकुन्तकः’ (२४) ‘माता० रोहतः’ (२५) ‘माता० क्रीडतः’ (२६) ‘ऊर्ध्वामेनाम्’ (२७) ‘ऊर्ध्वमेनम्’ (२८) ‘यदस्याः’ (२९) ‘यद्देवासः’ (३०) ‘यद्धरिणः० पशु’ (३१) ‘यद्धरिणः० बहु’ इत्येषामध्वर्युकुमार्यादयः ।

(३२) 'दधिक्राव्णो अकारिषम्' (३३) 'गायत्री त्रिष्टुप्' (३४) 'द्विपदा याः' (३५) 'महानाम्न्यो रेवत्यः' (३६) 'नार्यस्ते' (३७) 'रजता हरिणीः' (३८) 'कुविदङ्ग यवमन्तः' (३९) 'कस्त्वा' (४०) 'ऋतवस्ते' (४१) 'अर्धमासाः परूᳬषि' (४२) 'दैव्या अध्वर्यवः' (४३) 'द्यौस्ते पृथिवी' (४४) 'शन्ते परेभ्यः' इत्येषामश्वः ।

(४५) 'कः स्वित्' (४६) 'सूर्य एकाकी' (४७) 'किᳬ स्वित्' (४८) 'ब्रह्म सूर्यसमम्' (४९) 'पृच्छामि त्वा' (५०) 'अपि तेषु' (५१) 'केष्वन्तः' (५२) 'पञ्चस्वन्तः' (५३) 'का स्वित्' (५४) 'द्यौरासीत्' (५५) 'क ईमरे' (५६) 'अजारे पिशङ्गिला' (५७) 'कत्यस्य' (५८) 'षडस्य' (५९) 'को अस्य' (६०) 'वेदाहमस्य' (६१) 'पृच्छामि त्वा' (६२) 'इयं वेदिः' इत्येषां होत्रादयः ।

(६३) 'सुभूः स्वयम्भूः' इत्यस्य प्रजापतिः ।

(६४) 'होता यक्षत्' (६५) 'प्रजापते न' इत्यनयोः प्रजापतिः ॥

छन्दः (१) 'हिरण्यगर्भः समवर्तत' (३) 'यः प्राणतः' इत्यनयोस्त्रिष्टुप्, (५) 'युञ्जन्ति ब्रध्नम्' (६) 'युञ्जन्त्यस्य' इत्यनयोर्गायत्री, (७) 'यद्वातः' इत्यस्य बृहती, (९) 'कः स्वित्' इत्यारभ्य (१२) 'द्यौरासीत्' इत्यन्तानां (१४) 'सᳬशितो रश्मिना' इत्यस्य चानुष्टुप्, (१५) 'स्वयं वाजिन्' इत्यस्य विराट्, (१६) 'न वा उ' इत्यस्य त्रिष्टुप्, (१८) 'अम्बे अम्बिके' इत्यस्यानुष्टुप्, (२१) 'उत्सक्थ्या अवगुदम्' इत्यस्य गायत्री, (२२) 'यकासकौ शकुन्तिका' इत्यस्यानुष्टुप्, (२३) 'यकोसकौ शकुन्तकः' इत्यस्योपरिष्टाद्बृहती, (२४) 'माता च' इत्यारभ्य (३२) 'दधिक्राव्णो अकारिषम्' इत्यन्तानामनुष्टुप्, (३३) 'गायत्री त्रिष्टुप्' इत्यस्योष्णिक्, (३४) 'द्विपदा याः' इत्यारभ्य (३७) 'रजता हरिणीः' इत्यन्तानामनुष्टुप्, (३८) 'कुविदङ्ग यवमन्तः' इत्यस्य त्रिष्टुप्, (३९) 'कस्त्वा' इत्यस्य गायत्री, (४०) 'ऋतवस्ते' इत्यारभ्य (४८) 'ब्रह्म सूर्यसमम्' इत्यन्तानामनुष्टुप्, (४९) 'पृच्छामि त्वा' इत्यारभ्य (५२) 'पञ्चस्वन्तः' इत्यन्तानां त्रिष्टुप्, (५३) 'का स्वित्' इत्यारभ्य (५६) 'अजारे पिशङ्गिला' इत्यन्तानामनुष्टुप्, (५७) 'कत्यस्य' इत्यारभ्य (६२) 'इयं वेदिः' इत्यन्तानां त्रिष्टुप्, (६३) 'सुभूः स्वयम्भूः' इत्यस्यानुष्टुप्, (६५) 'प्रजापते न' इत्यस्य त्रिष्टुप् ॥

॥ हरिःॐ ॥

॥१॥ हि॒र॒ण्य॒ग॒र्ब्भः सम॑वर्त्त॒ताग्ग्रे॑ भू॒तस्य॑ जा॒तः पति॒रेक॑ऽआसीत् ।
स दा॑धार पृथि॒वीन्द्यामु॒तेमाङ्कस्म्मै॑ दे॒वाय॑ ह॒विषा॑ विधेम ॥१॥
उ॒प॒या॒मगृ॑हीतोसि प्प्र॒जाप॑तये त्वा॒ जुष्ट॑ङ्गृह्णाम्म्ये॒ष ते॒ योनि॒ꣳ सूर्य्य॑स्ते महि॒मा ।
यस्तेह॑न्त्सँव्वत्स॒रे म॑हि॒मा स॑म्बभू॒व यस्ते॑ वा॒याव॒न्तरि॑क्क्षे महि॒मा स॑म्बभू॒व यस्ते॑
दि॒वि सूर्य्ये॑ महि॒मा स॑म्बभू॒व तस्म्मै॑ ते महि॒म्म्ने प्प्र॒जाप॑तये॒ स्वाहा॑ दे॒वेब्भ्यः॑ ॥२॥
॥२॥ यः प्प्रा॑ण॒तो नि॑मिष॒तो म॑हि॒त्वैक॒ऽइद्राजा॒ जग॑तो ब॒भूव॑ ।
यऽईशे॑ऽअ॒स्य द्वि॒पद॒श्चतु॑ष्प्पद॒ꣳ कस्म्मै॑ दे॒वाय॑ ह॒विषा॑ विधेम ॥३॥
उ॒प॒या॒मगृ॑हीतोसि प्प्र॒जाप॑तये त्वा॒ जुष्ट॑ङ्गृह्णाम्म्ये॒ष ते॒ योनि॑श्च॒न्द्रमा॑स्ते महि॒मा ।
यस्ते॒ रात्त्रौ॑ सँव्वत्स॒रे म॑हि॒मा स॑म्बभू॒व यस्ते॑ पृथि॒व्याम॒ग्नौ म॑हि॒मा स॑म्बभू॒व यस्ते॑
नक्क्ष॑त्रेषु च॒न्द्रम॑सि महि॒मा स॑म्बभू॒व तस्म्मै॑ ते महि॒म्म्ने प्प्र॒जाप॑तये दे॒वेब्भ्य॒ꣳ
स्वाहा॑ ॥४॥
॥३॥ यु॒ञ्जन्ति॑ ब्ब्र॒ध्नम॑रु॒षञ्चर॑न्तु॒म्परि॑ त॒स्त्थुषः॑ । रोच॑न्ते रोच॒ना दि॒वि ॥५॥
यु॒ञ्जन्त्य॑स्य॒ काम्म्या॒ हरी॒ विप॑क्क्षसा॒ रथे॑ । शोणा॑ धृ॒ष्ण्णू नृ॒वाह॑सा ॥६॥

यद्वातोऽअपोऽअगनीगन्प्रियामिन्द्रस्य तन्वम् ।
एतꣳ स्तोतरनेन पथा पुनरश्श्वमावर्त्तयासि नः ॥७॥

वसवस्त्वाञ्जन्तु गायत्रेण च्छन्दसा रुद्रास्त्वाञ्जन्तु त्रैष्टुभेन च्छन्दसादित्यास्त्वाञ्जन्तु जागतेन च्छन्दसा । भूर्भुवः स्वर्ल्लाजी३ञ्छाची३न्यव्ये गव्यऽएतदन्नमत्त देवाऽएतदन्नमद्धि प्प्रजापते ॥८॥

कः स्विदेकाकी चरति कऽउ स्विज्जायते पुनः ।
किꣳ स्विद्धिमस्य भेषजङ्किम्वावपनम्महत् ॥९॥
सूर्य्यऽएकाकी चरति चन्द्रमा जायते पुनः ।
अग्निर्हिमस्य भेषजम्भूमिरावपनम्महत् ॥१०॥
का स्विदासीत्पूर्वचित्तिः किꣳ स्विदासीद्बृहद्वयः ।
का स्विदासीत्पिलिप्पिला का स्विदासीत्पिशङ्गिला ॥११॥
द्यौरासीत्पूर्वचित्तिरश्श्वऽआसीद्बृहद्वयः ।
अविरासीत्पिलिप्पिला रात्रिरासीत्पिशङ्गिला ॥१२॥

॥४॥ वायुष्ट्वा पचतैरवत्वसितग्ग्रीवश्छागैर्न्यग्ग्रोधश्चमसैः शल्म्मलिर्वृद्ध्या ।
एष स्य राथ्यो वृषा पड्भिश्चतुर्भिरेदगन्ब्रह्मा कृष्ण्णश्च नोवतु नमोग्नये ॥१३॥
सꣳशितो रश्म्मिना रथः सꣳशितो रश्म्मिना हयः ।
सꣳशितोऽअप्स्वप्सुजा ब्रह्मा सोमपुरोगवः ॥१४॥
स्वयँव्वाजिँस्तन्वङ्कल्प्पयस्व स्वयँय्यजस्व स्वयञ्जुषस्व ।
महिमा तेन्न्येन न सन्नशे ॥१५॥
न वाऽउऽएतन्म्रियसे न रिष्ष्यसि देवाँ२॥ऽइदेषि पथिभिः सुगेभिः ।
यत्रासते सुकृतो यत्र ते ययुस्तत्र त्वा देवः सविता दधातु ॥१६॥

अग्निः पशुरासीत्तेनायजन्त सऽएतँल्लोकमजयद्यस्मिन्नग्निः स ते लोको भविष्ष्यति तञ्जेष्ष्यसि पिबैताऽअपः । वायुः पशुरासीत्तेनायजन्त सऽएतँल्लोकमजयद्यस्मिन्न्वायुः स ते लोको भविष्ष्यति तञ्जेष्ष्यसि पिबैताऽअपः । सूर्य्यः पशुरासीत्तेनायजन्त सऽएतँल्लोकमजयद्यस्मिन्न्त्सूर्य्यः स ते लोको भविष्ष्यति तञ्जेष्ष्यसि पिबैताऽअपः ॥१७॥

॥५॥ प्राणाय स्वाहापानाय स्वाहा व्यानाय स्वाहा । अम्बेऽअम्बिकेम्बालिके न मा नयति कश्चन । ससस्त्यश्श्वकः सुभद्रिकाङ्काम्पीलवासिनीम् ॥१८॥

गणानान्त्वा गणपतिꣳ हवामहे प्प्रियाणान्त्वा प्प्रियपतिꣳ हवामहे निधीनान्त्वा
निधिपतिꣳ हवामहे व्वसो मम ।
आहमजानि गर्ब्भधमा त्वमजासि गर्ब्भधम् ॥१९॥
ताऽउभौ चतुरः पदः सम्प्रसारयाव स्वर्ग्गे लोके प्प्रोर्ण्णुवाथाँव्वृषा व्वाजी रेतोधा
रेतो दधातु ॥२०॥

उत्त्सक्क्थ्याऽअव गुदन्धेहि समञ्जिञ्चारया व्वृषन् । य स्त्रीणाञ्जीवभोजनः ॥२१॥
यकासकौ शकुन्तिकाहलगिति व्वञ्चति ।
आहन्ति गभे पसो निगल्गलीति धारका ॥२२॥
यकोसकौ शकुन्तकऽआहलगिति व्वञ्चति ।
व्विवक्षतऽइव ते मुखमद्ध्वर्य्यो मा नस्त्वमभिभाषथाः ॥२३॥
माता च ते पिता च तेग्ग्रँव्वृक्षस्य रोहतः ।
प्रतिलामीति ते पिता गभे मुष्ट्टिमतꣳसयत् ॥२४॥
माता च ते पिता च तेग्ग्रे व्वृक्षस्य क्रीडतः ।
व्विवक्षतऽइव ते मुखम्ब्रह्मन्मा त्वँव्वदो बहु ॥२५॥
ऊर्द्ध्वामेनामुच्छ्रापय गिरौ भारꣳ हरन्निव ।
अथास्यै मद्ध्यमेधताꣳ शीते व्वाते पुनन्निव ॥२६॥
ऊर्द्ध्वमेनमुच्छ्रयताद्ग्गिरौ भारꣳ हरन्निव । अथास्य मद्ध्यमेजतु शीते व्वाते पुनन्निव ॥२७॥
यदस्याऽअꣳहुभेद्याः कृधु स्त्थूलमुपातसत् ।
मुष्क्काविदस्याऽएजतो गोशफे शकुलाविव ॥२८॥
यद्देवासो ललामङ्गुम्प्र विष्ट्टीमिनमाविषुः ।
सक्क्थ्ना देदिश्श्यते नारी सत्त्यस्याक्क्षिभुवो यथा ॥२९॥
यद्धरिणो यवमत्ति न पुष्ट्टम्पशु मन्न्यते ।
शूद्रा यदर्य्यजारा न पोषाय धनायति ॥३०॥
यद्धरिणो यवमत्ति न पुष्ट्टम्बहु मन्न्यते ।
शूद्रो यदर्य्यायै जारो न पोषमनुमन्न्यते ॥३१॥
दधिक्क्राव्णोऽअकारिषञ्जिष्ण्णोरश्श्वस्य व्वाजिनः ।
सुरभि नो मुखा करत्प्र णऽआयूꣳषि तारिषत् ॥३२॥

॥७॥ गा॒य॒त्री त्रि॒ष्टुब्जग॑त्त्यनु॒ष्टुप्प॒ङ्क्त्या स॒ह ।
बृ॒ह॒त्त्यु॒ष्णिहा॑ क॒कुप्प्सू॒चीभि॑÷ शम्म्यन्तु त्त्वा ॥३३॥
द्वि॒प॑दा॒ याश्च॒तु॑ष्प्पदा॒स्त्रिप॑दा॒ याश्च॒ षट्प॑दाꣳ ।
व्वि॒च्छ॑न्दा॒ याश्च॒ सच्छ॑न्दाꣳ सू॒चीभि॑÷ शम्म्यन्तु त्त्वा ॥३४॥
म॒हाना॑म्न्यो रे॒वत्त्यो॒ व्विश्श्वा॒ऽआशा॑ꣳ प्प्र॒भूव॑रीꣳ ।
मैघी॑र्व्वि॒द्युतो॒ व्वाच॑÷ सू॒चीभि॑÷ शम्म्यन्तु त्त्वा ॥३५॥
ना॒र्य्य॑स्त्ते॒ पत्न्यो॒ लोम॒ व्विचि॑न्वन्तु मनी॒षया॑ ।
दे॒वाना॒म्पत्न्यो॒ दिश॑÷ सू॒चीभि॑÷ शम्म्यन्तु त्त्वा ॥३६॥
र॒ज॒ता हरि॑णी॒ꣳ सीसा॒ यु॒जो॑ यु॒ज्यन्ते॒ कर्म्म॑भिꣳ ।
अश्श्व॑स्य व्वा॒जिन॑स्त्त्व॒चि सिमा॑ꣳ शम्म्यन्तु॒ शम्म्य॑न्तीꣳ ॥३७॥
कु॒विद॒ङ्ग यव॑मन्तो॒ यव॑ञ्चि॒द्यथा॒ दान्त्य॑नुपू॒र्व्वँव्वि॒यूय॑ ।
इ॒हेहै॑षाङ्कृणु॒हि॒ भोज॑नानि॒ ये ब॒र्हिषो॒ नम॑ऽउक्तिँ॒य्यज॑न्ति ॥३८॥

॥८॥ कस्त्त्वाच्छ्य॑ति॒ कस्त्त्वा॒ व्विशा॑स्त्ति॒ कस्त्ते॒ गात्त्रा॑णि शम्म्यति ।
कऽउ॑ ते शमि॒ता क॒विः ॥३९॥
ऋ॒तव॑स्त्तऽऋतु॒था पर्व्व॑ शमि॒तारो॒ व्विशा॑सतु ।
सँ॒व्व॒त्स॒रस्य॒ तेज॑सा श॒मीभि॑÷ शम्म्यन्तु त्त्वा ॥४०॥
अ॒र्द्ध॒मा॒साः परू॑ꣳषि ते॒ मासा॒ऽआच्छ्य॑न्तु॒ शम्म्य॑न्तꣳ ।
अ॒हो॒रा॒त्त्राणि॑ म॒रुतो॒ व्विलि॑ष्टꣳ सूदयन्तु ते ॥४१॥
दैव्व्या॑ऽअद्ध्व॒र्य्यव॑स्त्त्वाच्छ्य॑न्तु॒ व्वि च॑ शासतु ।
गात्त्रा॑णि पर्व्व॒शस्त्ते॒ सिमा॑ꣳ कृ॒ण्वन्तु॒ शम्म्य॑न्तीꣳ ॥४२॥
द्यौस्त्ते॑ पृथि॒व्व्य॒न्तरि॑क्क्षँ॒व्वा॒युश्छि॒द्रम्पृ॑णातु ते ।
सूर्य्य॑स्त्ते॒ नक्क्ष॑त्त्रैꣳ स॒ह लो॒कङ्कृ॑णोतु साधु॒या ॥४३॥
शन्ते॒ परे॑ब्भ्यो॒ गात्त्रे॑ब्भ्य॒ꣳ शम॒स्त्त्वव॑रेब्भ्यꣳ ।
शम॒स्त्थब्भ्यो॑ म॒ज्जब्भ्य॒ꣳ शम्म्व॑स्त्तु त॒न्न्वै तव॑ ॥४४॥

॥९॥ कः स्वि॑देका॒की च॑रति॒ कऽउ॑ स्विज्जायते॒ पुन॑÷ ।
किꣳ स्वि॑द्धि॒मस्य॑ भेष॒जङ्किम्म्वा॒वप॑नम्म॒हत् ॥४५॥
सूर्य्य॑ऽएका॒की च॑रति च॒न्द्रमा॑ जायते॒ पुन॑÷ ।
अ॒ग्निर्हि॒मस्य॑ भेष॒जम्भूमि॑रा॒वप॑नम्म॒हत् ॥४६॥

किꣳ स्वित्सूर्य्यसमञ्ज्योतिः किꣳ समुद्रसमꣳ सरः ।
किꣳ स्वित्पृथिव्यै वर्षीयः कस्य मात्रा न विद्यते ॥४७॥
ब्रह्म सूर्य्यसमञ्ज्योतिर्द्यौः समुद्रसमꣳ सरः ।
इन्द्रः पृथिव्यै वर्षीयान्गोस्तु मात्रा न विद्यते ॥४८॥
पृच्छामि त्वा चितये देवसख यदि त्वमत्र मनसा जगन्थ ।
येषु विष्णुस्त्रिषु पदेष्वेष्टस्तेषु विश्वम्भुवनमाविवेशा३ ॥४९॥
अपि तेषु त्रिषु पदेष्वस्मि येषु विश्वम्भुवनमाविवेश ।
सद्यः पर्य्येमि पृथिवीमुत द्यामेकेनाङ्गेन दिवोऽअस्य पृष्ठम् ॥५०॥
केष्वन्तः पुरुषऽआविवेश कान्यन्तः पुरुषेऽअर्प्पितानि ।
एतद्ब्रह्मन्नुपवल्हामसि त्वा किꣳ स्विन्नः प्रतिवोचास्यत्र ॥५१॥
पञ्चस्वन्तः पुरुषऽआविवेश तान्यन्तः पुरुषेऽअर्प्पितानि ।
एतत्त्वात्र प्रतिमन्वानोऽअस्मि न मायया भवस्युत्तरो मत् ॥५२॥

॥१०॥ का स्विदासीत्पूर्वचित्तिः किꣳ स्विदासीद्बृहद्वयः ।
का स्विदासीत्पिलिप्पिला का स्विदासीत्पिशङ्गिला ॥५३॥
द्यौरासीत्पूर्वचित्तिरश्वऽआसीद्बृहद्वयः ।
अविरासीत्पिलिप्पिला रात्रिरासीत्पिशङ्गिला ॥५४॥
काऽईमरे पिशङ्गिला काऽईङ्कुरुपिशङ्गिला ।
कऽईमास्कन्दमर्षति कऽईम्पन्थाँविसर्प्पति ॥५५॥
अजारे पिशङ्गिला श्वावित्कुरुपिशङ्गिला ।
शशऽआस्कन्दमर्षत्यहिः पन्थाँविसर्प्पति ॥५६॥
कत्यस्य विष्ठाः कत्यक्षराणि कति होमासः कतिधा समिद्धः ।
यज्ञस्य त्वा विदथा पृच्छमत्र कति होतारऽऋतुशो यजन्ति ॥५७॥
षडस्य विष्ठाः शतमक्षराण्यशीतिर्होमाः समिधो ह तिस्रः ।
यज्ञस्य ते विदथा प्रब्रवीमि सप्त होतारऽऋतुशो यजन्ति ॥५८॥
कोऽअस्य वेद भुवनस्य नाभिङ्को द्यावापृथिवीऽअन्तरिक्षम् ।
कः सूर्य्यस्य वेद बृहतो जनित्रङ्को वेद चन्द्रमसँय्यतोजाः ॥५९॥
वेदाहमस्य भुवनस्य नाभिँवेद द्यावापृथिवीऽअन्तरिक्षम् ।
वेद सूर्य्यस्य बृहतो जनित्रमथो वेद चन्द्रमसँय्यतोजाः ॥६०॥

पृच्छामि॑ त्त्वा॒ पर॒मन्तम्पृथि॒व्याः पृच्छामि॒ यत्र॒ भुव॑नस्य॒ नाभि॑ः ।
पृच्छामि॑ त्त्वा॒ व्वृष्ण्णो॒ऽअश्श्व॑स्य॒ रेत॑ः पृच्छामि॑ व्वा॒चः प॑र॒मँव्व्योम ॥६१॥
इ॒यँव्वेदि॒ः परो॒ऽअन्त॑ः पृथि॒व्याऽअ॒यँय्य॒ज्ञो भुव॑नस्य॒ नाभि॑ः ।
अ॒यꣳ सोमो॒ व्वृष्ण्णो॒ऽअश्श्व॑स्य॒ रेतो॑ ब्र॒ह्मायँव्वा॒चः प॑र॒मँव्व्योम ॥६२॥

॥११॥ सु॒भूः स्व॑य॒म्भूः प्प्र॑थ॒मो॒न्तर्म्म॑ह॒त्त्य॒र्ण्ण॑वे ।
द॒धे ह॒ गर्ब्भ॑मृ॒त्त्वियँय्यतो॑ जा॒तः प्प्र॒जाप॑तिः ॥६३॥
होता॑ यक्षत्त्प्र॒जाप॑ति॒ꣳ सोम॑स्य महि॒म्म्नः ।
जु॒षता॒म्पिब॑तु॒ सोम॒ꣳ होत॒र्य्यज॑ ॥६४॥
प्रजा॑पते॒ न त्त्वदे॒तान्न्य॒न्न्यो व्विश्श्वा॑ रू॒पाणि॒ परि॒ ता ब॑भूव ।
यत्त्का॑मास्ते जुहु॒मस्तन्नो॑ऽअस्तु व्व॒यꣳ स्या॑म॒ पत॑यो रयी॒णाम् ॥६५॥

॥ इति त्रयोविशोऽध्यायः ॥

अथ चतुर्विंशोऽध्यायः

द्रव्यदैवतसंयोगविधायकत्वाद्ब्राह्मणरूपोऽयमध्यायो न मन्त्ररूपः, अत एव यजुःसर्वानुक्रमेऽस्यर्षिदैवतच्छन्दांसि नोक्तानि ॥

॥ ह॒रिः ॐ ॥

॥१॥ अश्श्व॑स्तूप॒रो गोमृ॒गस्ते॑ प्प्राजाप॒त्त्याः कृ॒ष्ण्णग्ग्री॑वऽआग्ग्ने॒यो र॒राटे॑ पु॒रस्त्ता॑त्सारस्व॒ती मे॒ष्ष्य॑धस्त्ता॒द्धन्न्वो॑राश्श्वि॒नाव॒धोरा॑मौ बा॒ह्वोः सौ॑मापौ॒ष्ण्णः श्या॒मो ना॒ब्भ्याꣳ सौ॒र्य्यया॒मौ श्श्वे॒तश्च॑ कृ॒ष्ण्णश्च॑ पा॒र्श्श्वयो॑स्त्वा॒ष्ट्रौ लो॑म॒शस॑क्थौ स॒क्थ्योर्व्वा॑य॒व्यः श्श्वे॒तः पुच्छ॒ऽइन्द्रा॑य स्वप॒स्या॑य व्वे॒हद्वै॑ष्ण्ण॒वो व्वा॑म॒नः ॥१॥

रोहि॑तो धू॒म्म्ररो॑हितः क॒र्क्कन्धु॑रोहितस्ते सौ॒म्म्या ब॒ब्भ्रुर॑रु॒णब॑ब्भ्रुः शु॒कब॑ब्भ्रु॒स्ते व्वा॑रु॒णाः शि॑ति॒रन्ध्रो॒न्न्यत॑ः शितिर॒न्ध्रः स॑म॒न्तशि॑तिरन्ध्र॒स्ते सा॑वि॒त्राः शि॑तिबा॒हुर॒न्न्यत॑ः शितिबा॒हुः स॑म॒न्तशि॑तिबाहु॒स्ते बा॑र्हस्प॒त्त्याः पृष॑ती क्षु॒द्रपृ॑षती स्थू॒लपृ॑षती॒ ता मै॑त्रावरु॒ण्ण्यः ॥२॥

शु॒द्धवा॑लः स॒र्व्वशु॑द्धवालो म॒णिवा॑ल॒स्तऽआ॑श्श्वि॒नाः श्येत॑ः श्येता॒क्षो॒ऽरु॒णस्ते॑ रु॒द्द्राय॑ पशु॒पत॑ये कु॒र्ण्णा या॒माऽअ॑वलि॒प्प्ता रौ॒द्द्रा नभो॑रूपाः पा॒र्ज्जन्न्याः ॥३॥

पृश्निस्त्तिरश्श्चीनपृश्निरूर्द्ध्वपृश्निस्त्ते मारुताः फल्ग्गूर्ल्लोहितोर्ण्णी पलक्क्षी ताः सारस्वत्त्य÷ प्प्लीहाकर्ण्ण÷ शुण्ठाकर्ण्णोऽद्ध्यालोहकर्ण्णस्त्ते त्वाष्ट्राः कृष्ण्णग्ग्रीवः शितिकक्क्षोऽञ्जिसक्क्थस्त्तऽऐन्द्राग्ग्नाः कृष्ण्णाञ्जिरल्प्पाञ्जिर्म्महाञ्जिस्त्तऽउषस्या÷ ॥४॥ ?

शिल्प्पा वैश्श्वदेव्व्यो रोहिण्ण्यस्त्र्यवयो व्वाचेविज्ज्ञाताऽअदित्त्यै सरूपा धात्रे व्वत्सतर्य्यो देवानाम्पत्नीब्भ्यः ॥५॥

कृष्ण्णग्ग्रीवाऽआग्ग्नेयाः शितिब्भ्रवो व्वसूनाꣳ रोहिता रुद्द्राणाꣳ श्श्वेताऽअवरोकिणऽआदित्त्यानान्नभोरूपाः पार्ज्जन्न्याः ॥६॥

उन्नतऽऋषभो व्वामनस्त्तऽऐन्द्रावैष्ण्णवाऽउन्नतः शितिबाहुः शितिपृष्ठस्त्तऽऐन्द्राबार्हस्प्पत्त्याः शुकरूपा व्वाजिनाः कल्म्माषाऽआग्निमारुताः श्यामाः पौष्ण्णाः ॥७॥

एताऽऐन्द्राग्ग्ना द्विरूपाऽअग्ग्नीषोमीया व्वामनाऽअनड्वाहऽआग्ग्नावैष्ण्णवा व्वशा मैत्रावरुण्ण्योन्न्यतऽएन्न्यो मैत्र्य÷ ॥८॥

कृष्ण्णग्ग्रीवाऽआग्ग्नेया बब्भ्रव÷ सौम्म्याः श्श्वेता व्वायव्व्याऽअविज्ज्ञाताऽअदित्त्यै सरूपा धात्रे व्वत्सतर्य्यो देवानाम्पत्नीब्भ्यः ॥९॥

कृष्ण्णा भौमा धूम्म्राऽआन्तरिक्क्षा बृहन्तो दिव्व्याः शबला वैद्द्युताः सिद्ध्मास्तारकाः ॥१०॥

॥२॥ धूम्म्रान्व्वसन्तायालभते श्श्वेतान्ग्ग्रीष्म्माय कृष्ण्णान्व्वर्षाब्भ्योऽरुणाञ्छरदे पृषतो हेमन्ताय पिशङ्गाञ्छिशिराय ॥११॥

त्र्यवयो गायत्त्र्यै पञ्चावयस्त्रिष्टुभे दित्त्यवाहो जगत्त्यै त्रिवत्साऽअनुष्टुभे तुर्य्यवाहऽउष्ण्णिहे ॥१२॥

पृष्ठवाहो व्विराजऽउक्क्षाणो बृहत्त्याऽऋषभाः ककुभेनड्वाह÷ पङ्क्त्यै धेनवोतिच्छन्दसे ॥१३॥

कृष्ण्णग्ग्रीवाऽआग्ग्नेया बब्भ्रव÷ सौम्म्याऽउपद्ध्वस्त्ताः सावित्रा व्वत्सतर्य्य÷ सारस्वत्त्य÷ श्यामाः पौष्ण्णाः पृश्न्नयो मारुता बहुरूपा वैश्श्वदेवा व्वशा द्यावापृथिवीयाः ॥१४॥

उक्त्ताः सञ्चराऽएताऽऐन्द्राग्ग्नाः कृष्ण्णा व्वारुणाः पृश्न्नयो मारुताः कायास्तूपराः ॥१५॥

अग्ग्नयेनीकवते प्प्रथमजानालभते मरुद्द्भ्य÷ सान्तपनेब्भ्य÷ सवात्त्यान्मरुद्द्भ्यो

गृहमेधिब्भ्यो बष्किहान्मरुद्भ्यः क्रीडिब्भ्यः सꣳसृष्टान्मरुद्भ्यः स्वतवद्भ्योनुसृष्टान् ॥१६॥

उक्क्ताः सञ्चराऽएताऽऐन्द्राग्नाः प्प्राशृङ्गा माहेन्द्रा बहुरूपा वैश्श्वकर्म्मणाः ॥१७॥

धूम्म्रा बब्भ्रुनीकाशाः पितृणाꣳ सोमवताम्बब्भ्रवो धूम्म्रनीकाशाः पितृणाम्बर्हिषदाङ्कृष्ण्णा बब्भ्रुनीकाशाः पितृणामग्निष्ष्वात्तानाङ्कृष्ण्णाः पृषन्तस्त्रैयम्बकाः ॥१८॥

उक्क्ताः सञ्चराऽएताः शुनासीरीयाः श्वेता वायव्याः श्वेताः सौर्य्याः ॥१९॥

वसन्ताय कपिञ्जलानालभते ग्ग्रीष्म्माय कलविङ्कान्वर्षाब्भ्यस्तित्तिरीञ्छरदे वर्त्तिका हेमन्ताय ककराञ्छिशिराय विककरान् ॥२०॥

॥३॥ समुद्राय शिशुमारानालभते पर्ज्जन्याय मण्डूकानद्भ्यो मत्त्स्यान्मित्राय कुलीपयान्वरुणाय नाक्क्रान् ॥२१॥

सोमाय हꣳसानालभते वायवे बलाकाऽइन्द्राग्निब्भ्याङ्क्रुञ्चान्मित्राय मद्गून्वरुणाय चक्क्रवाकान् ॥२२॥

अग्नये कुटरूनालभते वनस्प्पतिब्भ्यऽउलूकानग्नीषोमाब्भ्याञ्चाषानश्श्विब्भ्याम्मयूरान्मित्रावरुणाब्भ्याङ्कपोतान् ॥२३॥

सोमाय लबानालभते त्त्वष्ट्रे कौलीकान्गोषादीर्द्देवानाम्पत्नीब्भ्यः कुलीका देवजामिब्भ्योग्नये गृहपतये पारुष्ण्णान् ॥२४॥

अह्ने पारावतानऽलभते रात्र्यै सीचापूरहोरात्रयोः सन्धिब्भ्यो जतूर्म्मासेब्भ्यो दात्त्यौहान्त्सँवत्त्सराय महतः सुपर्ण्णान् ॥२५॥

भूम्म्याऽआखूनालभतेन्तरिक्क्षाय पाङ्क्त्रान्दिवे कशान्दिग्ग्भ्यो नकुलान्बब्भ्रुकानवान्तरदिशाब्भ्यः ॥२६॥

वसुब्भ्यऽऋश्श्यानालभते रुद्द्रेब्भ्यो रुरूनादित्त्येब्भ्यो न्यङ्कून्विश्श्वेब्भ्यो देवेब्भ्यः पृषतान्त्साद्ध्येब्भ्यः कुलुङ्गान् ॥२७॥

ईशानाय परस्वतऽआलभते मित्राय गौरान्वरुणाय महिषान्बृहस्प्पतये गवयाँस्त्वष्ट्रऽउष्ट्रान् ॥२८॥

प्रजापतये पुरुषान्हस्त्तिनऽआलभते वाचे प्प्लुषीँश्चक्क्षुषे मशकाञ्छ्रोत्राय भृङ्गाः ॥२९॥

प्रजापतये च वायवे च गोमृगो वरुणायारण्ण्यो मेषो यमाय कृष्ण्णो मनुष्ष्यराजाय मर्क्कटः शार्दूलाय रोहिदृषभाय गवयी क्षिप्प्रश्श्येनाय वर्त्तिका नीलङ्गोः क्रिमिः समुद्राय शिशुमारो हिमवते हस्ती ॥३०॥

॥४॥ मयुः प्प्राजापत्त्यऽउलो हलिक्ष्णो व्वृषदꣳशस्ते धात्रे दिशाङ्कङ्को धुङ्क्षाग्नेयी कलविङ्को लोहिताहिः पुष्करसादस्ते त्वाष्ट्रा व्वाचे क्रुञ्च÷ ॥३१॥

सोमाय कुलुङ्गऽआरण्ण्योजो नकुलः शका ते पौष्ण्णाः क्रोष्टा मायोरिन्द्रस्य गौरमृगः पिद्वो न्न्यङ्कु÷ कक्कुटस्तेनुमत्त्यै प्प्रतिश्श्रुत्कायै चक्रवाकः ॥३२॥

सौरी बलाका शार्ग्गः सृजयः शयाण्डकस्ते मैत्राः सरस्वत्त्यै शारि÷ पुरुषवाक्श्वाविद्गौमी शार्दूलो व्वृकः पृदाकुस्ते मन्न्यवे सरस्वते शुक÷ पुरुषवाक् ॥३३॥

सुपर्ण्णः पार्ज्जन्न्यऽआतिर्व्वाहसो दर्व्विदा ते व्वायवे बृहस्प्पतये व्वाचस्प्पतये पैङ्गराजोलजऽआन्तरिक्षः प्प्लवो मद्गुर्म्मत्त्स्यस्ते नदीपतये द्यावापृथिवीय÷ कूर्म्मः ॥३४॥

पुरुषमृगश्चन्द्रमसो गोधा कालका दार्व्वाघाटस्ते व्वनस्प्पतीनाङ्कृकवाकु÷ सावित्रो हꣳसो व्वातस्य नाक्रो मकरः कुलीपयस्तेकूपारस्य ह्रियै शल्ल्यकः ॥३५॥

एण्ण्यह्नो मण्डूको मूषिका तित्तिरिस्ते सर्प्पाणाँल्लोपाशऽआश्विनः कृष्ण्णो रात्र्याऽऋक्षो जतूः सुषिलीका तऽइतरजनानाञ्जहका व्वैष्ण्णवी ॥३६॥

अन्न्यवापोर्द्धमासानामृश्श्यो मयूर÷ सुपर्ण्णस्ते गन्धर्व्वाणामपामुद्रो मासाङ्कश्श्यपो रोहित्कुण्डृणाची गोलत्तिका तेप्प्सरसाम्मृत्त्यवेसितः ॥३७॥

व्वर्षाहूर्ऋतूनामाखुः कशो मान्थालस्ते पितॄणाम्बलायाजगरो व्वसूनाङ्कपिञ्जलः कपोतऽउलूकः शशस्ते निर्ऋत्त्यै व्वरुणायारण्ण्यो मेषः ॥३८॥

श्वित्रऽआदित्त्यानामुष्ट्रो घृणीवान्वार्ध्रीनसस्ते मत्त्याऽअरण्ण्याय सृमरो रुरू रौद्रः क्वयि÷ कुटरुर्द्दात्त्यौहस्ते व्वाजिनाङ्कामाय पिकः ॥३९॥

खड्गो व्वैश्श्वदेवः श्वा कृष्ण्णः कर्ण्णो गर्द्दभस्तरक्षुस्ते रक्षसामिन्द्राय सूकरः सिꣳहो मारुतः कृकलासः पिप्पका शकुनिस्ते शरव्यायै व्विश्श्वेषान्देवानाम्पृषतः ॥४०॥

॥ इति चतुर्विंशोऽध्यायः ॥

अथ पञ्चविंशोऽध्यायः

पृथिवीन्त्वचेत्येतत्पर्यन्तः शादन्दद्भिरित्ययमध्यायो विधायकत्वाद्ब्राह्मणमेव न मन्त्राः । अत एव यजुःसर्वानुक्रमेऽपि तावतोंशस्यर्षिदैवतच्छन्दांसि नोक्तानि । अवशिष्टांशस्य प्रदर्श्यन्ते—

ऋषिः (९) 'जुम्बकाय स्वाहा' इत्यारभ्य (४७) 'तन्त्वा' इत्यन्तानां सामान्यतः प्रजापतिर्ऋषिः । विशेषतश्च— (९) 'जुम्बकाय स्वाहा' इत्यस्यौदन्यो मुण्डिभः, (१०) 'हिरण्यगर्भः समवर्तत' (११) 'यः प्राणतः' (१२) 'यस्येमे' (१३) 'य आत्मदा' इत्येषां प्राजापत्यो हिरण्यगर्भः, (१४) 'आ नः' इत्यारभ्य (२३) 'अदितिर्द्यौः' इत्यन्तानां गोतमः, (२४) 'मा नः' इत्यारभ्य (४५) 'सुगव्यन्नः' इत्यन्तानां दीर्घतमाः, (४६) 'इमा नु' इत्यस्याप्त्यो

भुवनः, भौवनः साधनो वा, (४७) 'अग्ने त्वम्' 'वसुरग्निः' 'तन्त्वा' इत्येषां क्रमेण बन्धुः सुबन्धुः श्रुतबन्धुश्च ॥

देवता (९) 'जुम्बकाय स्वाहा' इत्यस्य वरुणः ।

(१०) 'हिरण्यगर्भः समवर्तत' (११) 'यः प्राणतः' (१२) 'यस्येमे' (१३) 'य आत्मदाः' इत्येषां कः ।

(१४) 'आ नः' (१५) 'देवानाम्भद्रा' (१६) 'तान्पूर्वया' (१७) 'तन्नो वातः' (१८) 'तमीशानम्' (१९) 'स्वस्ति नः' (२०) 'पृषदश्वा मरुतः' (२१) 'भद्रङ्कर्णेभिः' (२२) 'शतमिन्नु' (२३) 'अदितिर्द्यौः' इत्येषां विश्वे देवाः ।

(२४) 'मा नः' (२५) 'यन्निर्णिजा' (२६) 'एषच्छागः' (२७) 'यद्धविष्यम्' (२८) 'होताध्वर्युः' (२९) 'यूपव्रस्का' (३०) 'उप प्रागात्' (३१) 'यद्वाजिनः' (३२) 'यदश्वस्य' (३३) 'यदूवध्यम्' (३४) 'यत्ते गात्रात्' (३५) 'ये वाजिनम्' (३६) 'यन्नीक्षणम्' (३७) 'मा त्वाग्निः' (३८) 'निक्रमणन्निषदनम्' (३९) 'यदश्वाय' (४०) 'यत्ते सादे' (४१) 'चतुस्त्रिꣳशद्वाजिनः' (४२) 'एकस्त्वष्टुः' (४३) 'मा त्वा' (४४) 'न वा उ' (४५) 'सुगव्यन्नः' इत्येषामश्वः ।

(४६) 'इमा नु' (४७) 'अग्ने त्वम्' 'तन्त्वा' इत्येषां विश्वे देवाः ।

छन्दः (९) 'जुम्बकाय स्वाहा' इत्यस्य द्विपदा यजुर्गायत्री, (१०) 'हिरण्यगर्भः समवर्तत' इत्यारभ्य (१३) 'य आत्मदा' इत्यन्तानां त्रिष्टुप्, (१४) 'आ नः' इत्यारभ्य (१८) 'तमीशानम्' इत्यन्तानां जगती, (१९) 'स्वस्ति नः' इत्यस्य विराट्स्थाना, (२०) 'पृषदश्वा मरुतः' इत्यस्य जगती, (२१) 'भद्रङ्कर्णेभिः' इत्यारभ्य (२५) 'यन्निर्णिजा' इत्यन्तानां त्रिष्टुप्, (२६) 'एषच्छागः' इत्यस्य जगती, (२७) 'यद्धविष्यम्' (२८) 'होताध्वर्युः' इत्यनयोस्त्रिष्टुप्, (२९) 'यूपव्रस्का' इत्यस्य जगती, (३०) 'उप प्रागात्' इत्यारभ्य (४५) 'सुगव्यन्नः' इत्यन्तानां त्रिष्टुप्, (४६) 'इमा नु' इत्यादित्रयाणां (४७) 'अग्ने त्वम्' इत्यादित्रयाणाञ्च द्विपदा विराट् ॥

॥ हरिः३ॐ ॥

॥१॥ शा॒दन्द॒द्भिरव॑कान्दन्तमू॒लैर्मृद॒म्बस्वै॑स्ते॒गान्दꣳष्ट्रा॑भ्या॒ꣳ सर॑स्वत्त्याऽअग्ग्रजि॒ह्वञ्जि॒ह्वाया॑ऽउत्त्सा॒दम॑वक्क्र॒न्देन॒ तालु॒ वाज॒ꣳ हनु॑भ्याम॒पऽआ॒स्येन॒ वृष॑णमा॒ण्डाभ्या॑मादि॒त्त्याँश्मश्श्रु॑भिः॒ पन्था॑नम्भ्रू॒भ्यान्द्यावा॑पृथि॒वी वर्तो॑भ्याँविद्यु॒तङ्क॒नीन॑काभ्याꣳ शु॒क्क्लाय॒ स्वाहा॑ कृ॒ष्ण्णाय॒ स्वाहा॒ पार्य्या॑णि॒ पक्ष्मा॑ण्यवा॒र्य्याऽइ॒क्षवो॑ऽवा॒र्य्याणि॒ पक्ष्मा॑णि॒ पार्य्या॑ऽइ॒क्षवः॑ ॥१॥

॥२॥ वात॑म्प्रा॒णेना॑पा॒नेन॒ नासि॑केऽउपया॒मम॑धरे॒णौष्ठे॑न॒ सदुत्त॑रेण प्प्रका॒शेनान्त॑रमनूका॒शेन॒ बाह्यं॑न्निवे॒ष्ष्यम्मू॒र्द्ध्ना स्त्त॑नयि॒त्त्नुन्नि॑र्ब्बा॒धेना॒शनि॑म्म॒स्तिष्क्के॑ण वि॒द्युत॑ङ्क॒नीन॑काभ्याङ्कर्ण्णा॑भ्या॒ꣳ श्रोत्र॒ꣳ श्रोत्रा॑भ्याङ्कर्ण्णौ॑ तेद॒नीम॑धरक॒ण्ठेना॒पः शु॑ष्क्कक॒ण्ठेन॑ चि॒त्तम्मन्न्या॑भि॒रदि॑तिꣳ शी॒र्ष्ण्णा निर्ऋ॑ति॒न्निर्ज्ज॑र्जल्प्येन शी॒र्ष्ण्णा स॑ङ्क्रो॒शैः प्प्रा॒णान्रेष्म्मा॑णꣳ स्तु॒पेन॑ ॥२॥

॥३॥ म॒श॒कान्केशै॒रिन्द्र॒ꣳ स्वप॑सा॒ वहे॑न॒ बृह॒स्प्पति॑ꣳ शकुनिसा॒देन॑ कू॒र्म्माञ्छ॒फैरा॒क्क्रम॑ण॒ꣳ स्थू॒राभ्या॑मृक्ष॒लाभिः॑ क॒पिञ्ज॑लाञ्ज॒वञ्जङ्घा॑भ्या॒मद्ध्वा॑नम्बा॒हुभ्या॒ञ्जाम्बी॑लेनार॑ण्ण्यम॒ग्निम॑ति॒रुग्भ्या॑म्पू॒षण॑न्दो॒र्भ्याम॒श्विना॒वꣳसा॑भ्याꣳ रु॒द्रꣳ रोरा॑भ्याम् ॥३॥

॥४॥ अग्नेः पक्षतिर्व्वायोर्न्निपक्षतिरिन्द्रस्य तृतीया सोमस्य चतुर्त्थ्यदित्त्यै पञ्चमीन्द्राण्ण्यै षष्ठी मरुताꣳ सप्तमी बृहस्प्पतेरष्टम्म्यर्य्यम्म्णो नवमी धातुर्द्दशमीन्द्रस्यैकादशी वरुणस्य द्वादशी यमस्य त्रयोदशी ॥४॥

॥५॥ इन्द्राग्न्योः पक्षतिः सरस्वत्त्यै निपक्षतिर्म्मित्रस्य तृतीयापाञ्चतुर्त्थी निर्ऋत्त्यै पञ्चम्म्यग्नीषोमयोः षष्ठी सर्प्पाणाꣳ सप्तमी विष्ण्णोरष्टमी पूष्ण्णो नवमी त्वष्टुर्द्दशमीन्द्रस्यैकादशी वरुणस्य द्वादशी यम्म्यै त्रयोदशी द्यावापृथिव्योर्द्दक्षिणम्पार्श्वँव्विश्वेषान्देवानामुत्तरम् ॥५॥

॥६॥ मरुताꣳ स्कन्धा विश्वेषान्देवानाम्प्रथमा कीकसा रुद्राणान्द्वितीयादित्त्यानान्तृतीया वायोः पुच्छमग्नीषोमयोर्भासदौ क्रुञ्चौ श्रोणिभ्यामिन्द्राबृहस्प्पतीऽऊरुभ्याम्मित्रावरुणावल्गाभ्यामाक्रमणꣳ स्थूराभ्याम्बलङ्कुष्ठाभ्याम् ॥६॥

॥७॥ पूषणँव्वनिष्ठुनान्धाहीन्त्स्थूलगुदया सर्प्पान्गुदाभिर्व्विह्रुतऽआन्त्रैरपो वस्तिना वृषणमाण्डाभ्याँव्वाजिनꣳ शेपेन प्रजाꣳ रेतसा चाषान्पित्तेन प्रदरान्पायुना कूश्म्माञ्छकपिण्डैः ॥७॥

॥८॥ इन्द्रस्य क्रोडोदित्त्यै पाजस्यन्दिशाञ्जत्रवोदित्त्यै भसञ्जीमूतान्हृदयौपशेनान्तरिक्षम्पुरीतता नभऽउदर्य्येण चक्रवाकौ मतस्नाभ्यान्दिवँव्वृक्काभ्याङ्गिरीन्प्लाशिभिरुपलान्प्लीह्ना वल्म्मीकान्क्लोमभिर्ग्ग्लौभिर्ग्गुल्म्मान्हिराभिः स्रवन्तीर्ह्रदान्कुक्षिभ्याꣳ समुद्रमुदरेण वैश्वानरम्भस्म्मना ॥८॥

॥९॥ विधृतिन्नाभ्या घृतꣳ रसेनापो यूष्ण्णा मरीचीर्व्विप्रुड्भिर्न्नीहारमूष्म्मणा शीनँव्वसया प्रुष्वाऽअश्रुभिर्ह्रादुनीर्द्दूषीकाभिरस्ना रक्षाꣳसि चित्राण्ण्यङ्गैर्न्नक्षत्राणि रूपेण पृथिवीन्त्वचा जुम्बकाय स्वाहा ॥९॥

॥१०॥ हिरण्ण्यगर्भः समवर्त्तताग्ग्रे भूतस्य जातः पतिरेकऽआसीत् ।
स दाधार पृथिवीन्द्यामुतेमाङ्कस्म्मै देवाय हविषा विधेम ॥१०॥
यः प्राणतो निमिषतो महित्त्वैकऽइद्राजा जगतो बभूव ।
यऽईशेऽअस्य द्विपदश्चतुष्प्पदः कस्म्मै देवाय हविषा विधेम ॥११॥
यस्येमे हिमवन्तो महित्त्वा यस्य समुद्रꣳ रसया सहाहुः ।
यस्येमाः प्रदिशो यस्य बाहू कस्म्मै देवाय हविषा विधेम ॥१२॥
यऽआत्मदा बलदा यस्य विश्वऽउपासते प्रशिषँय्यस्य देवाः ।
यस्य छायामृतँय्यस्य मृत्युः कस्म्मै देवाय हविषा विधेम ॥१३॥

॥११॥ आ नो॑ भ॒द्राः क्क्रत॑वो यन्तु व्वि॒श्वतोऽद॑ब्धासो॒ऽअप॑रीतासऽउ॒द्भिदः॑ ।
दे॒वा नो॒ यथा॒ सद॒मिद्वृ॒धेऽअस॒न्नप्प्रा॑युवो रक्षि॒तारो॑ दि॒वेदि॑वे ॥१४॥
दे॒वाना॑म्भ॒द्रा सु॑म॒तिर्ऋ॑जूय॒तान्दे॒वाना॑ꣳ रा॒तिर॒भि नो॒ निव॑र्त्तताम् ।
दे॒वाना॑ꣳ स॒ख्यमुप॑सेदिमा व्व॒यन्दे॒वा न॒ऽआयुः॒ प्प्रति॑रन्तु जी॒वसे॑ ॥१५॥
तान्पूर्व्व॑या नि॒विदा॑ हूमहे व्व॒यम्भग॑म्मि॒त्रमदि॑ति॒न्दक्ष॑म॒स्रिध॑म् ।
अ॒र्य्य॒मण॒ँव्वरु॑ण॒ꣳ सोम॑म॒श्विना॒ सर॑स्वती नः सु॒भगा॒ मय॑स्करत् ॥१६॥
तन्नो॒ व्वातो॑ मयो॒भु व्वा॑तु भेष॒जन्तन्मा॒ता पृ॑थि॒वी तत्पि॒ता द्यौः ।
तद्ग्रावा॑णः सोम॒सुतो॑ मयो॒भुव॒स्तद॑श्विना शृणुतन्धिष्ण्या यु॒वम् ॥१७॥
तमीशा॑न॒ञ्जग॑तस्त॒स्थुष॒स्पति॑न्धियञ्जि॒न्वमव॑से हूमहे व्व॒यम् ।
पू॒षा नो॒ यथा॒ व्वेद॑सा॒मस॑द्वृ॒धे र॑क्षि॒ता पा॒युरद॑ब्धः स्व॒स्तये॑ ॥१८॥
स्व॒स्ति न॒ऽइन्द्रो॑ वृ॒द्धश्र॑वाः स्व॒स्ति नः॑ पू॒षा व्वि॒श्ववे॑दाः ।
स्व॒स्ति न॒स्तार्क्ष्यो॒ऽअरि॑ष्टनेमिः स्व॒स्ति नो॒ बृह॒स्पति॑र्द्दधातु ॥१९॥
पृष॑दश्वा म॒रुतः॒ पृश्नि॑मातरः शुभ॒ँय्यावा॑नो व्वि॒दथे॑षु॒ जग्म॑यः ।
अ॒ग्नि॒जि॒ह्वा मन॑वः॒ सूर॑चक्षसो॒ व्विश्वे॑ नो दे॒वाऽअव॒साग॑मन्नि॒ह ॥२०॥
भ॒द्रङ्कर्णे॑भिः शृणुयाम देवा भ॒द्रम्प॑श्येमा॒क्षभि॒र्य्यज॑त्राः ।
स्थि॒रैरङ्गै॑स्तुष्टु॒वाꣳस॑स्त॒नूभि॒र्व्य॑शेमहि दे॒वहि॑त॒ँय्यदायुः॑ ॥२१॥
श॒तमिन्नु श॒रदो॒ऽअन्ति॑ देवा॒ यत्रा॑ नश्च॒क्रा ज॒रस॑न्त॒नूना॑म् ।
पु॒त्रासो॒ यत्र॑ पि॒तरो॒ भव॑न्ति॒ मा नो॑ म॒ध्या री॑रिष॒तायु॒र्ग्गन्तोः॑ ॥२२॥
अदि॑ति॒र्द्यौरदि॑तिर॒न्तरि॑क्ष॒मदि॑तिर्म्मा॒ता स पि॒ता स पु॒त्रः ।
व्विश्वे॑ दे॒वाऽअदि॑तिः॒ पञ्च॒ जना॒ऽअदि॑तिर्ज्जा॒तमदि॑ति॒र्ज्जनि॑त्त्वम् ॥२३॥

॥१२॥ मा नो॑ मि॒त्रो व्वरु॑णोऽअर्य्य॒मायुरिन्द्र॑ऽऋभु॒क्षा म॒रुतः॒ परि॑ख्यन् ।
यद्वा॒जिनो॑ दे॒वजा॑तस्य॒ सप्तेः॑ प्प्रव॒क्ष्यामो॑ व्वि॒दथे॑ व्वी॒र्य्या॑णि ॥२४॥
यन्नि॒र्णिजा॒ रेक्ण॑सा॒ प्प्रावृ॑तस्य रा॒तिङ्गृ॑भी॒ताम्मु॑ख॒तो नय॑न्ति ।
सुप्प्रा॑ङ॒जो मेम्म्य॑द्वि॒श्वरू॑पऽइन्द्रापू॒ष्णोः प्प्रि॒यमप्प्ये॑ति॒ पाथः॑ ॥२५॥
ए॒ष च्छाग॑ः पु॒रोऽअश्वे॑न व्वा॒जिना॑ पू॒ष्णो भा॒गो नी॑यते व्वि॒श्वदे॑व्यः ।
अ॒भि॒प्प्रि॒यँय्यत्पु॑रो॒डाश॒मर्व्व॑ता॒ त्त्वष्टेदे॑नꣳ सौश्रव॒साय॒ जिन्व॑ति ॥२६॥
यद्ध॑वि॒ष्य᳖मृतु॒शो दे॑व॒यान॒न्त्रिर्म्मानु॑षाः॒ पर्य्यश्व॒न्नय॑न्ति ।
अत्रा॑ पू॒ष्णः प्प्र॑थ॒मो भा॒गऽए॑ति य॒ज्ञन्दे॒वेभ्यः॑ प्प्रतिवे॒दय॑न्न॒जः ॥२७॥

होताद्ध्वर्य्युरावयाऽअग्निमिन्धो ग्ग्रावग्ग्राभऽउत शꣳस्ता सुविप्प्रः ।
तेन यज्ञेन स्वरङ्कृतेन स्विष्टेन वक्षणाऽआपृणद्ध्वम् ॥२८॥
यूपव्व्रस्काऽउत ये यूपवाहाश्चषालँय्येऽअश्श्वयूपाय तक्षति ।
ये चार्व्वते पचनꣳ सम्भरन्त्युतो तेषामभिगूर्त्तिर्न्नऽइन्वतु ॥२९॥
उपप्प्रागात्त्सुमन्मेधायि मन्म देवानामाशाऽउप वीतपृष्ठः ।
अन्वेनँविप्प्राऽऋषयो मदन्ति देवानाम्पुष्टे चकृमा सुबन्धुम् ॥३०॥
यद्वाजिनो दाम सन्दानमर्व्वतो या शीर्षण्ण्या रशना रज्जुरस्य ।
यद्वा घास्य प्प्रभृतमास्स्ये तृणꣳ सर्व्वा ता तेऽअपि देवेष्ष्वस्तु ॥३१॥

॥१३॥ यदश्श्वस्य क्क्रविषो मक्क्षिकाश यद्वा स्वरौ स्वधितौ रिप्प्तमस्ति ।
यद्धस्तयोः शमितुर्य्यन्नखेषु सर्व्वा ता तेऽअपि देवेष्ष्वस्तु ॥३२॥
यदूवद्ध्यमुदरस्यापवाति यऽआमस्य क्क्रविषो गन्धोऽअस्ति ।
सुकृता तच्छमितारः कृण्ण्वन्तूत मेधꣳ श्शृतपाकम्पचन्तु ॥३३॥
यत्ते गात्त्रादग्निना पच्च्यमानादभि शूलन्निहतस्यावधावति ।
मा तद्भूम्म्यामाश्श्रिषन्मा तृणेषु देवेब्भ्यस्तदुशद्भ्यो रातमस्तु ॥३४॥
ये वाजिनम्परिपश्श्यन्ति पक्क्वँय्यऽईमाहुः सुरभिर्न्निर्हरेति ।
ये चार्व्वतो माꣳसभिक्क्षामुपासतऽउतो तेषामभिगूर्त्तिर्न्नऽइन्वतु ॥३५॥
यन्नीक्क्षणम्माँस्पचन्न्याऽउखाया या पात्त्राणि यूष्ण्णऽआसेचनानि ।
ऊष्म्मण्ण्यापिधाना चरूणामङ्काः सूनाः परिभूषन्त्यश्श्वम् ॥३६॥
मा त्वाग्निर्द्ध्वनयीद्धूमगन्धिर्म्मोखा ब्भ्राजन्त्यभिविक्त जघ्रिः ।
इष्टँवीतमभिगूर्त्तँवषट्कृतन्तन्देवासः प्प्रतिगृब्भ्णन्त्यश्श्वम् ॥३७॥
निक्क्रमणन्निषदनँविवर्त्तनँय्यच्च पड्वीशमर्व्वतः ।
यच्च पपौ यच्च घासिञ्जघास सर्व्वा ता तेऽअपि देवेष्ष्वस्तु ॥३८॥
यदश्श्वाय व्वासऽउपस्तृणन्त्यधीवासँय्या हिरण्ण्यान्यस्म्मै ।
सन्दानमर्व्वन्तम्पड्वीशम्प्प्रिया देवेष्ष्वायामयन्ति ॥३९॥

॥१४॥ यत्ते सादे महसा शूकृतस्य पार्ष्ण्ण्या वा कशया वा तुतोद ।
स्रुचेव ता हविषोऽअद्ध्वरेषु सर्व्वा ता ते ब्ब्रह्मणा सूदयामि ॥४०॥
चतुस्त्त्रिꣳशद्वाजिनो देवबन्धोर्व्वङ्क्रीरश्श्वस्य स्वधितिः समेति ।
अच्छिद्द्रा गात्त्रा व्वयुना कृणोत परुष्प्परुरनुघुष्या व्विशस्त ॥४१॥

एकस्त्वष्टुरश्वस्या विशस्ता द्वा यन्तारा भवतस्तथऽऋतुः ।
या ते गात्राणामृतुथा कृणोमि ताता पिण्डानाम्प्रजुहोम्म्यग्नौ ॥४२॥
मा त्वा तपत्प्रियऽआत्मापियन्तम्मा स्वधितिस्तन्व्वऽआतिष्ठिपत्ते ।
मा ते गृध्नुरविशस्तातिहाय छिद्रा गात्राण्ण्यसिना मिथू कः ॥४३॥
न वाऽउऽएतन्म्रियसे न रिष्ष्यसि देवाँ२॥ऽइदेषि पथिभिः सुगेभिः ।
हरी ते युञ्जा पृषतीऽअभूतामुपास्थाद्वाजी धुरि रासभस्य ॥४४॥
सुगव्यन्नो वाजी स्वश्व्यम्पुꣳसः पुत्राँ२॥ऽउत विश्वापुषꣳ रयिम् ।
अनागास्त्वन्नोऽअदितिः कृणोतु क्षत्रन्नोऽअश्वो वनताꣳ हविष्म्मान् ॥४५॥

॥१५॥ इमा नु कम्भुवना सीषधामेन्द्रश्च विश्वे च देवाः । आदित्त्यैरिन्द्रः सगणो मरुद्भिरस्म्मभ्यम्भेषजा करत् । यज्ञञ्च नस्तन्वञ्च प्प्रजाञ्चादित्त्यैरिन्द्रः सह सीषधाति ॥४६॥

अग्ने त्वन्नोऽअन्तमऽउत त्राता शिवो भवा वरूथ्यः । वसुरग्निर्वसुश्श्रवाऽअच्छा नक्क्षि द्युमत्तमꣳ रयिन्दाः । तन्त्वा शोचिष्ठ दीदिवः सुम्नाय नूनमीमहे सखिभ्यः ॥४७॥

॥ इति पञ्चविंशोऽध्यायः ॥

अथ षड्विंशोऽध्यायः

ऋषिः (१) 'अग्निश्च' इत्यादिषण्णां (२) 'यथेमाम्' इत्यस्य च विवस्वान्, 'प्रियो देवानाम्' इत्यस्य लौगाक्षिः, (३) 'बृहस्पते अति' इत्यस्य गृत्समदः, (४) 'इन्द्र गोमन्' (५) 'इन्द्रायाहि' इत्यनयो रम्याक्षिः, (६) 'ऋतावानं वैश्वानरम्' इत्यस्य प्रादुराक्षिः, (७) 'वैश्वानरस्य सुमतौ' इत्यस्य कुत्सः, (९) 'अग्निर्ऋषिः' इत्यस्य वसिष्ठ-भरद्वाजौ, (१०) 'महाँ इन्द्रः' इत्यस्य वसिष्ठः, (११) 'तं वः' इत्यस्य नोधागोतमः, (१२) 'यद्वाहिष्ठम्' इत्यस्य वसूयवः, (१३) 'एद्यू षुब्रवाणि' इत्यस्य भरद्वाजः, (१५) 'उपह्वरे गिरीणाम्' इत्यस्य वत्सः, (१६) 'उच्चा ते' इत्यारभ्य (१८) 'एना विश्वानि' इत्यन्तानामामहीयवः, (१९) 'अनु वीरैः' इत्यस्य यक्षपुरुषो मुद्गलः, (२०) 'अग्ने पत्नीः' इत्यारभ्य (२२) 'द्रविणोदाः पिपीषति' इत्यन्तानां मेधातिथिः, (२३) 'तवायम्' इत्यस्य विश्वामित्रः, (२४) 'अमेव नः' इत्यस्य गृत्समदः, (२५) 'स्वादिष्ठया मदिष्ठया' (२६) 'रक्षोहा विश्वचर्षणिः' इत्यनयोर्मधुच्छन्दाः ॥

देवता (१) 'अग्निश्च' 'वायुश्च' 'आदित्यश्च' 'आपश्च' 'सप्त सꣳसदः' 'सकामाँ अध्वनः' (२) 'यथेमाम्' इत्येषां लिङ्गोक्ता. 'प्रियो देवानाम्' इत्यस्याशीः ।
(३) 'बृहस्पते अति' इत्यस्य ब्रह्मा ।
(४) 'इन्द्र गोमन्' (५) 'इन्द्रायाहि' इत्यनयोरिन्द्रः ।
(६) 'ऋतावानं वैश्वानरम्' (७) 'वैश्वानरस्य सुमतौ' (८) 'वैश्वानरो नः' इत्येषां वैश्वानरः ।

(९) 'अग्निर्ऋषिः' इत्यस्याग्निः ।
(१०) 'महाँ इन्द्रः' इत्यस्य महेन्द्रः ।
(११) 'तं वः' इत्यस्येन्द्रः ।
(१२) 'यद्वाहिष्ठम्' (१३) 'एह्यू षुब्रवाणि' (१४) 'ऋतवस्ते' इत्येषामग्निः ।
(१५) 'उपह्वरे गिरीणाम्' (१६) 'उच्चा ते' (१७) 'स नः' (१८) 'एना विश्वानि' इत्येषां सोमः ।
(१९) 'अनु वीरैः' इत्यस्य देवाः ।
(२०) 'अग्ने पत्नीः' इत्यस्याग्निः ।
(२१) 'अभि यज्ञम्' (२२) 'द्रविणोदाः पिपीषति' इत्यनयोर्ऋतुः ।
(२३) 'तवायम्' इत्यस्येन्द्रः ।
(२४) 'अमेव नः' इत्यस्य त्वष्टा ।
(२५) 'स्वादिष्ठया मदिष्ठया' (२६) 'रक्षोहा विश्वचर्षणिः' इत्यनयोः सोमः ॥

छन्दः (२) 'प्रियो देवानाम्' इत्यस्यानुष्टुप्, (३) 'बृहस्पते अति' इत्यस्य त्रिष्टुप्, (४) 'इन्द्र गोमन्' इत्यारभ्य (६) 'ऋतावानं वैश्वानरम्' इत्यन्तानां गायत्री, (७) 'वैश्वानरस्य सुमतौ' इत्यस्य त्रिष्टुप्, (८) 'वैश्वानरो नः' इत्यारभ्य (१०) 'महाँ इन्द्रः' इत्यन्तानां गायत्री, (११) 'तं वः' इत्यस्य पथ्याबृहती, (१२) 'यद्वाहिष्ठम्' इत्यस्यानुष्टुप्, (१३) 'एह्यू षुब्रवाणि' इत्यस्य गायत्री, (१४) 'ऋतवस्ते' इत्यस्य बृहती, (१५) 'उपह्वरे गिरीणाम्' इत्यारभ्य (१८) 'एना विश्वानि' इत्यन्तानां गायत्री, (१९) 'अनु वीरैः' इत्यस्य त्रिष्टुप्, (२०) 'अग्ने पत्नीः' (२१) 'अभि यज्ञम्' (२२) 'द्रविणोदाः पिपीषति' इत्येषां गायत्री, (२३) 'तवायम्' इत्यस्य त्रिष्टुप्, (२४) 'अमेव नः' इत्यस्य जगती, (२५) 'स्वादिष्ठया मदिष्ठया' (२६) 'रक्षोहा विश्वचर्षणिः' इत्यनयोर्गायत्री ॥

॥ हरिः ॐ ॥

अ॒ग्निश्च॑ पृथि॒वी च॒ सन्न॑ते॒ ते मे॒ सन्न॑मतामदो वा॒युश्चा॒न्तरि॑क्षञ्च॒ सन्न॑ते॒ ते मे॒ सन्न॑मतामदऽआदि॒त्यश्च॒ द्यौश्च॒ सन्न॑ते॒ ते मे॒ सन्न॑मतामदऽआप॑श्च॒ वरु॑णश्च॒ सन्न॑ते॒ ते मे॒ सन्न॑मतामदः । स॒प्त स॒ꣳसदो॑ऽअष्ट॒मी भू॒तसाध॑नी । सका॑माँ॒२ऽअद्ध्व॑नस्कुरु स॒ञ्ज्ञान॑मस्तु मे॒मुना॑ ॥१॥

य॒थेमां॒ व्वाचं॑ कल्या॒णीमा॒वदा॑नि॒ जने॑भ्यः । ब्र॒ह्म॒रा॒ज॒न्या᳖भ्या॒ꣳ शू॒द्राय॒ चार्य्या॑य च॒ स्वाय॒ चार॑णाय च । प्रि॒यो दे॒वानां॒ दक्षि॑णायै दा॒तुरि॒ह भू॑यासम॒यम्मे॒ कामः॒ समृ॑द्ध्यता॒मुप॑ मा॒दो न॑मतु ॥२॥

बृह॑स्पते॒ऽअति॒ यद॒र्य्यो॒ऽअर्हा॑द्द्यु॒मद्वि॒भाति॒ क्रतु॑मज्जने॑षु । यद्दी॒दय॒च्छव॑सऽऋतप्रजात॒ तद॒स्मासु॒ द्रवि॑णन्धेहि चि॒त्रम् । उ॒प॒या॒मगृ॑हीतोसि॒ बृह॒स्पत॑ये त्वै॒ष ते॒ योनि॒र्बृह॒स्पत॑ये त्वा ॥३॥

इन्द्र॒ गोम॑न्नि॒हायाहि॒ पिबा॒ सोम॑ꣳ शतक्रतो । वि॒द्यद्भि॒र्ग्राव॑भिः सु॒तम् ।
उ॒प॒या॒मगृ॑हीतो॒सीन्द्रा॑य त्वा॒ गोम॑तऽए॒ष ते॒ योनि॒रिन्द्रा॑य त्वा॒ गोम॑ते ॥४॥

इन्द्राया॑हि वृत्रहन्पिबा॒ सोम॑ꣳ शतक्रतो । गोम॑द्भि॒र्ग्राव॑भिः सु॒तम् ।
उ॒प॒या॒मगृ॑हीतो॒सीन्द्रा॑य त्वा॒ गोम॑तऽए॒ष ते॒ योनि॒रिन्द्रा॑य त्वा॒ गोम॑ते ॥५॥

ऋतावानँव्वैश्वानरमृतस्य ज्योतिषस्प्पतिम् । अजस्रङ्घर्म्ममीमहे ।
उपयामगृहीतोसि व्वैश्वानराय त्वैष ते योनिर्व्वैश्वानराय त्वा ॥६॥
व्वैश्वानरस्य सुमतौ स्याम राजा हि कम्भुवनानामभिश्रीः । इतो जातो व्विश्वमिदँव्विचष्टे व्वैश्वानरो यतते सूर्य्येण । उपयामगृहीतोसि व्वैश्वानराय त्वैष ते योनिर्व्वैश्वानराय त्वा ॥७॥
व्वैश्वानरो नऽऊतयऽआप्प्रयातु परावतः ।
अग्निरुक्थेन व्वाहसा ।
उपयामगृहीतोसि व्वैश्वानराय त्वैष ते योनिर्व्वैश्वानराय त्वा ॥८॥
अग्निर्ऋषिः पवमानः पाञ्चजन्यः पुरोहितः । तमीमहे महागयम् ।
उपयामगृहीतोस्यग्नये त्वा व्वर्च्चसऽएष ते योनिरग्नये त्वा व्वर्च्चसे ॥९॥
महाँ२॥ऽइन्द्रो व्वज्रहस्तः षोडशी शर्म्म यच्छतु । हन्तु पाप्मानँय्योस्मान्द्वेष्टि ।
उपयामगृहीतोसि महेन्द्राय त्वैष ते योनिर्म्महेन्द्राय त्वा ॥१०॥
तँव्वो दस्म्ममृतीषहँव्वसोर्म्मन्दानमन्धसः ।
अभि व्वत्सन्न स्वसरेषु धेनवऽइन्द्रङ्गीर्भिर्न्नवामहे ॥११॥
यद्वाहिष्ठन्तदग्नये बृहदर्च्च व्विभावसो ।
महिषीव त्वद्रयिस्त्वद्वाजाऽउदीरते ॥१२॥
एह्यू षु ब्रवाणि तेग्नऽइत्त्थेतरा गिरः । एभिर्व्वर्द्धासऽइन्दुभिः ॥१३॥
ऋतवस्ते यज्ञँव्वितन्वन्तु मासा रक्षन्तु ते हविः ।
सँव्वत्सरस्ते यज्ञन्दधातु नः प्प्रजाञ्च परिपातु नः ॥१४॥
उपह्वरे गिरिणाꣳ सङ्गमे च नदीनाम् । धिया व्विप्प्रोऽअजायत ॥१५॥

॥२॥ उच्चा ते जातमन्धसो दिवि सद्भूम्म्याददे । उग्रꣳ शर्म्म महि श्श्रवः ॥१६॥
स नऽइन्द्राय यज्यवे व्वरुणाय मरुद्भ्यः । व्वरिवोवित्त्परिस्रव ॥१७॥
एना व्विश्वान्यर्य्यऽआ द्युम्नानि मानुषाणाम् । सिषासन्तो व्वनामहे ॥१८॥
अनु व्वीरैरनु पुष्यास्म्म गोभिरन्वश्श्वैरनु सर्व्वेण पुष्टैः ।
अनु द्विपदानु चतुष्प्पदा व्वयन्देवा नो यज्ञमृतुथा नयन्तु ॥१९॥
अग्ने पत्नीरिहावह देवानामुशतीरुप । त्वष्टारꣳ सोमपीतये ॥२०॥
अभि यज्ञङ्गृणीहि नो ग्नावो नेष्टः पिबऽऋतुना । त्वꣳ हि रत्नधाऽअसि ॥२१॥
द्रविणोदाः पिपीषति जुहोत प्प्र च तिष्ठत । नेष्ट्रादृतुभिरिष्यत ॥२२॥

तवायꣳ सोमस्त्वमेह्यर्वाङ्शश्वत्तमꣳ सुमनाऽअस्य पाहि ।
अस्मिन्यज्ञे बर्हिष्या निषद्या दधिष्वेमञ्जठरऽइन्दुमिन्द्र ॥२३॥
अमेव नः सुहवाऽआ हि गन्तन नि बर्हिषि सदतना रणिष्टन ।
अथा मन्दस्व जुजुषाणोऽअन्धसस्त्वष्टर्देवेभिर्जनिभिः सुमद्गणः ॥२४॥
स्वादिष्ठया मदिष्ठया पवस्व सोम धारया । इन्द्राय पातवे सुतः ॥२५॥ II-494
रक्षोहा विश्वचर्षणिरभि योनिमयोहते । द्रोणे सधस्थमासदत् ॥२६॥

॥ इति षड्विंशोऽध्यायः ॥

अथ सप्तविंशोऽध्यायः

ऋषिः (१) 'समास्त्वा' इत्यारभ्य (४५) 'संवत्सरोसि' इत्यन्तानां सामान्यतः प्रजापतिर्ऋषिः । विशेषतश्च—
(१) 'समास्त्वा' इत्यारभ्य (९) 'असुत्रभूयादध' इत्यन्तानामग्निः, (१०) 'उद्वयन्तमसः' इत्यस्य प्रस्कण्वः, (११)
'ऊर्ध्वा अस्य' इत्यारभ्य (२२) 'अग्ने स्वाहा' इत्यन्तानामग्निः, (२३) 'पीवो अन्ना' (२४) 'राये नु' इत्यनयो-
र्वसिष्ठः, (२५) 'आपो ह' (२६) 'यश्चिदापः' इत्यनयोः प्राजापत्यो हिरण्यगर्भः, (२७) 'प्र याभिर्यासि' (२८)
'आ नः' इत्यनयोर्वसिष्ठः, (२९) 'नियुत्वान्वायो' इत्यस्य गृत्समदः, (३०) 'वायो शुक्रः' इत्यस्य पुरुमीढाजमीढौ,
(३४) 'तव वायो' इत्यस्याङ्गिरसो व्यश्वः, (३५) 'अभि त्वा' (३६) 'न त्वावाम्' इत्यनयोर्वसिष्ठः, (३७)
'त्वामिद्धि' (३८) 'स त्वम्' इत्यनयोर्बार्हस्पत्यः शंयुः, (३९) 'कया नः' इत्यारभ्य (४१) 'अभी षु णः' इत्यन्तानां
वामदेवः, (४२) 'यज्ञायज्ञा वः' (४३) 'पाहि नः' (४४) 'ऊर्जो नपातम्' इत्येषां शंयुः ॥

देवता (१) 'समास्त्वा' (२) 'सञ्चेध्यस्व' (३) 'त्वामग्ने' (४) 'इहैव' (५) 'क्षत्रेणाग्ने' (६) 'अति निहः' (७) 'अनाधृष्यो
जातवेदाः' (८) 'बृहस्पते सवितः' (९) 'असुत्रभूयादध' इत्येषामग्निः ।
(१०) 'उद्वयन्तमसः' इत्यस्य सूर्यः ।
(११) 'ऊर्ध्वा अस्य' (१२) 'तनूनपादसुरः' (१३) 'मध्वा यज्ञम्' (१४) 'अच्छायम्' (१५) 'स यक्षत्' (१६) 'द्वारो
देवीः' (१७) 'ते अस्य' (१८) 'दैव्या होतारा' (१९) 'तिस्रो देवीः' (२०) 'तन्नस्तुरीपम्' (२१) 'वनस्पते-
वसृजा' (२२) 'अग्ने स्वाहा' इत्येषां प्रजापतिरग्निश्च ।
(२३) 'पीवो अन्ना' (२४) 'राये नु' इत्यनयोर्वायुः ।
(२५) 'आपो ह' (२६) 'यश्चिदापः' इत्यनयोः प्रजापतिः ।
(२७) 'प्रयाभिर्यासि' (२८) 'आ नः' (२९) 'नियुत्वान्वायो' (३०) 'वायो शुक्रः' (३१) 'वायुरग्रेगाः' (३२) 'वायो
ये' (३३) 'एकया च दशभिश्च' (३४) 'तव वायो' इत्येषां वायुः ।
(३५) 'अभि त्वा' (३६) 'न त्वावाम्' (३७) 'त्वामिद्धि' (३८) 'स त्वम्' (३९) 'कया नः' (४०) 'कस्त्वा'
(४१) 'अभी षु णः' इत्येषामिन्द्रः ।
(४२) 'यज्ञायज्ञा वः' (४३) 'पाहि नः' (४४) 'ऊर्जो नपातम्' (४५) 'संवत्सरोसि' इत्येषामग्निः ॥

छन्दः (१) 'समास्त्वा' इत्यारभ्य (९) 'असुत्रभूयादध' इत्यन्तानां त्रिष्टुप्, (१०) 'उद्वयन्तमसः' इत्यस्यानुष्टुप्, (११)
'ऊर्ध्वा अस्य' इत्यारभ्य (२२) 'अग्ने स्वाहा' इत्यन्तानामुष्णिक्, (२३) 'पीवो अन्ना' इत्यारभ्य (२८) 'आ
नः' इत्यन्तानां त्रिष्टुप्, (२९) 'नियुत्वान्वायो' इत्यस्य गायत्री, (३०) 'वायो शुक्रः' इत्यस्यानुष्टुप्, (३१)
'वायुरग्रेगाः' (३२) 'वायो ये' इत्यनयोर्गायत्री, (३३) 'एकया च दशभिश्च' इत्यस्य त्रिष्टुप्, (३४) 'तव वायो'

इत्यस्य गायत्री, (३५) 'अभि त्वा' इत्यादिद्वयोः (३७) 'त्वामिद्धि' इत्यादिद्वयोश्च वार्हतः प्रगाथः, (३९) 'कया नः' (४०) 'कस्त्वा' इत्यनयोर्गायत्री. (४१) 'अभी षु णः' इत्यस्य पादनिचृद्गायत्री, (४२) 'यज्ञायज्ञा वः' (४३) 'पाहि नः' (४४) 'ऊर्जो नपातम्' इत्येषां वार्हतः प्रगाथः (द्वयोर्बृहती, तृतीयस्य सतोबृहती) ॥

॥ हरिः ॐ ॥

॥१॥ समास्त्वाग्नऽऋतवो वर्द्धयन्तु सँव्वत्सराऽऋषयो यानि सत्त्या ।
सन्दिव्येन दीदिहि रोचनेन विश्श्वाऽआभाहि प्प्रदिशश्चतस्रः ॥१॥
सञ्चेद्ध्यस्वाग्ने प्प्र च बोधयैनमुच्च तिष्ठ महते सौभगाय ।
मा च रिषदुपसत्ता तेऽअग्ने ब्ब्रह्माणस्ते यशसः सन्तु मान्न्ये ॥२॥
त्वामग्ने वृणते ब्ब्राह्मणाऽइमे शिवोऽअग्ने सँव्वरणे भवा नः ।
सपत्नहा नोऽअभिमातिजिच्च स्वे गये जागृह्यप्प्रयुच्छन् ॥३॥
इहैवाग्नेऽअधिधारया रयिम्मा त्वा निक्रन्पूर्व्वचितो निकारिणः ।
क्षत्रमग्ने सुयममस्तु तुब्भ्यमुपसत्ता वर्द्धतान्तेऽअनिष्टृतः ॥४॥
क्षत्रेणाग्ने स्वायुः सꣳरभस्व मित्रेणाग्ने मित्रधेये यतस्व ।
सजातानाम्मद्ध्यमस्त्थाऽएधि राज्ञामग्ने विहव्यो दीदिहीह ॥५॥
अति निहोऽअति स्रिधोत्त्यचित्तिमत्त्यरातिमग्ने ।
विश्श्वा ह्यग्ने दुरिता सहस्वाथास्म्मब्भ्यꣳ सहवीराꣳ रयिन्दाः ॥६॥
अनाधृष्ष्यो जातवेदाऽअनिष्टृतो विराडग्ने क्षत्रभृद्दीदिहीह ।
विश्श्वाऽआशाः प्प्रमुञ्चन्मानुषीर्भियः शिवेभिरद्य परिपाहि नो वृधे ॥७॥
बृहस्प्पते सवितर्ब्बोधयैनꣳ सꣳशितञ्चित्सन्तराꣳ सꣳशिशाधि ।
वर्द्धयैनम्महते सौभगाय विश्श्वऽएनमनुमदन्तु देवाः ॥८॥
अमुत्रभूयादध यद्यमस्य बृहस्प्पतेऽअभिशस्तेरमुञ्चः ।
प्रत्त्यौहतामश्श्विना मृत्त्युमस्म्माद्देवानामग्ने भिषजा शचीभिः ॥९॥
उद्वयन्तमसस्प्परि स्वः पश्श्यन्तऽउत्तरम् ।
देवन्देवत्रा सूर्य्यमगन्म ज्योतिरुत्तमम् ॥१०॥

॥२॥ ऊर्द्ध्वाऽअस्य समिधो भवन्त्यूर्द्ध्वा शुक्का शोचीꣳष्ष्यग्नेः ।
द्युमत्तमा सुप्प्रतीकस्य सूनोः ॥११॥
तनूनपादसुरो विश्श्ववेदा देवो देवेषु देवः । पथोऽअनक्तु मद्ध्वा घृतेन ॥१२॥
मद्ध्वा यज्ञन्नक्षसे प्प्रीणानो नराशꣳसोऽअग्ने ।
सुकृद्देवः सविता विश्श्ववारः ॥१३॥

अच्छायमेति शवसा घृतेनेडानो वह्निर्नमसा ।
अग्निꣳ स्रुचोऽअद्ध्वरेषु प्प्रयत्त्सु ॥१४॥
स यक्षदस्य महिमानमग्नेः सऽईम्मन्द्रा सुप्प्रयसः ।
वसुश्चेतिष्ठो वसुधातमश्च ॥१५॥
द्वारो देवीरन्वस्य विश्वे व्रता ददन्तेऽअग्नेः ।
उरुव्यचसो धाम्म्ना पत्त्यमानाः ॥१६॥
तेऽअस्य योषणे दिव्ये न योनाऽउषासानक्ता । इमँय्यज्ञमवतामद्ध्वरन्नः ॥१७॥
दैव्या होताराऽऊर्द्ध्वमद्ध्वरन्नोग्नेर्जिह्वामभिगृणीतम् । कृणुतन्नः स्विष्ट्टिम् ॥१८॥
तिस्रो देवीर्बर्हिरेदꣳ सदन्त्विडा सरस्वती भारती । मही गृणाना ॥१९॥
तन्नस्तुरीपमद्भुतम्पुरुक्षु त्वष्ट्टा सुवीर्य्यम् ।
रायस्प्पोषँविष्ष्यतु नाभिमस्म्मे ॥२०॥
वनस्प्पतेवसृजा रराणस्त्मना देवेषु । अग्निर्हव्यꣳ शमिता सूदयाति ॥२१॥
अग्ने स्वाहा कृणुहि जातवेदऽइन्द्राय हव्यम् । विश्वे देवा हविरिदञ्जुषन्ताम् ॥२२॥

॥३॥ पीवोऽअन्ना रयिवृधः सुमेधाः श्वेतः सिषक्ति नियुतामभिश्रीः ।
ते वायवे समनसो वितस्त्थुर्विश्वेन्नरः स्वपत्त्यानि चक्रुः ॥२३॥
राये नु यञ्जज्ञतू रोदसीमे राये देवी धिषणा धाति देवम् ।
अध वायुन्नियुतः सश्चत स्वाऽउत श्वेतँवसुधितिन्निरेके ॥२४॥
आपो ह यद्बृहतीर्विश्वमायन्गर्भन्दधाना जनयन्तीरग्निम् ।
ततो देवानाꣳ समवर्त्ततासुरेकः कस्म्मै देवाय हविषा विधेम ॥२५॥
यश्चिदापो महिना पर्यपश्यद्दक्षन्दधाना जनयन्तीर्यज्ञम् ।
यो देवेष्वधि देवऽएकऽआसीत्त्कस्म्मै देवाय हविषा विधेम ॥२६॥
प्र याभिर्यासि दाश्वाꣳसमच्छा नियुद्भिर्वायविष्ट्टये दुरोणे ।
नि नो रयिꣳ सुभोजसँयुवस्व नि वीरङ्गव्यमश्व्यञ्च राधः ॥२७॥
आ नो नियुद्भिः शतिनीभिरद्ध्वरꣳ सहस्रिणीभिरुपयाहि यज्ञम् ।
वायोऽअस्म्मिन्त्सवने मादयस्व यूयम्पात स्वस्त्तिभिः सदा नः ॥२८॥
नियुत्त्वान्वायवागह्ययꣳ शुक्रोऽअयामि ते । गन्तासि सुन्वतो गृहम् ॥२९॥
वायो शुक्रोऽअयामि ते मद्ध्वोऽअग्ग्रन्दिविष्ट्टिषु ।
आयाहि सोमपीतये स्प्पार्हो देव नियुत्त्वता ॥३०॥

व्वायुरग्ग्रेगा यज्ज्ञप्प्रीः साकङ्गन्मनसा यज्ज्ञम्। शिवो नियुद्भिः शिवाभिः ॥३१
व्वायो ये ते सहस्रिणो रथासस्तेभिरागहि। नियुत्त्वान्त्सोमपीतये ॥३२॥
एकया च दशभिश्च स्वभूते द्वाब्भ्यामिष्टये व्विꣳशती च।
तिसृभिश्च व्वहसे त्रिꣳशता च नियुद्भिर्व्वायविह ता व्विमुञ्च ॥३३॥
तव व्वायवृतस्प्पते त्वष्टुर्ज्जामातरद्भुत। अवाꣳस्याव्वृणीमहे ॥३४॥

॥४॥ अभि त्त्वा शूर नोनुमोदुग्ग्धाऽइव धेनवः।
ईशानमस्य जगतः स्वर्दृशमीशानमिन्द्र तस्त्थुषः ॥३५॥
न त्त्वावाँ२॥ऽअन्यो दिव्यो न पार्त्थिवो न जातो न जनिष्यते।
अश्श्वायन्तो मघवन्निन्द्र व्वाजिनो गव्यन्तस्त्वा हवामहे ॥३६॥
त्वामिद्धि हवामहे सातौ व्वाजस्य कारवः।
त्वाँव्वृत्रेष्विन्द्र सत्त्पतिन्नरस्त्वाङ्काष्ट्ठास्वर्व्वतः ॥३७॥
स त्वन्नश्चित्र व्वज्ज्रहस्त धृष्ण्णुया मह स्तवानोऽअद्रिवः।
गामश्श्वꣳ रत्थ्यमिन्द्र सङ्किर सत्त्रा व्वाजन्न जिग्ग्युषे ॥३८॥
कया नश्चित्रऽआभुवदूती सदावृधः सखा। कया शचिष्ठया व्वृता ॥३९॥
कस्त्वा सत्त्यो मदानाम्मꣳहिष्ठो मत्त्सदन्धसः। दृढा चिदारुजे व्वसु ॥४०॥
अभी षु णः सखीनामविता जरितॄणाम्। शतम्भवास्यूतये ॥४१॥
यज्ज्ञायज्ज्ञा वोऽअग्ग्नये गिरागिरा च दक्क्षसे।
प्रप्प्र व्वयममृतञ्जातवेदसम्प्प्रियम्मित्रन्न शꣳसिषम् ॥४२॥
पाहि नोऽअग्ग्नऽएकया पाह्युत द्वितीयया।
पाहि गीर्ब्भिस्त्तिसृभिरूर्ज्जाम्पते पाहि चतसृभिर्व्वसो ॥४३॥
ऊर्ज्जो नपातꣳ स हिनायमस्म्मयुर्द्दाशेम हव्व्यदातये।
भुवद्व्वाजेष्ष्वविता भुवद्वृधऽउत त्त्राता तनूनाम् ॥४४॥
सँव्वत्त्सरोसि परिवत्त्सरोसीदावत्त्सरोसीद्वत्त्सरोसि व्वत्त्सरोसि। उषसस्ते कल्प्पन्तामहोरात्त्रास्ते कल्प्पन्तामर्द्धमासास्ते कल्प्पन्ताम्मासास्ते कल्प्पन्तामृतवस्ते कल्प्पन्ताꣳ सँव्वत्त्सरस्ते कल्प्पताम्। प्रेत्त्याऽएत्त्यै सञ्चाञ्च प्प्र च सारय। सुपर्ण्णचिद
तया देवतयाङ्गिरस्वद्ध्रुवः सीद ॥४५॥

॥ इति सप्तविंशोऽध्यायः ॥

अथाष्टाविंशोऽध्यायः

ऋषिः (१) 'होता यक्षत्' इत्यारभ्य (४६) 'अग्निमद्य' इत्यन्तानां प्रजापतिरश्विनौ सरस्वती च ऋषयः ।

देवता (१) 'होता यक्षत्' इत्याद्येकादशानां क्रमेणेध्मस्तनूनपादिडो बर्हिर्द्वार उषासानक्ता दैव्यौ होतारौ तिस्रो देव्यस्त्वष्टा वनस्पतिः स्वाहाकृतयः ।

(१२) 'देवम्बर्हिः' (१३) 'देवीर्द्वारः' (१४) 'देवी उषासानक्ता' (१५) 'देवी जोष्ट्री' (१६) 'देवी ऊर्जाहुती' (१७) 'देवा दैव्या' (१८) 'देवीस्तिस्रः' (१९) 'देव इन्द्रः' (२०) 'देवो देवैः' (२१) 'देवम्बर्हिः' (२२) 'देवो अग्निः' इत्येषां क्रमेण बर्हिः, द्वारः, उषासानक्ता, (पञ्चदशीषोडश्योः —) द्यावापृथिव्यावहोरात्रे वा, दैव्यौ होतारौ, तिस्रो देव्यः, नराशंसः, वनस्पतिः, बर्हिः, स्विष्टकृदग्निः ।

(२३) 'अग्निमद्य' 'सूपस्था अद्य' 'त्वामद्य' इत्येषां लिङ्गोक्ता ।

(२४) 'होता यक्षत्' इत्याद्येकादशानां क्रमेण समित्तनूनपादिडो बर्हिर्द्वार उषासानक्ता दैव्यौ होतारौ तिस्रो देव्यस्त्वष्टा वनस्पतिः स्वाहाकृतयः ॥

(३५) 'देवम्बर्हिः' (३६) 'देवीर्द्वारः' (३७) 'देवी उषासानक्ता' (३८) 'देवी जोष्ट्री' (३९) 'देवी ऊर्जाहुती' (४०) 'देवा दैव्या' (४१) 'देवीस्तिस्रः' (४२) 'देवो नराशꣳसः' (४३) 'देवो वनस्पतिः' (४४) 'देवम्बर्हिः' (४५) 'देवो अग्निः' इत्येषां क्रमेण बर्हिः, द्वारः, उषासानक्ता, (अष्टात्रिंश्येकोनचत्वारिंश्योः —) द्यावापृथिव्यावहोरात्रे वा, दैव्यौ होतारौ, तिस्रो देव्यः, नराशंसः, वनस्पतिः, बर्हिः, स्विष्टकृदग्निः ।

(४६) 'अग्निमद्य' 'सूपस्था अद्य' 'त्वामद्य' इत्येषां लिङ्गोक्ता ॥

॥ हरिः ॐ ॥

॥१॥ होता॑ यक्षत्त्स॒मिधेन्द्र॑मि॒डस्प्प॒दे नाभा॑ पृथि॒व्याऽअधि॑ ।
दि॒वो व्वर्ष्म॒न्त्समि॑ध्यत॒ऽओजि॑ष्ठश्चर्षणी॒सहाँ॒ व्वेत्त्वाज्ज्य॑स्य॒ होत॒र्य्यज॑ ॥१॥
होता॑ यक्ष॒त्तनू॒नपा॑तमू॒तिभि॒र्ज्जेता॑रम॒प॑राजितम् । इन्द्र॑न्दे॒वꣳ स्व॒र्व्विद॑म्प॒थिभि॒र्म्मधु॑मत्तमै॒र्न्नरा॒शꣳसे॑न॒ तेज॑सा॒ व्वेत्त्वाज्ज्य॑स्य॒ होत॒र्य्यज॑ ॥२॥
होता॑ यक्ष॒दिडा॑भि॒रिन्द्र॑मीडि॒तमा॒जुह्वा॑न॒मम॑र्त्त्यम् ।
दे॒वो दे॒वैः सवी॑र्य्यो॒ व्वज्ज्र॑हस्तः पुरन्द॒रो व्वेत्त्वाज्ज्य॑स्य॒ होत॒र्य्यज॑ ॥३॥
होता॑ यक्षद्ब॒र्हिषीन्द्र॑न्निष॒द्वरँ॑ व्वृष॒भन्नर्य्या॑पसम् ।
व्वसु॑भी रु॒द्रैरा॑दि॒त्यैः स॒युग्भि॑र्ब्ब॒र्हिरास॑दद्व्वेत्त्वाज्ज्य॑स्य॒ होत॒र्य्यज॑ ॥४॥
होता॑ यक्ष॒दोजो॒ न व्वी॒र्य्यꣳ॒ सहो॒ द्वार॒ऽइन्द्र॑मवर्द्धयन् । सु॒प्प्रा॒य॒णाऽअ॒स्मिन्न्य॒ज्ञे व्वि॑श्श्रयन्तामृता॒वृधो॒ द्वार॒ऽइन्द्रा॑य मी॒ढुषे॒ व्व्यन्त्वाज्ज्य॑स्य॒ होत॒र्य्यज॑ ॥५॥
होता॑ यक्षद्दु॒षेऽइन्द्र॑स्य धे॒नू सु॒दुघे॑ मा॒तरा॑ म॒ही ।
स॒वा॒तरौ॒ न तेज॑सा व्व॒त्समिन्द्र॑मवर्द्धताँ व्वी॒तामाज्ज्य॑स्य॒ होत॒र्य्यज॑ ॥६॥
होता॑ यक्ष॒द्दैव्या॒ होता॑रा भि॒षजा॒ सखा॑या ह॒विषेन्द्र॑म्भिषज्ज्यतः ।
क॒वी दे॒वौ प्प्रचे॑तसा॒विन्द्रा॑य धत्त॒ऽइन्द्रि॒यँ व्वी॒तामाज्ज्य॑स्य॒ होत॒र्य्यज॑ ॥७॥

होता यक्षत्तिस्रो देवीर्न्न भेषजन्त्रयस्त्रिधातवोपसऽइडा सरस्वती भारती महीः ।
इन्द्रपत्नीर्हविष्म्मतीर्व्यन्त्वाज्यस्य होतर्य्यज ॥८॥
होता यक्षत्त्वष्टारमिन्द्रन्देवम्भिषजꣳ सुयजङ्घृतश्रियम् ।
पुरुरूपꣳ सुरेतसम्मघोनमिन्द्राय त्वष्टा दधदिन्द्रियाणि वेत्त्वाज्यस्य होतर्य्यज ॥९॥
होता यक्षद्वनस्पतिꣳ शमितारꣳ शतक्क्रतुन्धियो जोष्टारमिन्द्रियम् । मध्वा
समञ्जन्पथिभिः सुगेभिः स्वदाति यज्ञम्मधुना घृतेन वेत्त्वाज्यस्य होतर्य्यज ॥१०॥
होता यक्षदिन्द्रꣳ स्वाहाज्यस्य स्वाहा मेदसः स्वाहा स्तोकानाꣳ स्वाहा स्वाहाकृतीनाꣳ स्वाहा हव्यसूक्तीनाम् ।
स्वाहा देवाऽआज्यपा जुषाणाऽइन्द्रऽआज्यस्य व्यन्तु होतर्य्यज ॥११॥

॥२॥ देवम्बर्हिरिन्द्रꣳ सुदेवन्देवैर्व्वीरवत्स्तीर्ण्णँवेद्यामवर्द्धयत् ।
वस्तोर्वृतम्प्राक्तोर्भृतꣳ राया बर्हिष्म्मतोत्त्यगाद्वसुवने वसुधेयस्य वेतु यज ॥१२॥
देवीर्द्वारऽइन्द्रꣳ सङ्घाते वीड्वीर्य्यामन्नवर्द्धयन् । आ वत्सेन तरुणेन कुमारेण च
मीवतापार्व्वाणꣳ रेणुक्ककाटन्नुदन्ताँवसुवने वसुधेयस्य व्यन्तु यज ॥१३॥
देवीऽउषासानक्तेन्द्रँय्यज्ञे प्प्रयत्यह्वेताम् ।
दैवीर्व्विशः प्प्रायासिष्टाꣳ सुप्प्रीते सुधिते वसुवने वसुधेयस्य वीताँय्यज ॥१४॥ ॥३॥
देवी जोष्ट्री वसुधिती देवमिन्द्रमवर्द्धताम् । अयाव्यन्याघा द्वेषाꣳस्यान्या वक्षद्वसु
वार्य्याणि यजमानाय शिक्क्षिते वसुवने वसुधेयस्य वीताँय्यज ॥१५॥
देवीऽऊर्ज्जाहुती दुघे सुदुघे पयसेन्द्रमवर्द्धताम् । इषमूर्ज्जमन्या वक्षत्सग्ग्धिꣳ सपीतिमन्या नवेन पूर्व्वन्दयमाने पुराणेन नवमधातामूर्ज्जमूर्ज्जाहुतीऽऊर्ज्जयमाने वसु
वार्य्याणि यजमानाय शिक्क्षिते वसुवने वसुधेयस्य वीताँय्यज ॥१६॥
देवा दैव्या होतारा देवमिन्द्रमवर्द्धताम् । हताघशꣳसावाभार्ष्टाँवसु वार्य्याणि यजमानाय शिक्क्षितौ वसुवने वसुधेयस्य वीताँय्यज ॥१७॥
देवीस्तिस्रस्तिस्रो देवीः पतिमिन्द्रमवर्द्धयन् । अस्पृक्षद्भारती दिवꣳ रुद्रैर्य्यज्ञꣳ
सरस्वतीडा वसुमती गृहान्वसुवने वसुधेयस्य व्यन्तु यज ॥१८॥
देवऽइन्द्रो नराशꣳसस्त्रिवरूथस्त्रिबन्धुरो देवमिन्द्रमवर्द्धयत् । शतेन शितिपृष्ठानामाहितः सहस्रेण प्प्रवर्त्तते मित्रावरुणेदस्य होत्रमर्हतो बृहस्पति स्तोत्रमश्विनाध्वर्य्यवँवसुवने वसुधेयस्य वेतु यज ॥१९॥

दे॒वो दे॒वैर्व्वन॒स्पति॒र्हिर॑ण्यपर्ण्णो॒ मधु॑शाखः सुपिप्प॒लो दे॒वमिन्द्र॑मवर्द्धयत् ।
दिव॒मग्ग्रे॑णास्पृक्ष॒दान्तरि॑क्षम्पृथि॒वीम॑दृꣳहीद्वसु॒वने॑ वसु॒धेय॑स्य वेतु॒ यज॑ ॥२०॥
दे॒वम्ब॒र्हिर्व्वारि॑तीनान्दे॒वमिन्द्र॑मवर्द्धयत् ।
स्वा॒स॒स्थमिन्द्रे॒णास॑न्नम॒न्या ब॒र्हीꣳष्य॒भ्य॑भूद्वसु॒वने॑ वसु॒धेय॑स्य वेतु॒ यज॑ ॥२१॥
दे॒वोऽअ॒ग्निः स्वि॑ष्टकृद्दे॒वमिन्द्र॑मवर्द्धयत् ।
स्वि॑ष्टङ्कु॒र्व्वन्त्स्वि॑ष्टकृत्स्वि॑ष्टम॒द्य क॑रोतु नो वसु॒वने॑ वसु॒धेय॑स्य वेतु॒ यज॑ ॥२२॥
अ॒ग्निम॒द्य होता॑रमवृणीता॒यँय्यज॑मानः पच॒न्पक्तीः॒ पच॑न्पुरो॒डाश॑म्ब॒ध्नन्निन्द्रा॑य॒
च्छाग॑म् । सू॒प॒स्थाऽअ॒द्य दे॒वो वन॒स्पति॑रभव॒दिन्द्रा॑य॒ च्छागे॑न ।
अघ॒त्तम्मे॑द॒स्तः प्प्रति॑पच॒ताग्ग्र॑भी॒दवी॑वृधत्पुरो॒डाशे॑न । त्वाम॒द्यऽऋ॑षे ॥२३॥

गलितमन्त्रः —

त्वाम॒द्यऽऋ॑षऽआर्षेयऽऋषीणान्नपादवृणीता॒यँय्यज॑मानो ब॒हुभ्य॒ऽआ सङ्ग॑तेभ्यऽए॒ष मे॑ दे॒वेषु॒ वसु॒ वार्य्याय॑क्ष्यत॒ऽइति॒ ता या दे॒वा दे॑व॒ दाना॒न्यद॒स्तान्य॑स्म॒ऽआ च॒ शास्स्वा च॑ गुरस्वेषि॒तश्च॑ होत॒रसि॑ भद्र॒वाच्या॑य॒ प्प्रेषि॑तो॒ मानु॑षः सूक्तवा॒काय॑ सूक्ता ब्रूहि ॥

होता॑ यक्षत्स॒मिधा॒नम्म॒हद्यशः॒ सुस॑मिद्धँवरे॑ण्यम॒ग्निमिन्द्रँ॑वयो॒धस॑म् ।
गा॒य॒त्रीञ्छन्द॑ऽइन्द्रि॒यन्त्र्यवि॒ङ्गाँवयो॒ दध॒द्वेत्त्वाज्य॑स्य॒ होत॒र्य्यज॑ ॥२४॥
होता॑ यक्ष॒त्तनू॒नपा॑तमु॒द्भिदँ॒य्यङ्गर्भ॒मदि॑ति॒र्द॒धे शुचि॒मिन्द्रँ॑वयो॒धस॑म् ।
उ॒ष्णिह॒ञ्छन्द॑ऽइन्द्रि॒यन्दि॑त्य॒वाह॒ङ्गाँवयो॒ दध॒द्वेत्त्वाज्य॑स्य॒ होत॒र्य्यज॑ ॥२५॥
होता॑ यक्षदी॒डेन्य॑मीडि॒तँवृ॑त्र॒हन्त॑म॒मिडा॑भि॒रीड्य॒ꣳ सहः॒ सोम॒मिन्द्रँ॑वयो॒धस॑म् ।
अ॒नु॒ष्टुभ॒ञ्छन्द॑ऽइन्द्रि॒यम्पञ्चा॑वि॒ङ्गाँवयो॒ दध॒द्वेत्त्वाज्य॑स्य॒ होत॒र्य्यज॑ ॥२६॥
होता॑ यक्षत्सुब॒र्हिष॑म्पूष॒ण्वन्त॒मम॑र्त्त्य॒ꣳ सीद॑न्तम्ब॒र्हिषि॑ प्प्रि॒येऽमृ॒तेन्द्रँ॑वयो॒धस॑म् ।
बृ॒ह॒तीञ्छन्द॑ऽइन्द्रि॒यन्त्रि॑व॒त्सङ्गाँवयो॒ दध॒द्वेत्त्वाज्य॑स्य॒ होत॒र्य्यज॑ ॥२७॥
होता॑ यक्ष॒द्व्यच॑स्वतीः सुप्प्राय॒णाऽऋ॑ता॒वृधो॒ द्वारो॑ दे॒वीर्हि॑र॒ण्ययी॒र्ब्रह्मा॑ण॒मिन्द्रँ॑-
वयो॒धस॑म् । प॒ङ्क्तिञ्छन्द॑ऽइ॒हेन्द्रि॒यन्तु॑र्य्य॒वाह॒ङ्गाँवयो॒ दध॒द्व्यन्त्वाज्य॑स्य होत॒र्य्यज॑ ॥२८॥
होता॑ यक्षत्सु॒पेश॑सा सुशि॒ल्प्पे बृ॑ह॒तीऽउ॒भे नक्तो॒षासा॒ न द॑र्श॒ते विश्श्व॒मिन्द्रँ॑वयो॒-
धस॑म् । त्रि॒ष्टुभ॒ञ्छन्द॑ऽइ॒हेन्द्रि॒यम्प॑ष्ठ॒वाह॒ङ्गाँवयो॒ दध॑द्वीता॒माज्य॑स्य होत॒र्य्यज॑ ॥२९॥
होता॑ यक्ष॒त्प्रचे॑तसा दे॒वाना॑मुत्त॒मँय्यशो॒ होता॑रा॒ दैव्या॑ क॒वी स॒युजेन्द्रँ॑वयो॒धस॑म् ।
जग॑ती॒ञ्छन्द॑ऽइन्द्रि॒यम॑न॒ड्वाह॒ङ्गाँवयो॒ दध॑द्वीता॒माज्य॑स्य होत॒र्य्यज॑ ॥३०॥

होता यक्क्षत्त्पेशस्वतीस्तिस्रो देवीर्हिरण्ययीर्ब्भारतीर्बृहतीर्म्महीः पतिमिन्द्रँव्वयो-
धसम् । व्विराजञ्छन्दऽइहेन्द्रियन्धेनुङ्गान्न व्वयो दधद्व्यन्त्वाज्ज्यस्य होतर्य्यज ॥३१॥

होता यक्क्षत्सुरेतसन्त्वष्टारम्पुष्टिवर्द्धनꣳ रूपाणि बिब्भ्रतम्पृथक्पुष्टिमिन्द्रँव्वयो-
धसम् । द्विपदञ्छन्दऽइन्द्रियमुक्क्षाणङ्गान्न व्वयो दधद्वेत्त्वाज्ज्यस्य होतर्य्यज ॥३२॥

होता यक्क्षद्वनस्प्पतिꣳ शमितारꣳ शतक्क्रतुꣳ हिरण्ण्यपर्ण्णमुक्थिनꣳ रशनाम्बि-
ब्भ्रतँव्वशिम्भगमिन्द्रँव्वयोधसम् । ककुभञ्छन्दऽइहेन्द्रियँव्वशाँव्वेहतङ्गाँव्वयो दधद्वेत्त्वा-
ज्ज्यस्य होतर्य्यज ॥३३॥

होता यक्क्षत्स्वाहाकृतीरग्निङ्गृहपतिम्पृथग्वरुणम्भेषजङ्कविङ्क्षत्रमिन्द्रँव्वयोधसम् ।
अतिच्छन्दसञ्छन्दऽइन्द्रियम्बृहदृषभङ्गाँव्वयो दधद्व्यन्त्वाज्ज्यस्य होतर्य्यज ॥३४॥

॥४॥ देवम्बर्हिर्व्वयोधसन्देवमिन्द्रमवर्द्धयत् । गायत्र्या च्छन्दसेन्द्रियञ्चक्षुरिन्द्रे व्वयो दध-
द्वसुवने व्वसुधेयस्य व्वेतु यज ॥३५॥

देवीर्द्वारो व्वयोधसꣳ शुचिमिन्द्रमवर्द्धयन् ।
उष्णिहा च्छन्दसेन्द्रियम्प्राणमिन्द्रे व्वयो दधद्वसुवने व्वसुधेयस्य व्यन्तु यज ॥३६॥

देवीऽउषासानक्ता देवमिन्द्रँव्वयोधसन्देवी देवमवर्द्धताम् ।
अनुष्टुभा च्छन्दसेन्द्रियम्बलमिन्द्रे व्वयो दधद्वसुवने व्वसुधेयस्य व्वीताँय्यज ॥३७॥

देवी जोष्ट्री व्वसुधिती देवमिन्द्रँव्वयोधसन्देवी देवमवर्द्धताम् ।
बृहत्या च्छन्दसेन्द्रियꣳ श्रोत्रमिन्द्रे व्वयो दधद्वसुवने व्वसुधेयस्य व्वीताँय्यज ॥३८॥

देवीऽऊर्ज्जाहुती दुघे सुदुघे पयसेन्द्रँव्वयोधसन्देवी देवमवर्द्धताम् ।
पङ्क्त्या च्छन्दसेन्द्रियꣳ शुक्रमिन्द्रे व्वयो दधद्वसुवने व्वसुधेयस्य व्वीताँय्यज ॥३९॥

देवा दैव्या होतारा देवमिन्द्रँव्वयोधसन्देवौ देवमवर्द्धताम् ।
त्रिष्टुभा च्छन्दसेन्द्रियन्त्विषिमिन्द्रे व्वयो दधद्वसुवने व्वसुधेयस्य व्वीताँय्यज ॥४०॥

देवीस्तिस्रस्तिस्रो देवीर्व्वयोधसम्पतिमिन्द्रमवर्द्धयन् ।
जगत्या च्छन्दसेन्द्रियꣳ शूषमिन्द्रे व्वयो दधद्वसुवने व्वसुधेयस्य व्यन्तु यज ॥४१॥

देवो नराशꣳसो देवमिन्द्रँव्वयोधसन्देवो देवमवर्द्धयत् ।
व्विराजा च्छन्दसेन्द्रियꣳ रूपमिन्द्रे व्वयो दधद्वसुवने व्वसुधेयस्य व्वेतु यज ॥४२॥

देवो व्वनस्प्पतिर्द्देवमिन्द्रँव्वयोधसन्देवो देवमवर्द्धयत् ।
द्विपदा च्छन्दसेन्द्रियम्भगमिन्द्रे व्वयो दधद्वसुवने व्वसुधेयस्य व्वेतु यज ॥४३॥

देवम्बर्हिर्व्वारितीनान्देवमिन्द्रँव्वयोधसन्देवन्देवमवर्द्धयत् ।
ककुभा च्छन्दसेन्द्रियँय्यशऽइन्द्रे व्वयो दधद्वसुवने व्वसुधेयस्य व्वेतु यज ॥४४॥
देवोऽअग्निः स्विष्टकृद्देवमिन्द्रँव्वयोधसन्देवो देवमवर्द्धयत् ।
अतिच्छन्दसा च्छन्दसेन्द्रियङ्क्षत्रमिन्द्रे व्वयो दधद्वसुवने व्वसुधेयस्य व्वेतु यज ॥४५॥
अग्निमद्य होतारमवृणीतायँय्यजमानः पचन्पक्तीः पचन्पुरोडाशम्बध्नन्निन्द्राय व्वयोधसे च्छागम् । सूपस्थाऽअद्य देवो व्वनस्पतिरभवदिन्द्राय व्वयोधसे च्छागेन । अघत्तम्मेदस्तः प्प्रतिपचताग्ग्रभीदवीवृधत्पुरोडाशेन । त्वामद्यऽऋषे ॥४६॥

गलितमन्त्रः —

त्वामद्यऽऋषऽआर्षेयऽऋषीणान्नपादवृणीतायँय्यजमानो बहुभ्यऽआ सङ्गतेभ्यऽएष मे देवेषु व्वसु व्वार्य्यायक्ष्यतऽइति ता या देवा देव दानान्यदुस्तान्यस्माऽआ च शास्स्वा च गुरस्वेषितश्च होतरसि भद्द्रवाच्याय प्प्रेषितो मानुषः सूक्तवाकाय सूक्ता ब्रूहि ॥

॥ इत्यष्टाविंशोऽध्यायः ॥

अथैकोनत्रिंशोऽध्यायः

ऋषिः (१) 'समिद्धो अञ्जन्' इत्यारभ्य (६०) 'अग्नये गायत्राय' इत्यन्तानां सामान्यतः प्रजापतिर्ऋषिः । विशेषतश्च—
(१) 'समिद्धो अञ्जन्' इत्यारभ्य (११) 'प्रजापतेस्तपसा' इत्यन्तानां वामदेव्यो बृहदुक्थः सामुद्रिरश्वो वा, (१२) 'यदक्रन्दत्' इत्यारभ्य (२४) 'उप प्रागात्' इत्यन्तानां भार्गवो जमदग्निर्दीर्घतमाश्च, (२५) 'समिद्धो अद्य' इत्यारभ्य (३६) 'सद्यो जातः' इत्यन्तानां जमदग्निः, (३७) 'केतुङ्कृण्वन्' इत्यस्य मधुच्छन्दाः, (३८) 'जीमूतस्येव' इत्यारभ्य (५७) 'समश्वपर्णाश्चरन्ति' इत्यन्तानां भारद्वाजः पायुः ॥

देवता (१) 'समिद्धो अञ्जन्' (२) 'घृतेनाञ्जन्' (३) 'ईड्यश्चासि' (४) 'स्तीर्णम्बर्हिः' (५) 'एता उ' (६) 'अन्तरा मित्रावरुणा' (७) 'प्रथमा वाम्' (८) 'आदित्यैर्नः' (९) 'त्वष्टा वीरम्' (१०) 'अश्वो घृतेन' (११) 'प्रजापतेस्तपसा' इत्येषां क्रमेण समित्तनूनपादिडो बर्हिर्द्वार उषासानक्ता दैव्यौ होतारौ तिस्रो देव्यस्त्वष्टा वनस्पतिः स्वाहाकृतयः ।
(१२) 'यदक्रन्दः' (१३) 'यमेन दत्तम्' (१४) 'असि यमः' (१५) 'त्रीणि ते' (१६) 'इमा ते' (१७) 'आत्मानन्ते' (१८) 'अत्रा ते' (१९) 'अनु त्वा' (२०) 'हिरण्यशृङ्गोयः' (२१) 'ईर्मान्तासः' (२२) 'तव शरीरम्' (२३) 'उप प्रागाच्छसनम्' (२४) 'उप प्रागात्परमम्' इत्येषामश्वः ।
(२५) 'समिद्धो अद्य' (२६) 'तनूनपात्पथः' (२७) 'नराशꣳसस्य' (२८) 'आजुह्वान ईड्यः' (२९) 'प्राचीनम्बर्हिः' (३०) 'व्यचस्वतीरुर्विया' (३१) 'आ सुष्वयन्ती' (३२) 'दैव्या होतारा' (३३) 'आ नः' (३४) 'य इमे' (३५) 'उपावसृज त्मन्या' (३६) 'सद्यो जातः' इत्येषां क्रमेण समित्तनूनपान्नराशंस इडो वर्हिर्द्वार उषासानक्ता दैव्यौ होतारौ तिस्रो देव्यस्त्वष्टा वनस्पतिः स्वाहाकृतयः ।

(३७) 'केतुङ्कृण्वन्' इत्यस्याग्निः ।
(३८) 'जीमूतस्येव' इत्यस्य सन्नाहः ।
(३९) 'धन्वना गाः' इत्यस्य कार्मुकम् ।
(४०) 'वक्ष्यन्तीवेदागनीगन्ति' इत्यस्य ज्या ।
(४१) 'ते आचरन्ती' इत्यस्यार्त्नी ।
(४२) 'बह्वीनाम्पिता' इत्यस्य तूणम् ।
(४३) 'रथे तिष्ठन्' इत्यस्य सारथिः, 'अभीशूनाम्महिमानम्' इत्यस्य रश्मयः ।
(४४) 'तीव्रान्घोषान्' इत्यस्य हरयः ।
(४५) 'रथवाहणꣳ हविः' इत्यस्य रथः ।
(४६) 'स्वादुषꣳसदः पितरः' इत्यस्य रथगोपायितारः ।
(४७) 'ब्राह्मणासः पितरः' इत्यस्य लिङ्गोक्ता ।
(४८) 'सुपर्णं वस्ते' (४९) 'ऋजीते परिवृङ्धि' इत्यनयोरिषुः ।
(५०) 'आजङ्घन्ति' इत्यस्य कशा ।
(५१) 'अहिरिव' इत्यस्य हस्तघ्नः ।
(५२) 'वनस्पते वीड्वङ्गः' (५३) 'दिवः पृथिव्याः' (५४) 'इन्द्रस्य वज्रः' इत्येषां रथः ।
(५५) 'उपश्वासय' (५६) 'आक्रन्दय बलम्' (५७) 'आमूरज' इत्येषां दुन्दुभिः, 'समश्वपर्णाश्चरन्ति' इत्यस्येन्द्रः ।
(५८) 'आग्नेयः कृष्णग्रीवः' (५९) 'अग्नयेनीकवते' (६०) 'अग्नये गायत्र्याय' इत्येषां द्रव्यदैवतसंयोगविधायकत्वाद्ब्राह्मणत्वमेव न मन्त्रत्वम्, अतो यजुःसर्वानुक्रम एतेषामृषिदैवतच्छन्दांसि नोक्तानि ॥

छन्दः (१) 'समिद्धो अञ्जन्' इत्यारभ्य (३६) 'सद्यो जातः' इत्यन्तानां त्रिष्टुप्, (३७) 'केतुङ्कृण्वन्' इत्यस्य गायत्री, (३८) 'जीमूतस्येव' इत्यारभ्य (४२) 'बह्वीनां पिता' इत्यन्तानां त्रिष्टुप्, (४३) 'रथे तिष्ठन्' 'अभीशूनाम्महिमानम्' इत्यनयोर्जगती, (४४) 'तीव्रान्घोषान्' इत्यारभ्य (४६) 'स्वादुषꣳसदः पितरः' इत्यन्तानां त्रिष्टुप्, (४७) 'ब्राह्मणासः पितरः' इत्यस्य जगती, (४८) 'सुपर्णं वस्ते' इत्यस्य त्रिष्टुप्, (४९) 'ऋजीते परिवृङ्धि' (५०) 'आजङ्घन्ति' इत्यनयोरनुष्टुप्, (५१) 'अहिरिव' इत्यारभ्य (५७) 'समश्वपर्णाश्चरन्ति' इत्यन्तानां त्रिष्टुप् ॥

॥ हरिः३ॐ ॥

॥१॥ स॒मिद्धो॑ऽअ॒ञ्जन्कृद॑रम्मती॒नाङ्घृ॒तम॑ग्ने॒ मधु॑म॒त्पिन्व॑मानः ।
व्वा॒जी व्वह॑न्व्वा॒जिन॑ञ्जातवेदो दे॒वानाँ॑व्वक्षि प्प्रि॒यमा स॒धस्त्थ॑म् ॥१॥
घृ॒तेना॒ञ्जन्त्सम्प॒थो दे॑व॒याना॑न्प्रजा॒नन्व्वा॒ज्य॒प्प्ये॑तु दे॒वान् ।
अनु॑ त्वा सप्ते प्प्र॒दिशः॑ सचन्ताꣳ स्व॒धाम॒स्मै यज॑मानाय धेहि ॥२॥
ईड्य॒श्चासि॒ व्वन्द्य॑श्च व्वाजिन्ना॒शुश्चासि॒ मेद्ध्य॑श्च सप्ते ।
अ॒ग्निष्ट्वा॑ दे॒वैर्व्वसु॑भिः स॒जोषाः॑ प्प्री॒तँव्वह्नि॑ँव्वहतु जा॒तवे॑दाः ॥३॥
स्ती॒र्ण्णम्ब॒र्हिः सु॒ष्टरी॑मा जुषा॒णोरु पृ॒थु प्प्रथ॑मानम्पृथि॒व्याम् ।
दे॒वेभि॒र्य्यु॒क्तमदि॑तिः स॒जोषाः॑ स्यो॒नङ्कृ॒ण्वा॒ना सु॑वि॒ते द॑धातु ॥४॥
ए॒ताऽउ॑ वः सु॒भगा॑ वि॒श्वरू॑पा॒ वि पक्षो॑भिः श्रय॑माणा॒ऽउदा॑तैः ।
ऋ॒ष्वाः स॒तीः क॒वषः॒ शुम्भ॑माना॒ द्वारो॑ दे॒वीः सु॒प्प्राय॒णा भ॑वन्तु ॥५॥

अन्तरा मित्रावरुणा चरन्ती मुखँय्यज्ञानामभिसँविदाने ।
उषासा वाꣳ सुहिरण्ण्ये सुशिल्प्पेऽऋतस्य योनाविह सादयामि ॥६॥
प्रथमा वाꣳ सरथिना सुवर्ण्णा देवौ पश्श्यन्तौ भुवनानि विश्श्वा ।
अपिप्प्रयञ्चोदना वाम्मिमाना होतारा ज्योतिः प्प्रदिशा दिशन्ता ॥७॥
आदित्त्यैर्न्नो भारती वष्टु यज्ञꣳ सरस्वती सह रुद्रैर्न्नऽआवीत् ।
इडोपहूता वसुभिः सजोषा यज्ञन्नो देवीरमृतेषु धत्त ॥८॥
त्वष्टा वीरन्देवकामञ्जजान त्वष्टुरर्वा जायतऽआशुरश्श्वः ।
त्वष्टेदँविश्श्वम्भुवनञ्जजान बहोः कर्त्तारमिह यक्षि होतः ॥९॥
अश्श्वो घृतेन त्मन्न्या समक्तऽउप देवाँ॥ऽऋतुशः पाथऽएतु ।
वनस्प्पतिर्द्देवलोकम्प्रजानन्नग्ग्निना हव्व्या स्वदितानि वक्षत् ॥१०॥
प्रजापतेस्त्तपसा वावृधानः सद्द्यो जातो दधिषे यज्ञमग्ग्ने ।
स्वाहाकृतेन हविषा पुरोगा याहि साद्ध्या हविरदन्तु देवाः ॥११॥

॥२॥ यदक्क्रन्दः प्प्रथमञ्जायमानऽउद्यन्त्समुद्द्रादुत वा पुरीषात् ।
श्येनस्य पक्षा हरिणस्य बाहूऽउपस्तुत्त्यम्महि जातन्तेऽअर्वन् ॥१२॥
यमेन दत्तन्त्रितऽएनमायुनगिन्द्रऽएणम्प्रथमोऽअद्ध्यतिष्ठत् ।
गन्धर्वोऽअस्य रशनामगृब्भ्णात्त्सूरादश्श्वँवसवो निरतष्ट ॥१३॥
असि यमोऽअस्यादित्त्योऽअर्व्वन्नसि त्रितो गुह्येन व्रतेन ।
असि सोमेन समया विपृक्तऽआहुस्ते त्रीणि दिवि बन्धनानि ॥१४॥
त्रीणि तऽआहुर्द्दिवि बन्धनानि त्रीण्ण्यप्प्सु त्रीण्ण्यन्तः समुद्रे ।
उतेव मे वरुणश्छन्त्स्यर्व्वन्यत्रा तऽआहुः परमञ्जनित्रम् ॥१५॥
इमा ते वाजिन्नवमार्ज्जनानीमा शफानाꣳ सनितुर्न्निधाना ।
अत्रा ते भद्रा रशनाऽअपश्श्यमृतस्य याऽअभिरक्षन्ति गोपाः ॥१६॥
आत्मानन्ते मनसारादजानामवो दिवा पतयन्तम्पतङ्गम् ।
शिरोऽअपश्श्यम्पथिभिः सुगेभिररेणुभिर्ज्जेहमानम्पतत्रि ॥१७॥
अत्रा ते रूपमुत्तममपश्श्यञ्जिगीषमाणमिषऽआ पदे गोः ।
यदा ते मर्त्तोऽअनु भोगमानडादिद्ग्रसिष्ठऽओषधीरजीगः ॥१८॥
अनु त्वा रथोऽअनु मर्य्योऽअर्व्वन्ननु गावोनु भगः कनीनाम् ।
अनु व्रातासस्तव सक्ख्यमीयुरनु देवा ममिरे वीर्य्यन्ते ॥१९॥

हिरण्ण्यशृङ्गोयोऽअस्य पादा मनोजवाऽअवरऽइन्द्रऽआसीत् ।
देवाऽइदस्य हविरद्द्यमायन्न्योऽअर्वन्तम्प्रथमोऽअद्ध्यतिष्ठत् ॥२०॥
ईर्म्मान्तासः सिलिकमद्ध्यमासः सꣳ शूरणासो दिव्व्यासोऽअत्त्याः ।
हꣳसाऽइव श्श्रेणिशो यतन्ते यदाक्षिषुर्द्दिव्व्यमज्ज्ममश्श्वाः ॥२१॥
तव शरीरम्पतयिष्ण्ण्वर्व्वन्तव चित्तँव्वातऽइव ध्रजीमान् ।
तव शृङ्गाणि विष्ठिता पुरुत्त्रारण्ण्येषु जर्ब्भुराणा चरन्ति ॥२२॥
उपप्प्रागाच्छसनँव्वाज्ज्यर्व्वा देवद्द्रीचा मनसा दीद्ध्यानः । ॥४॥
अजः पुरो नीयते नाभिरस्यानु पश्श्चात्कवयो यन्ति रेभाः ॥२३॥
उपप्प्रागात्परमँय्यत्सधस्त्थमर्व्वाँ२॥ऽअच्छा पितरम्मातरञ्च ।
अद्द्या देवाञ्जुष्टतमो हि गम्म्याऽअथाशास्ते दाशुषे व्वार्य्याणि ॥२४॥

॥३॥ समिद्धोऽअद्य मनुषो दुरोणे देवो देवान्न्यजसि जातवेदः ।
आ च व्वह मित्रमहश्चिकित्वान्त्वन्दूतः कविरसि प्प्रचेताः ॥२५॥
तनूनपात्पथऽऋतस्य यानान्मद्ध्वा समञ्जन्त्स्वदया सुजिह्व ।
मन्म्मानि धीभिरुत यज्ञमृन्धन्देवत्रा च कृणुह्यद्ध्वरन्नः ॥२६॥
नराशꣳसस्य महिमानमेषामुपस्तोषाम यजतस्य यज्ञैः ।
ये सुक्रतवः शुचयो धियन्धाः स्वदन्ति देवाऽउभयानि हव्व्या ॥२७॥
आजुह्वानऽईड्यो वन्द्यश्चायाह्यग्ने व्वसुभिः सजोषाः ।
त्वन्देवानामसि यह्व होता सऽएनान्न्यक्षीषितो यजीयान् ॥२८॥
प्राचीनम्बर्हिः प्प्रदिशा पृथिव्व्या व्वस्तोरस्या व्वृज्ज्यतेऽअग्ग्रेऽअह्नाम् ।
व्व्यु प्प्रथते व्वितरँव्वरीयो देवेब्भ्योऽअदितये स्योनम् ॥२९॥
व्व्यचस्वतीरुर्व्विया व्विश्श्रयन्ताम्पतिब्भ्यो न जनयः शुम्भमानाः ।
देवीर्द्वारो बृहतीर्व्विश्श्वमिन्न्वा देवेब्भ्यो भवत सुप्प्रायणाः ॥३०॥
आ सुष्ष्वयन्ती यजतेऽउपाकेऽउषासानक्ता सदताम्नि योनौ ।
दिव्व्ये योषणे बृहती सुरुक्मेऽअधि श्श्रियꣳ शुक्रपिशन्दधाने ॥३१॥
दैव्व्या होतारा प्प्रथमा सुवाचा मिमाना यज्ञम्मनुषो यजद्ध्यै ।
प्प्रचोदयन्ता व्विदथेषु कारू प्प्राचीनञ्ज्योतिः प्प्रदिशा दिशन्ता ॥३२॥
आ नो यज्ञम्भारती तूयमेत्विडा मनुष्ष्वदिह चेतयन्ती ।
तिस्रो देवीर्ब्बर्हिरेदꣳ स्योनꣳ सरस्वती स्वपसः सदन्तु ॥३३॥

यऽइमे द्यावापृथिवी जनित्री रूपैरपिꣳशद्भुवनानि विश्वा ।
तमद्य होतरिषितो यजीयान्देवन्त्वष्टारमिह यक्षि विद्वान् ॥३४॥
उपावसृज त्मन्न्या समञ्जन्देवानाम्पाथऽऋतुथा हवीꣳषि ।
वनस्प्पतिः शमिता देवोऽअग्निः स्वदन्तु हव्यम्मधुना घृतेन ॥३५॥
सद्यो जातो व्यमिमीत यज्ञमग्निर्देवानामभवत्पुरोगाः ।
अस्य होतुः प्प्रदिश्यृतस्य वाचि स्वाहाकृतꣳ हविरदन्तु देवाः ॥३६॥
॥४॥ केतुङ्कृण्ण्वन्नकेतवे पेशो मर्य्याऽअपेशसे । समुषद्भिरजायथाः ॥३७॥
जीमूतस्येव भवति प्प्रतीकँयद्वर्म्मी याति समदामुपस्थे ।
अनाविद्धया तन्न्वा जय त्वꣳ स त्वा वर्म्मणो महिमा पिपर्त्तु ॥३८॥
धन्न्वना गा धन्न्वनाजिञ्जयेम धन्न्वना तीव्राः समदो जयेम ।
धनुः शत्रोरपकामङ्कृणोति धन्न्वना सर्व्वाः प्प्रदिशो जयेम ॥३९॥
वक्ष्यन्तीवेदागनीगन्ति कर्ण्णम्प्रियꣳ सखायम्परिषस्वजाना ।
योषेव शिङ्क्ते वितताधि धन्न्वञ्ज्याऽइयꣳ समने पारयन्ती ॥४०॥
तेऽआचरन्ती समनेव योषा मातेव पुत्रम्बिभृतामुपस्थे ।
अप शत्रून्विध्यताꣳ सँविदानेऽआर्त्नीऽइमे विष्प्फुरन्तीऽअमित्रान् ॥४१॥
बह्वीनाम्पिता बहुरस्य पुत्रश्चिश्चाकृणोति समनावगत्य ।
इषुधिः सङ्काः पृतनाश्च सर्व्वाः पृष्ठे निनद्धो जयति प्प्रसूतः ॥४२॥
रथे तिष्ठन्नयति वाजिनः पुरो यत्रयत्र कामयते सुषारथिः ।
अभीशूनाम्महिमानम्पनायत मनः पश्चादनुयच्छन्ति रश्म्मयः ॥४३॥
तीव्रान्घोषान्कृण्ण्वते वृषपाणयोऽश्वा रथेभिः सह वाजयन्तः ।
अवक्क्रामन्तः प्प्रपदैरमित्रान्क्षिणन्ति शत्रूँ१॥रनपव्ययन्तः ॥४४॥
रथवाहनꣳ हविरस्य नाम यत्रायुधन्निहितमस्य वर्म्म ।
तत्रा रथमुप शग्ग्मꣳ सदेम विश्वाहा वयꣳ सुमनस्यमानाः ॥४५॥
स्वादुषꣳसदः पितरो वयोधाः कृच्छ्रेश्रितः शक्तीवन्तो गभीराः ।
चित्रसेनाऽइषुबलाऽअमृद्ध्राः सतोवीराऽउरवो व्रातसाहाः ॥४६॥
ब्राह्मणासः पितरः सोम्म्यासः शिवे नो द्यावापृथिवीऽअनेहसा ।
पूषा नः पातु दुरितादृतावृधो रक्षा माकिर्न्नोऽअघशꣳसऽईशत ॥४७॥

सुपर्णँव्वस्ते मृगोऽअस्या दन्तो गोभिः सन्नद्धा पतति प्प्रसूता ।
यत्रा नरः सञ्च वि च द्रवन्ति तत्रास्म्मब्भ्यमिषवः शर्म्म यꣳसन् ॥४८॥
ऋजीते परिवृङ्ग्धि नोश्म्मा भवतु नस्तनूः ।
सोमोऽअधिब्ब्रवीतु नोदितिः शर्म्म यच्छतु ॥४९॥
आजङ्घन्ति सान्वेषाञ्जघनाँ२॥ऽउपजिघ्नते ।
अश्श्वाजनि प्प्रचेतसोश्श्वान्त्समत्सु चोदय ॥५०॥
अहिरिव भोगैः पर्य्येति बाहुञ्ज्याया हेतिम्परिबाधमानः ।
हस्तघ्नो व्विश्श्वा व्वयुनानि व्विद्वान्पुमान्पुमाꣳसम्परिपातु व्विश्श्वतः ॥५१॥
व्वनस्प्पते व्वीड्वङ्गो हि भूयाऽअस्म्मत्सखा प्प्रतरणः सुवीरः ।
गोभिः सन्नद्धोऽअसि व्वीडयस्वास्थाता ते जयतु जेत्त्वानि ॥५२॥
दिवः पृथिव्याः पर्य्योजऽउद्भृतँव्वनस्प्पतिब्भ्यः पर्य्याभृतꣳ सहः ।
अपामोज्मानम्परि गोभिरावृतमिन्द्रस्य व्वज्रꣳ हविषा रथँय्यज ॥५३ ॥
इन्द्रस्य व्वज्रो मरुतामनीकम्मित्रस्य गर्ब्भो व्वरुणस्य नाभिः ।
सेमान्नो हव्यदातिञ्जुषाणो देव रथ प्प्रति हव्या गृभाय ॥५४॥
उपश्श्वासय पृथिवीमुत द्याम्पुरुत्रा ते मनुताँव्विष्ठितञ्जगत् ।
स दुन्दुभे सजूरिन्द्रेण देवैर्द्दूराद्दवीयोऽअपसेध शत्रून् ॥५५॥
आक्क्रन्दय बलमोजो नऽआधा निष्टनिहि दुरिता बाधमानः ।
अपप्प्रोथ दुन्दुभे दुच्छुनाऽइतऽइन्द्रस्य मुष्टिरसि व्वीडयस्व ॥५६॥
आमूरज प्प्रत्यावर्त्तयेमाः केतुमद्दुन्दुभिर्व्वावदीति ।
समश्श्वपर्णाश्चरन्ति नो नरोस्म्माकमिन्द्र रथिनो जयन्तु ॥५७॥

आग्नेयः कृष्णग्ग्रीवः सारस्वती मेषी बब्भ्रुः सौम्म्यः पौष्णः श्यामः शितिपृष्ठो बार्हस्प्पत्यः शिल्पो व्वैश्श्वदेवऽऐन्द्रोरुणो मारुतः कल्म्माषऽऐन्द्राग्ग्नः सꣳहितोधोरामः सावित्रो व्वारुणः कृष्णऽएकशितिपात्त्पेत्वः ॥५८॥

अग्ग्नयेनीकवते रोहिताञ्जिरनड्वानधोरामौ सावित्रौ पौष्णौ रजतनाभी व्वैश्श्वदेवौ पिशङ्गौ तूपरौ मारुतः कल्म्माषऽआग्नेयः कृष्णोजः सारस्वती मेषी व्वारुणः पेत्वः ॥५९॥

अग्ग्नये गायत्राय त्रिवृते राथन्तरायाष्टाकपालऽइन्द्राय त्रैष्टुभाय पञ्चदशाय बार्हतायैकादशकपालो व्विश्श्वेब्भ्यो देवेब्भ्यो जागतेब्भ्यः सप्तदशेब्भ्यो व्वैरूपेब्भ्यो

द्वादशकपालो मित्रावरुणाब्भ्यामानुष्टुभाब्भ्यामेकविꣳशाब्भ्याँव्वैराजाब्भ्याम्पयस्या बृहस्प्पतये पाङ्क्ताय त्रिणवाय शाक्क्वराय चरुः सवित्रऽऔष्ण्णिहाय त्रयस्त्रिꣳशाय रैवताय द्वादशकपालः प्प्राजापत्यश्च्चरुरदित्यै व्विष्ण्णुपत्न्यै चरुरग्नये व्वैश्श्वानराय द्वादशकपालोनुमत्त्याऽअष्टाकपालः ॥६०॥

॥ इत्यकोनत्रिंशोऽध्यायः ॥

[illegible] चन्द्रभानु शर्मा

अथ त्रिंशोऽध्यायः

ऋषिः (१) 'देव सवितः' इत्यारभ्य (२२) 'अथैतान्' इत्यन्तानां सामान्यतो नारायणः पुरुष ऋषिः। विशेषतश्च—
(१) 'देव सवितः' इत्यस्य बृहस्पतीन्द्रौ, (२) 'तत्सवितुः' इत्यस्य विश्वामित्रः, (३) 'विश्वानि देव' इत्यस्य श्यावाश्वः,
(४) 'विभक्तारꣳ हवामहे' इत्यस्य मेधातिथिः ॥

देवता (१) 'देव सवितः' (२) 'तत्सवितुः' (३) 'विश्वानि देव' (४) 'विभक्तारꣳ हवामहे' इत्येषां सविता।
(५) 'ब्रह्मणे ब्राह्मणम्' इत्यारभ्य (२२) 'अथैतानष्टौ' इत्यन्तो भागः द्रव्यदेवताविधायकत्वाद्ब्राह्मणं न तु मन्त्राः।
तेनास्यर्षिदैवतच्छन्दांसि यजुःसर्वानुक्रमे नोक्तानि ॥

छन्दः (१) 'देव सवितः' इत्यस्य त्रिष्टुप्, (२) 'तत्सवितुः' इत्यारभ्य (४) 'विभक्तारꣳ हवामहे' इत्यन्तानां गायत्री ॥

॥ हरिःॐ ॥

॥१॥ देव सवितः प्प्रसुव यज्ञम्प्रसुव यज्ञपतिम्भगाय ।
दिव्यो गन्धर्वः केतपूः केतन्नः पुनातु व्वाचस्प्पतिर्व्वाचन्नः स्वदतु ॥१॥
तत्सवितुर्व्वरेण्ण्यम्भर्ग्गो देवस्य धीमहि । धियो यो नः प्प्रचोदयात् ॥२॥
व्विश्श्वानि देव सवितर्दुरितानि परासुव । यद्भद्रन्तन्नऽआसुव ॥३॥
व्विभक्तारꣳ हवामहे व्वसोश्च्चित्रस्य राधसः । सवितारन्नृचक्षसम् ॥४॥

ब्रह्मणे ब्राह्मणङ्क्षत्राय राजन्न्यम्मरुद्भ्यो व्वैश्श्यन्तपसे शूद्रन्तमसे तस्करन्नारकाय व्वीरहणम्प्पाप्प्मने क्लीबमाक्क्रयायाऽअयोगूङ्कामाय पुँश्चलूमतिक्क्रुष्टाय मागधम् ॥५॥

नृत्ताय सूतङ्गीताय शैलूषन्धर्म्माय सभाचरन्नरिष्ट्यै भीमलन्नर्म्माय रेभꣳहसाय कारिमानन्दाय स्त्रीषखम्प्रमदे कुमारीपुत्रम्मेधायै रथकारन्धैर्य्याय तक्षाणम् ॥६॥

॥२॥ तपसे कौलालम्मायायै कर्म्मारꣳ रूपाय मणिकारꣳ शुभे व्वपꣳ शरव्व्यायाऽइषुकारꣳ हेत्यै धनुष्क्कारङ्कर्म्मणे ज्ज्याकारन्दिष्टाय रज्जुसर्जम्मृत्यवे मृगयुमन्तकाय श्श्वनिनम् ॥७॥

नदीभ्यः पौञ्जिष्ठमृक्षीकाभ्यो नैषादम्पुरुषव्याघ्राय दुर्म्मदङ्गन्धर्व्वाप्सरोभ्यो व्रात्त्यम्प्रयुग्भ्यऽउन्मत्तꣳ सर्प्पदेवजनेभ्योऽप्रतिपदमयेभ्यः कितवमीर्य्यतायाऽअकितवम्पिशाचेभ्यो बिदलकारीँय्यातुधानेभ्यः कण्टकीकारीम् ॥८॥

सन्धये जारङ्गेहायोपपतिमार्त्त्यै परिवित्तन्निर्ऋत्यै परिविविदानमराद्ध्याऽएदिधिषुःपतिन्निष्कृत्यै पेशस्कारीꣳ सञ्ज्ञानाय स्मरकारीम्प्रकामोद्यायोपसदँव्वर्ण्णायानुरुधम्बलायोपदाम् ॥९॥

उत्सादेभ्यः कुब्जम्प्रमुदे वामनन्द्वार्भ्यः स्रामꣳ स्वप्नायान्धमधर्म्माय बधिरम्पवित्राय भिषजम्प्रज्ञानाय नक्षत्रदर्शमाशिक्षायै प्रश्निनमुपशिक्षायाऽअभिप्रश्निनम्मर्य्यादायै प्रश्नविवाकम् ॥१०॥

अर्म्मेभ्यो हस्तिपञ्जवायाश्वपम्पुष्ट्यै गोपालँव्वीर्य्यायाविपालन्तेजसेजपालमिरायै कीनाशङ्कीलालाय सुराकारम्भद्राय गृहपꣳ श्रेयसे वित्तधमाद्ध्यक्ष्यायानुक्षत्तारम् ॥११॥

भायै दार्व्वाहारम्प्रभायाऽअग्न्येधम्ब्रध्नस्य व्विष्टपायाभिषेक्तारँव्वर्षिष्ठाय नाकाय परिवेष्टारन्देवलोकाय पेशितारम्मनुष्यलोकाय प्रकरितारꣳ सर्व्वेभ्यो लोकेभ्यऽउपसेक्तारमवऽऋत्यै वधायोपमन्थितारम्मेधाय वासःपल्पूलीम्प्रकामाय रजयित्रीम् ॥१२॥

ऋतये स्तेनहृदयँव्वैरहत्त्याय पिशुनँव्विविक्त्यै क्षत्तारमौपद्रष्ट्र्यायानुक्षत्तारम्बलायानुचरम्भूम्ने परिष्कन्दम्प्रियाय प्रियवादिनमरिष्ट्याऽअश्वसादꣳ स्वर्ग्गाय लोकाय भागदुघँव्वर्षिष्ठाय नाकाय परिवेष्टारम् ॥१३॥

मन्यवेयस्तापङ्क्रोधाय निसरँय्योगाय योक्तारꣳ शोकायाभिसर्त्तारङ्क्षेमाय विमोक्तारमुत्कूलनिकूलेभ्यस्त्रिष्ठिनँव्वपुषे मानस्कृतꣳ शीलायाञ्जनीकारीन्निर्ऋत्यै कोशकारीँय्यमायासूम् ॥१४॥

यमाय यमसूमथर्व्वभ्योवतोकाꣳ सँव्वत्सराय पर्य्यायिणीम्परिवत्सरायाविजातामिदावत्सरायातीत्त्वरीमिद्वत्सरायातिष्कद्वरीँव्वत्सराय विजर्ज्जराꣳ सँव्वत्सराय पलिक्नीमृभुभ्योजिनसन्धꣳ साध्येभ्यश्चर्म्मम्नम् ॥१५॥

सरोभ्यो धैवरमुपस्थावराभ्यो दाशँव्वैशन्ताभ्यो बैन्दन्नड्वलाभ्यः शौष्कलम्पाराय मार्ग्गारमवाराय कैवर्त्तन्तीर्त्थेभ्यऽआन्दँव्विषमेभ्यो मैनालꣳ स्वनेभ्यः पर्ण्णकङ्गुहाभ्यः किरातꣳ सानुभ्यो जम्भकम्पर्व्वतेभ्यः किम्पूरुषम् ॥१६॥

बीभत्सायै पौल्कसँव्वर्णाय हिरण्यकारन्तुलायै व्वाणिजम्पश्चादोषाय ग्लाविनँव्विश्वेभ्यो भूतेभ्यः सिध्मलम्भूत्यै जागरणमभूत्यै स्वपनमार्त्यै जनवादिनँव्व्यृद्ध्याऽ अपगल्भꣳ सꣳशराय प्प्रच्छिदम् ॥१७॥

अक्षराजाय कितवङ्कृतायादिनवदर्शन्त्रेतायै कल्पिनन्द्वापरायाधिकल्पिनमास्कन्दाय सभास्थाणुम्मृत्यवे गोव्यच्छमन्तकाय गोघातङ्क्षुधे यो गाँव्विकृन्तन्तम्भिक्षमाणऽउपतिष्ठति दुष्कृताय चरकाचार्य्यम्पाप्मने सैलगम् ॥१८॥

प्रतिश्श्रुत्कायाऽअर्त्तनङ्घोषाय भषमन्ताय बहुवादिनमनन्ताय मूकꣳ शब्दायाडम्बराघातम्महसे व्वीणावादङ्क्रोशाय तूणवध्ममवरस्पराय शङ्खध्मँव्वनाय व्वनपमन्यतोरण्याय दावपम् ॥१९॥

नर्म्माय पुँश्चलूꣳ हसाय कारिँय्यादसे शाबल्याङ्ग्रामण्यङ्गणकमभिक्क्रोशकन्तान्महसे व्वीणावादम्पाणिघ्नन्तूणवध्मन्तान्नृत्तायानन्दाय तलवम् ॥२०॥

अग्नये पीवानम्पृथिव्यै पीठसर्प्पिणँव्वायवे चाण्डालमन्तरिक्षाय व्वꣳशनर्त्तिनन्दिवे खलतिꣳ सूर्य्याय हर्य्यक्षन्नक्षत्रेभ्यः किर्म्मिरञ्चन्द्रमसे किलासमह्ने शुक्लम्पिङ्गाक्षꣳ रात्र्यै कृष्णम्पिङ्गाक्षम् ॥२१॥

अथैतानष्टौ व्विरूपानालभतेतिदीर्घञ्चातिह्रस्वञ्चातिस्थूलञ्चातिकृशञ्चातिशुक्लञ्चातिकृष्णञ्चातिकुल्वञ्चातिलोमशञ्च। अशूद्राऽअब्राह्मणास्ते प्प्राजापत्याः। मागधः पुँश्चली कितवः क्लीबोशूद्राऽअब्राह्मणास्ते प्प्राजापत्याः ॥२२॥

॥ इति त्रिंशोऽध्यायः ॥

अथैकत्रिंशोऽध्यायः

ऋषिः (१) 'सहस्रशीर्षा पुरुषः' इत्यारभ्य (२२) 'श्रीश्च ते' इत्यन्तानां नारायणः पुरुष ऋषिः ॥

देवता (१) 'सहस्रशीर्षा पुरुषः' (२) 'पुरुष एवेदम्' (३) 'एतावानस्य' (४) 'त्रिपादूर्ध्वः' (५) 'ततो विराट्' (६) 'तस्माद्यज्ञात्सर्वहुतः सम्भृतम्' (७) 'तस्माद्यज्ञात्सर्वहुत ऋचः' (८) 'तस्मादश्वाः' (९) 'तं यज्ञम्' (१०) 'यत्पुरुषम्' (११) 'ब्राह्मणोस्य' (१२) 'चन्द्रमा मनसः' (१३) 'नाभ्या आसीत्' (१४) 'यत्पुरुषेण' (१५) 'सप्तास्यासन्' (१६) 'यज्ञेन यज्ञम्' इत्येषां पुरुषः जगद्बीजम् ।
(१७) 'अद्भ्यः सम्भृतः' (१८) 'वेदाहम्' (१९) 'प्रजापतिश्चरति' (२०) 'यो देवेभ्यः' (२१) 'रुचम्ब्राह्मम्' (२२) 'श्रीश्च ते' इत्येषामादित्यः ॥

छन्दः (१) 'सहस्रशीर्षा पुरुषः' इत्यारभ्य (१५) 'सप्तास्यासन्' इत्यन्तानामनुष्टुप्, (१६) 'यज्ञेन यज्ञम्' इत्यारभ्य (१९) 'प्रजापतिश्चरति' इत्यन्तानां त्रिष्टुप्, (२०) 'यो देवेभ्यः' (२१) 'रुचम्ब्राह्मम्' इत्यनयोरनुष्टुप्, (२२) 'श्रीश्च ते' इत्यस्य त्रिष्टुप् ॥

॥ हरिः ॐ ॥

॥१॥ सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ।
स भूमिꣳ सर्वत स्पृत्वात्त्यतिष्ठद्दशाङ्गुलम् ॥१॥
पुरुष एवेदꣳ सर्वँय्यद्भूतँय्यच्च भाव्यम् । उतामृतत्त्वस्येशानो यदन्नेनातिरोहति ॥२॥ ॥२॥
एतावानस्य महिमातो ज्यायाँश्च पूरुषः ।
पादोस्य विश्वा भूतानि त्रिपादस्यामृतन्दिवि ॥३॥
त्रिपादूर्ध्वऽउदैत्पुरुषः पादोस्येहाभवत्पुनः ।
ततो विष्वङ्व्यक्क्रामत्साशनानशनेऽअभि ॥४॥
ततो विराडजायत विराजोऽअधि पूरुषः ।
स जातोऽअत्त्यरिच्च्यत पश्चाद्भूमिमथो पुरः ॥५॥
तस्माद्यज्ञात्सर्वहुतः सम्भृतम्पृषदाज्यम् ।
पशूँस्ताँश्चक्रे वायव्यानारण्ण्या ग्ग्राम्म्याश्च ये ॥६॥
तस्माद्यज्ञात्सर्वहुतऽऋचः सामानि जज्ञिरे ।
छन्दाꣳसि जज्ञिरे तस्माद्यजुस्तस्मादजायत ॥७॥
तस्मादश्वाऽअजायन्त ये के चोभयादतः ।
गावो ह जज्ञिरे तस्मात्तस्माज्जाताऽअजावयः ॥८॥
तँय्यज्ञम्बर्हिषि प्प्रौक्षन्पुरुषञ्जातमग्ग्रतः ।
तेन देवाऽअयजन्त साध्याऽऋषयश्च ये ॥९॥
यत्पुरुषँव्यदधुः कतिधा व्यकल्प्पयन् ।
मुखङ्किमस्यासीत्किम्बाहू किमूरू पादाऽउच्च्येते ॥१०॥
ब्राह्मणोस्य मुखमासीद्बाहू राजन्न्यः कृतः ।
ऊरू तदस्य यद्वैश्श्यः पद्भ्याꣳ शूद्रोऽअजायत ॥११॥
चन्द्रमा मनसो जातश्चक्षोः सूर्य्योऽअजायत ।
श्रोत्राद्वायुश्च प्प्राणश्च मुखादग्निरजायत ॥१२॥
नाभ्याऽआसीदन्तरिक्षꣳ शीर्ष्णो द्यौः समवर्त्तत ।
पद्भ्याम्भूमिर्दिशः श्रोत्रात्तथा लोकाँ२ऽअकल्प्पयन् ॥१३॥
यत्पुरुषेण हविषा देवा यज्ञमतन्वत ।
वसन्तोस्यासीदाज्ज्यङ्ग्रीष्मऽइद्ध्मः शरद्धविः ॥१४॥

ऋषि
देवत
छन्द

स॒प्तास्या॑सन्परि॒धय॒स्त्रिः स॒प्त स॒मिध॑ः कृ॒ताः ।
दे॒वा यद्य॒ज्ञन्त॑न्वा॒नाऽअब॑ध्न॒न्पुरु॑षम्प॒शुम् ॥१५॥
य॒ज्ञेन॑ य॒ज्ञम॑यजन्त दे॒वास्तानि॒ धर्म्मा॑णि प्रथ॒मान्या॑सन् ।
ते ह॒ नाक॑म्महि॒मान॑ः सचन्त॒ यत्र॒ पूर्वे॑ सा॒ध्याः सन्ति॑ दे॒वाः ॥१६॥
२॥ ॥२॥ अ॒द्भ्यः सम्भृ॑तः पृथि॒व्यै रसा॑च्च वि॒श्वक॑र्म्मणः॒ सम॑वर्त्त॒ताग्रे॑ ।
तस्य॒ त्वष्टा॑ वि॒दध॑द्रू॒पमे॑ति॒ तन्मर्त्य॑स्य दे॒वत्वमा॒जान॒मग्रे॑ ॥१७॥
वेदा॒हमे॒तम्पुरु॑षम्म॒हान्त॑मादि॒त्यव॑र्ण्ण॒न्तम॑सः पु॒रस्ता॑त् ।
तमे॒व वि॑दि॒त्वाति॑ मृ॒त्युमे॑ति॒ नान्यः पन्था॑ विद्य॒तेय॑नाय ॥१८॥
प्र॒जाप॑तिश्चरति॒ गर्ब्भे॑ऽअ॒न्तरजा॑यमानो बहु॒धा विजा॑यते ।
तस्य॒ योनि॒म्परि॑पश्यन्ति॒ धीरा॒स्तस्मि॑न्ह त॒स्थुर्भुव॑नानि॒ विश्वा॑ ॥१९॥
यो दे॒वेभ्य॑ऽआ॒तप॑ति॒ यो दे॒वाना॑म्पु॒रोहि॑तः ।
पूर्वो॒ यो दे॒वेभ्यो॑ जा॒तो नमो॑ रु॒चाय॒ ब्राह्म॑ये ॥२०॥
रु॒चम्ब्रा॒ह्मञ्ज॒नय॑न्तो दे॒वाऽअग्रे॒ तद॑ब्रुवन् ।
यस्त्वै॒वम्ब्रा॑ह्म॒णो वि॒द्यात्तस्य॑ दे॒वाऽअस॒न्वशे॑ ॥२१॥
श्रीश्च॑ ते ल॒क्ष्मीश्च॒ पत्न्या॑वहोरा॒त्रे पा॒र्श्वे नक्ष॑त्राणि रू॒पम॒श्विनौ॒ व्यात्त॑म् ।
इ॒ष्णन्नि॑षाणा॒मुम्म॑ऽइषाण सर्व्वलो॒कम्म॑ऽइषाण ॥२२॥

॥ इत्येकत्रिंशोऽध्यायः ॥

अथ द्वात्रिंशोऽध्यायः

ऋषिः (१) 'तदेवाग्निः' इत्यारभ्य (१६) 'इदम्मे' इत्यन्तानां ब्रह्म स्वयम्भु ऋषिः ।

देवता (१) 'तदेवाग्निः' (२) 'सर्वे निमेषाः' (३) 'न तस्य' (४) 'एषो ह' (५) 'यस्माज्जातम्' (६) 'येन द्यौः' (७) 'यङ्क्रन्दसी' (८) 'वेनस्तत्' (९) 'प्र तद्' (१०) 'स नः' (११) 'परीत्य भूतानि' (१२) 'परि द्यावापृथिवी' इत्येषामात्मा ।
(१३) 'सदसस्पतिमद्भुतम्' इत्यस्य लिङ्गोक्ता ।
(१४) 'याम्मेधाम्' इत्यस्याग्निः ।
(१५) 'मेधाम्मे' इत्यस्य लिङ्गोक्ता ।
(१६) 'इदम्मे' इत्यस्य मन्त्रोक्ता ॥

छन्दः (१) 'तदेवाग्निः' (२) 'सर्वे निमेषाः' इत्यनयोरनुष्टुप्, (३) 'न तस्य' इत्यस्य द्विपदा गायत्री, (४) 'एषो ह' इत्यारभ्य (१२) 'परि द्यावापृथिवी' इत्यन्तानां त्रिष्टुप्, (१३) 'सदसस्पतिमद्भुतम्' इत्यस्य गायत्री, (१४) 'याम्मेधाम्' इत्यारभ्य (१६) 'इदम्मे' इत्यन्तानामनुष्टुप् ॥

॥ हरिःॐ ॥

॥१॥ तदेवाग्निस्तदादित्यस्तद्वायुस्तदु चन्द्रमाः ।
तदेव शुक्रन्तद्ब्रह्म ताऽआपः स प्रजापतिः ॥१॥
सर्वे निमेषा जज्ञिरे विद्युतः पुरुषादधि ।
नैनमूर्द्ध्वन्न तिर्य्यञ्चन्न मद्ध्ये परिजग्ग्रभत् ॥२॥
न तस्य प्प्रतिमाऽअस्ति यस्य नाम महद्यशः ।
हिरण्ण्यगर्ब्भऽइत्त्येष मा मा हिꣳसीदित्त्येषा यस्म्मान्न जातऽइत्त्येषः ॥३॥

गलितमन्त्राः —

॥२॥ हिरण्ण्यगर्ब्भः समवर्त्तताग्ग्रे भूतस्य जातः पतिरेकऽआसीत् ।
स दाधार पृथिवीन्द्यामुतेमाङ्कस्म्मै देवाय हविषा विधेम ॥
यः प्प्राणतो निमिषतो महित्त्वैकऽइद्राजा जगतो बभूव ।
यऽईशेऽअस्य द्विपदश्चतुष्प्पदः कस्म्मै देवाय हविषा विधेम ॥
यस्येमे हिमवन्तो महित्त्वा यस्य समुद्रꣳ रसया सहाहुः ।
यस्येमाः प्प्रदिशो यस्य बाहू कस्म्मै देवाय हविषा विधेम ॥
यऽआत्मदा बलदा यस्य विश्श्वऽउपासते प्प्रशिषँय्यस्य देवाः ।
यस्य छायामृतँय्यस्य मृत्त्युः कस्म्मै देवाय हविषा विधेम ॥
मा मा हिꣳसीज्जनिता यः पृथिव्या यो वा दिवꣳ सत्त्यधर्म्मा व्यानट् ।
यश्चापश्चन्द्राः प्प्रथमो जजान कस्म्मै देवाय हविषा विधेम ॥
यस्म्मान्न जातः परोऽअन्न्योऽअस्ति यऽआविवेश भुवनानि विश्श्वा ।
प्रजापतिः प्प्रजया सꣳरराणस्त्रीणि ज्योतीꣳषि सचते स षोडशी ॥
इन्द्रश्च सम्म्राड्वरुणश्च राजा तौ ते भक्षञ्चक्रतुरग्ग्रऽएतम् ।
तयोरहमनु भक्षम्भक्षयामि वाग्ग्देवी जुषाणा सोमस्य तृप्प्यतु सह प्प्राणेन स्वाहा

एषो ह देवः प्प्रदिशोनु सर्व्वाः पूर्व्वो ह जातः सऽउ गर्ब्भेऽअन्तः ।
सऽएव जातः स जनिष्ष्यमाणः प्प्रत्त्यङ्जनास्तिष्ठति सर्व्वतोमुखः ॥४॥
यस्म्माज्जातन्न पुरा किञ्चनैव यऽआबभूव भुवनानि विश्श्वा ।
प्रजापतिः प्प्रजया सꣳरराणस्त्रीणि ज्योतीꣳषि सचते स षोडशी ॥५॥
येन द्यौरुग्ग्रा पृथिवी च दृढा येन स्व स्तभितँय्येन नाकः ।
योऽअन्तरिक्षे रजसो विमानः कस्म्मै देवाय हविषा विधेम ॥६॥

यङ्क्रन्दसीऽअवसा तस्तभानेऽअभ्यैक्षेताम्मनसा रेजमाने । यत्राधि सूरऽउदितो व्विभाति कस्मै देवाय हविषा व्विधेम । आपो ह यद्बृहतीर्य्यश्चिदापः ॥७॥

गलितमन्त्रौ —

आपो ह यद्बृहतीर्व्विश्वमायन्गर्भन्दधाना जनयन्तीरग्निम् ।
ततो देवानाᳫँ समवर्त्ततासुरेकः कस्मै देवाय हविषा व्विधेम ॥
यश्चिदापो महिना पर्य्यपश्यद्दक्षन्दधाना जनयन्तीर्य्यज्ञम् ।
यो देवेष्वधि देवऽएकऽआसीत्कस्मै देवाय हविषा व्विधेम ॥

॥२॥ व्वेनस्तत्पश्यन्निहितङ्गुहा सद्यत्र व्विश्वम्भवत्त्येकनीडम् ।
तस्मिन्निदᳫँ सञ्च व्वि चैति सर्व्वᳫँ सऽओतः प्प्रोतश्च व्विभूः प्प्रजासु ॥८॥
प्र तद्वोचेदमृतन्नु व्विद्वान्गन्धर्व्वो धाम व्विभृतङ्गुहा सत् ।
त्रीणि पदानि निहिता गुहास्य यस्तानि व्वेद स पितुः पितासत् ॥९॥
स नो बन्धुर्ज्जनिता स व्विधाता धामानि व्वेद भुवनानि व्विश्वा ।
यत्र देवाऽअमृतमानशानास्तृतीये धामन्नध्यैरयन्त ॥१०॥
परीत्त्य भूतानि परीत्त्य लोकान्परीत्त्य सर्व्वाः प्प्रदिशो दिशश्च ।
उपस्थाय प्प्रथमजामृतस्यात्त्मनात्त्मानमभिसँव्विवेश ॥११॥
परि द्यावापृथिवी सद्यऽइत्त्वा परि लोकान्परि दिशः परि स्वः ।
ऋतस्य तन्तुँव्वितततँव्विचृत्त्य तदपश्यत्तदभवत्तदासीत् ॥१२॥
सदसस्पतिमद्भुतम्प्रियमिन्द्रस्य काम्म्यम् ।
सनिम्मेधामयासिषᳫँ स्वाहा ॥१३॥
याम्मेधान्देवगणाः पितरश्चोपासते ।
तया मामद्य मेधयाग्ग्ने मेधाविनङ्कुरु स्वाहा ॥१४॥
मेधाम्मे व्वरुणो ददातु मेधामग्निः प्प्रजापतिः ।
मेधामिन्द्रश्च व्वायुश्च मेधान्धाता ददातु मे स्वाहा ॥१५॥
इदम्मे ब्रह्म च क्षत्रञ्चोभे श्रियमश्नुताम् ।
मयि देवा दधतु श्रियमुत्तमान्तस्यै ते स्वाहा ॥१६॥

॥ इति द्वात्रिंशोऽध्यायः ॥

अथ त्रयस्त्रिंशोऽध्यायः

ऋषिः (१) 'अस्याजरासः' इत्यस्य वत्सप्रीः, (२) 'हरयो धूमकेतवः' इत्यस्य विरूपः, (३) 'यजा नः' इत्यस्य गोतमः, (४) 'युक्ष्वा हि' इत्यस्य विरूपः, (५) 'द्वे विरूपे' इत्यस्य कुत्सः, (६) 'अयमिह' इत्यस्य वामदेवः, (७) 'त्रीणि शता' इत्यस्य विश्वामित्रः, (८) 'मूर्धानन्दिवः' (९) 'अग्निर्वृत्राणि' इत्यनयोर्भरद्वाजः, (१०) 'विश्वेभिः सोम्यम्' इत्यस्य मेधातिथिः, (११) 'आ यदिषे' इत्यस्य शाक्त्यः पराशरः, (१२) 'अग्ने शर्ध' इत्यस्यात्रिदुहिता विश्ववारा, (१३) 'त्वाꣳ हि' इत्यस्य भरद्वाजः, (१४) 'त्वे अग्ने' इत्यस्य वसिष्ठः, (१५) 'श्रुधि श्रुत्कर्ण' इत्यस्य प्रस्कण्वः, (१६) 'विश्वेषामदितिः' इत्यस्य वामदेवो गोतमः, (१७) 'महो अग्नेः' इत्यस्य धानाको लुशः, (१८) 'आपश्चित्' इत्यस्य वसिष्ठः, (१९) 'गाव उपावत' इत्यस्य पुरुमीढाजमीढौ, (२०) 'यदद्य सूरः' इत्यस्य वसिष्ठः, (२१) 'आ सुते' इत्यस्यासुनीतिः, (२२) 'आतिष्ठन्तम्परि' इत्यस्य विश्वामित्रः, (२३) 'प्र वो महे' इत्यस्य सुचीकः, (२४) 'बृहन्निदिध्मः' इत्यस्य त्रिशोकः, (२५) 'इन्द्रेहि' इत्यस्य मधुच्छन्दाः, (२६) 'इन्द्रो वृत्रम्' इत्यस्य विश्वामित्रः, (२७) 'कुतस्त्वम्' इत्यस्यागस्त्यः, (२८) 'आ तत्ते' इत्यस्य शाक्त्यो गौरिवीतिः, (२९) 'इमान्ते' इत्यस्य कुत्सः, (३०) 'विभ्राड्बृहत्' इत्यस्य सौर्यो विभ्राट्, (३१) 'उदु त्यम्' (३२) 'येना पावक' (३३) 'दैव्यावध्वर्यू' इत्येषां प्रस्कण्वः, (३४) 'आ न इडाभिः' इत्यस्यागस्त्यः, (३५) 'यदद्य' इत्यस्य श्रुतकक्षसुकक्षौ, (३६) 'तरणिर्विश्वदर्शतः' इत्यस्य प्रस्कण्वः, (३७) 'तत्सूर्यस्य' (३८) 'तन्मित्रस्य' इत्यनयोः कुत्सः, (३९) 'बण्महाँ असि' (४०) 'बट् सूर्य श्रवसा' इत्यनयोर्जमदग्निः, (४१) 'श्रायन्त इव' इत्यस्य नृमेधः, (४२) 'अद्या देवाः' इत्यस्य कुत्सः, (४३) 'आ कृष्णेन' इत्यस्याङ्गिरसो हिरण्यस्तूपः, (४४) 'प्रवावृजे सुप्रयाः' इत्यस्य वसिष्ठः, (४५) 'इन्द्रवायू बृहस्पतिम्' (४६) 'वरुणः प्राविता' इत्यनयोर्मेधातिथिः, (४७) 'अधि न इन्द्र' इत्यस्य काण्वः कुसीदी, (४८) 'अग्न इन्द्र' इत्यस्य प्रतिक्षत्रः, (४९) 'इन्द्राग्नी मित्रावरुणा' इत्यस्य काश्यपोऽवत्सारः (५०) 'अस्मे रुद्राः' इत्यस्य प्रगाथः, (५१) 'अर्वाञ्चो अद्या' इत्यस्य गार्त्समदः कूर्मः, (५२) 'विश्वे अद्य' इत्यस्य धानाको लुशः, (५३) 'विश्वे देवाः' इत्यस्य सुहोत्रः, (५४) 'देवेभ्यो हि' इत्यस्य वामदेवः, (५५) 'प्र वायुम्' इत्यारभ्य (९७) 'अस्येदिन्द्रः' इत्यन्तानां सामान्यत आदित्ययाज्ञवल्क्यौ। विशेषतश्च—

(५५) 'प्र वायुम्' इत्यस्य ऋजिश्वा, (५६) 'इन्द्रवायू इमे' (५७) 'मित्रꣳ हुवे' (५८) 'दस्रा युवाकवः' इत्येषां मधुच्छन्दाः, (५९) 'विदद्यदी' इत्यस्य कुशिकः, (६०) 'नहि स्पशम्' इत्यस्य विश्वामित्रः, (६१) 'उग्रा विघनिना' इत्यस्य भरद्वाजः, (६२) 'उपास्मै गायता' इत्यस्य देवलोऽसितो वा, (६३) 'ये त्वाहिहत्ये' इत्यस्य विश्वामित्रः, (६४) 'जनिष्ठा उग्रः' इत्यस्य गौरिवीतिः, (६५) 'आ तू नः' इत्यस्य वामदेवः, (६६) 'त्वमिन्द्र' (६७) 'अनु ते' इत्यनयोर्नृमेधः, (६८) 'यज्ञो देवानाम्' इत्यस्य कुत्सः, (६९) 'अदब्धेभिः सवितः' इत्यस्य भरद्वाजः, (७०) 'प्रवीरया शुचयः' इत्यस्य वसिष्ठः, (७१) 'गाव उपावत' इत्यस्य पुरुमीढाजमीढौ, (७२) 'कान्ययोराजानेषु' इत्यस्य दक्षः, (७३) 'दैव्यावध्वर्यू' इत्यस्य प्रस्कण्वः, (७४) 'तिरश्चीनो विततः' इत्यस्य परमेष्ठी प्रजापतिः, (७५) 'आ रोदसी' इत्यस्य विश्वामित्रः, (७६) 'उक्थेभिर्वृत्रहन्तमा' इत्यस्य वसिष्ठः, (७७) 'उप नः' इत्यस्य सुहोत्रः, (७८) 'ब्रह्माणि मे' (७९) 'अनुत्तमा ते' इत्यनयोरगस्त्यः, (८०) 'तदिदास' इत्यस्याथर्वणो बृहद्दिवः, (८१) 'इमा उ' (८२) 'यस्यायम्' (८३) 'अयꣳ सहस्रम्' इत्येषां मेधातिथिः, (८४) 'अदब्धेभिः सविता' इत्यस्य भरद्वाजः, (८५) 'आ नो यज्ञम्' इत्यस्य जमदग्निः, (८६) 'इन्द्रवायू सुसन्दृशा' इत्यस्य तापसः, (८७) 'ऋधगित्था' इत्यस्य जमदग्निः, (८८) 'आयातम्' इत्यस्य वसिष्ठः, (८९) 'प्रैतु ब्रह्मणस्पतिः' इत्यस्य कण्वः, (९०) 'चन्द्रमा अप्सु' इत्यस्याप्त्यस्त्रितः, (९१) 'देवन्देवम्' इत्यस्य वैवस्वतो मनुः, (९२) 'दिवि पृष्टः' इत्यस्यैन्द्रो मेधाः, (९३) 'इन्द्राग्नी अपात्' इत्यस्य सुहोत्रः, (९४) 'देवासो हि' इत्यस्य मनुः, (९५) 'अपाध्वमदभिशस्तीः' (९६) 'प्र व इन्द्राय' इत्यनयोर्नृमेधः, (९७) 'अस्येदिन्द्रः' इत्यस्य मेधातिथिः ॥

देवता (१) 'अस्याजरासः' (२) 'हरयो धूमकेतवः' (३) 'यजा नः' (४) 'युक्ष्वा हि' (५) 'द्वे विरूपे' (६) 'अयमिह' (७) 'त्रीणि शता' (८) 'मूर्धानन्दिवः' (९) 'अग्निर्वृत्राणि' (१०) 'विश्वेभिः सोम्यम्' (११) 'आ यदिषे'

(१२) 'अग्ने शर्ध' (१३) 'त्वाथं हि' (१४) 'त्वे अग्ने' (१५) 'श्रुधि श्रुत्कर्ण' (१६) 'विश्वेषामदितिः' (१७) 'महो अग्नेः' इत्येषामग्निः ।

(१८) 'आपश्चित्' (१९) 'गाव उपावत' (२०) 'यदद्य सूरः' (२१) 'आ सुते' (२२) 'आतिष्ठन्तम्परि' (२३) 'प्र वो महे' (२४) 'बृहन्निदिध्मः' (२५) 'इन्द्रेहि' (२६) 'इन्द्रो वृत्रम्' (२७) 'कुतस्त्वम्' (२८) 'आ तत्ते' (२९) 'इमान्ते' इत्येषामिन्द्रः ।

(३०) 'विभ्राड्बृहत्' (३१) 'उदु त्यम्' (३२) 'येना पावक' (३३) 'दैव्यावध्वर्यू' (३४) 'आ न इडाभिः' (३५) 'यदद्य' (३६) 'तरणिर्विश्वदर्शतः' (३७) 'तत्सूर्यस्य' (३८) 'तन्मित्रस्य' (३९) 'बण्महाँ असि' (४०) 'बट् सूर्य श्रवसा' (४१) 'श्रायन्त इव' (४२) 'अद्या देवाः' (४३) 'आ कृष्णेन' इत्येषां सूर्यः ।

(४४) 'प्रवावृजे सुप्रयाः' (४५) 'इन्द्रवायू बृहस्पतिम्' (४६) 'वरुणः प्राविता' (४७) 'अधि न इन्द्र' (४८) 'अग्न इन्द्र' (४९) 'इन्द्राग्नी मित्रावरुणा' (५०) 'अस्मे रुद्राः' (५१) 'अर्वाञ्चो अद्या' (५२) 'विश्वे अद्य' (५३) 'विश्वे देवाः' (५४) 'देवेभ्यो हि' इत्येषां विश्वे देवाः ।

(५५) 'प्र वायुम्' इत्यस्य वायुः ।

(५६) 'इन्द्रवायू इमे' इत्यस्येन्द्रवायू ।

(५७) 'मित्रथं हुवे' इत्यस्य लिङ्गोक्ता ।

(५८) 'दस्रा युवाकवः' इत्यस्याश्विनौ ।

(५९) 'विदद्यदी' इत्यस्येन्द्रः ।

(६०) 'नहि स्पशम्' इत्यस्य वैश्वानरः ।

(६१) 'उग्रा विघनिना' इत्यस्येन्द्राग्नी ।

(६२) 'उपास्मै गायता नरः' इत्यस्य सोमः ।

(६३) 'ये त्वाहिहत्ये' (६४) 'जनिष्ठा उग्रः' (६५) 'आ तू नः' (६६) 'त्वमिन्द्र' (६७) 'अनु ते' इत्येषामिन्द्रः ।

(६८) 'यज्ञो देवानाम्' इत्यस्यादित्यः ।

(६९) 'अदब्धेभिः सवितः' इत्यस्य सविता ।

(७०) 'प्रवीरया शुचयः' इत्यंस्य वायुः ।

(७१) 'गाव उपावत' इत्यस्येन्द्रः ।

(७२) 'काव्ययोराजानेषु' इत्यस्य मित्रावरुणौ ।

(७३) 'दैव्यावध्वर्यू' इत्यस्य सूर्यः ।

(७४) 'तिरश्चीनो विततः' इत्यस्य भाववृत्तम् ।

(७५) 'आ रोदसी' इत्यस्य वैश्वानरः ।

(७६) 'उक्थेभिर्वृत्रहन्तमा' इत्यस्येन्द्राग्नी ।

(७७) 'उप नः' इत्यस्य विश्वे देवाः ।

(७८) 'ब्रह्माणि मे' (७९) 'अनुत्तमा ते' इत्यनयोरिन्द्रामरुतौ ।

(८०) 'तदिदास' इत्यस्य महेन्द्रः ।

(८१) 'इमा उ' (८२) 'यस्यायम्' (८३) 'अयथं सहस्रम्' इत्येषामादित्यः ।

(८४) 'अदब्धेभिः सविता' इत्यस्य सविता ।

(८५) 'आ नो यज्ञम्' इत्यस्य वायुः ।

(८६) 'इन्द्रवायू सुसन्दृशा' इत्यस्येन्द्रवायू ।

(८७) 'ऋधगित्था' इत्यस्य मित्रावरुणौ ।

(८८) 'आयातम्' इत्यस्याश्विनौ ।

(८९) 'प्रैतु ब्रह्मणस्पतिः' इत्यस्य विश्वे देवाः ।

(९०) 'चन्द्रमा अप्सु' इत्यस्येन्द्रः

(९१) 'देवन्देवम्' इत्यस्य विश्वे देवाः ।

(९२) 'दिवि पृष्टः' इत्यस्य वैश्वानरः ।
(९३) 'इन्द्राग्नी अपात्' इत्यस्येन्द्राग्नी ।
(९४) 'देवासो हि' इत्यस्य विश्वे देवाः ।
(९५) 'अपाधमदभिशस्तीः' (९६) 'प्र व इन्द्राय' इत्यनयोर्मरुत्वानिन्द्रः ।
(९७) 'अस्येदिन्द्रः' इत्यस्य महेन्द्रः ॥

छन्दः (१) 'अस्याजरासः' इत्यस्य त्रिष्टुप्, (२) 'हरयो धूमकेतवः' इत्यारभ्य (४) 'युक्ष्वा हि' इत्यन्तानां गायत्री, (५) 'द्वे विरूपे' इत्यस्य त्रिष्टुप्, (६) 'अयमिह' इत्यस्य जगती, (७) 'त्रीणि शता' (८) 'मूर्धानन्दिवः' इत्यनयोस्त्रिष्टुप्, (९) 'अग्निर्वृत्राणि' (१०) 'विश्वेभिः सोम्यम्' इत्यनयोर्गायत्री, (११) 'आ यदिषे' (१२) 'अग्ने शर्ध' (१३) 'त्वाꣳ हि' इत्येषां त्रिष्टुप्, (१४) 'त्वे अग्ने' (१५) 'श्रुधि श्रुत्कर्ण' इत्यनयोर्बृहती, (१६) 'विश्वेषामदितिः' (१७) 'महो अग्नेः' (१८) 'आपश्चित्' इत्येषां त्रिष्टुप्, (१९) 'गाव उपावत' (२०) 'यदद्य सूरः' (२१) 'आ सुते' इत्येषां गायत्री, (२२) 'आतिष्ठन्तम्परि' (२३) 'प्र वो महे' इत्यनयोस्त्रिष्टुप्, (२४) 'बृहन्निदिध्मः' (२५) 'इन्द्रेहि' इत्यनयोर्गायत्री, (२६) 'इन्द्रो वृत्रम्' (२७) 'कुतस्त्वम्' (२८) 'आ तत्ते' इत्येषां त्रिष्टुप्, (२९) 'इमान्ते' (३०) 'विभ्राड्बृहत्' इत्यनयोर्जगती, (३१) 'उदु त्यम्' (३२) 'येना पावक' (३३) 'दैव्यावध्वर्यू' इत्येषां गायत्री, (३४) 'आ न इडाभिः' इत्यस्य त्रिष्टुप्, (३५) 'यदद्य' (३६) 'तरणिर्विश्वदर्शतः' इत्यनयोर्गायत्री, (३७) 'तत्सूर्यस्य' (३८) 'तन्मित्रस्य' इत्यनयोस्त्रिष्टुप्, (३९) 'बण्महाँ असि' इत्यस्य बृहती, (४०) 'बट् सूर्य श्रवसा' इत्यस्य सतोबृहती, (४१) 'श्रायन्त इव' इत्यस्य बृहती, (४२) 'अद्या देवाः' (४३) 'आ कृष्णेन' (४४) 'प्रवावृजे सुप्रयाः' इत्येषां त्रिष्टुप्, (४५) 'इन्द्रवायू बृहस्पतिम्' (४६) 'वरुणः प्राविता' (४७) 'अधि न इन्द्र' इत्येषां गायत्री, (४८) 'अग्न इन्द्र' इत्यस्य त्रिष्टुप्, (४९) 'इन्द्राग्नी मित्रावरुणा' इत्यस्य जगती, (५०) 'अस्मे रुद्राः' इत्यारभ्य (५३) 'विश्वे देवाः' इत्यन्तानां त्रिष्टुप्, (५४) 'देवेभ्यो हि' इत्यस्य जगती, (५५) 'प्र वायुम्' इत्यस्य त्रिष्टुप्, (५६) 'इन्द्रवायू इमे' (५७) 'मित्रꣳ हुवे' (५८) 'दस्रा युवाकवः' इत्येषां गायत्री, (५९) 'विदद्यदी' (६०) 'नहि स्पशम्' इत्यनयोस्त्रिष्टुप्, (६१) 'उग्रा विघनिना' (६२) 'उपास्मै गायता नरः' इत्यनयोर्गायत्री, (६३) 'ये त्वाहिहत्ये' (६४) 'जनिष्ठा उग्रः' इत्यनयोस्त्रिष्टुप्, (६५) 'आ तू नः' इत्यस्य गायत्री, (६६) 'त्वमिन्द्र' इत्यस्य पथ्याबृहती, (६७) 'अनु ते' इत्यस्य सतोबृहती, (६८) 'यज्ञो देवानाम्' इत्यस्य त्रिष्टुप्, (६९) 'अदब्धेभिः सवितः' इत्यस्य जगती, (७०) 'प्रवीरया शुचयः' इत्यस्य त्रिष्टुप्, (७१) 'गाव उपावत' (७२) 'काव्ययोराजानेषु' (७३) 'दैव्यावध्वर्यू' इत्येषां गायत्री, (७४) 'तिरश्चीनो विततः' इत्यस्य त्रिष्टुप्, (७५) 'आ रोदसी' इत्यस्य जगती, (७६) 'उक्थेभिर्वृत्रहन्तमा' (७७) 'उप नः' इत्यनयोर्गायत्री, (७८) 'ब्रह्माणि मे' (७९) 'अनुत्तमा ते' (८०) 'तदिदास' इत्येषां त्रिष्टुप्, (८१) 'इमा उ' (८२) 'यस्यायम्' इत्यनयोर्बृहती, (८३) 'अयꣳ सहस्रम्' इत्यस्य सतोबृहती, (८४) 'अदब्धेभिः सविता' इत्यस्य जगती, (८५) 'आ नो यज्ञम्' इत्यारभ्य (९३) 'इन्द्राग्नी अपात्' इत्यन्तानां बृहती, (९४) 'देवासो हि' (९५) 'अपाधमदभिशस्तीः' इत्यनयोः सतोबृहती, (९६) 'प्र व इन्द्राय' इत्यस्य बृहती, (९७) 'अस्येदिन्द्रः' इत्यस्य सतोबृहती ॥

॥ हरिःॐ ॥

१॥ अस्याजरासो दमामरित्राऽअर्च्चद्धूमासोऽअग्ग्नयः पावकाः ।
श्वितीचयः श्वात्रासो भुरण्ण्यवो वनर्षदो वायवो न सोमाः ॥१॥
हरयो धूमकेतवो वातजूताऽउप द्यवि । यतन्ते वृथगग्ग्नयः ॥२॥
यजा नो मित्रावरुणा यजा देवाँ२॥ऽऋतम्बृहत् । अग्ग्ने यक्षि स्वन्दमम् ॥३॥

युक्ष्वा हि देवहूतमाँ२॥ऽअश्वाँ२॥ऽअग्ने रथीरिव ।
नि होता पूर्व्यः सदः ॥४॥
द्वे विरूपे चरतः स्वर्त्थेऽअन्यान्या वत्समुपधापयेते ।
हरिरन्यस्याम्भवति स्वधावाञ्छुक्रोऽअन्यस्यान्ददृशे सुवर्च्चाः ॥५॥
अयमिह प्रथमो धायि धातृभिर्होता यजिष्ठोऽअद्ध्वरेष्वीड्यः ।
यमप्नवानो भृगवो विरुरुचुर्व्वनेषु चित्रँविभ्वँविशेविशे ॥६॥
त्रीणि शता त्री सहस्राण्यग्निन्त्रिꣳशच्च देवा नव चासपर्य्यन् ।
औक्षन्घृतैरस्तृणन्बर्हिरस्माऽआदिद्धोतारन्न्यसादयन्त ॥७॥
मूर्द्धानन्दिवोऽअरतिम्पृथिव्या वैश्वानरमृतऽआ जातमग्निम् ।
कविꣳ सम्राजमतिथिञ्जनानामासन्ना पात्रञ्जनयन्त देवाः ॥८॥
अग्निर्व्वृत्राणि जङ्घनद्द्रविणस्युर्व्विपन्यया । समिद्धः शुक्रऽआहुतः ॥९॥
विश्वेभिः सोम्यम्मध्वग्नऽइन्द्रेण वायुना । पिबा मित्रस्य धामभिः ॥१०॥
आ यदिषे नृपतिन्तेजऽआनट्शुचि रेतो निषिक्तन्द्यौरभीके ।
अग्निः शर्द्धमनवद्यँय्युवानꣳ स्वाध्यञ्जनयत्सूदयच्च ॥११॥
अग्ने शर्द्ध महते सौभगाय तव द्युम्नान्युत्तमानि सन्तु ।
सञ्जास्पत्यꣳ सुयममाकृणुष्व शत्रूयतामभितिष्ठा महाꣳसि ॥१२॥
त्वाꣳ हि मन्द्रतममर्कशोकैर्ववृमहे महि नः श्रोष्यग्ने ।
इन्द्रन्न त्वा शवसा देवता वायुम्पृणन्ति राधसा नृतमाः ॥१३॥
त्वेऽअग्ने स्वाहुत प्रियासः सन्तु सूरयः ।
यन्तारो ये मघवानो जनानामूर्वान्दयन्त गोनाम् ॥१४॥
श्रुधि श्रुत्कर्ण्ण वह्निभिर्द्देवैरग्ने सयावभिः ।
आसीदन्तु बर्हिषि मित्रोऽअर्य्यमा प्रातर्य्यावाणोऽअद्ध्वरम् ॥१५॥
विश्वेषामदितिर्य्यज्ञियानाँविश्वेषामतिथिर्म्मानुषाणाम् ।
अग्निर्द्देवानामवऽआवृणानः सुमृडीको भवतु जातवेदाः ॥१६॥
महोऽअग्नेः समिधानस्य शर्म्मण्यनागा मित्रे वरुणे स्वस्तये ।
श्रेष्ठे स्याम सवितुः सवीमनि तद्देवानामवोऽअद्या वृणीमहे ॥१७॥

॥२॥ आपश्चित्पिप्यु स्तर्य्यो न गावो नक्षन्नृतञ्जरितारस्तऽइन्द्र ।
३॥ याहि वायुर्न्न नियुतो नोऽअच्छा त्वꣳ हि धीभिर्द्दयसे वि वाजान् ॥१८॥

गावऽउपावतावतम्मही यज्ञस्य रप्प्सुदा । उभा कर्ण्णा हिरण्यया ॥१९॥
यदद्य सूरऽउदितेनागा मित्रोऽअर्य्यमा । सुवाति सविता भगः ॥२०॥
आ सुते सिञ्चत श्श्रियꣳ रोदस्योरभिश्श्रियम् ।
रसा दधीत वृषभम् । तम्प्रत्नथायँव्वेनः ॥२१॥

गलितमन्त्रौ —

तम्प्रत्नथा पूर्व्वथा व्विश्श्वथेमथा ज्ज्येष्ठतातिम्बर्हिषदꣳ स्वर्व्विदम् ।
प्रतीचीनँव्वृजनन्दोहसे धुनिमाशुञ्जयन्तमनु यासु वर्द्धसे ॥
अयँव्वेनश्चोदयत्पृश्निगर्ब्भा ज्ज्योतिर्ज्जरायू रजसो व्विमाने ।
इममपाꣳ सङ्गमे सूर्य्यस्य शिशुन्न व्विप्प्रा मतिभी रिहन्ति ॥

आतिष्ठन्तम्परि व्विश्श्वेऽअभूषञ्छ्रियो व्वसानश्चरति स्वरोचिः ।
महत्तद्वृष्ष्णोऽअसुरस्य नामा व्विश्श्वरूपोऽअमृतानि तस्थौ ॥२२॥
प्र वो महे मन्दमानायान्धसोर्च्चा व्विश्श्वानराय व्विश्श्वाभुवे ।
इन्द्रस्य यस्य सुमखꣳ सहो महि श्श्रवो नृम्म्णञ्च रोदसी सपर्य्यतः ॥२३॥
बृहन्निदिद्ध्मऽएषाम्भूरि शस्त्तम्पृथुः स्वरुः । येषामिन्द्रो युवा सखा ॥२४॥
इन्द्रेहि मत्स्यन्धसो व्विश्श्वेभिः सोमपर्व्वभिः । महाँ॥ऽअभिष्ष्टिरोजसा ॥२५॥
इन्द्रो व्वृत्रमवृणोच्छर्द्धनीतिः प्प्र मायिनाममिनाद्वर्प्पणीतिः ।
अहन्व्यꣳसमुशधग्ग्वनेष्ष्वाविर्द्धेनाऽअकृणोद्राम्म्याणाम् ॥२६॥
कुतस्त्वमिन्द्र माहिनः सन्नेको यासि सत्त्पते किन्तऽइत्था । सम्पृच्छसे समराणः शुभानैर्व्वोचेस्तन्नो हरिवो यत्तेऽअस्म्मे । महाँ॥ऽइन्द्रो यऽओजसा कदाचन स्त्तरीरसि कदाचन प्प्रयुच्छसि ॥२७॥

गलितमन्त्राः —

महाँ॥ऽइन्द्रो यऽओजसा पर्ज्जन्न्यो व्वृष्टिमाँ॥ऽइव । स्तोमैर्व्वत्सस्य व्वावृधे ॥
कदाचन स्त्तरीरसि नेन्द्र सश्चसि दाशुषे ।
उपोपेन्नु मघवन्भूयऽइन्नु ते दानन्देवस्य पृच्यते ॥
कदाचन प्प्रयुच्छस्युभे निपासि जन्मनी ।
तुरीयादित्त्य सवनन्तऽइन्द्रियमातस्थावमृतन्दिवि ॥

आ तत्तऽइन्द्रायवः पनन्ताभि यऽऊर्व्वङ्गोमन्तन्तितृत्त्सान् ।
सकृत्त्स्वँय्ये पुरुपुत्राम्महीꣳ सहस्रधाराम्बृहतीन्दुदुक्क्षन् ॥२८॥

इमान्ते धियम्प्रभरे महो महीमस्य स्तोत्रे धिषणा यत्तऽआनजे ।
तमुत्सवे च प्रसवे च सासहिमिन्द्रन्देवासः शवसामदन्ननु ॥२९॥

॥३॥ व्विभ्राड्बृहत्पिबतु सोम्म्यम्मद्ध्वायुर्द्दधद्यज्ञपताववि॑ह्रुतम् ।
व्वातजूतो योऽअभिरक्षति त्मना प्प्रजाः पुपोष पुरुधा व्विराजति ॥३०॥
उदु त्त्यञ्जातवेदसन्देवँव्वहन्ति केतवः । दृशे व्विश्वाय सूर्य्यम् ॥३१॥
येना पावक चक्षसा भुरण्ण्यन्तञ्जनाँ२॥ऽअनु । त्वँव्वरुण पश्श्यसि ॥३२॥
दैव्व्यावद्ध्वर्य्यूऽआगतꣳ रथेन सूर्य्यत्त्वचा । मद्ध्वा यज्ञꣳ समञ्जाथे ।
तम्प्रत्क्नथायँव्वेनश्चित्रन्देवानाम् ॥३३॥

गलितमन्त्राः —

तम्प्रत्क्नथा पूर्व्वथा व्विश्वथेमथा ज्ज्येष्ठतातिम्बर्हिषदꣳ स्वर्व्विदम् ।
प्रतीचीनँव्वृजनन्दोहसे धुनिमाशुञ्जयन्तमनु यासु वर्द्धसे ॥
अयँव्वेनश्चोदयत्पृश्निगर्ब्भा ज्ज्योतिर्ज्जरायू रजसो व्विमाने ।
इममपाꣳ सङ्गमे सूर्य्यस्य शिशुन्न व्विप्प्रा मतिभी रिहन्ति ॥
चित्रन्देवानामुदगादनीकञ्चक्षुर्म्मित्रस्य व्वरुणस्याग्नेः ।
आप्प्रा द्यावापृथिवीऽअन्तरिक्षꣳ सूर्य्यऽआत्क्मा जगतस्तस्थुषश्च ॥

आ नऽइडाभिर्व्विदथे सुशस्ति व्विश्वानरः सविता देवऽएतु ।
अपि यथा युवानो मत्सथा नो व्विश्वञ्जगदभिपित्त्वे मनीषा ॥३४॥
यदद्य कच्च व्वृत्रहन्नुदगाऽअभि सूर्य्य । सर्व्वन्तदिन्द्र ते व्वशे ॥३५॥
तरणिर्व्विश्वदर्शतो ज्ज्योतिष्कृदसि सूर्य्य । व्विश्वमाभासि रोचनम् ॥३६॥
तत्सूर्य्यस्य देवत्त्वन्तन्महित्त्वम्मद्ध्या कर्त्तोर्व्विततꣳ सञ्जभार ।
यदेदयुक्त हरितः सधस्थादाद्रात्री व्वासस्तनुते सिमस्म्मै ॥३७॥
तन्मित्रस्य व्वरुणस्याभिचक्षे सूर्य्यो रूपङ्कृणुते द्योरुपस्थे ।
अनन्तमन्न्यद्रुशदस्य पाजः कृष्णमन्न्यद्धरितः सम्भरन्ति ॥३८॥
बण्महाँ२॥ऽअसि सूर्य्य बडादित्त्य महाँ२॥ऽअसि ।
महस्ते सतो महिमा पनस्यतेद्धा देव महाँ२॥ऽअसि ॥३९॥
बट्सूर्य्य श्श्रवसा महाँ२॥ऽअसि सत्रा देव महाँ२॥ऽअसि ।
मह्ना देवानामसुर्य्यः पुरोहितो व्विभु ज्ज्योतिरदाब्भ्यम् ॥४०॥

श्राय॑न्तऽइव॒ सूर्य्यँ॒व्विश्वे॒दिन्द्र॑स्य भक्षत ।
व्वसू॑नि जा॒ते जन॑मान॒ऽओज॑सा॒ प्प्रति॑ भा॒गन्न दी॑धिम ॥४१॥
अ॒द्या दे॑वा॒ऽउदि॑ता॒ सूर्य्य॑स्य॒ निरꣳह॑सः पिपृ॒ता निर॑व॒द्यात् ।
तन्नो॑ मि॒त्रो व्वरु॑णो मामहन्ता॒मदि॑तिः॒ सिन्धु॑ः पृथि॒वीऽउ॒त द्यौः ॥४२॥
आ कृ॒ष्ण्णेन॒ रज॑सा॒ व्वर्त्त॑मानो निवे॒शय॑न्न॒मृत॒म्मर्त्त्यं॑ञ्च ।
हि॒रण्ण्यये॑न सवि॒ता रथे॒ना दे॒वो या॑ति॒ भुव॑नानि॒ पश्श्य॑न् ॥४३॥

॥४॥ प्रवा॑वृजे सु॒प्प्र॒या ब॒र्हिरे॑षा॒मा वि॒श्प्पती॑व॒ बीरि॑टऽइयाते ।
व्वि॒शाम॒क्क्तोरु॒षस॑ः पू॒र्व्वहू॑तौ व्वा॒युः पू॒षा स्व॒स्त्तये॑ नि॒युत्त्वा॑न् ॥४४॥
इ॒न्द्र॒वा॒यू बृ॒ह॒स्प्पति॑म्मि॒त्राग्निम्पू॒षण॒म्भग॑म् । आ॒दि॒त्त्यान्मारु॑तङ्ग॒णम् ॥४५॥
व्वरु॑णः प्प्रावि॒ता भु॑वन्मि॒त्रो व्विश्वा॑भिरू॒तिभि॑ः । कर॑तान्नः सु॒राध॑सः ॥४६॥
अधि॑ नऽइन्द्रैषाँ॒व्विष्ण्णो॑ सजा॒त्त्याना॑म् । इ॒ता मरु॑तो॒ऽअश्वि॑ना । तम्प्र॒त्क्कथा॒यँव्वे॒नो ये
दे॑वास॒ऽआ न॒ऽइडा॑भि॒र्व्विश्वे॑भिः सो॒म्म्यम्मद्ध्वोमा॑सश्च्चर्षणीधृतः ॥४७॥

गलितमन्त्राः —

त॒म्प्र॒त्क्कथा॑ पू॒र्व्वथा॑ व्वि॒श्वथे॒मथा॑ ज्ज्ये॒ष्ठता॑तिम्बर्हि॒षद॑ꣳ स्व॒र्व्विद॑म् ।
प्र॒ती॒ची॒नँव्वृ॒जन॑न्दोहसे॒ धुनि॑मा॒शुञ्जय॑न्त॒मनु॒ यासु॒ व्वर्द्ध॑से ॥
अ॒यँव्वे॒नश्चो॑दय॒त्त्पृश्नि॑गर्ब्भा॒ ज्ज्योति॑र्ज्जरायू॒ रज॑सो व्वि॒माने॑ ।
इ॒मम॒पाꣳ स॑ङ्ग॒मे सूर्य्य॑स्य॒ शिशु॒न्न व्विप्प्रा॑ म॒तिभी॑ रिहन्ति ॥
ये दे॑वासो दि॒व्व्येका॑दश॒ स्त्थ पृ॑थि॒व्व्याम॒द्ध्येका॑दश॒ स्त्थ ।
अ॒प्प्सु॒क्क्षितो॑ महि॒नैका॑दश॒ स्त्थ ते दे॑वासो य॒ज्ज्ञमि॒मञ्जु॑षद्ध्वम् ॥
आ न॒ऽइडा॑भिर्व्वि॒दथे॑ सु॒श॒स्त्ति व्वि॒श्वान॑रः सवि॒ता दे॒वऽए॑तु ।
अपि॒ यथा॑ यु॒वानो॒ मत्स॑था नो॒ व्विश्व॒ञ्जग॑दभिपि॒त्त्वे म॑नी॒षा ॥
व्विश्वे॑भिः सो॒म्म्यम्मद्ध्व॑ग्न॒ऽइन्द्रे॑ण व्वा॒युना॑ । पिबा॑ मि॒त्रस्य॒ धाम॑भिः ॥
ओमा॑सश्च्चर्षणीधृतो॒ व्विश्वे॑ देवास॒ऽआग॑त । दा॒श्वाꣳसो॑ दा॒शुष॑ः सु॒तम् ॥

अग्न॒ऽइन्द्र॒ व्वरु॑ण॒ मित्र॒ देवा॒ः शर्द्ध॒ः प्प्रय॑न्त॒ मारु॑तो॒त व्विष्ण्णो ।
उ॒भा नास॑त्त्या रु॒द्द्रोऽअध॒ ग्नाः पू॒षा भग॒ः सर॑स्वती जुषन्त ॥४८॥
इ॒न्द्रा॒ग्नी मि॒त्रावरु॒णादि॑ति॒ꣳ स्वः पृ॑थि॒वीन्द्याम्म॒रुत॒ः पर्व्व॑ताँ२॥ऽअ॒पः ।
हु॒वे व्वि॒ष्ण्णुम्पू॒षण॒म्ब्रह्म॑ण॒स्प्पति॒म्भग॒न्नु शꣳस॑ꣳ सवि॒तार॑मू॒तये॑ ॥४९॥

अस्म्मे रुद्द्रा मेहना पर्व्वतासो वृत्रहत्त्ये भरहूतौ सजोषाः ।
यः शꣳसते स्तुवते धायि पज्ज्रऽइन्द्रज्ज्येष्ठाऽअस्म्माँ२॥ऽअवन्तु देवाः ॥५०॥
अर्व्वाञ्चोऽअद्या भवता यजत्राऽआ वो हार्द्दि भयमानो व्ययेयम् ।
त्राद्ध्वन्नो देवा निजुरो वृकस्य त्राद्ध्वङ्कर्त्तादवपदो यजत्राः ॥५१॥
विश्श्वेऽअद्य मरुतो विश्श्वऽऊती विश्श्वे भवन्त्वग्नयः समिद्धाः ।
विश्श्वे नो देवाऽअवसागमन्तु विश्श्वमस्तु द्रविणँव्वाजोऽअस्म्मे ॥५२॥
विश्श्वे देवाः शृणुतेमꣳ हवम्मे येऽअन्तरिक्क्षे यऽउप द्यवि ष्ठ ।
येऽअग्निजिह्वाऽउत वा यजत्राऽआसद्यास्म्मिन्बर्हिषि मादयद्ध्वम् ॥५३॥
देवेब्भ्यो हि प्प्रथमँय्यज्ञियेब्भ्योमृतत्त्वꣳ सुवसि भागमुत्तमम् ।
आदिद्दामानꣳ सवितर्व्व्यूर्ण्णुषेनूचीना जीविता मानुषेब्भ्यः ॥५४॥

॥५॥ प्र वायुमच्छा बृहती मनीषा बृहद्रयिँव्विश्श्ववारꣳ रथप्प्राम् ।
द्युतद्यामा नियुतः पत्त्यमानः कविः कविमियक्क्षसि प्प्रयज्ज्यो ॥५५॥
इन्द्रवायूऽइमे सुताऽउप प्प्रयोभिरागतम् । इन्दवो वामुशन्ति हि ॥५६॥
मित्रꣳ हुवे पूतदक्क्षँव्वरुणञ्च रिशादसम् । धियङ्घृताचीꣳ साधन्ता ॥५७॥
दस्रा युवाकवः सुता नासत्त्या वृक्तबर्हिषः ।
आयातꣳ रुद्रवर्त्तनी । तम्प्रत्क्नथायँव्वेनः ॥५८॥

गलितमन्त्रौ —

तम्प्रत्क्नथा पूर्व्वथा विश्श्वथेमथा ज्ज्येष्ठतातिम्बर्हिषदꣳ स्वर्व्विदम् ।
प्रतीचीनँव्वृजनन्दोहसे धुनिमाशुञ्जयन्तमनु यासु वर्द्धसे ॥
अयँव्वेनश्चोदयत्पृश्निगब्भा ज्ज्योतिर्ज्जरायू रजसो विमाने ।
इममपाꣳ सङ्गमे सूर्य्यस्य शिशुन्न विप्प्रा मतिभी रिहन्ति ॥

विदद्यदी सरमा रुग्णमद्रेर्म्महि पाथः पूर्व्यꣳ सद्ध्र्यक्कः ।
अग्ग्रन्नयत्सुपद्यक्क्षराणामच्छा रवम्प्रथमा जानती गात् ॥५९॥
नहि स्प्पशमविदन्नन्यमस्म्माद्वैश्श्वानरात्पुरऽएतारमग्नेः ।
एमेनमवृधन्नमृताऽअमर्त्त्यँव्वैश्श्वानरङ्क्षैत्रजित्त्याय देवाः ॥६०॥
उग्ग्रा विघनिना मृधऽइन्द्राग्नी हवामहे । ता नो मृडातऽईदृशे ॥६१॥
उपास्म्मै गायता नरः पवमानायेन्दवे । अभि देवाँ२॥ऽइयक्क्षते ॥६२॥

ये त्वाहिहत्त्ये मघवन्नवर्द्धन्ये शाम्बुरे हरिवो ये गविष्ट्टौ ।
ये त्वा नूनमनुमदन्ति विप्प्राः पिबेन्द्र सोमꣳ सगणो मुरुद्भिः ॥६३॥
जनिष्ट्ठाऽउग्ग्रः सहसे तुराय मुन्द्रऽओजिष्ट्ठो बहुलाभिमानः ।
अवर्द्धन्निन्द्रम्मुरुतश्चिदत्र माता यद्वीरन्दधनद्धनिष्ट्ठा ॥६४॥
आ तू नऽइन्द्र वृत्रहन्नस्म्माकमर्द्धमागहि । मुहान्म्मुहीभिरूतिभिः ॥६५॥
त्वमिन्द्र प्प्रतूर्त्तिष्ष्वभि विश्श्वाऽअसि स्पृधः ।
अशस्तिहा जनिता विश्श्वतूरसि त्वन्तूर्य्य तरुष्ष्यतः ॥६६॥
अनु ते शुष्म्मन्तुरयन्तमीयतुः क्षोणी शिशुन्न मातरा ।
विश्श्वास्त्ते स्पृधः श्नथयन्त मन्न्यवे वृत्रँय्यदिन्द्र तूर्वसि ॥६७॥
यज्ज्ञो देवानाम्प्रत्त्येति सुम्न्नमादित्त्यासो भवता मृडयन्तः ।
आ वोर्वाची सुमतिर्व्ववृत्त्यादꣳहोश्चिद्या वरिवोवित्तरासत् ॥६८॥
अदब्धेभिः सवितः पायुभिष्ट्वꣳ शिवेभिरद्य परिपाहि नो गयम् ।
हिरण्ण्यजिह्वः सुविताय नव्व्यसे रक्षा माकिर्न्नोऽअघशꣳसऽईशत ॥६९॥
॥६॥ प्रवीरया शुचयो दद्रिरे वामद्ध्वर्य्युभिर्म्मधुमन्तः सुतासः ।
वह वायो नियुतो याह्यच्छा पिबा सुतस्यान्धसो मदाय ॥७०॥
गावऽउपावतावतम्महो यज्ज्ञस्य रप्प्सुदा । उभा कर्ण्णा हिरण्ण्यया ॥७१॥
काव्व्ययोराजानेषु क्रत्त्वा दक्षस्य दुरोणे । रिशादसा सधस्त्थऽआ ॥७२॥
दैव्व्यावद्ध्वर्य्यूऽआगतꣳ रथेन सूर्य्यत्त्वचा । मद्ध्वा यज्ज्ञꣳ समञ्ज्ञाथे ।
तम्प्रत्नथायँव्वेनः ॥७३॥

गलितमन्त्रौ—

तम्प्रत्नथा पूर्व्वथा विश्श्वथेमथा ज्ज्येष्ठतातिम्बर्हिषदꣳ स्वर्व्विदम् ।
प्रतीचीनँव्वृजनन्दोहसे धुनिमाशुञ्जयन्तमनु यासु वर्द्धसे ॥
अयँव्वेनश्चोदयत्पृश्निगर्ब्भा ज्ज्योतिर्ज्जरायू रजसो विमाने ।
इममपाꣳ सङ्गमे सूर्य्यस्य शिशुन्न विप्प्रा मतिभी रिहन्ति ॥

तिरश्चीनो विततो रश्म्मिरेषामधः स्विदासी३दुपरि स्विदासी३त् ।
रेतोधाऽआसन्म्महिमानऽआसन्त्स्वधाऽअवस्त्तात्प्रयतिः पुरस्त्तात् ॥७४॥
आ रोदसीऽअपृणदा स्वर्म्महज्जातँय्यदेनमपसोऽअधारयन् ।
सोऽअद्ध्वराय परिणीयते कविरत्त्यो न वाजसातये चनोहितः ॥७५॥

उक्थेभिर्व्वृत्रहन्तमा या मन्दाना चिदा गिरा । आङ्गूषैराविवासतः ॥७६॥
उप नः सूनवो गिरः शृण्वन्त्वमृतस्य ये । सुमृडीका भवन्तु नः ॥७७॥
ब्रह्माणि मे मतयः शꣳ सुतासः शुष्म्मऽइयर्त्ति प्प्रभृतो मेऽअद्रिः ।
आशासते प्प्रतिहर्य्यन्त्युक्थेमा हरी वहतस्त्ता नोऽअच्छ ॥७८॥
अनुत्तमा ते मघवन्नकिर्न्नु न त्त्वावाँ२॥ऽअस्त्ति देवता विदानः ।
न जायमानो नशते न जातो यानि करिष्ष्या कृणुहि प्प्रवृद्ध ॥७९॥
तदिदास भुवनेषु ज्ज्येष्ठँय्यतो जज्ज्ञऽउग्ग्रस्त्त्वेषनृम्म्णः ।
सद्यो जज्ज्ञानो निरिणाति शत्रूननु यँविश्श्वे मदन्त्यूमाः ॥८०॥
इमाऽउ त्त्वा पुरूवसो गिरो वर्द्धन्तु या मम ।
पावकवर्ण्णाः शुचयो विपश्श्चितोभि स्त्तोमैरनूषत ॥८१॥
यस्यायँविश्श्वऽआर्य्यो दासः शेवधिपाऽअरिः ।
तिरश्श्चिदर्य्ये रुशमे पवीरवि तुब्भ्येत्सोऽअज्ज्यते रयिः ॥८२॥
अयꣳ सहस्रमृषिभिः सहस्कृतः समुद्रऽइव पप्प्रथे ।
सत्त्यः सोऽअस्य महिमा गृणे शवो यज्ज्ञेषु विप्प्रराज्ज्ये ॥८३॥
अदब्धेभिः सवितः पायुभिष्ट्वꣳ शिवेभिरद्य परिपाहि नो गयम् ।
हिरण्ण्यजिह्वः सुविताय नव्यसे रक्षा माकिर्न्नोऽअघशꣳसऽईशत ॥८४॥

॥७॥ आ नो यज्ज्ञन्दिविस्पृशँवायो याहि सुमन्न्मभिः ।
अन्तः पवित्त्रऽउपरि श्श्रीणानोयꣳ शुक्क्रोऽअयामि ते ॥८५॥
इन्द्रवायू सुसन्दृशा सुहवेह हवामहे ।
यथा नः सर्व्वऽइज्जनोनमीवः सङ्गमे सुमनाऽअसत् ॥८६॥
ऋधगित्था स मर्त्त्यः शशमे देवतातये ।
यो नूनम्मित्त्रावरुणावभिष्टयऽआचक्क्रे हव्यदातये ॥८७॥
आयातमुपभूषतम्मद्ध्वः पिबतमश्श्विना ।
दुग्ग्धम्पयो वृषणा जेन्न्यावसू मा नो मर्द्धिष्ट्टमागतम् ॥८८॥
प्रैतु ब्रह्मणस्प्पतिः प्प्र देव्येतु सूनृता ।
अच्छा वीरन्नर्य्यम्पङ्क्तिराधसन्देवा यज्ज्ञन्नयन्तु नः ॥८९॥
चन्द्रमाऽअप्प्स्वन्तरा सुपर्ण्णो धावते दिवि ।
रयिम्पिशङ्गम्बहुलम्पुरुस्पृहꣳ हरिरेति कनिक्क्रदत् ॥९०॥

दे॒वन्दे॑वँ॒व्वोव॑से दे॒वन्दे॑वम॒भिष्ट॑ये ।
दे॒वन्दे॑वꣳ हुवेम॒ व्वाज॑सातये गृ॒णन्तो॑ दे॒व्या धि॒या ॥९१॥
दि॒वि पृ॒ष्टोऽअ॑रोचता॒ग्निर्वै॑श्वान॒रो बृ॒हन् ।
क्ष्मया॑ वृधा॒नऽओज॑सा॒ चनो॑हितो॒ ज्योति॑षा बाधते॒ तमः॑ ॥९२॥
इन्द्रा॑ग्नीऽअ॒पादि॒यम्पूर्व्वागा॑त्प॒द्वती॑भ्यः ।
हि॒त्त्वी शिरो॑ जि॒ह्वया॒ व्वाव॑द॒च्चर॑त्त्रि॒ꣳशत्प॒दान्य॑क्रमीत् ॥९३॥
दे॒वासो॒ हि ष्मा॒ मन॑वे॒ सम॑न्यवो॒ व्विश्वे॑ सा॒कꣳ सरा॑तयः ।
ते नो॑ऽअ॒द्य तेऽअ॑प॒रन्तु॒चे तु नो॒ भव॑न्तु व्वरिवो॒विदः॑ ॥९४॥
अपा॑धमद॒भिश॑स्तीरशस्ति॒हाथेन्द्रो॑ द्यु॒म्न्याभ॑वत् ।
दे॒वास्त॑ऽइन्द्र स॒ख्याय॑ येमिरे॒ बृह॑द्भानो॒ मरु॑द्गण ॥९५॥
प्र व॒ऽइन्द्रा॑य बृ॒हते॒ मरु॑तो॒ ब्रह्मा॑र्च्चत ।
व्वृ॒त्रꣳ ह॑नति व्वृत्र॒हा श॒तक्र॑तु॒र्व्वज्रे॑ण श॒तप॑र्व्वणा ॥९६॥
अ॒स्येदिन्द्रो॑ व्वावृधे॒ व्वृष्ण्य॒ꣳ शवो॒ मदे॑ सु॒तस्य॒ व्विष्ण॑वि ।
अ॒द्या तम॑स्य महि॒मान॑मा॒यवोनु॑ष्टुवन्ति पू॒र्व्वथा॑ ।
इ॒माऽउ॑ त्वा॒ यस्या॒यम॒यꣳ स॒हस्र॑मू॒र्द्ध्वऽऊ॒ षु णः॑ ॥९७॥

गलितमन्त्राः —

इ॒माऽउ॑ त्वा पु॒रूवसो॒ गिरो॑ व्वर्द्धन्तु॒ या मम॑ ।
पा॒व॒कव॑र्ण्णाः॒ शुच॑यो व्विप॒श्चितो॒भि स्तोमै॑रनूषत ॥
यस्या॒यँव्विश्व॒ऽआर्य्यो॒ दासः॑ शेवधि॒पाऽअ॒रिः ।
ति॒रश्चि॑द॒र्य्ये रु॒शमे॒ पवी॑रवि॒ तुभ्येत्सोऽअ॑ज्यते र॒यिः ॥
अ॒यꣳ स॒हस्र॒मृषि॑भि॒ः सह॑स्कृतः समु॒द्रऽइ॑व पप्रथे ।
स॒त्यः सोऽअ॑स्य महि॒मा गृ॒णे शवो॑ य॒ज्ञेषु॑ व्विप्र॒राज्ये॑ ॥
ऊ॒र्द्ध्वऽऊ॒ षु ण॑ऽऊ॒तये॒ तिष्ठा॑ दे॒वो न स॑वि॒ता ।
ऊ॒र्द्ध्वो व्वाज॑स्य॒ सनि॑ता॒ यद॒ञ्जिभि॑र्व्वा॒घद्भि॑र्व्वि॒ह्वया॑महे ॥

॥ इति त्रयस्त्रिंशोऽध्यायः ॥

अथ चतुस्त्रिंशोऽध्यायः

ऋषिः (१) 'यज्ञाग्रतः' इत्यारभ्य (५८) 'ब्रह्मणस्पते त्वम्' इत्यन्तानां सामान्यत आदित्ययाज्ञवल्क्यावृषी । विशेषतश्च— (१) 'यज्जाग्रतः' इत्यारभ्य (६) 'सुषारथिरश्वान्' इत्यन्तानां शिवसङ्कल्पः, (७) 'पितुन्नु' इत्यस्यागस्त्यः, (१०) 'सिनीवालि पृथुष्टुके' (११) 'पञ्च नद्यः' इत्यनयोर्गृत्समदः, (१२) 'त्वमग्ने' (१३) 'त्वन्नः' इत्यनयोराङ्गिरसो हिरण्यस्तूपः, (१४) 'उत्तानायामवभरा' (१५) 'इडायास्त्वा' इत्यनयोर्भारतौ देवश्रवोदेववातौ, (१६) 'प्रमन्महे' (१७) 'प्र वो महे' इत्यनयोर्नोधाः, (१८) 'इच्छन्ति त्वा' (१९) 'न ते' इत्यनयोर्भारतौ देवश्रवोदेववातौ, (२०) 'अषाढं युत्सु' इत्यारभ्य (२३) 'देवेन नः' इत्यन्तानां गोतमः, (२४) 'अष्टौ व्यख्यत्' इत्यारभ्य (२७) 'ये ते' इत्यन्तानामाङ्गिरसो हिरण्यस्तूपः, (२८) 'उभा पिबतम्' इत्यस्य प्रस्कण्वः, (२९) 'अप्नस्वतीमश्विना' (३०) 'द्युभिरक्तुभिः' इत्यनयोः कुत्सः, (३१) 'आ कृष्णेन रजसा' इत्यस्याङ्गिरसो हिरण्यस्तूपः, (३२) 'आ रात्रि पार्थिवम्' इत्यस्य भरद्वाजदुहिता कशिपा, (३३) 'उषस्तत्' इत्यस्य गोतमः, (३४) 'प्रातरग्निम्' इत्यारभ्य (४०) 'अश्वावतीर्गोमतीः' इत्यन्तानां वसिष्ठः, (४१) 'पूषन्तव' इत्यस्य सुहोत्रः, (४२) 'पथस्पथः' इत्यस्य ऋजिश्वा, (४३) 'त्रीणि पदा' (४४) 'तद्विप्रासः' इत्यनयोर्मेधातिथिः, (४५) 'घृतवती भुवनानाम्' इत्यस्य भरद्वाजः, (४६) 'ये नः' इत्यस्य विहव्यः, (४७) 'आ नासत्या' इत्यस्य हिरण्यस्तूपः, (३८) 'एष वः' इत्यस्यागस्त्यः, (४९) 'सहस्तोमाः सहछन्दसः' इत्यस्य प्राजापत्यो यज्ञः, (५०) 'आयुष्यं वर्चस्यम्' (५१) 'न तद्' (५२) 'यदाबध्नन्' इत्येषां दक्षः, (५३) 'उत नः' इत्यस्य ऋजिश्वा, (५४) 'इमा गिरः' इत्यस्य गार्त्समदः कूर्मः, (५६) 'उत्तिष्ठ ब्रह्मणस्पते' (५७) 'प्र नूनम्' इत्यनयोर्घौरः कण्वः, (५८) 'ब्रह्मणस्पते त्वम्' इत्यस्य गृत्समदः ॥

देवता (१) 'यज्जाग्रतः' (२) 'येन कर्माणि' (३) 'यत्प्रज्ञानम्' (४) 'येनेदम्' (५) 'यस्मिन्नृचः' (६) 'सुषारथिरश्वान्' इत्येषां मनः ।
(७) 'पितुन्नु' इत्यस्यान्नम् ।
(८) 'अन्विदनुमते' (९) 'अनु नः' इत्यनयोरनुमतिः ।
(१०) 'सिनीवालि पृथुष्टुके' इत्यस्य सिनीवाली ।
(११) 'पञ्च नद्यः' इत्यस्य सरस्वती ।
(१२) 'त्वमग्ने' (१३) 'त्वन्नः' (१४) 'उत्तानायामवभरा' (१५) 'इडायास्त्वा' इत्येषामग्निः ।
(१६) 'प्रमन्महे' (१७) 'प्र वो महे' (१८) 'इच्छन्ति त्वा' (१९) 'न ते' इत्येषामिन्द्रः ।
(२०) 'अषाढं युत्सु' (२१) 'सोमो धेनुम्' (२२) 'त्वमिमाः' (२३) 'देवेन नः' इत्येषां सोमः ।
(२४) 'अष्टौ व्यख्यत्' (२५) 'हिरण्यपाणिः सविता' (२६) 'हिरण्यहस्तो असुरः' (२७) 'ये ते' इत्येषां सविता ।
(२८) 'उभा पिबतम्' (२९) 'अप्नस्वतीमश्विना' (३०) 'द्युभिरक्तुभिः' इत्येषामश्विनौ ।
(३१) 'आ कृष्णेन रजसा' इत्यस्य सूर्यः ।
(३२) 'आ रात्रि पार्थिवम्' इत्यस्य रात्रिः ।
(३३) 'उषस्तत्' इत्यस्य उषाः ।
(३४) 'प्रातरग्निम्' इत्यस्याग्नीन्द्रमित्रावरुणाश्विभगपूषब्रह्मणस्पतिसोमरुद्राः ।
(३५) 'प्रातर्जितम्' (३६) 'भग प्रणेतः' (३७) 'उतेदानीम्' (३८) 'भग एव' (३९) 'समध्वरायोपसः' इत्येषां भगः ।
(४०) 'अश्वावतीर्गोमतीः' इत्यस्य उषाः ।
(४१) 'पूषन्तव' (४२) 'पथस्पथः' इत्यनयोः पूषा ।
(४३) 'त्रीणि पदा' (४४) 'तद्विप्रासः' इत्यनयोर्विष्णुः ।
(४५) 'घृतवती भुवनानाम्' इत्यस्य द्यावापृथिव्यौ ।
(४६) 'ये नः' इत्यस्य लिङ्गोक्ता ।

(४७) 'आ नासत्या' इत्यस्याश्विनौ ।
(४८) 'एष वः' इत्यस्य मरुतः ।
(४९) 'सहस्तोमाः सहछन्दसः' इत्यस्य ऋषयः ।
(५०) 'आयुष्यं वर्चस्यम्' (५१) 'न तद्' (५२) 'यदावध्नन्' इत्येषां हिरण्यम् ।
(५३) 'उत नः' इत्यस्याहिर्बुध्न्योऽज एकपात्पृथिवी समुद्रो विश्वे देवाश्च ।
(५४) 'इमा गिरः' इत्यस्यादित्यः ।
(५५) 'सप्त ऋषयः' इत्यस्य सप्तर्षयः ।
(५६) 'उत्तिष्ठ ब्रह्मणस्पते' (५७) 'प्र नूनम्' (५८) 'ब्रह्मणस्पते त्वम्' इत्येषां ब्रह्मणस्पतिः ॥

छन्दः (१) 'यज्जाग्रतः' इत्यारभ्य (६) 'सुषारथिरश्वान्' इत्यन्तानां त्रिष्टुप्, (७) 'पितुन्नु' इत्यस्योष्णिक्, (८) 'अन्विदनुमते' इत्यारभ्य (११) 'पञ्च नद्यः' इत्यन्तानामनुष्टुप्, (१२) 'त्वमग्ने' (१३) 'त्वन्नः' इत्यनयोर्जगती, (१४) 'उत्तानायामवभरा' इत्यस्य त्रिष्टुप्, (१५) 'इडायास्त्वा' इत्यस्यानुष्टुप्, (१६) 'प्रमन्महे' इत्यारभ्य (२४) 'अष्टौ व्यख्यत्' इत्यन्तानां त्रिष्टुप्, (२५) 'हिरण्यपाणिः सविता' इत्यस्य जगती, (२६) 'हिरण्यहस्तो असुरः' (२७) 'ये ते' इत्यनयोस्त्रिष्टुप्, (२८) 'उभा पिबतम्' इत्यस्य गायत्री, (२९) 'अप्नस्वतीमश्विना' (३०) 'द्युभिरक्तुभिः' (३१) 'आ कृष्णेन रजसा' इत्येषां त्रिष्टुप्, (३२) 'आ रात्रि पार्थिवम्' इत्यस्य पथ्याबृहती, (३३) 'उषस्तत्' इत्यस्य परोष्णिक्, (३४) 'प्रातरग्निम्' इत्यस्य जगती, (३५) 'प्रातर्जितम्' इत्यारभ्य (४०) 'अश्वावतीर्गोमतीः' इत्यन्तानां त्रिष्टुप्, (४१) 'पूषन्तव' इत्यस्य गायत्री, (४२) 'पथस्पथः' इत्यस्य त्रिष्टुप्, (४३) 'त्रीणि पदा' (४४) 'तद्विप्रासः' इत्यनयोर्गायत्री, (४५) 'घृतवती भुवनानाम्' इत्यस्य जगती, (४६) 'ये नः' इत्यस्य त्रिष्टुप्, (४७) 'आ नासत्या' इत्यस्य जगती, (४८) 'एष वः' (४९) 'सहस्तोमाः सहछन्दसः' इत्यनयोस्त्रिष्टुप्, (५०) 'आयुष्यं वर्चस्यम्' इत्यस्योष्णिक्, (५१) 'न तद्' इत्यस्य शक्वरी, (५२) 'यदावध्नन्' (५३) 'उत नः' (५४) 'इमा गिरः' इत्येषां त्रिष्टुप्, (५५) 'सप्त ऋष॰' इत्यस्य जगती, (५६) 'उत्तिष्ठ ब्रह्मणस्पते' (५७) 'प्र नूनम्' इत्यनयोर्बृहती, (५८) 'ब्रह्मणस्पते त्वम्' इत्यस्य त्रिष्टुप् ॥

॥ हरिः ॐ ॥

॥१॥ यज्जाग्र॑तो दू॒रमु॒दैति॒ दैव॒न्तदु॑ सु॒प्तस्य॒ तथै॒वैति॑ ।
दू॒र॒ङ्ग॒मञ्ज्योति॑षा॒ञ्ज्योति॒रेक॒न्तन्मे॒ मन॑÷ शि॒वस॑ङ्कल्पमस्तु ॥१॥
येन॒ कर्म्मा॑ण्य॒पसो॑ मनी॒षिणो॑ य॒ज्ञे कृ॒ण्वन्ति॑ वि॒दथे॑षु॒ धीरा॑ः ।
यद॑पू॒र्व्वँय्य॒क्षम॒न्तः प्प्र॒जाना॒न्तन्मे॒ मन॑÷ शि॒वस॑ङ्कल्पमस्तु ॥२॥
यत्प्र॒ज्ञान॑मु॒त चेतो॒ धृति॑श्च॒ यज्ज्योति॑र॒न्तर॒मृत॑म्प्र॒जासु॑ ।
यस्मा॒न्नऽऋ॒ते किञ्च॒न कर्म्म॑ क्रि॒यते॒ तन्मे॒ मन॑÷ शि॒वस॑ङ्कल्पमस्तु ॥३॥
येने॒दम्भू॒तम्भुव॑नम्भवि॒ष्यत्परि॑गृहीतम॒मृते॑न॒ सर्व्व॑म् ।
येन॑ य॒ज्ञस्ता॒यते॑ स॒प्तहो॑ता॒ तन्मे॒ मन॑÷ शि॒वस॑ङ्कल्पमस्तु ॥४॥
यस्मि॒न्नृच॒ः साम॒ यजू॑ꣳषि॒ यस्मि॑न्प्रति॒ष्ठिता॑ रथना॒भावि॑वा॒राः ।
यस्मि॑ꣳश्चि॒त्तꣳ सर्व्व॒मोत॑म्प्र॒जाना॒न्तन्मे॒ मन॑÷ शि॒वस॑ङ्कल्पमस्तु ॥५॥
सु॒षा॒र॒थिरश्वा॑निव॒ यन्म॑नु॒ष्या॒न्नेनी॒यते॒भीशु॑भिर्व्वा॒जिन॑ऽइव ।
हृ॒त्प्रति॑ष्ठँ॒य्यद॑जि॒रञ्जवि॑ष्ठ॒न्तन्मे॒ मन॑÷ शि॒वस॑ङ्कल्पमस्तु ॥६॥

पि॒तुन्नु स्तो॑षम्म॒हो ध॒र्म्माण॒न्तवि॑षीम् । यस्य॑ त्रि॒तो व्योज॑सा वृ॒त्रँव्विप॑र्वम॒र्दय॑त् ॥७॥
अन्वि॒दनु॑मते॒ त्वम्मन्या॑सै॒ शञ्च॑ नस्कृधि ।
क्रत्वे॒ दक्षा॑य नो हिनु॒ प्प्र ण॒ऽआयू॑ꣳषि तारिषः ॥८॥
अनु॑ नो॒द्यानु॑मतिर्य्य॒ज्ञन्दे॒वेषु॑ मन्यताम् ।
अ॒ग्निश्च॑ हव्य॒वाह॑नो॒ भव॑तन्दा॒शुषे॒ मयः॑ ॥९॥
सिनी॑वालि॒ पृथु॑ष्टुके॒ या दे॒वाना॒मसि॒ स्वसा॑ ।
जु॒षस्व॑ ह॒व्यमाहु॑तम्प्र॒जान्दे॑वि दिदिड्ढि नः ॥१०॥

॥२॥ पञ्च॑ न॒द्यः॒ सर॑स्वती॒मपि॑यन्ति॒ सस्रो॑तसः ।
सर॑स्वती॒ तु प॑ञ्च॒धा सो दे॒शेभ॑वत्स॒रित् ॥११॥
त्वम॑ग्ने प्प्रथ॒मोऽअङ्गि॑रा॒ऽऋषि॑र्द्दे॒वो दे॒वाना॑मभवः शि॒वः सखा॑ ।
तव॑ व्व्र॒ते क॒वयो॑ विद्म॒नाप॑सोजाय॑न्त म॒रुतो॒ ब्भ्राज॑दृष्टयः ॥१२॥
त्वन्नो॑ऽअग्ने॒ तव॑ देव पा॒युभि॑र्म्म॒घोनो॑ रक्ष त॒न्व॑श्च वन्द्य ।
त्रा॒ता तो॒कस्य॒ तन॑ये॒ गवा॑म॒स्यनि॑मेष॒ꣳ रक्ष॑माण॒स्तव॑ व्व्र॒ते ॥१३॥
उ॒त्ता॒नाया॒मव॑भरा चिकि॒त्वान्त्स॒द्यः प्प्रवी॑ता॒ वृष॑णञ्जजान ।
अ॒रु॒षस्तू॑पो॒ रुश॑दस्य॒ पाज॒ऽइडा॑यास्प्पु॒त्रो व॒युने॑जनिष्ट ॥१४॥
इडा॑यास्त्वा प॒दे व॒यन्नाभा॑ पृथि॒व्याऽअधि॑ ।
जात॑वेदो॒ निधी॑म॒ह्यग्ने॑ ह॒व्याय॒ वोढ॑वे ॥१५॥
प्रम॑न्महे शवसा॒नाय॑ शू॒षमा॑ङ्गू॒षङ्गिर्व्व॑णसेऽअङ्गिर॒स्वत् ।
सु॒वृ॒क्तिभि॑ स्तुव॒तऽऋ॑ग्ग्मि॒याया॒र्च्चा॑मा॒र्क्कन्न॒रे व्विश्श्रु॑ताय ॥१६॥
प्र वो॑ म॒हे महि॒ नमो॑ भरद्ध्वमाङ्गू॒ष्य॒ꣳ शवसा॒नाय॒ साम॑ ।
येना॑ नः॒ पूर्व्वे॑ पि॒तरः॑ पद॒ज्ञाऽअर्च्च॑न्तो॒ऽअङ्गि॑रसो॒ गाऽअवि॑न्दन् ॥१७॥
इ॒च्छन्ति॑ त्वा सो॒म्म्यासः॒ सखा॑यः सु॒न्न्वन्ति॒ सोम॒न्दध॑ति॒ प्प्रया॑ꣳसि ।
तिति॑क्षन्तेऽअ॒भिश॑स्ति॒ञ्जना॑ना॒मिन्द्र॒ त्वदा कश्च॒न हि प्प्रके॒तः ॥१८॥
न ते॑ दू॒रे प॑र॒मा चि॒द्रजा॑ꣳस्या तु प्प्रया॑हि हरिवो॒ हरि॑ब्भ्याम् ।
स्थि॒राय॒ वृष्ण्णे॒ सव॑ना कृ॒तेमा यु॒क्ता ग्ग्रावा॑णः समिधा॒नेऽअ॒ग्नौ ॥१९॥
अषा॑ढँय्यु॒त्सु पृत॑नासु॒ पप्प्रि॑ꣳ स्व॒र्षाम॒प्प्साँव्वृ॒जन॑स्य गो॒पाम् ।
भ॒रे॒षु॒जाꣳ सु॑क्षि॒तिꣳ सु॒श्श्रव॑सञ्जय॑न्त॒न्त्वामनु॑मदेम सोम ॥२०॥

॥३॥ सोमो धेनुꣳ सोमोऽअर्व्वन्तमाशुꣳ सोमो व्वीरङ्कर्म्मण्यन्ददाति ।
सादन्यँव्विदत्थ्यꣳ सभेयम्पितृश्श्रवणँय्यो ददाशदस्मै ॥२१॥
त्वमिमाऽओषधीः सोम व्विश्वास्त्वमपोऽअजनयस्त्वङ्गाः ।
त्वमाततन्थोर्व्वन्तरिक्षन्त्वञ्ज्योतिषा व्वि तमो व्ववर्त्थ ॥२२॥
देवेन नो मनसा देव सोम रायो भागꣳ सहसावन्नभियुद्ध्य ।
मा त्वातनदीशिषे व्वीर्य्यस्योभयेभ्यः प्प्रचिकित्सा गविष्टौ ॥२३॥
अष्टौ व्यख्यत्ककुभः पृथिव्यास्त्री धन्व योजना सप्त सिन्धून् ।
हिरण्ण्याक्षः सविता देवऽआगाद्दधद्रत्ना दाशुषे व्वार्य्याणि ॥२४॥
हिरण्ण्यपाणिः सविता व्विचर्षणिरुभे द्यावापृथिवीऽअन्तरीयते ।
अपामीवाम्बाधते व्वेति सूर्य्यमभि कृष्ण्णेन रजसा द्यामृणोति ॥२५॥
हिरण्ण्यहस्तोऽअसुरः सुनीथः सुमृडीकः स्ववा यात्वर्व्वाङ् ।
अपसेधन्व्रक्षसो यातुधानानस्थाद्देवः प्प्रतिदोषङ्गृणानः ॥२६॥
ये ते पन्थाः सवितः पूर्व्यासोऽरेणवः सुकृताऽअन्तरिक्षे ।
तेभिर्न्नोऽअद्य पथिभिः सुगेभी रक्षा च नोऽअधि च ब्रूहि देव ॥२७॥
उभा पिबतमश्विनोभा नः शर्म्म यच्छतम् । अविद्द्रियाभिरूतिभिः ॥२८॥
अप्नस्वतीमश्विना व्वाचमस्मे कृतन्नो दस्रा व्वृषणा मनीषाम् ।
अद्यूत्त्येवसे निह्वये व्वाँव्वृधे च नो भवतँव्वाजसातौ ॥२९॥
द्युभिरक्तुभिः परिपातमस्मानरिष्टेभिरश्विना सौभगेभिः ।
तन्नो मित्रो व्वरुणो मामहन्तामदितिः सिन्धुः पृथिवीऽउत द्यौः ॥३०॥

॥४॥ आ कृष्ण्णेन रजसा व्वर्त्तमानो निवेशयन्नमृतम्मर्त्त्यञ्च ।
हिरण्ण्ययेन सविता रथेना देवो याति भुवनानि पश्श्यन् ॥३१॥
आ रात्रि पार्त्थिवꣳ रजः पितुरप्प्रायि धामभिः ।
दिवः सदाꣳसि बृहती व्वितिष्ठसऽआ त्वेषँव्वर्त्तते तमः ॥३२॥
उषस्तच्चित्रमाभरास्मभ्यँव्वाजिनीवति । येन तोकञ्च तनयञ्च धामहे ॥३३॥
प्रातरग्निम्प्रातरिन्द्रꣳ हवामहे प्प्रातर्म्मित्रावरुणा प्प्रातरश्विना ।
प्रातर्ब्भगम्पूषणम्ब्रह्मणस्पतिम्प्रातः सोममुत रुद्रꣳ हुवेम ॥३४॥
प्रातर्ज्जितम्भगमुग्ग्रꣳ हुवेम व्वयम्पुत्रमदितेर्य्यो व्विधर्त्ता ।
आद्ध्रश्चिद्यम्मन्यमानस्तुरश्चिद्राजा चिद्यम्भगम्भक्षीत्त्याह ॥३५॥

भग॒ प्प्रणे॑तु॒र्ब्भग॒ सत्त्य॑राधो॒ भगे॒मान्धिय॒मुद॑वा॒ दद॑न्नः ।
भग॒ प्प्र नो॑ जनय॒ गोभि॒रश्श्वै॒र्ब्भग॒ प्प्र नृभि॑र्न्नृ॒वन्त॑÷ स्याम ॥३६॥
उ॒तेदानी॒म्भग॑वन्तः स्यामो॒त प्प्र॑पि॒त्वऽउ॒त मद्ध्ये॒ऽअह्ना॑म् ।
उ॒तोदि॑ता मघव॒न्त्सूर्य्य॑स्य व॒यन्दे॒वाना॑ꣳ सु॒म॒तौ स्या॑म ॥३७॥
भग॑ऽए॒व भग॑वाँ२॥ऽअस्त्तु देवा॒स्तेन॑ व॒यम्भग॑वन्तः स्याम ।
तन्त्वा॑ भग॒ सर्व्व॒ऽइज्जो॑हवीति॒ स नो॑ भग पु॒रऽए॒ता भ॑वे॒ह ॥३८॥
सम॑द्ध्व॒राये॒षसो॑ नमन्त दधि॒क्क्रावे॑व॒ शुच॑ये प॒दाय॑ ।
अ॒र्व्वा॒ची॒नँव्व॑सु॒विद॒म्भग॑न्नो॒ रथ॑मि॒वाश्श्वा॑ वा॒जिन॒ऽआव॑हन्तु ॥३९॥
अश्श्वा॑वती॒र्ग्गोम॑तीर्न्न॒ऽउ॒षासो॑ वी॒रव॑तीः॒ सद॑मुच्छन्तु भ॒द्द्राः ।
घृ॒तन्दुहा॑ना वि॒श्श्वत॑ः॒ प्प्रपी॑ता यू॒यम्पा॑त स्व॒स्त्तिभि॑ः॒ सदा॑ नः ॥४०॥
॥५॥ पू॒षन्तव॑ व्व्र॒ते व॒यन्न रि॑ष्ष्येम॒ कदा॑च॒न । स्त्तो॒तार॑स्त्त॒ऽइ॒ह स्म॑सि ॥४१॥
प॒थस्प्प॑थ॒ः परि॑पतिँव्वच॒स्या कामे॑न कृ॒तोऽअ॒ब्भ्या॑नड॒र्क्कम् ।
स नो॑ रासच्छु॒रुध॑श्च॒न्द्राग्ग्रा॒ धिय॑न्धियꣳ सीषधाति॒ प्प्र पू॒षा ॥४२॥
८॥ त्री॒णि प॒दा वि च॑क्क्रमे॒ विष्ष्णु॑र्ग्गो॒पाऽअदा॑ब्भ्यः । अतो॒ धर्म्मा॑णि धा॒रय॑न् ॥४३॥
तद्विप्प्रा॑सो विप॒न्यवो॑ जागृ॒वाꣳस॑ः समि॑न्धते । विष्ष्णो॒र्य्यत्प॑र॒मम्प॒दम् ॥४४॥
घृ॒तव॑ती॒ भुव॑नानामभि॒श्श्रियो॒र्व्वी पृ॒थ्वी म॑धु॒दुघे॑ सु॒पेश॑सा ।
द्यावा॑पृथि॒वी वरु॑णस्य॒ धर्म्म॑णा॒ विष्क्क॑भिते॒ऽअ॒जरे॒ भूरि॑रेतसा ॥४५॥
ये नः॑÷ स॒पत्ना॒ऽअप॒ ते भ॑वन्त्विन्द्रा॒ग्निब्भ्या॒मव॑बाधामहे॒ तान् ।
वस॑वो रु॒द्द्राऽआ॑दि॒त्त्याऽउ॑परि॒स्पृश॒म्मो॒ग्ग्रञ्चे॒त्तार॑मधिरा॒जम॑क्क्रन् ॥४६॥
आ ना॑सत्त्या त्त्रि॒भिरे॑काद॒शैरि॒ह दे॒वेभि॑र्य्यातम्मधु॒पेय॑मश्श्विना ।
प्रायु॒स्त्तारि॑ष्टन्नी॒ रपा॑ꣳसि मृक्क्ष॒तꣳ सेध॑तन्द्वेषो॒ भव॑तꣳ सचा॒भुवा॑ ॥४७॥
ए॒ष व॒ स्त्तोमो॑ मरुतऽइ॒यङ्गीर्म्मा॑न्दा॒र्य्यस्य॑ मा॒न्यस्य॑ का॒रोः ।
३॥ एषा या॑सीष्ट त॒न्वे॑ व॒याँव्वि॒द्यामे॒षँव्वृ॒जन॑ञ्जी॒रदा॑नुम् ॥४८॥
स॒हस्त्तो॑माः स॒हच्छ॑न्दसऽआ॒वृत॑÷ स॒हप्प्र॑मा॒ऽऋष॑यः स॒प्त दैव्या॑÷ ।
पू॒र्व्वेषा॒म्पन्था॑मनु॒दृश्श्य॒ धीरा॒ऽअ॒न्वाले॑भिरे र॒थ्यो॒ न र॒श्म्मीन् ॥४९॥
आयु॒ष्यँव्व॑र्च्च॒स्यꣳ॒ रा॒यस्पोष॒मौद्भि॑दम् ।
इ॒दꣳ हिर॑ण्ण्यँव्वर्च्च॑स्व॒ज्जैत्त्रा॒याविशतादु॒ माम् ॥५०॥

॥६॥ न तद्रक्षाꣳसि न पिशाचास्तरन्ति देवानामोजः प्प्रथमजꣳ ह्येतत् ।
यो बिभर्त्ति दाक्षायणꣳ हिरण्ण्यꣳ स देवेषु कृणुते दीर्ग्घमायुः स मनुष्ष्येषु कृणुते
दीर्ग्घमायुः ॥५१॥
यदाबध्नन्दाक्षायणा हिरण्ण्यꣳ शतानीकाय सुमनस्यमानाः ।
तन्मऽआबध्नामि शतशारदायायुष्म्माञ्जरदष्ट्टिर्य्यथासम् ॥५२॥
उत नोहिर्बुध्न्यः शृणोत्वजऽएकपात्पृथिवी समुद्रः ।
विश्वे देवाऽऋतावृधो हुवाना स्तुता मन्त्राः कविशस्ताऽअवन्तु ॥५३॥
इमा गिरऽआदित्त्येब्भ्यो घृतस्नूः सनाद्राजब्भ्यो जुह्वा जुहोमि ।
शृणोतु मित्त्रोऽअर्य्यमा भगो नस्तुविजातो वरुणो दक्षोऽअꣳशः ॥५४॥
सप्तऽऋषयः प्प्रतिहिताः शरीरे सप्त रक्षन्ति सदमप्प्रमादम् ।
सप्तापः स्वपतो लोकमीयुस्तत्र जागृतोऽअस्वप्नजौ सत्रसदौ च देवौ ॥५५॥
उत्तिष्ठ ब्रह्मणस्प्पते देवयन्तस्त्वेमहे ।
उपप्प्रयन्तु मरुतः सुदानवऽइन्द्र प्प्राशूर्ब्भवा सचा ॥५६॥
प्र नूनम्ब्रह्मणस्प्पतिर्म्मन्त्रँ वदत्युक्थ्यम् ।
यस्मिन्निन्द्रो वरुणो मित्त्रोऽअर्य्यमा देवाऽओकाꣳसि चक्क्रिरे ॥५७॥
ब्रह्मणस्प्पते त्वमस्य यन्ता सूक्तस्य बोधि तनयञ्च जिन्व । विश्वन्तद्भद्रँय्यदव
न्ति देवा बृहद्वदेम विदथे सुवीराः । यऽइमा विश्वा विश्वकर्म्मा यो नः पिता
न्नपतेन्नस्य नो देहि ॥५८॥

गलितमन्त्राः —

यऽइमा विश्वा भुवनानि जुह्वदृषिर्होता न्यसीदत्पिता नः ।
सऽआशिषा द्रविणमिच्छमानः प्प्रथमच्छदवराँ२ऽआविवेश ॥
विश्वकर्म्मा विमनाऽआद्विहाया धाता विधाता परमोत सन्दृक् ।
तेषामिष्टानि समिषा मदन्ति यत्रा सप्तऽऋषीन्परऽएकमाहुः ॥
यो नः पिता जनिता यो विधाता धामानि वेद भुवनानि विश्वा ।
यो देवानान्नामधाऽएकऽएव तꣳ सम्प्रश्नम्भुवना यन्त्यन्या ॥
अन्नपतेन्नस्य नो देह्यनमीवस्य शुष्मिणः ।
प्रप्र दातारन्तारिषऽऊर्ज्जन्नो धेहि द्विपदे चतुष्प्पदे ॥

॥ इति चतुस्त्रिंशोऽध्यायः ॥

अथ पञ्चत्रिंशोऽध्यायः

षिः (१) 'अपेतो यन्तु' इत्यारभ्य (२२) 'अस्मात्त्वम्' इत्यन्तानां सामान्यत आदित्यो देवा वा ऋषयः । विशेषतश्च—
(४) 'अश्वत्थे वः' इत्यस्याथर्वणो भिषक्, (७) 'परम्मृत्यो' इत्यस्य सङ्कुसुकः, (१०) 'अश्मन्वती रीयते' इत्यस्य सुचीकः, (११) 'अपाघमप' इत्यस्य शुनःशेपः, (१२) 'सुमित्रिया नः' इत्यस्य प्रजापतिः, (१४) 'उद्वयन्तमसः' इत्यस्य प्रस्कण्वः, (१५) 'इमञ्जीवेभ्यः' इत्यस्य सङ्कुसुकः, (१६) 'अग्न आयूꣳषि' इत्यस्य वैखानसः प्रजापतिः, (१७) 'आयुष्मानग्ने' इत्यस्य वैखानसः, (१८) 'परीमे गाम्' इत्यस्य भारद्वाजः शिरिम्बिठः, (१९) 'क्रव्यादमग्निम्' इत्यस्य दमनः, (२१) 'स्योना पृथिवि' इत्यस्य मेधातिथिः ॥

वता (१) 'अपेतो यन्तु' (२) 'सविता ते' इत्यनयोः पितरः ।
(३) 'वायुः पुनाति' 'सविता पुनातु' 'अग्नेर्भ्राजसा' 'सूर्यस्य वर्चसा' इत्येषां लिङ्गोक्ता, 'विमुच्यन्तामुस्रियाः' इत्यस्यानड्वान् ।
(४) 'अश्वत्थे वः' इत्यस्यौषधिः ।
(५) 'सविता ते' इत्यस्य सविता ।
(६) 'प्रजापतौ त्वा' इत्यस्य प्रजापतिः ।
(७) 'परम्मृत्यो' इत्यस्य मृत्युः ।
(८) 'शं वातः' (९) 'कल्पन्तान्ते' (१०) 'अश्मन्वती रीयते' इत्येषां विश्वे देवाः ।
(११) 'अपाघमप' इत्यस्य लिङ्गोक्ता ।
(१२) 'सुमित्रिया नः' इत्यस्यापः ।
(१३) 'अनड्वाहमन्वारभामहे' इत्यस्यानड्वान ।
(१४) 'उद्वयन्तमसः' इत्यस्य सूर्यः ।
(१५) 'इमञ्जीवेभ्यः' इत्यस्य मृत्युः ।
(१६) 'अग्न आयूꣳषि' (१७) 'आयुष्मानग्ने' इत्यनयोरग्निः ।
(१८) 'परीमे गाम्' इत्यस्येन्द्रः ।
(१९) 'क्रव्यादमग्निम्' इत्यस्याग्निः ।
(२०) 'वह वपाम्' इत्यस्य जातवेदाः ।
(२१) 'स्योना पृथिवि' इत्यस्य पृथिवी ।
(२२) 'अस्मात्त्वम्' इत्यस्याग्निः ॥

छन्दः (१) 'अपेतो यन्तु' (२) 'सविता ते' इत्यनयोर्गायत्री, आद्ये 'द्युभिरहोभिः' इति यजुः, (४) 'अश्वत्थे वः' इत्यस्यानुष्टुप्, (५) 'सविता ते' इत्यस्य गायत्री, (६) 'प्रजापतौ त्वा' इत्यस्योष्णिक्, (७) 'परम्मृत्यो' इत्यस्य त्रिष्टुप्, (८) 'शं वातः' इत्यस्यानुष्टुप्, (९) 'कल्पन्तान्ते' इत्यस्य बृहती, (१०) 'अश्मन्वती रीयते' इत्यस्य त्रिष्टुप्, (११) 'अपाघमप' (१३) 'अनड्वाहमन्वारभामहे' (१४) 'उद्वयन्तमसः' इत्येषामनुष्टुप्, (१५) 'इमञ्जीवेभ्यः' इत्यस्य त्रिष्टुप्, (१६) 'अग्न आयूꣳषि' इत्यस्य गायत्री, (१७) 'आयुष्मानग्ने' इत्यस्य त्रिष्टुप्, (१८) 'परीमे गाम्' इत्यस्यानुष्टुप्, (१९) 'क्रव्यादमग्निम्' (२०) 'वह वपाम्' इत्यनयोस्त्रिष्टुप्, (२१) 'स्योना पृथिवि' (२२) 'अस्मात्त्वम्' इत्यनयोर्गायत्री, आद्ये 'अप नः' इति यजुः ॥

॥ ह॒रिः॒ओ३म् ॥

॥१॥ अपे॒तो य॑न्तु प॒णयो॒ऽसु॑म्ना देवपी॒यव॑ः । अ॒स्य लो॒कः सु॒ताव॑तः ।
द्युभि॒रहो॑भिर॒क्तुभि॒र्व्य॑क्तँ य॒मो द॑दात्वव॒सान॑मस्मै ॥१॥

स॒वि॒ता ते॒ शरी॑रेभ्यः पृथि॒व्याँल्लो॒कमि॑च्छतु । तस्मै॑ युज्यन्तामु॒स्रिया॑ः ॥२॥
वा॒युः पु॑नातु सवि॒ता पु॑नात्व॒ग्नेर्भ्राज॑सा॒ सूर्य्य॑स्य॒ वर्च्च॑सा ।
वि मु॑च्यन्तामु॒स्रिया॑ः ॥३॥
अ॒श्श्व॒त्थे वो॑ नि॒षद॑नम्प॒र्ण्णे वो॑ व॒स॒तिष्कृ॒ता ।
गो॒भाज॒ऽइत्किला॑सथ॒ यत्स॒नव॑थ॒ पूरु॑षम् ॥४॥
स॒वि॒ता ते॒ शरी॑राणि मा॒तुरु॒पस्थ॒ऽआव॑पतु । तस्मै॑ पृथिवि॒ शम्भ॑व ॥५॥
प्र॒जाप॑तौ त्वा दे॒वता॑यामु॒पोद॑के लो॒के नि द॑धाम्य॒सौ । अप॑ नः॒ शोशु॑चद॒घम् ॥६॥
पर॑म्मृत्यो॒ऽअनु॒ परे॑हि॒ पन्था॒ँस्यस्ते॒ऽअ॒न्यऽइत॑रो दे॒व॒याना॑त् ।
चक्षु॑ष्मते शृण्व॒ते ते॑ ब्रवीमि॒ मा नः॑ प्र॒जाꣳ री॑रिषो॒ मोत वी॒रान् ॥७॥
शँवा॒तः शꣳ हि ते॒ घृ॒णिः शन्ते॑ भव॒न्त्विष्ट॑काः ।
शन्ते॑ भवन्त्व॒ग्नयः॒ पार्थि॑वासो॒ मा त्वा॒भिशू॑शुचन् ॥८॥
कल्प॑न्तान्ते॒ दिश॒स्तुभ्य॒माप॑ः शि॒वत॑मा॒स्तुभ्य॑म्भवन्तु॒ सिन्ध॑वः ।
अ॒न्तरि॑क्षꣳ शि॒वन्तुभ्य॒ङ्कल्प॑न्तान्ते॒ दिशः॒ सर्व्वा॑ः ॥९॥
अश्म॑न्वती रीयते॒ सꣳर॑भध्व॒मुत्ति॑ष्ठत॒ प्रत॑रता सखायः ।
अत्रा॑ जही॒मोशि॑वा॒ येऽअस॑ञ्छि॒वान्व॒यमुत्त॑रेमा॒भि वाजा॑न् ॥१०॥

॥२॥ अपा॒घमप॒ किल्ब्बि॑ष॒मप॒ कृत्या॒मपो॒ रप॑ः ।
अपा॑मार्ग्ग॒ त्वम॒स्मदप॑ दुः॒ष्वप्न्य॑ꣳ सुव ॥११॥
◦ सु॒मि॒त्रि॒या न॒ऽआप॒ऽओष॑धयः सन्तु दु॒र्म्मि॒त्रि॒यास्तस्मै॑ सन्तु॒ यो॒स्मान्द्वेष्टि॒ यञ्च॑ व॒यन्द्वि॒ष्मः ॥१२॥
अ॒न॒ड्ड्वाह॑म॒न्वार॑भामहे॒ सौर॑भेयꣳ स्व॒स्तये॑ ।
स न॒ऽइन्द्र॑ऽइव दे॒वेभ्यो॒ वह्नि॑ः स॒न्तार॑णो भव ॥१३॥
उ॒द्व॒यन्तम॑स॒स्परि॒ स्वः॑ पश्य॑न्त॒ऽउत्त॑रम् ।
दे॒वन्दे॑व॒त्रा सूर्य्य॒मग॑न्म॒ ज्योति॑रुत्त॒मम् ॥१४॥
इ॒मञ्जी॒वेभ्य॑ः परि॒धिन्द॑धामि॒ मैषा॒न्नु गा॒दप॑रो॒ऽअर्त्थ॑मे॒तम् ।
श॒तञ्जीव॑न्तु श॒रद॑ः पुरू॒चीर॒न्तर्म्मृ॒त्युन्द॑धता॒म्पर्व्व॑तेन ॥१५॥
अग्न॒ऽआयू॑ꣳषि पवस॒ऽआ सु॒वोर्ज्ज॒मिष॑ञ्च नः । आ॒रे बा॑धस्व दु॒च्छुना॑म् ॥१६॥
आयु॑ष्मानग्ने ह॒विषा॑ वृधा॒नो घृ॒तप्र॑तीको घृ॒तयो॑निरेधि ।
घृ॒तम्पी॒त्वा मधु॒ चारु॒ गव्य॑म्पि॒तेव॑ पु॒त्रम॒भिर॑क्षतादि॒मान्त्स्वाहा॑ ॥१७॥

परी॒मे गाम॑नेषत॒ पर्य्य॒ग्निम॑हृषत ।
दे॒वेष्व॑क्रत॒ श्श्रव॒ः कऽइ॒मा२ँ॥ऽआद॑धर्षति ॥१८॥
क्र॒व्याद॑म॒ग्निम्प्रहि॑णोमि दू॒रँय्य॒मरा॑ज्ज्यङ्गच्छतु रिप्प्रवा॒हः ।
इ॒हैवाय॒मित॑रो जा॒तवे॑दा दे॒वेभ्यो॑ ह॒व्यँव्व॑हतु प्प्रजा॒नन् ॥१९॥
वह॑ व॒पाञ्जा॑तवेदः पि॒तृभ्यो॒ यत्रै॑ना॒न्वेत्थ॒ निहि॑तान्परा॒के ।
मेद॑सः कु॒ल्ल्याऽउप॒ तान्त्स्र॑वन्तु स॒त्याऽए॑षामा॒शिष॒ः सन्न॑मन्ता॒ꣳ स्वाहा॑ ॥२०॥
स्यो॒ना पृ॑थिवि नो भवानृक्ष॒रा नि॒वेश॑नी । यच्छा॑ नः॒ शर्म्म॑ स॒प्प्रथाः॑ ।
अप॑ नः॒ शोशु॑चद॒घम् ॥२१॥
अ॒स्मात्त्वमधि॑जा॒तो॑सि त्वद॒यञ्जा॑यता॒म्पुन॑ः । अ॒सौ स्व॒र्ग्गाय॑ लो॒काय॒ स्वाहा॑ ॥२२॥

॥ इति पञ्चत्रिंशोऽध्यायः ॥

अथ षट्त्रिंशोऽध्यायः

ऋषिः (१) 'ऋचं वाचम्' इत्यारभ्य (२४) 'तच्चक्षुः' इत्यन्तानां सामान्यत आथर्वणो दध्यङ्ङृषिः । विशेषतश्च—
(३) 'तत्सवितुः' इत्यस्य विश्वामित्रः, (४) 'कया नश्चित्रः' (५) 'कस्त्वा सत्यः' (६) 'अभी षु णः' इत्येषां वामदेवः, (१३) 'स्योना पृथिवि' इत्यस्य मेधातिथिः, (१४) 'आपो हि ष्ठा' (१५) 'यो वः' (१६) 'तस्मा अरम्' इत्येषां सिन्धुद्वीपः, (२०) 'नमस्ते हरसे' इत्यस्य ऋषिसुता लोपामुद्रा ॥

देवता (१) 'ऋचं वाचम्' 'मनो यजुः' 'साम प्राणम्' 'चक्षुः श्रोत्रम्' 'वागोजः' इत्येषां लिङ्गोक्ता ।
(२) 'यन्मे छिद्रम्' इत्यस्य बृहस्पतिः ।
(३) 'भूः' 'भुवः' 'स्वः' इत्येषां क्रमेणाग्निवायुसूर्याः, 'तत्सवितुः' इत्यस्य सविता ।
(४) 'कया नश्चित्रः' (५) 'कस्त्वा' (६) 'अभी षु णः' (७) 'कया त्वम्' (८) 'इन्द्रो विश्वस्य' इत्येषामिन्द्रः ।
(९) 'शन्नो मित्रः' (१०) 'शन्नो वातः' इत्यनयोर्लिङ्गोक्ता ।
(११) 'अहानि शम्' इत्यस्याहानि रात्र्यश्च, 'शन्न इन्द्राग्नी' इत्यस्येन्द्राग्नी इन्द्रावरुणौ इन्द्रापूषणौ इन्द्रासोमौ च ।
(१२) 'शन्नो देवीः' इत्यस्यापः ।
(१३) 'स्योना पृथिवि' इत्यस्य पृथिवी ।
(१४) 'आपो हि ष्ठा' (१५) 'यो वः' (१६) 'तस्मा अरम्' इत्येषामापः ।
(१७) 'द्यौः शान्तिः' (१८) 'दृते दृꣳह मा मित्रस्य' (१९) 'दृते दृꣳह मा । ज्योक्ते' इत्येषां लिङ्गोक्ता ।
(२०) 'नमस्ते हरसे' इत्यस्याग्निः ।
(२१) 'नमस्ते अस्तु' (२२) 'यतो यतः' इत्यनयोर्विद्युत्स्तनयित्नुरूपो भगवान् ।
(२३) 'सुमित्रिया नः' इत्यस्यापः ।
(२४) 'तच्चक्षुः' इत्यस्य सूर्यः ॥

छन्दः (२) 'यन्मे छिद्रम्' इत्यस्य पङ्क्तिः, (३) 'तत्सवितुः' इत्यारभ्य (५) 'कस्त्वा सत्यः' इत्यन्तानां गायत्री, (६) 'अभी षु णः' इत्यस्य पादनिचृद्गायत्री, (७) 'कया त्वम्' इत्यस्य गायत्री, (८) 'इन्द्रो विश्वस्य' इत्यस्य द्विपदा

विराट्, (९) 'शन्नो मित्रः' (१०) 'शन्नो वातः' इत्यनयोरनुष्टुप्, (११) 'अहानि शम्' इत्यस्य द्विपदा गायत्री, 'शन्न इन्द्राग्नी' इत्यस्य त्रिष्टुप्, (१२) 'शन्नो देवीः' इत्यारभ्य (१६) 'तस्मा अरम्' इत्यन्तानां गायत्री, (२०) 'नमस्ते हरसे' इत्यस्य बृहती, (२१) 'नमस्ते अस्तु' (२२) 'यतो यतः' इत्यनयोरनुष्टुप्, (२४) 'तच्चक्षुः' इत्यस्य त्रिष्टुप् ॥

॥ हरिःॐ ॥

॥१॥ ऋचँ॑ व्वाच॒म्प्रप॑द्ये म॒नो यजुः॒ प्प्रप॑द्ये॒ साम॑ प्प्रा॒णम्प्रप॑द्ये॒ चक्षुः॒ श्श्रोत्र॒म्प्रप॑द्ये ।
व्वागोज॑÷ स॒हौजो॒ मयि॑ प्प्राणापा॒नौ ॥१॥
यन्मे॑ च्छि॒द्रञ्चक्षु॑षो॒ हृद॑यस्य॒ मन॑सो॒ वाति॑तृण्ण॒म्बृह॒स्प्पति॑र्म्मे॒ तद्द॑धातु ।
शन्नो॑ भवतु॒ भुव॑नस्य॒ यस्प्पति॑÷ ॥२॥
भूर्भुवः॒ स्व॒÷ । तत्स॑वि॒तुर्व्वरे॑ण्ण्य॒म्भर्ग्गो॑ दे॒वस्य॑ धीमहि । धियो॒ यो न॑÷ प्प्रचो॒दया॑त् ॥३
कया॑ नश्चि॒त्रऽआभु॑वदू॒ती स॒दावृ॑धः॒ सखा॑ । कया॒ शचि॑ष्ठया वृ॒ता ॥४॥
कस्त्वा॑ स॒त्यो मदा॑नाम्मꣳहि॑ष्ठो मत्स॒दन्ध॑सः । दृ॒ढा चि॑दा॒रुजे॒ व्वसु॑ ॥५॥
अ॒भी षु णः॒ सखी॑नामवि॒ता ज॑रितॄ॒णाम् । श॒तम्भ॑वास्यू॒तिभि॑÷ ॥६॥
कया॒ त्वन्न॑ऽऊ॒त्याभि प्प्रम॑न्दसे वृषन् । कया॑ स्तो॒तृभ्य॒ऽआभ॑र ॥७॥
इन्द्रो॒ व्विश्श्व॑स्य राजति । शन्नो॑ऽअस्तु द्वि॒पदे॒ शञ्चतु॑ष्प्पदे ॥८॥
शन्नो॑ मि॒त्रः शँव्वरु॑णः॒ शन्नो॑ भवत्त्वर्य्य॒मा ।
शन्न॒ऽइन्द्रो॒ बृह॒स्प्पतिः॒ शन्नो॒ व्विष्ण्णु॑रुरुक्र॒मः ॥९॥
शन्नो॒ व्वात॑÷ पवता॒ꣳ शन्न॑स्तपतु॒ सूर्य्य॑÷ ।
शन्नः॒ कनि॑क्रदद्दे॒वः प॒र्ज्जन्न्यो॑ऽअ॒भिव॑र्षतु ॥१०॥
अहा॑नि॒ शम्भ॑वन्तु नः॒ शꣳ रात्रीः॒ प्प्रति॑धीयताम् । शन्न॑ऽइन्द्रा॒ग्नी भ॑वता॒मवो॑भिः॒
शन्न॒ऽइन्द्रा॒वरु॑णा रा॒तह॑व्या । शन्न॑ऽइन्द्रापू॒षणा॒ व्वाज॑सातौ॒ शमिन्द्रा॒सोमा॑ सुवि॒ताय॒
शँय्योः ॥११॥
शन्नो॑ दे॒वीर॒भिष्ट॑य॒ऽआपो॑ भवन्तु पी॒तये॑ । शँय्योर॒भिस्र॑वन्तु नः ॥१२॥
स्यो॒ना पृ॑थिवि नो भवानृक्ष॒रा नि॒वेश॑नी । यच्छा॑ नः॒ शर्म्म॑ स॒प्प्रथाः॑ ॥१३॥
आपो॒ हि ष्ठा म॑यो॒भुव॒स्ता न॑ऽऊ॒र्ज्जे द॑धातन । म॒हे रणा॑य॒ चक्ष॑से ॥१४॥
यो व॑÷ शि॒वत॑मो॒ रस॒स्तस्य॑ भाजयते॒ह न॑÷ । उ॒श॒तीरि॑व मा॒तर॑÷ ॥१५॥
तस्म्मा॒ऽअर॑ङ्गमाम वो॒ यस्य॒ क्षया॑य॒ जिन्न्व॑थ । आपो॑ ज॒नय॑था च नः ॥१६॥
॥२॥ द्यौः शान्ति॑र॒न्तरि॑क्ष॒ꣳ शान्ति॑÷ पृथि॒वी शान्ति॒रापः॒ शान्ति॒रोष॑धयः॒ शान्ति॑÷ ।
व्वन॒स्प्पत॑यः॒ शान्ति॒र्व्विश्श्वे॑ दे॒वाः शान्ति॒र्ब्ब्रह्म॒ शान्तिः॒ सर्व्व॒ꣳ शान्तिः॒ शान्ति॑रे॒व
शान्तिः॒ सा मा॒ शान्ति॑रेधि ॥१७॥

दृते दृꣳह मा मित्रस्य मा चक्क्षुषा सर्व्वाणि भूतानि समीक्क्षन्ताम् । मित्रस्याहञ्चक्क्षुषा सर्व्वाणि भूतानि समीक्क्षे । मित्रस्य चक्क्षुषा समीक्क्षामहे ॥१८॥

दृते दृꣳह मा । ज्योक्क्ते सन्दृशि जीव्यासञ्ज्योक्क्ते सन्दृशि जीव्यासम् ॥१९॥

नमस्त्ते हरसे शोचिषे नमस्त्तेऽअस्त्वर्च्चिषे ।

अन्न्याँस्त्तेऽअस्म्मत्त्तपन्तु हेतय÷ पावकोऽअस्म्मब्भ्यꣳ शिवो भव ॥२०॥

नमस्त्तेऽअस्तु विद्युते नमस्त्ते स्त्तनयित्नवे ।

नमस्त्ते भगवन्नस्तु यतः स्व÷ समीहसे ॥२१॥

यतोयतः समीहसे ततो नोऽअभयङ्कुरु ।

शन्न÷ कुरु प्प्रजाब्भ्योभयन्नः पशुब्भ्य÷ ॥२२॥

सुमित्त्रिया नऽआपऽओषधयः सन्तु दुर्म्मित्त्रियास्तस्म्मै सन्तु योऽस्म्मान्द्वेष्टि यञ्च वयन्द्विष्म्मः ॥२३॥

तच्चक्क्षुर्द्देवहितम्पुरस्त्ताच्छुक्क्रमुच्चरत् ।

पश्श्येम शरद÷ शतञ्जीवेम शरद÷ शतꣳ शृणुयाम शरद÷ शतम्प्रब्ब्रवाम शरद÷ शतमदीनाः स्याम शरद÷ शतम्भूयश्च शरद÷ शतात् ॥२४॥

॥ इति षट्त्रिंशोऽध्यायः ॥

अथ सप्तत्रिंशोऽध्यायः

ऋषिः (१) 'देवस्य त्वा' इत्यारभ्य (२१) 'अहः केतुना' इत्यन्तानां सामान्यत आथर्वणो दध्यङ्ङृषिः । विशेषतस्तु—
(२) 'युञ्जते मनः' इत्यस्य श्यावाश्वः, 'प्रैतु ब्रह्मणस्पतिः' इत्यस्य कण्वः, (१७) 'अपश्यङ्गोपाम्' इत्यस्य दीर्घतमाः ॥

देवता (१) 'देवस्य त्वा' इत्यस्य सविता, 'आददे नारिरसि' इत्यस्याभ्रिः ।
(२) 'युञ्जते मनः' इत्यस्य सविता ।
(३) 'देवी द्यावापृथिवी' इत्यस्य द्यावापृथिव्यौ ।
(४) 'देव्यो वम्र्यः' इत्यस्य वल्मीकवपा ।
(५) 'इयत्यग्रे' इत्यस्य वराहविहतमृत् ।
(६) 'इन्द्रस्यौजः' 'मखाय त्वा' इत्यनयोरादाराः, द्वितीयस्य 'मखाय त्वा' इत्यस्य पयः, तृतीयस्य 'मखाय त्वा' इत्यस्य सम्भाराः ।
(७) 'प्रैतु ब्रह्मणस्पतिः' इत्यस्य घर्मो विश्वे देवा वा, 'मखाय त्वा' इत्यादिद्वयोः सम्भाराः, तृतीयस्य 'मखाय त्वा' इत्यस्य, (८) 'मखस्य शिरः' इत्यादित्रयाणाम्, 'मखाय त्वा' इत्यादित्रयाणाम्, (९) 'अश्वस्य त्वा' इत्यादित्रयाणाम्, 'मखाय त्वा' इत्यादित्रयाणाम्, (१०) 'ऋजवे त्वा' 'साधवे त्वा' 'सुक्षित्यै त्वा' इत्येषाम्, 'मखाय त्वा' इत्यादित्रयाणाम्, (११) 'यमाय त्वा' 'मखाय त्वा' 'सूर्यस्य त्वा' 'देवस्त्वा' इत्येषाञ्च घर्मः, 'पृथिव्याः सꣳस्पृशः' इत्यस्य घर्मो रजतश्च, 'अर्चिरसि' इत्यस्य घर्मः ।
(१२) 'अनाधृष्टा पुरस्तात्' 'पुत्रवती दक्षिणतः' 'सुषदा पश्चात्' 'आश्रुतिरुत्तरतः' 'विधृतिरुपरिष्टात्' 'विश्वाभ्यो मा' 'मनोरश्वासि' इत्येषां पृथिवी ।

(१३) 'स्वाहा मरुद्भिः' इत्यस्य घर्मः, 'दिवः सꣳस्पृशः' इत्यस्य सुवर्णम्, 'मधु' 'मधु' 'मधु' इत्येषां प्राणः ।
(१४) 'गर्भो देवानाम्' (१५) 'समग्निरग्निना' (१६) 'धर्ता दिवः' (१७) 'अपश्यङ्गोपाम्' (१८) 'विश्वासाम्भुवाम्'
(१९) 'हृदे त्वा' (२०) 'पिता नः' 'त्वष्टृमन्तस्त्वा' (२१) 'अहः केतुना' 'रात्रिः केतुना' इत्येषां घर्मः ॥

छन्दः (२) 'युञ्जते मनः' इत्यस्य जगती, (७) 'प्रैतु ब्रह्मणस्पतिः' इत्यस्य बृहती, (१६) 'धर्ता दिवः' इत्यस्योर्ध्वबृहती,
(१७) 'अपश्यङ्गोपाम्' इत्यस्य त्रिष्टुप्, (१९) 'हृदे त्वा' इत्यस्य परोष्णिक् ॥

॥ हरिः ॐ ॥

॥१॥ दे॒वस्य॑ त्वा सवि॒तुः प्प्र॑स॒वे᳕श्विनो॑र्ब्बा॒हुब्भ्यां॑म्पू॒ष्ण्णो हस्त्ता॑ब्भ्याम् ।
आद॑दे॒ नारि॑रसि ॥१॥
यु॒ञ्ज॒ते॒ मन॑ऽउ॒त यु॑ञ्जते॒ धियो॒ विप्प्रा॒ विप्प्र॑स्य बृह॒तो वि॑प॒श्चित॑÷ ।
वि होत्रा॑ दधे वयुना॒विदेक॒ऽइन्म॒ही दे॒वस्य॑ सवि॒तुः परि॑ष्टुतिः ॥२॥
दे॑वी॑ द्यावापृथिवी म॒खस्य॑ वाम॒द्य शिरो॑ राद्ध्यासन्दे॒व॒यज॑ने पृथि॒व्याः ।
म॒खाय॑ त्वा म॒खस्य॑ त्वा शी॒र्ष्ण्णे ॥३॥
दे॒व्व्यो॑ वम्म्र्यो भूतस्य॑ प्प्रथम॒जा म॒खस्य॑ वो॒द्य शिरो॑ राद्ध्यासन्दे॒व॒यज॑ने पृथि॒व्याः ।
म॒खाय॑ त्वा म॒खस्य॑ त्वा शी॒र्ष्ण्णे ॥४॥
इ॒यत्त्य॒ग्ग्र॑ऽआसीन्म॒खस्य॑ ते॒द्य शिरो॑ राद्ध्यासन्दे॒व॒यज॑ने पृथि॒व्याः ।
म॒खाय॑ त्वा म॒खस्य॑ त्वा शी॒र्ष्ण्णे ॥५॥
इन्द्र॒स्यौज॑ स्त्थ म॒खस्य॑ वो॒द्य शिरो॑ राद्ध्यासन्दे॒व॒यज॑ने पृथि॒व्याः ।
म॒खाय॑ त्वा म॒खस्य॑ त्वा शी॒र्ष्ण्णे । म॒खाय॑ त्वा म॒खस्य॑ त्वा शी॒र्ष्ण्णे । म॒खाय॑ त्वा
म॒खस्य॑ त्वा शी॒र्ष्ण्णे ॥६॥
प्रैतु॒ ब्रह्म॑ण॒स्प्पति॒ः प्प्र दे॒व्व्येतु सू॒नृता॑ । अच्छा॑ वी॒रन्नर्य॑म्प॒ङ्क्तिरा॑धसन्दे॒वा य॒ज्ञन्न॑यन्तु नः । म॒खाय॑ त्वा म॒खस्य॑ त्वा शी॒र्ष्ण्णे । म॒खाय॑ त्वा म॒खस्य॑ त्वा शी॒र्ष्ण्णे ।
म॒खाय॑ त्वा म॒खस्य॑ त्वा शी॒र्ष्ण्णे ॥७॥
म॒खस्य॒ शिरो॑सि । म॒खाय॑ त्वा म॒खस्य॑ त्वा शी॒र्ष्ण्णे । म॒खस्य॒ शिरो॑सि । म॒खाय॑ त्वा
म॒खस्य॑ त्वा शी॒र्ष्ण्णे । म॒खस्य॒ शिरो॑सि । म॒खाय॑ त्वा म॒खस्य॑ त्वा शी॒र्ष्ण्णे । म॒खाय॑
त्वा म॒खस्य॑ त्वा शी॒र्ष्ण्णे । म॒खाय॑ त्वा म॒खस्य॑ त्वा शी॒र्ष्ण्णे । म॒खाय॑ त्वा म॒खस्य॑
त्वा शी॒र्ष्ण्णे ॥८॥
अश्श्व॑स्य त्वा॒ वृष्ण्ण॑÷ श॒क्ना धू॑पयामि देव॒यज॑ने पृथि॒व्याः । म॒खाय॑ त्वा म॒खस्य॑
त्वा शी॒र्ष्ण्णे । अश्श्व॑स्य त्वा॒ वृष्ण्ण॑÷ श॒क्ना धू॑पयामि देव॒यज॑ने पृथि॒व्याः । म॒खाय॑
त्वा म॒खस्य॑ त्वा शी॒र्ष्ण्णे । अश्श्व॑स्य त्वा॒ वृष्ण्ण॑÷ श॒क्ना धू॑पयामि देव॒यज॑ने पृथि॒व्याः ।

मुखाय त्वा मुखस्य त्वा शीर्ष्णे । मुखाय त्वा मुखस्य त्वा शीर्ष्णे । मुखाय त्वा
मुखस्य त्वा शीर्ष्णे । मुखाय त्वा मुखस्य त्वा शीर्ष्णे ॥९॥
ऋजवे त्वा साधवे त्वा सुक्षित्यै त्वा । मुखाय त्वा मुखस्य त्वा शीर्ष्णे । मुखाय
त्वा मुखस्य त्वा शीर्ष्णे । मुखाय त्वा मुखस्य त्वा शीर्ष्णे ॥१०॥
॥२॥ यमाय त्वा मुखाय त्वा सूर्य्यस्य त्वा तपसे । देवस्त्वा सविता मद्ध्वानक्तु पृथिव्याः
सꣳस्पृशस्पाहि । अर्च्चिरसि शोचिरसि तपोसि ॥११॥
अनाधृष्टा पुरस्तादग्नेराधिपत्यऽआयुर्म्मे दाः पुत्रवती दक्षिणतऽइन्द्रस्याधिपत्ये
प्रजाम्मे दाः । सुषदा पश्चाद्देवस्य सवितुराधिपत्ये चक्षुर्म्मे दाऽआश्रुतिरुत्तरतो
धातुराधिपत्ये रायस्पोषम्मे दाः । विधृतिरुपरिष्टाद्बृहस्पतेराधिपत्यऽओजो मे दा
विश्वाभ्यो मा नाष्ट्राभ्यस्पाहि मनोरश्वासि ॥१२॥
स्वाहा मरुद्भिः परिश्रीयस्व दिवः सꣳस्पृशस्पाहि । मधु मधु मधु ॥१३॥
गर्भो देवानाम्पिता मतीनाम्पतिः प्रजानाम् ।
सन्देवो देवेन सवित्रा गत सꣳ सूर्य्येण रोचते ॥१४॥
समग्निरग्निना गत सन्दैवेन सवित्रा सꣳ सूर्य्येणारोचिष्ट ।
स्वाहा समग्निस्तपसा गत सन्दैव्येन सवित्रा सꣳ सूर्य्येणारूरुचत ॥१५॥
धर्त्ता दिवो विभाति तपसस्पृथिव्यान्धर्त्ता देवो देवानाममर्त्त्यस्तपोजाः ।
वाचमस्म्मे नियच्छ देवायुवम् ॥१६॥
अपश्यङ्गोपामनिपद्यमानमा च परा च पथिभिश्चरन्तम् ।
स सद्ध्रीचीः स विषूचीर्वसानऽआवरीवर्त्ति भुवनेष्वन्तः ॥१७॥
विश्वासाम्भुवाम्पते विश्वस्य मनसस्पते विश्वस्य वचसस्पते सर्वस्य वचसस्पते ।
देवश्रुत्त्वन्देव घर्म्म देवो देवान्पाह्यत्र प्रावीरनु वान्देववीतये । मधु माद्ध्वीभ्याम्मधु माधूचीभ्याम् ॥१८॥
हृदे त्वा मनसे त्वा दिवे त्वा सूर्य्याय त्वा । ऊर्द्ध्वोऽअद्ध्वरन्दिवि देवेषु धेहि ॥१९॥
पिता नोसि पिता नो बोधि नमस्तेऽअस्तु मा मा हिꣳसीः । त्वष्टृमन्तस्त्वा
सपेम पुत्रान्पशून्मयि धेहि प्रजामस्म्मासु धेह्यरिष्टाहꣳ सह पत्त्या भूयासम् ॥२०॥
अहः केतुना जुषताꣳ सुज्ज्योतिर्ज्ज्योतिषा स्वाहा ।
रात्रिः केतुना जुषताꣳ सुज्ज्योतिर्ज्ज्योतिषा स्वाहा ॥२१॥

॥ इति सप्तत्रिंशोऽध्यायः ॥

अथाष्टात्रिंशोऽध्यायः

ऋषिः (१) 'देवस्य त्वा' इत्यारभ्य (२८) 'त्विषः संवृक्' इत्यन्तानां सामान्यत आथर्वणो दध्यङृषिः । विशेषतश्च—
(५) 'यस्ते स्तनः' इत्यस्य दीर्घतमाः, (२४) 'उद्वयन्तमसः' इत्यस्य प्रस्कण्वः ॥

देवता (१) 'देवस्य त्वा' इत्यस्य सविता, 'आददेदित्यै' इत्यस्य रज्जुः ।
(२) 'इड एहि' 'अदित एहि' 'सरस्वत्येहि' 'असावेहि' इत्येषां गौः ।
(३) 'अदित्यै रास्नासि' इत्यस्य रज्जुः, 'पूषासि' 'घर्माय दीष्व' इत्यनयोर्वत्सः ।
(४) 'अश्विभ्याम्पिन्वस्व' 'सरस्वत्यै पिन्वस्व' 'इन्द्राय पिन्वस्व' इत्येषां लिङ्गोक्ता, 'स्वाहेन्द्रवत' इत्यस्य विप्रुषः ।
(५) 'यस्ते स्तनः' इत्यस्य वाक्, 'उर्वन्तरिक्षम्' इत्यस्यान्तरिक्षम् ।
(६) 'गायत्रञ्छन्दः' 'त्रैष्टुभञ्छन्दः' इत्यनयोः परीशासौ, 'द्यावापृथिवीभ्यान्त्वा' 'अन्तरिक्षेणोपयच्छामि' इत्यनयोर्घर्मः,
'इन्द्राश्विना' इत्यस्य विश्वे देवाः ।
(७) 'समुद्राय त्वा' 'सरिराय त्वा' 'अनाधृष्याय त्वा' 'अप्रतिधृष्याय त्वा' 'अवस्यवे त्वा' 'अशिमिदाय त्वा'
(८) 'इन्द्राय त्वा वसुमते' 'इन्द्राय त्वादित्यवते' 'इन्द्राय त्वाभिमातिघ्ने' 'सवित्रे त्वा' 'बृहस्पतये त्वा'
(९) 'यमाय त्वा' इत्येषां वातनामानि, 'स्वाहा घर्माय' 'स्वाहा घर्मः' इत्यनयोर्घर्मः ।
(१०) 'विश्वा आशाः' इत्यस्याश्विनौ ।
(११) 'दिवि धाः' 'स्वाहाग्नये' इत्यनयोर्घर्मः ।
(१२) 'अश्विना घर्मम्' इत्यस्याश्विनावादित्यो द्यावापृथिव्यौ च ।
(१३) 'अपातामश्विना' इत्यस्याश्विनौ घर्मो वा ।
(१४) 'इषे पिन्वस्व' 'धर्मासि सुधर्म' इत्यनयोर्घर्मः, 'अमेन्यस्मे' इत्यस्य खरो घर्मो वा ।
(१५) 'स्वाहा पूष्णे' 'स्वाहा ग्रावभ्यः' 'स्वाहा प्रतिरवेभ्यः' 'स्वाहा पितृभ्यः' 'स्वाहा द्यावापृथिवीभ्याम्' 'स्वाहा
विश्वेभ्यः' (१६) 'स्वाहा रुद्राय' इत्येषां लिङ्गोक्ता, 'स्वाहा सञ्ज्योतिषा' इत्यस्य पयः, 'अहः केतुना'
'रात्रिः केतुना' 'मधु हुतम्' इत्येषां घर्मः ।
(१७) 'अभीमम्महिमा' इत्यस्याग्निः ।
(१८) 'या ते घर्म दिव्या' 'या ते घर्मान्तरिक्षे' 'या ते घर्म पृथिव्याम्' (१९) 'क्षत्रस्य त्वा' (२०) 'चतुःस्रक्तिर्नाभिः'
(२१) 'घर्मैतत्ते' (२२) 'अचिक्रदद्वृषा' इत्येषां घर्मः ।
(२३) 'सुमित्रिया नः' इत्यस्यापः ।
(२४) 'उद्वयन्तमसः' इत्यस्य सूर्यः ।
(२५) 'एधोसि' 'समिदसि' इत्यनयोः समित् ।
(२६) 'यावती द्यावापृथिवी' इत्यस्य दधिघर्म इन्द्रश्च ।
(२७) 'मयि त्यत्' (२८) 'पयसो रेतः' 'त्विषः संवृक्' इत्येषां दधिघर्मः ।

छन्दः (५) 'यस्ते स्तनः' इत्यस्य त्रिष्टुप्, 'उर्वन्तरिक्षम्' इति यजुः, (१०) 'विश्वा आशाः' इत्यस्यानुष्टुप्, (१२) 'अश्विना घर्मम्' इत्यस्योष्णिक्, (१३) 'अपातामश्विना' इत्यस्य ककुबुष्णिक्, (१७) 'अभीमम्महिमा' इत्यस्यातिशक्वरी, (१९) 'क्षत्रस्य त्वा' इत्यनयोर्बृहती, (२०) 'चतुःस्रक्तिर्नाभिः' इत्यस्य महाबृहती, (२१) 'घर्मैतत्ते' इत्यस्यानुष्टुप्, (२२) 'अचिक्रदद्वृषा' इत्यस्य परोष्णिक्, (२४) 'उद्वयन्तमसः' इत्यस्यानुष्टुप्, (२७) 'मयि त्यत्' इत्यस्य पङ्क्तिः; (२८) 'पयसो रेतः' इत्यस्य गायत्री ॥

॥ हरिःॐ ॥

॥१॥ दे॒वस्य॑ त्वा सवि॒तुः प्प्र॑स॒वे॒ऽश्विनो॑र्ब्बा॒हुब्भ्या॑म्पू॒ष्ण्णो हस्ता॑ब्भ्याम् ।
आद॑दे॒दित्त्यै॑ रास्न्ना॑सि ॥१॥

इडऽएह्यदितऽएहि सरस्वत्येहि । असावेह्यसावेह्यसावेहि ॥२॥

अदित्यै रास्नासीन्द्राण्याऽउष्णीषः । पूषासि घर्म्माय दीष्व ॥३॥

अश्विभ्याम्पिन्वस्व सरस्वत्यै पिन्वस्वेन्द्राय पिन्वस्व ।
स्वाहेन्द्रवत्स्वाहेन्द्रवत्स्वाहेन्द्रवत् ॥४॥

यस्ते स्तनः शशयो यो मयोभूर्य्यो रत्नधा वसुविद्यः सुदत्रः । येन विश्वा पुष्यसि वार्य्याणि सरस्वति तमिह धातवेकः । उर्व्वन्तरिक्षमन्वेमि ॥५॥

गायत्रञ्छन्दोसि त्रैष्टुभञ्छन्दोसि द्यावापृथिवीभ्यान्त्वा परिगृह्णाम्म्यन्तरिक्षेणोपयच्छामि । इन्द्राश्विना मधुनः सारघस्य घर्म्मम्पात वसवो यजत वाट् । स्वाहा सूर्य्यस्य रश्म्मये वृष्टिवनये ॥६॥

समुद्राय त्वा वाताय स्वाहा सरिराय त्वा वाताय स्वाहा । अनाधृष्याय त्वा वाताय स्वाहाप्प्रतिधृष्याय त्वा वाताय स्वाहा । अवस्यवे त्वा वाताय स्वाहाशिमिदाय त्वा वाताय स्वाहा ॥७॥

इन्द्राय त्वा वसुमते रुद्रवते स्वाहेन्द्राय त्वादित्यवते स्वाहेन्द्राय त्वाभिमातिघ्ने स्वाहा । सवित्रे त्वऽऋभुमते विभुमते वाजवते स्वाहा बृहस्पतये त्वा विश्वदेव्यावते स्वाहा ॥८॥

॥२॥ यमाय त्वाङ्गिरस्वते पितृमते स्वाहा । स्वाहा घर्म्माय स्वाहा घर्म्मः पित्रे ॥९॥

विश्वाऽआशा दक्षिणसद्विश्वान्देवानयाडिह ।
स्वाहाकृतस्य घर्म्मस्य मधोः पिबतमश्विना ॥१०॥

दिवि धाऽइमँय्यज्ञमिमँय्यज्ञन्दिवि धाः ।
स्वाहाग्नये यज्ञियाय शँय्यजुर्भ्यः ॥११॥

अश्विना घर्म्मम्पातꣳ हार्द्दानमहर्दिवाभिरूतिभिः ।
तन्त्रायिणे नमो द्यावापृथिवीभ्याम् ॥१२॥

अपातामश्विना घर्म्ममनु द्यावापृथिवीऽअमꣳसाताम् । इहैव रातयः सन्तु ॥१३॥

इषे पिन्वस्वोर्ज्जे पिन्वस्व ब्रह्मणे पिन्वस्व क्षत्राय पिन्वस्व द्यावापृथिवीभ्याम्पिन्वस्व । धर्म्मासि सुधर्म्मामेन्न्यस्म्मे नृम्म्णानि धारय ब्रह्म धारय क्षत्रन्धारय विशन्धारय ॥१४॥

स्वाहा पूष्णे शरसे स्वाहा ग्रावभ्यः स्वाहा प्रतिरवेभ्यः । स्वाहा पितृभ्यऽ

ऊर्द्ध्वबर्हिब्भ्यो घर्म्मपावब्भ्यः स्वाहा द्यावापृथिवीब्भ्याꣳ स्वाहा विश्श्वेब्भ्यो देवेब्भ्यः ॥१५॥

स्वाहा रुद्राय रुद्रहूतये स्वाहा सञ्ज्योतिषा ज्ज्योतिः । अहः केतुना जुषताꣳ सुज्ज्योतिर्ज्ज्योतिषा स्वाहा । रात्रिः केतुना जुषताꣳ सुज्ज्योतिर्ज्ज्योतिषा स्वाहा । मधु हुतमिन्द्रतमेऽअग्ग्नावश्श्याम ते देव घर्म्म नमस्त्तेऽअस्त्तु मा मा हिꣳसीः ॥१६॥

अभीमम्महिमा दिवँव्विप्प्रो बभूव सप्प्रथाः । उत श्श्रवसा पृथिवीꣳ सꣳसीदस्व महाँ२ऽअसि रोचस्व देववीतमः । वि धूममग्ग्नेऽअरुषम्मियेद्ध्य सृज प्प्रशस्त दर्शतम् ॥१७॥

या ते घर्म्म दिव्व्या शुग्ग्या गायत्र्याꣳ हविर्द्धाने । सा तऽआप्प्यायतान्निष्ट्ट्यायतान्तस्यै ते स्वाहा । या ते घर्म्मान्तरिक्षे शुग्ग्या त्रिष्टुब्भ्याग्ग्नीद्ध्रे । सा तऽआप्प्यायतान्निष्ट्ट्यायतान्तस्यै ते स्वाहा । या ते घर्म्म पृथिव्व्याꣳ शुग्ग्या जगत्त्याꣳ सदस्स्या । सा तऽआप्प्यायतान्निष्ट्ट्यायतान्तस्यै ते स्वाहा ॥१८॥

॥३॥ क्षत्रस्य त्वा परस्प्पाय ब्रह्मणस्त्तन्न्वम्पाहि ।
विशस्त्त्वा धर्म्मणा वयमनुक्क्रामाम सुविताय नव्व्यसे ॥१९॥

चतुःस्स्रक्क्तिर्न्नाभिर्ऋतस्य सप्प्रथाः स नो विश्श्वायुः सप्प्रथाः स नः सर्व्वायुः सप्प्रथाः । अप द्द्वेषोऽअप ह्ह्वरोन्न्यव्व्रतस्य सश्श्चिम ॥२०॥

घर्म्मैतत्ते पुरीषन्तेन वर्द्धस्व चा च प्प्यायस्व ।
वर्द्धिषीमहि च वयमा च प्प्यासिषीमहि ॥२१॥

अचिक्क्रदद्वृषा हरिर्म्महान्मित्त्रो न दर्शतः । सꣳ सूर्य्येण दिद्युतदुदधिर्न्निधिः ॥२२॥

○ सुमित्त्रिया नऽआपऽओषधयः सन्तु दुर्म्मित्त्रियास्त्तस्म्मै सन्तु योऽस्म्मान्द्द्वेष्टि यञ्च वयन्द्विष्म्मः ॥२३॥

उद्वयन्तमसस्प्परि स्वः पश्श्यन्तऽउत्तरम् ।
देवन्देवत्त्रा सूर्य्यमगन्म्म ज्ज्योतिरुत्तमम् ॥२४॥

○ एधोस्येधिषीमहि समिदसि तेजोसि तेजो मयि धेहि ॥२५॥

यावती द्यावापृथिवी यावच्च सप्त सिन्धवो वितस्त्थिरे ।
तावन्तमिन्द्र ते ग्ग्रहमूर्ज्जा गृह्णाम्म्यक्षितम्मयि गृह्णाम्म्यक्षितम् ॥२६॥

मयि त्यदिन्द्रियम्बृहन्मयि दक्क्षो मयि क्क्रतुः ।
घर्म्मस्त्रिशुग्ग्विराजति व्विराजा ज्ज्योतिषा सह ब्ब्रह्मणा तेजसा सह ॥२७॥
पयसो रेतऽआभृतन्तस्य दोहमशीमह्युत्तरामुत्तराꣳ समाम् । त्विषः सँव्वृक्क्त्वे दक्क्षस्य ते सुषुम्म्णस्य ते सुषुम्म्णाग्निहुतः । इन्द्रपीतस्य प्प्रजापतिभक्क्षितस्य मधुमतऽउपहूतऽउपहूतस्य भक्क्षयामि ॥२८॥

॥ इत्यष्टात्रिंशोऽध्यायः ॥

अथैकोनचत्वारिंशोऽध्यायः

ऋषिः (१) 'स्वाहा प्राणेभ्यः' इत्यारभ्य (४) 'मनसः कामम्' इत्यन्तानामाथर्वणो दध्यङ्, (७) 'उग्रश्च' इत्यस्य प्रजापतिः साध्या वा, प्राजापत्यः परमेष्ठी वा, (१०) 'लोमभ्यः स्वाहा' इत्यारभ्य (१३) 'यमाय स्वाहा' इत्यन्तानां प्रजापतिः ॥

देवता (१) 'स्वाहा प्राणेभ्यः' 'पृथिव्यै स्वाहा' 'अग्नये स्वाहा' 'अन्तरिक्षाय स्वाहा' 'वायवे स्वाहा' 'दिवे स्वाहा' 'सूर्याय स्वाहा' (२) 'दिग्भ्यः स्वाहा' 'चन्द्राय स्वाहा' 'नक्षत्रेभ्यः स्वाहा' 'अद्भ्यः स्वाहा' 'वरुणाय स्वाहा' 'नाभ्यै स्वाहा' 'पूताय स्वाहा' इत्येषाम्, (३) 'वाचे स्वाहा' इत्यस्य, 'प्राणाय स्वाहा' इत्यादिद्वयोः, 'चक्षुषे स्वाहा' इत्यादिद्वयोः, 'श्रोत्राय स्वाहा' इत्यादिद्वयोश्च मान्त्रवर्णिक्यः ।

(४) 'मनसः कामम्' इत्यस्य श्रीः ।

(५) 'प्रजापतिः सम्भ्रियमाणः' (६) 'सविता प्रथमे' इत्यनयोर्ब्राह्मणरूपत्वादृष्यादिकन्नोक्तम् ।

(७) 'उग्रश्च' 'भीमश्च' 'ध्वान्तश्च' 'धुनिश्च' 'सासह्वाँश्च' 'अभियुग्वा च' 'विक्षिपः स्वाहा' इत्येषामुग्रभीमादयो मरुतः ।

(८) 'अग्निꣳ हृदयेन' (९) 'उग्रं लोहितेन' इत्यनयोर्ब्राह्मणरूपत्वादृष्यादिकन्नोक्तम् ।

(१०) 'लोमभ्यः स्वाहा' इत्यादिस्वाहान्तानामष्टादशानाम्, (११) 'आयासाय स्वाहा' इत्यादिस्वाहान्तानां नवानाम्, (१२) 'तपसे स्वाहा' इत्यादिस्वाहान्तानामष्टानाम्, (१३) 'यमाय स्वाहा' इत्यादिस्वाहान्तानां सप्तानाञ्च लिङ्गोक्ता ॥

छन्दः (४) 'मनसः कामम्' इत्यस्यानुष्टुप्, (७) 'उग्रश्च' इत्यस्य गायत्री ॥

॥ हरिःॐ ॥

॥१॥ स्वाहा प्प्राणेब्भ्यः साधिपतिकेब्भ्यः । पृथिव्यै स्वाहाग्नये स्वाहान्तरिक्क्षाय स्वाहा
व्वायवे स्वाहा । दिवे स्वाहा सूर्य्याय स्वाहा ॥१॥
दिग्ग्भ्यः स्वाहा चन्द्राय स्वाहा नक्क्षत्रेब्भ्यः स्वाहाद्भ्यः स्वाहा व्वरुणाय स्वाहा ।
नाब्भ्यै स्वाहा पूताय स्वाहा ॥२॥
व्वाचे स्वाहा प्प्राणाय स्वाहा प्प्राणाय स्वाहा ।
चक्क्षुषे स्वाहा चक्क्षुषे स्वाहा श्श्रोत्राय स्वाहा श्श्रोत्राय स्वाहा ॥३॥

मनसः काममाकूतिँव्वाचः सत्त्यमशीय ।
पशूनाꣳ रूपमन्नस्य रसो यशः श्रीः श्रयताम्मयि स्वाहा ॥४॥

प्रजापतिः सम्भ्रियमाणः सम्म्राट्सम्भृतो वैश्श्वदेवः सꣳसन्नो घर्म्मः प्प्रवृक्तस्तेजऽउद्यतऽआश्श्विनः पयस्यानीयमाने पौष्ण्णो विष्ष्यन्दमाने मारुतः क्क्लथन् । मैत्रः शरसि सन्ताय्यमाने वायव्यो ह्रियमाणऽआग्नेयो हूयमानो वाग्घुतः ॥५॥

सविता प्प्रथमेहन्नग्निर्द्वितीये व्वायुस्तृतीयऽआदित्त्यश्चतुर्त्थे चन्द्रमाः पञ्चमऽऋतुः षष्ट्ठे मरुत्तः सप्तमे बृहस्प्पतिरष्ट्टमे । मित्रो नवमे व्वरुणो दशमऽइन्द्रऽएकादशे व्विश्वे देवा द्वादशे ॥६॥

॥२॥ उग्ग्रश्च भीमश्च ध्वान्तश्च धुनिश्च । सासह्वाँश्चाभियुग्ग्वा च व्विक्षिपः स्वाहा ॥७॥

अग्निꣳ हृदयेनाशनिꣳ हृदयाग्ग्रेण पशुपतिङ्कृत्स्नहृदयेन भवँय्यक्क्ना । शर्व्वम्मतस्नाब्भ्यामीशानम्मन्न्युना महादेवमन्तःपर्शव्व्येनोग्ग्रन्देवँव्वनिष्ठ्ठुना व्वसिष्ठ्ठहनुः शिङ्गीनि कोश्श्याब्भ्याम् ॥८॥

उग्ग्रँल्लोहितेन मित्रꣳ सौव्व्रत्त्येन रुद्द्रन्दौर्व्व्रत्त्येनेन्द्रम्प्रक्क्रीडेन मरुतो बलेन साद्ध्यान्प्रमुदा । भवस्य कण्ठ्यꣳ रुद्द्रस्यान्तःपार्श्श्व्यम्महादेवस्य यकृच्छर्व्वस्य व्वनिष्ठ्ठुः पशुपतेः पुरीतत् ॥९॥

लोमब्भ्यः स्वाहा लोमब्भ्यः स्वाहा त्त्वचे स्वाहा त्त्वचे स्वाहा लोहिताय स्वाहा लोहिताय स्वाहा मेदोब्भ्यः स्वाहा मेदोब्भ्यः स्वाहा । माꣳसेब्भ्यः स्वाहा माꣳसेब्भ्यः स्वाहा स्नावब्भ्यः स्वाहा स्नावब्भ्यः स्वाहास्त्थब्भ्यः स्वाहास्त्थब्भ्यः स्वाहा मज्जब्भ्यः स्वाहा मज्जब्भ्यः स्वाहा । रेतसे स्वाहा पायवे स्वाहा ॥१०॥

आयासाय स्वाहा प्प्रायासाय स्वाहा सँय्यासाय स्वाहा व्वियासाय स्वाहोद्यासाय स्वाहा । शुचे स्वाहा शोचते स्वाहा शोचमानाय स्वाहा शोकाय स्वाहा ॥११॥

तपसे स्वाहा तप्प्यते स्वाहा तप्प्यमानाय स्वाहा तप्प्ताय स्वाहा घर्म्माय स्वाहा । निष्ष्कृत्त्यै स्वाहा प्प्रायश्चित्त्यै स्वाहा भेषजाय स्वाहा ॥१२॥

यमाय स्वाहान्तकाय स्वाहा मृत्त्यवे स्वाहा । ब्रह्मणे स्वाहा ब्रह्महत्त्यायै स्वाहा व्विश्वेब्भ्यो देवेब्भ्यः स्वाहा द्यावापृथिवीब्भ्याꣳ स्वाहा ॥१३॥

॥ इत्येकोनचत्वारिंशोऽध्यायः ॥

अथ चत्वारिंशोऽध्यायः

ऋषिः (१) 'ईशा वास्यम्' इत्यारभ्य (१७) 'हिरण्मयेन पात्रेण' इत्यन्तानां सामान्यत आथर्वणो दध्यङ्ङृषिः। विशेषतश्च— (१५) 'ओ३म्' इत्यस्य ब्रह्मा, (१६) 'अग्ने नय' इत्यस्यागस्त्यः ॥

देवता (१) 'ईशा वास्यम्' (२) 'कुर्वन्नेवेह' (३) 'असुर्या नाम' (४) 'अनेजदेकम्' (५) 'तदेजति' (६) 'यस्तु सर्वाणि' (७) 'यस्मिन्त्सर्वाणि' (८) 'स पर्यगात्' (९) 'अन्धन्तमः' (१०) 'अन्यदेवाहुः' (११) 'सम्भूतिञ्च' (१२) 'अन्धन्तमः' (१३) 'अन्यदेवाहुः' (१४) 'विद्याञ्चाविद्याञ्च' (१५) 'वायुरनिलम्' इत्येषामात्मा, 'ओ३म्' इत्यस्य परमात्मा, 'क्रतो स्मर' 'क्लिबे स्मर' 'कृतꣳ स्मर' इत्येषामात्मा।

(१६) 'अग्ने नय' इत्यस्याग्निः।

(१७) 'हिरण्मयेन पात्रेण' इत्यस्यादित्यः, 'ओ३म्' इत्यस्य परमात्मा, 'खम्ब्रह्म' इत्यस्यात्मा ॥

छन्दः (१) 'ईशा वास्यम्' (२) 'कुर्वन्नेवेह' (३) 'असुर्या नाम' इत्येषामनुष्टुप्, (४) 'अनेजदेकम्' इत्यस्य त्रिष्टुप्, (५) 'तदेजति' (६) 'यस्तु सर्वाणि' (७) 'यस्मिन्त्सर्वाणि' इत्येषामनुष्टुप्, (८) 'स पर्यगात्' इत्यस्य जगती, (९) 'अन्धन्तमः' इत्यारभ्य (१४) 'विद्याञ्चाविद्याञ्च' इत्यन्तानामनुष्टुप्, (१६) 'अग्ने नय' इत्यस्य त्रिष्टुप्, (१७) 'हिरण्मयेन पात्रेण' इत्यस्योष्णिक्, 'ओ३म्' 'खम्ब्रह्म' इति यजुषी ॥

॥ हरिः ओ३म् ॥

॥१॥ ई॒शा व्वा॒स्य॑मि॒दꣳ स॒र्वँ॒य्यत्किञ्च॒ जग॑त्त्या॒ञ्जग॑त् ।
तेन॑ त्य॒क्तेन॑ भुञ्जीथा॒ मा गृ॑धः॒ कस्य॑ स्वि॒द्धन॑म् ॥१॥
कु॒र्व्वन्ने॒वेह कर्म्मा॑णि जिजीवि॒षेच्छ॒तꣳ समाः॑ ।
ए॒वन्त्वयि॒ नान्यथे॒तो॑स्ति॒ न कर्म्म॑ लिप्प्यते॒ नरे॑ ॥२॥
अ॒सु॒र्य्या॒ नाम॒ ते लो॒काऽअ॒न्धेन॒ तम॒सावृ॑ताः ।
ताँस्ते॒ प्रेत्त्यापि॑गच्छन्ति॒ ये के चा॑त्म॒हनो॒ जनाः॑ ॥३॥
अने॑ज॒देक॒म्मन॑सो॒ जवी॑यो॒ नैन॑द्दे॒वाऽआ॑प्नुव॒न्पूर्व्व॒मर्श॑त् ।
तद्धाव॑तो॒न्यानत्त्ये॑ति॒ तिष्ठ॒त्तस्म्मि॑न्न॒पो मा॑त॒रिश्श्वा॑ दधाति ॥४॥
तदे॑जति॒ तन्नैज॑ति॒ तद्दू॒रे तद्व॑न्ति॒के ।
तद॒न्तर॑स्य॒ सर्व्व॑स्य॒ तदु॒ सर्व्व॑स्यास्य बाह्य॒तः ॥५॥
यस्तु सर्व्वा॑णि भू॒तान्या॒त्मन्ने॒वानु॒पश्श्य॑ति ।
स॒र्व्व॒भू॒तेषु॑ चा॒त्मान॒न्ततो॒ न वि चि॑कित्सति ॥६॥

यस्मिन्त्सर्व्वाणि भूतान्न्यात्मैवाभूद्विजानतः ।
तत्र को मोहः कः शोकऽएकत्त्वमनुपश्श्यतः ॥७॥
स पर्य्यगाच्छुक्रमकायमव्रणमस्नाविरꣳ शुद्धमपापविद्धम् । कविर्म्मनीषी परिभूः
स्वयम्भूर्य्याथातत्थ्यतोर्त्थान्व्यदधाच्छाश्श्वतीब्भ्यः समाब्भ्यः ॥८॥

॥२ अन्धन्तमः प्प्रविशन्ति येसम्भूतिमुपासते ।
ततो भूयऽइव ते तमो यऽउ सम्भूत्त्याꣳ रताः ॥९॥
अन्यदेवाहुः सम्भवादन्यदाहुरसम्भवात् ।
इति शुश्श्रुम धीराणाँय्ये नस्तद्विचचक्षिरे ॥१०॥
सम्भूतिञ्च विनाशञ्च यस्तद्वेदोभयꣳ सह ।
विनाशेन मृत्युन्तीर्त्वा सम्भूत्त्यामृतमश्श्नुते ॥११॥
अन्धन्तमः प्प्रविशन्ति येविद्यामुपासते ।
ततो भूयऽइव ते तमो यऽउ विद्यायाꣳ रताः ॥१२॥
अन्यदेवाहुर्विद्यायाऽअन्यदाहुरविद्यायाः ।
इति शुश्श्रुम धीराणाँय्ये नस्तद्विचचक्षिरे ॥१३॥
विद्याञ्चाविद्याञ्च यस्तद्वेदोभयꣳ सह ।
अविद्यया मृत्युन्तीर्त्वा विद्ययामृतमश्श्नुते ॥१४॥
वायुरनिलममृतमथेदम्भस्मान्तꣳ शरीरम् ।
ओ३म् । क्रतो स्म्मर । क्लिबे स्म्मर । कृतꣳ स्मर ॥१५॥
अग्ने नय सुपथा रायेऽअस्मान्विश्श्वानि देव वयुनानि विद्वान् ।
युयोद्ध्यस्म्मज्जुहुराणमेनो भूयिष्ठान्ते नमऽउक्तिँविधेम ॥१६॥
हिरण्मयेन पात्रेण सत्त्यस्यापिहितम्मुखम् ।
योसावादित्त्ये पुरुषः सोसावहम् । ओ३म् खम्ब्रह्म ॥१७॥

॥ इति चत्वारिंशोऽध्यायः ॥

॥ इत्युत्तरविंशतिः ॥

पूर्वविंशत्यामनुवाकाः २०२, कण्डिकाः १२११ ।
उत्तरविंशत्यामनुवाकाः १०१, कण्डिकाः ७६४ ।
सम्पूर्णसंहितायामनुवाकाः ३०३, कण्डिकाः १९७५, प्रतीकोक्ता गलितमन्त्राः ४९ ॥

॥ इति माध्यन्दिनवाजसनेयिशुक्लयजुर्वेदसंहिता ॥

इन्द्रेश कुमार शुक्लः

अथ शुक्लयजुर्वेदमन्त्राणां वर्णानुक्रमणी

	अ.	क.
अंशुना ते अंशुः	२०.	२७
अंशुरंशुष्टे देव	५.	७
अंशुश्च मे रश्मिश्च	१८.	१९
अक्रन्कर्म कर्मकृतः	३.	४७
अक्रन्ददग्नि स्तनयन्	१२.	६
	१२.	२१
	१२.	३३
अक्षन्नमीमदन्त ह्यव	३.	५१
अक्षराजाय कितवङ्कृताया	३०.	१८
अग्न आयूंषि पवस	१९.	३८
	३५.	१६
अग्न इन्द्र वरुण मित्र	३३.	४८
अग्नये कव्यवाहनाय	२.	२९
अग्नये कुटरूनालभते	२४.	२३
अग्नये गायत्राय त्रिवृते	२९.	६०
अग्नये गृहपतये स्वाहा	१०.	२३
अग्नये त्वा मह्यं वरुणो	७.	४७
अग्नयेनीकवते प्रथमजा	२४.	१६
अग्नयेनीकवते रोहिता	२९.	५९
अग्नये पीवानम्पृथिव्यै	३०.	२१
अग्नये स्वाहा० स्वाहापां	२२.	६
अग्नये स्वाहा० स्वाहेन्द्राय	२२.	२७
अग्ना इ पत्नीवन्त्सजूर्देवेन	८.	१०
अग्नावग्निश्चरति प्रविष्ट	५.	४
अग्निं युनज्मि शवसा	१८.	५१
अग्निं स्तोमेन बोधय	२२.	१५
अग्निं हृदयेनाशनिं	३९.	८
अग्निं होतारम्मन्ये	१५.	४७
अग्निः पशुरासीत्तेना	२३.	१७

	अ.	क.
अग्निमद्य० पुरोडाशं० वयोधसे	२८.	४६
अग्निमद्य० पुरोडाशान्	२१.	५९
अग्निरस्मि जन्मना	१८.	६६
अग्निरेकाक्षरेण प्राण	९.	३१
अग्निर्ऋषिः पवमानः	२६.	९
अग्निर्ज्योतिर्ज्योतिरग्निः	३.	९
अग्निर्ज्योतिषा ज्योतिष्मान्	१३.	४०
अग्निर्देवता वातो देवता	१४.	२०
अग्निर्मूर्द्धा० जिन्वति ।	३.	१२
	१५.	२०
अग्निर्मूर्द्धा० जिन्वति । इन्द्रस्य .	१३.	१४
अग्निर्वृत्राणि जङ्घनद्	३३.	९
अग्निश्च पृथिवी च	२६.	१
अग्निश्च म आपश्च	१८.	१४
अग्निश्च म इन्द्रश्च	१८.	१६
अग्निश्च मे घर्मश्च	१८.	२२
अग्निष्वात्ताः पितर	१९.	५९
अग्निष्वात्तानृतुमतो	१९.	६१
अग्निस्तिग्मेन शोचिषा	१७.	१६
अग्नीषोमयोरुज्जिति	२.	१५
अग्नेः पक्षतिर्वायो	२५.	४
अग्ने अङ्गिरः शतन्ते	१२.	८
अग्ने अच्छा वदेह नः	९.	२८
अग्ने गृहपते सुगृहपति	२.	२७
अग्ने जातान्प्रणुदा नः	१५.	१
अग्ने तमद्याश्वन्न स्तोमैः	१५.	४४
	१७.	७७
अग्ने तव श्रवो वयो	१२.	१०६
अग्ने त्वं सुजागृहि वयं	४.	१४

अग्निः पृथुर्धर्मणस्पति	१०. २९
अग्निः प्रियेषु धामसु	१२. ११७
अग्निन्तम्मन्ये यो	१५. ४१
अग्निन्दूतम्पुरो दधे	२२. १७
अग्निमद्य० पुरोडाशं० छागम्	२८. २३
अग्ने दिवो अर्णमच्छा	१२. ४९
अग्ने नय० विधेम ।	५. ३६
	४०. १६
अग्ने नय० विधेम स्वाहा ।	७. ४३
अग्ने पत्नीरिहावह	२६. २०
अग्ने पवस्व स्वपा	८. ३८
अग्ने पावक रोचिषा	१७. ८
अग्ने प्रेहि प्रथमो	१७. ६९
अग्ने ब्रह्म गृभ्णीष्व	१. १८
अग्नेभ्यावर्तिन्नभि मा	१२. ७
अग्ने यत्ते दिवि वर्चः	१२. ४८
अग्ने यत्ते शुक्रं यच्चन्द्रं	१२. १०४
अग्ने युक्ष्वा हि ये	१३. ३६
अग्नेरनीकमप आविवेशा	८. २४
अग्नेर्जनित्रमसि वृषणो	५. २
अग्नेर्भागोसि दीक्षाया	१४. २४
अग्नेर्वोपन्नगृहस्य सदसि	६. २४
अग्ने वाजजिद्वाजन्त्वा	२. ७
अग्ने वाजस्य गोमत	१५. ३५
अग्ने वेर्होत्रं वेर्दूत्यमवता	२. ९
अग्ने व्रतपते व्रतञ्चरिष्यामि	१. ५
अग्ने व्रतपते व्रतमचारिषन	२. २८
अग्ने व्रतपास्त्वे० तनूरियं	५. ६
अग्ने व्रतपास्त्वे० तनूर्मय्यभूदेषा	५. ४०
अग्ने शर्द्ध महते	३३. १२
अग्ने सहस्राक्ष शतमूर्द्ध	१७. ७१
अग्ने सहस्व पृतना	९. ३७
अग्नेस्तनूरसि वाचो	१. १५
अग्नेस्तनूरसि विष्णवे	५. १
अग्ने स्वाहा कृणुहि	२७. २२
अग्रेणीरसि स्वावेश	६. २
अग्ने बृहन्नुषसामूर्द्ध्वो	१२. १३
अङ्गान्यात्मन्भिषजा	१९. ९३
अङ्गिरसो नः पितरो	१९. ५०
अचिक्रदद्वृषा हरिर्महान्	३८. २२
अग्ने त्वन्नो० दाः ।	३. २५
अग्ने त्वन्नो० दाः । तं त्वा	१५. ४८
	२५. ४७
अग्ने त्वम्पुरीष्यो रयिमान्	१२. ५९
अग्नेदब्धायोशीतम	२. २०
अच्छायमेति शवसा	२७. १४
अच्छिन्नस्य ते देव	७. १४
अजस्रमिन्दुमरुषम्	१३. ४३
अजारे पिशङ्गिला	२३. ५६
अजीजनो हि पवमान	२२. १८
अजो ह्यग्नेरजनिष्ट	१३. ५१
अति निहो अति स्रिधो	२७. ६
अति विश्वाः परिष्ठा	१२. ८४
अत्यन्याँ अगान्नान्याँ	५. ४२
अत्र पितरो मादयध्वं	२. ३१
अत्रा ते रूपमुत्तम	२९. १८
अथैतानष्टौ विरूपा	३०. २२
अदब्धेभिः सवितः	३३. ६९
	३३. ८४
अदितिर्द्यौरदितिरन्तरिक्ष	२५. २३
अदितिष्ट्वा देवी विश्व	११. ६१
अदित्यास्त्वगस्यदित्यै	४. ३०
अदित्यास्त्वा पृष्ठे	१४. ५
अदित्यास्त्वा मूर्द्धन्	४. २२
अदित्यै रास्नासि विष्णो	१. ३०
अदित्यै रास्नासीन्द्राण्या	३८. ३
अदित्यै रास्नास्यदितिष्टे	११. ५९
अदित्यै व्युन्दनमसि	२. २
अदृश्रमस्य केतवो वि	८. ४०
अद्भ्यः क्षीरं व्यपिबत्	१९. ७३
अद्भ्यः सम्भृतः पृथिव्यै	३१. १७
अद्भ्यः स्वाहा वार्भ्यः	२२. २५
अद्या देवा उदिता	३३. ४२
अधा यथा नः पितरः	१९. ६९
अधा ह्यग्ने क्रतोर्भद्रस्य	१५. ४५
अधि न इन्द्रैषां विष्णो	३३. ४७
अधिपत्न्यसि बृहती	१५. १४
अध्यवोचदधिवक्ता	१६. ५
अध्वर्यो अद्रिभिः सुतं	२०. ३१
अनड्वान्वयः पङ्क्तिश्छन्दो	१४. १०

अनड्वाहमन्वारभामहे ३५. १३
अनाधृष्टा पुरस्तादग्ने ३७. १२
अनाधृष्यो जातवेदा २७. ७
अनु ते शुष्मन्तुरयन्त ३३. ६७
अनुत्तमा ते मघवन्नकिर्नु ३३. ७९
अनु त्वा माता मन्यतामनु ४. २०
अनु त्वा रथो अनु मर्यो २९. १९
अनु नोद्यानुमतिर्यज्ञ ३४. ९
अनु वीरैरनु पुष्यास्म २६. १९
अनेजदेकम्मनसो ४०. ४
अन्तरग्ने रुचा त्वमुखायाः १२. १६
अन्तरा मित्रावरुणा २९. ६
अन्तश्चरति रोचनास्य ३. ७
अन्तस्ते द्यावापृथिवी ७. ५
अन्धन्तमः० येविद्या ४०. १२
अन्धन्तमः० येसम्भूति ४०. ९
अन्ध स्थान्धो वो भक्षीय ३. २०
अन्नपतेन्नस्य नो ११. ८३
अन्नात्परिस्रुतो रसं १९. ७५
अन्यदेवाहुः सम्भवा ४०. १०
अन्यदेवाहुर्विद्याया ४०. १३
अन्यवापोर्धमासाना २४. ३७
अन्या वो अन्यामव १२. ८८
अन्वग्निरुषसामग्रमख्य ११. १७
अन्विदनुमते त्वमन्यासै ३४. ८
अपश्यङ्गोपामनिपद्य ३७. १७
अपां रसमुद्वयसं सूर्ये ९. ३
अपाघमप किल्बिषमप ३५. ११
अपाङ्गम्भन्त्सीद मा १३. ३०
अपातामश्विना घर्ममनु ३८. १३
अपाधमदभिशस्तीरशस्ति ३३. ९५
अपान्त्वेमन्त्सादयाम्यपान् १३. ५३
अपामिदन्न्ययनं १७. ७
अपाम्पृष्ठमसि योनिरग्नेः ११. २९
१३. २
अपाम्पेरुरस्यापो देवीः ६. १०
अपाम्फेनेन नमुचेः १९. ७१
अपारुरम्पृथिव्यै १. २६
अपि तेषु त्रिषु पदे २३. ५०
अपेत वीत वि च १२. ४५
अपेतो यन्तु पणयो ३५. १
अपो अद्यान्वचारिषं २०. २२
अपो देवा मधुमती १०. १
अपो देवीरुप सृज ११. ३८
अप्नस्वतीमश्विना ३४. २९
अप्स्वग्ने सधिष्टव १२. ३६
अप्स्वन्तरमृतमप्सु ९. ६
अबोध्यग्निः समिधा १५. २४
अभि गोत्राणि सहसा १७. ३९
अभि त्यन्देवं सवितार ४. २५
अभि त्वा शूर नोनुमो २७. ३५
अभिधा असि भुवनमसि २२. ३
अभिप्रवन्त समनेव १७. ९६
अभिभूरस्येतास्ते पञ्च १०. २८
अभि यज्ञङ्गृणीहि नो २६. २१
अभीमम्महिमा दिवं ३८. १७
अभी षु णः० भवास्यूतये २७. ४१
अभी षु णः० भवास्यूतिभिः ३६. ६
अभ्यर्षत सुष्टुतिङ्गव्य १७. ९८
अभ्यादधामि समिधमग्ने २०. २४
अभ्यावर्तस्व पृथिवि १२. १०३
अभ्रिरसि नार्यसि त्वया ११. १०
अमीषाञ्चित्तम्प्रतिलोभयन्ती १७. ४४
अमुत्रभूयादध यद्यमस्य २७. ९
अमेव नः सुहवा आ हि २६. २४
अयं वामित्रावरुणा सुतः ७. ९
अयं वेनश्चोदयत्पृश्निगर्भा ७. १६
अयं सहस्रमृषिभिः ३३. ८३
अयं सो अग्निर्यस्मिन् १२. ४७
अयन्ते योनिर्ऋत्वियो ३. १४
१२. ५२
१५. ५६
अयन्दक्षिणा० मनो १३. ५५
अयन्दक्षिणा० रथ १५. १६
अयन्नो अग्निर्वरिव ५. ३७
७. ४४
अयमग्निः पुरीष्यो ३. ४०
अयमग्निः सहस्रिणो १५. २१
अयमग्निर्गृहपतिर्गार्हपत्यः ३. ३९
अयमग्निर्वीरतमो १५. ५२

अयमिह प्रथमो धायि	३.	१५
	१५.	२६
	३३.	६
अयमुत्तरात्संयद्वसुस्तस्य	१५.	१८
अयमुपर्यर्वाग्वसुस्तस्य	१५.	१९
अयम्पश्चाद्विश्वव्यचास्तस्य चक्षु	१३.	५६
अयम्पश्चाद्विश्वव्यचास्तस्य रथ	१५.	१७
अयम्पुरो भुवस्तस्य	१३.	५४
अयम्पुरो हरिकेशः	१५.	१५
अर्येत स्थ राष्ट्रदा	१०.	३
अर्ध ऋचैरुक्थानां	१९.	२५
अर्धमासाः परूंषि ते	२३.	४१
अर्मेभ्यो हस्तिपजवा	३०.	११
अर्यमणम्बृहस्पतिमिन्द्र	९.	२७
अर्वाञ्चो अद्या भवता	३३.	५१
अवतत्य धनुष्ट्वं	१६.	१३
अवपतन्तीरवदन्दिव	१२.	९१
अवभृथ० रिषस्पाहि ।	३.	४८
अवभृथ० रिषस्पाहि । देवानां	८.	२७
अव रुद्रमदीमह्यव	३.	५८
अवसृष्टा परापत	१७.	४५
अविर्न मेषो नसि	१९.	९०
अवेष्टा दन्दशूकाः	१०.	१०
अवोचाम कवये	१५.	२५
अश्मन्नूर्जम्पर्वते	१७.	१
अश्मन्वती रीयते	३५.	१०
अश्मा च मे मृत्तिका	१८.	१३
अश्याम तङ्काममग्ने	१८.	७४
अश्वत्थे वो निषदनम्	१२.	७९
	३५.	४
अश्वस्तूपरो गोमृगस्ते	२४.	१
अश्वस्य त्वा वृष्णः	३७.	९
अश्वावतीं सोमावती	१२.	८१
अश्वावतीर्गोमतीर्न	३४.	४०
अश्विनकृतस्य ते	२०.	३५
अश्विना गोभिरिन्द्रिय	२०.	७३
अश्विना घर्मम्पातं	३८.	१२
अश्विना तेजसा चक्षुः	२०.	८०
अश्विना नमुचेः सुतं	२०.	५९
अश्विना पिबताम्मधु	२०.	९०
अश्विना भेषजम्मधु	२०.	६४
अश्विना हविरिन्द्रिय	२०.	६७
अश्विभ्याञ्चक्षुरमृत	१९.	८९
अश्विभ्याम्पच्यस्व	१०.	३१
अश्विभ्याम्पिन्वस्व	३८.	४
अश्विभ्याम्प्रातःसवन	१९.	२६
अश्वो घृतेन त्मन्या	२९.	१०
अषाढं युत्सु पृतनासु	३४.	२०
अषाढासि सहमाना	१३.	२६
अष्टौ व्यख्यत्ककुभः	३४.	२४
असङ्ख्याता सहस्राणि	१६.	५४
असवे स्वाहा वसवे	२२.	३०
असि यमो अस्यादित्यो	२९.	१४
असुन्वन्तमयजमानमिच्छ	१२.	६२
असुर्या नाम ते लोका	४०.	३
असौ यस्ताम्रो अरुण	१६.	६
असौ या सेना मरुतः	१७.	४७
असौ योवसर्पति	१६.	७
अस्कन्नमद्य देवेभ्य	२.	८
अस्ताव्यग्निर्नरां सुशेवो	१२.	२९
अस्माकमिन्द्रः समृतेषु	१७.	४३
अस्मात्त्वमधिजातोसि	३५.	२२
अस्मिन्महत्यर्णवे	१६.	५५
अस्मे रुद्रा मेहना	३३.	५०
अस्मे वो अस्त्विन्द्रिय	९.	२२
अस्य प्रत्नामनु द्युतं	३.	१६
अस्याजरासो दमामरित्रा	३३.	१
अस्येदिन्द्रो वावृधे	३३.	९७
अहः केतुना जुषतां	३७.	२१
अहरहरप्रयावम्भरन्तो	११.	७५
अहानि शम्भवन्तु नः	३६.	११
अहान्यग्ने हविरास्ये	२०.	७९
अहिरिव भोगैः पर्येति	२९.	५१
अह्ने पारावतानालभते	२४.	२५
अहुतमसि हविर्धानं	१.	९
आकूतिमग्निम्प्रयुजं	११.	६६
आकूत्यै प्रयुजेग्नये	४.	७
आ कृष्णेन रजसा	३३.	४३
	३४.	३१
आक्रन्दय बलमोजो	२९.	५६

आक्रम्य वाजिन्पृथिवी ११. १९
आगत्य वाज्यध्वानं ११. १८
आगन्म विश्ववेदस ३. ३८
आग्नेयः कृष्णग्रीवः २९. ५८
आग्रयणश्च मे वैश्वदेवश्च १८. २०
आ घा ये अग्निमिन्धते ७. ३२
आच्छच्छन्दः प्रच्छच्छन्दः १५. ५
आच्या जानु दक्षिणतो १९. ६२
आजङ्घन्ति सान्वेपा २९. ५०
आजिघ्र कलशम्मह्या ८. ४२
आजुह्वानः सुप्रतीकः १७. ७३
आजुह्वान ईड्यो वन्द्य २९. २८
आजुह्वाना सरस्वती २०. ५८
आ तत्त इन्द्रायवः ३३. २८
आ तम्भज सौश्रवसेष्वग्न १२. २७
आतिथ्यरूपं मासरम् १९. १४
आतिष्ठन्तम्परि विश्वे ३३. २२
आतिष्ठ वृत्रहन्रथं युक्ता ८. ३३
आ तू न इन्द्र वृत्रहन् ३३. ६५
आ ते वत्सो मनो यमत् १२. ११५
आत्मने मे वर्चोदा वर्चसे ७. २८
आत्मन्नुपस्थे न वृकस्य १९. ९२
आत्मानन्ते मनसा २९. १७
आ त्वा जिघर्मि मनसा ११. २३
आ त्वाहार्षमन्तरभू १२. ११
आदित्यङ्गर्भम्पयसा १३. ४१
आदित्यैर्नो भारती २९. ८
आधत्त पितरो गर्भं २. ३३
आ न इडाभिर्विदथे ३३. ३४
आ न इन्द्रो दूरादा २०. ४८
आ न इन्द्रो हरिभि २०. ४९
आ न एतु मनः पुनः ३. ५४
आ नासत्या त्रिभिरेका ३४. ४७
आ नो नियुद्भिः शतिनी २७. २८
आ नो भद्राः क्रतवो २५. १४
आ नो मित्रावरुणा २१. ८
आ नो यज्ञन्दिविस्पृशं ३३. ८५
आ नो यज्ञम्भारती २९. ३३
आन्त्राणि स्थालीर्मधु १९. ८६
आपतये त्वा परिपतये ५. ५
आपये स्वाहा स्वापये ९. २०
आपवस्व हिरण्यवदश्ववत् ८. ६३
आपश्चित्पिप्यु स्तर्यो ३३. १८
आपो अस्मान्मातरः ४. २
आपो देवीः प्रतिगृभ्णीत १२. ३५
आपो ह यद्बृहतीर्विश्व २७. २५
आपो हि ष्ठा मयोभुव ११. ५०
३६. १४
आप्यायस्व मदिन्तम १२. ११४
आप्यायस्व समेतु ते १२. ११२
आ ब्रह्मन्ब्राह्मणो ब्रह्म २२. २२
आ मन्द्रैरिन्द्र हरिभि २०. ५३
आ मा वाजस्य प्रसवो ९. १९
आमूरज प्रत्यावर्तयेमाः २९. ५७
आयङ्गौः पृश्निरक्रमी ३. ६
आ यद्दिषे नृपतिन्तेज ३३. ११
आयन्तु नः पितरः १९. ५८
आयातमुपभूषतम् ३३. ८८
आयात्विन्द्रोवस उप २०. ४७
आयासाय स्वाहा ३९. ११
आयुर्म्मे पाहि प्राणम्मे १४. १७
आयुर्यज्ञेन कल्पतां स्वाहा २२. ३३
आयुर्यज्ञेन कल्पताम्प्राणो॰ पृष्ठं ९. २१
आयुर्यज्ञेन कल्पताम्प्राणो॰ वाग् १८. २९
आयुष्मानग्ने हविषा ३५. १७
आयुष्यं वर्चस्यं राय ३४. ५०
आयोष्ट्वा सदने सादया १५. ६३
आ रात्रि पार्थिवं रजः ३४. ३२
आ रोदसी अपृणदा ३३. ७५
आ वाचो मध्यमरुहद् १५. ५१
आ वायो भूप शुचिपा ७. ७
आविर्मर्या आवित्तो १०. ९
आ विश्वतः प्रत्यञ्च ११. २४
आ वो देवास ईमहे ४. ५
आशुः शिशानो वृषभो १७. ३३
आशुस्त्रिवृद्भान्तः पञ्चदशो १४. २३
आश्रावयेति स्तोत्रियाः १०. २४
आसन्दी रूपं राजा १९. १६
आसीनासो अरुणीना १९. ६३
आ सुते सिञ्चत श्रियं ३३. २१

आ सुष्वयन्ती यजते २९. ३१
आहम्पितृन्त्सुविदत्राँ १९. ५६
इच्छन्ति त्वा सोम्यासः ३४. १८
इड एह्यदित एहि काम्या एत ३. २७
इड एह्यदित एहि सरस्वत्येहि ३८. २
इडाभिरग्निरीड्यः सोमो २१. १४
इडाभिर्भक्षानाप्नोति १९. २९
इडामग्ने पुरुदंसं सनिङ्गोः १२. ५१
इडायास्त्वा पदे वयन्नाभा ३४. १५
इडे रन्ते हव्ये काम्ये ८. ४३
इदं विष्णुर्विचक्रमे त्रेधा ५. १५
इदं हविः प्रजननम् १९. ४८
इदमापः प्रवहतावद्यञ्च ६. १७
इदमुत्तरात्स्वस्तस्य १३. ५७
इदम्पितृभ्यो नमो १९. ६८
इदम्मे ब्रह्म च क्षत्रञ्चोभे ३२. १६
इन्दुर्दक्षः श्येन ऋतावा १८. ५३
इन्द्रं विश्वा अवीवृधन् १२. ५६
१५. ६१
१७. ६१
इन्द्रः सुत्रामा स्ववाँ २०. ५१
इन्द्रः सुत्रामा हृदयेन १९. ८५
इन्द्र आसान्नेता बृहस्पति १७. ४०
इन्द्र गोमन्निहायाहि २६. ४
इन्द्रघोषस्त्वा वसुभिः ५. ११
इन्द्रन्दुरः कवष्यो २०. ४०
इन्द्रन्दैवीर्विशो मरुतो १७. ८६
इन्द्र मरुत्व इह पाहि ७. ३५
इन्द्रमिद्धरी वहतो ८. ३५
इन्द्रवायू इमे०हि । ३३. ५६
इन्द्रवायू इमे०हि । उपयाम ७. ८
इन्द्रवायू बृहस्पतिम् ३३. ४५
इन्द्रवायू सुसन्दृशा ३३. ८६
इन्द्रश्च मरुतश्च ८. ५५
इन्द्रश्च सम्राड्वरुणश्च ८. ३७
इन्द्रस्य क्रोडोदित्यै २५. ८
इन्द्रस्य रूपमृषभो १९. ९१
इन्द्रस्य वज्रो मरुता २९. ५४
इन्द्रस्य वज्रोसि मित्रा १०. २१
इन्द्रस्य वज्रोसि वाजसा ९. ५
इन्द्रस्य वृष्णो वरुणस्य १७. ४१
इन्द्रस्य स्यूरसीन्द्रस्य ५. ३०
इन्द्रस्यौज स्थ मखस्य ३७. ६
इन्द्राग्नी अपादियम् ३३. ९३
इन्द्राग्नी अव्यथमाना १४. ११
इन्द्राग्नी आगतं सुत ७. ३१
इन्द्राग्नी मित्रावरुणा ३३. ४९
इन्द्राग्न्योः पक्षतिः २५. ५
इन्द्राय त्वा वसुमते रुद्रवत ६. ३२
इन्द्राय त्वा वसुमते रुद्रवते ३८. ८
इन्द्रायाहि चित्रभानो २०. ८७
इन्द्रायाहि तूतुजान २०. ८९
इन्द्रायाहि धियेषितो २०. ८८
इन्द्रायाहि वृत्रहन्पिबा २६. ५
इन्द्रायेन्दुं सरस्वती २०. ५७
इन्द्रेमम्प्रतरान्नय १७. ५१
इन्द्रेहि मत्स्यन्धसो ३३. २५
इन्द्रो विश्वस्य राजति ३६. ८
इन्द्रो वृत्रमवृणोच्छर्धनीतिः ३३. २६
इन्धानास्त्वा शतं हिमा ३. १८
इमं साहस्रं शतधारमुत्सं १३. ४९
इमं स्तनमूर्जस्वन्त १७. ८७
इमञ्जीवेभ्यः परिधि ३५. १५
इमन्देवा असपत्नं ९. ४०
१०. १८
इमन्नो देव सवितर्यज्ञम् ११. ८
इममूर्णायुं वरुणस्य १३. ५०
इमम्मा हिंसीरेकशफम् १३. ४८
इमम्मा हिंसीर्द्विपादम् १३. ४७
इमम्मे वरुण श्रुधी २१. १
इमा उ त्वा पुरूवसो ३३. ८१
इमा गिर आदित्येभ्यो ३४. ५४
इमा ते वाजिन्नवमार्जना २९. १६
इमा नु कम्भुवना २५. ४६
इमान्ते धियम्प्रभरे ३३. २९
इमामगृभ्णन्नशनामृतस्य २२. २
इमा मे अग्न इष्टका १७. २
इमा रुद्राय तवसे १६. ४८
इमौ ते पक्षावजरौ १८. ५२
इयं वेदिः परो अन्तः २३. ६२

इयत्यग्र आसीन्मखस्य	३७. ५
इयदस्यायुरस्यायुर्मयि	१०. २५
इयन्ते यज्ञिया तनूरपो	४. १३
इयमुपरि मतिस्तस्यै	१३. ५८
इरज्यन्नग्ने प्रथयस्व	१२. १०९
इरावती धेनुमती हि	५. १६
इषमूर्जमहमित आदमृतस्य	१२. १०५
इषश्चोर्जश्च शारदावृतू	१४. १६
इषिरो विश्वव्यचा	१८. ४१
इषे त्वोर्जे त्वा वायव	१. १
इषे पिन्वस्वोर्जे पिन्वस्व	३८. १४
इषे राये रमस्व सहसे	१३. ३५
इष्कर्तारमध्वरस्य प्रचेतसं	१२. ११०
इष्कृतिर्नाम वो मातायो	१२. ८३
इष्टो अग्निराहुतः पिपर्तु	१८. ५७
इष्टो यज्ञो भृगुभिराशीर्दा	१८. ५६
इह रतिरिह रमध्वमिह	८. ५१
इहैवाग्ने अधिधारया	२७. ४
ईडितो देवैर्हरिवाँ	२०. ३८
ईड्यश्चासि वन्द्यश्च	२९. ३
ईदृक्षास एतादृक्षास	१७. ८४
ईदृङ्चान्यादृङ् सदृङ्	१७. ८१
ईर्मान्तासः सिलिक	२९. २१
ईशानाय परस्वत	२४. २८
ईशा वास्यमिदं सर्वं	४०. १
उक्ताः सञ्चरा एताः	२४. १९
उक्ताः सञ्चरा एता० कृष्णा	२४. १५
उक्ताः सञ्चरा एता० प्राश्टङ्गा	२४. १७
उक्थेभिर्वृत्रहन्तमा	३३. ७६
उक्षा समुद्रो अरुणः	१७. ६०
उखाङ्कृणोतु शक्त्या	११. ५७
उग्रं लोहितेन मित्रं	३९. ९
उग्रश्च भीमश्च ध्वान्तश्च	३९. ७
उग्रा विघनिना मृध	३३. ६१
उच्चा ते जातमन्धसो	२६. १६
उच्छुष्मा ओषधीनाङ्गावो	१२. ८२
उत नोहिर्बुध्न्यः शृणोत्वज	३४. ५३
उत स्मास्य द्रवतस्तुरण्यतः	९. १५
उतेदानीम्भगवन्तः स्यामोत	३४. ३७
उत्क्राम महते सौभगाया	११. २१
उत्तानायामवभरा	३४. १४
उत्तिष्ठन्नोजसा सह	८. ३९
उत्तिष्ठ ब्रह्मणस्पते	३४. ५६
उत्थाय बृहती भवोदु	११. ६४
उत्सक्थ्या अव गुदन्धेहि	२३. २१
उत्सादेभ्यः कुब्जम्	३०. १०
उदक्रमीद्द्रविणोदा	११. २२
उदग्ने तिष्ठ प्रत्यातनुष्व	१३. १२
उदीचीमारोहानुष्टुप्	१०. १३
उदीरतामवर उत्परास	१९. ४९
उदु तिष्ठ स्वध्वरावा	११. ४१
उदुत्तमं वरुण पाश	१२. १२
उदु त्यञ्जातवेदसन्देवं० सूर्यं स्वाहा	७. ४१
उदु त्यञ्जातवेदसन्देवं० सूर्यम् ।	३३. ३१
उदु त्यञ्जातवेदसन्देवं० सूर्यम् । उपयाम	८. ४१
उदु त्वा विश्वे देवा	१२. ३१
	१७. ५३
उदेनमुत्तरान्नयाग्ने	१७. ५०
उदेषास्बाहू अतिरमुद्वर्चो	११. ८२
उद्ग्राभश्च निग्राभश्च	१७. ६४
उद्दिवं स्तभानान्तरिक्षम्	५. २७
उद्धर्षय मघवन्नायुधा	१७. ४२
उद्बुध्यस्वाग्ने प्रतिजागृहि	१५. ५४
	१८. ६१
उद्वयन्तमसस्परि स्वः	२०. २१
	२७. १०
	३५. १४
	३८. २४
उन्नत ऋषभो वामनस्त	२४. ७
उप ज्मन्नुप वेतसेवतर	१७. ६
उप त्वाग्ने हविष्मती	३. ४
उप नः सूनवो गिरः	३३. ७७
उपप्रयन्तो अध्वरम्मन्त्रं	३. ११
उपप्रागाच्छसनं वाज्यर्वा	२९. २३
उपप्रागात्परमं यत्सधस्थ	२९. २४
उपप्रागात्सुमन्मेधायि	२५. ३०
उपयामगृहीतोसि ध्रुवोसि	७. २५
उपयामगृहीतोसि प्रजा० योनिः	२३. २
उपयामगृहीतोसि प्रजा० योनि	२३. ४
उपयामगृहीतोसि बृहस्पति	८. ९

उपयामगृहीतोसि मधवे ७. ३०
उपयामगृहीतोसि सावित्रोसि ८. ७
उपयामगृहीतोसि सुशर्मासि ८. ८
उपयामगृहीतोसि हरिरसि ८. ११
उपयामगृहीतोसीन्द्राय त्वा ७. २२
उपयामगृहीतोस्यग्नये त्वा ८. ४७
उपयामगृहीतोस्यन्तर्यच्छ ७. ४
उपयामगृहीतोस्यश्विभ्यान्त्वा २०. ३३
उपयामगृहीतोस्याग्रयणोसि ७. २०
उपयामगृहीतोस्यादित्येभ्यस्त्वा ८. १
उपयामगृहीतोस्याश्विनन्तेजः १९. ८
उपश्वासय पृथिवीमुत २९. ५५
उपहूताः पितरः सोम्यासो १९. ५७
उपहूता इह गाव उपहूता ३. ४३
उपहूतो द्यौष्पितोप २. ११
उपह्वरे गिरीणां सङ्गमे २६. १५
उपावसृज त्मन्या २९. ३५
उपावीरस्युप देवान् ६. ७
उपास्मै गायता नरः ३३. ६२
उभा पिबतमश्विनोभा ३४. २८
उभाभ्यान्देव सवितः १९. ४३
उभा वामिन्द्राग्नी ३. १३
उभे सुश्चन्द्र सर्पिषो १५. ४३
उरु विष्णो विक्रमस्वोरु ५. ३८
५. ४१
उशन्तस्त्वा निधीमह्युशन्तः १९. ७०
उशिक्त्वन्देव सोमाग्नेः ८. ५०
उशिक्पावको अरतिः १२. २४
उशिगसि कविरङ्घारि ५. ३२
उपस्तच्चित्रमाभरा ३४. ३३
उषासानक्तमश्विना २०. ६१
उषासानक्ता बृहती २०. ४१
उषे यह्वी सुपेशसा २१. १७
उस्रावेतन्धूर्षाहौ ४. ३३
ऊर्क्च मे सूनृता च १८. ९
ऊर्गस्याङ्गिरस्यूर्णम्रदा ४. १०
ऊर्जं वहन्तीरमृतङ्घृत २. ३४
ऊर्जो नपाज्जातवेदः १२. १०८
ऊर्जो नपातं स हिनाय २७. ४४
ऊर्ध्वं ऊ षु ण ऊतये ११. ४२
ऊर्ध्वमेनमुच्छ्रयताद्गिरौ २३. २७
ऊर्ध्वा अस्य समिधो २७. ११
ऊर्ध्वामारोह पङ्क्तिस्त्वा १०. १४
ऊर्ध्वामेनामुच्छ्रापय २३. २६
ऊर्ध्वो भव प्रतिविद्ध्या १३. १३
ऋक्सामयोः शिल्पे ४. ९
ऋचं वाचम्प्रपद्ये मनो ३६. १
ऋचे त्वा रुचे त्वा १३. ३९
ऋचो नामास्मि यजूंषि १८. ६७
ऋजवे त्वा साधवे त्वा ३७. १०
ऋजीते परिवृङ्धि नो २९. ४९
ऋतं सत्यमृतं सत्य ११. ४७
ऋतजिच्च सत्यजिच्च १७. ८३
ऋतञ्च मेमृतञ्च मे १८. ६
ऋतये स्तेनहृदयं ३०. १३
ऋतवस्त ऋतुथा पर्वं २३. ४०
ऋतवस्ते यज्ञं वितन्वन्तु २६. १४
ऋतव स्थ ऋतावृध १७. ३
ऋतश्च सत्यश्च ध्रुवश्च १७. ८२
ऋतावानं वैश्वानर २६. ६
ऋतावानम्महिषं १२. १११
ऋताषाडृतधामाग्नि १८. ३८
ऋतुथेन्द्रो वनस्पतिः २०. ६५
ऋधगित्था स मर्त्यः ३३. ८७
एकया च दशभिश्च २७. ३३
एकयास्तुवत प्रजा १४. २८
एकस्त्वष्टुरश्वस्या २५. ४२
एकस्मै स्वाहा द्वाभ्यां २२. ३४
एका च मे तिस्रश्च १८. २४
एजतु दशमास्यो गर्भो ८. २८
एण्यह्नो मण्डूको मूषिका २४. ३६
एतं सधस्थ परि ते १८. ५९
एतआनाथ परमे १८. ६०
एतत्ते रुद्रावसन्तेन ३. ६१
एतन्ते देव सवितर्यज्ञम् २. १२
एता अर्षन्ति हृद्यात् १७. ९३
एता उ वः सुभगा २९. ५
एता ऐन्द्राग्ना द्विरूपा २४. ८
एतावद्रूपं यज्ञस्य १९. ३१
एतावानस्य महिमातो ३१. ३

एदमगन्म देवयजनम् ४. १
एधोस्येधिषीमहि० धेहिं । ३८. २५
एधोस्येधिषीमहि० धेहि । समाववर्ति २०. २३
एना विश्वान्यर्य आ २६. १८
एना वो अग्निन्नमसोर्जो १५. ३२
एभिर्नो अर्कैर्भवा १५. ४६
एवश्छन्दो वरिवश्छन्दः १५. ४
एवेदिन्द्रं वृषणं वज्रबाहुं २०. ५४
एष च्छागः पुरो अश्वेन २५. २६
एष ते गायत्रो भाग ४. २४
एष ते निर्ऋते भाग ९. ३५
एष ते रुद्र भागः सह ३. ५७
एष व स्तोमो मरुत ३४. ४८
एष स्य वाजी क्षिपणि ९. १४
एषा ते अग्ने समित्तया २. १४
एषा ते शुक्र तनूरेतद् ४. १७
एषा वः सा सत्या ९. १२
एषो ह देवः प्रदिशोनु ३२. ४
एह्यू षुब्रवाणि तेग्न २६. १३
ऐन्द्रः प्राणो अङ्गे अङ्गे ६. २०
ओजश्च मे सहश्च १८. ३
ओमासश्चर्षणीधृतो ७. ३३
ओषधयः प्रतिगृभ्णीतं ११. ४८
ओषधयः समवदन्त १२. ९६
ओषधीः प्रतिमोदध्वम् १२. ७७
ओषधीरिति मातरस्तद्वो १२. ७८
कः स्विदेकाकी चरति २३. ९
२३. ४५
ककुभं रूपं वृषभस्य ८. ४९
कत्यस्य विष्ठाः कत्यक्षराणि २३. ५७
कदा चन प्रयुच्छस्युभे ८. ३
कदा चन स्तरीरसि० पृच्यत ८. २
कदा चन स्तरीरसि० पृच्यते । ३. ३४
कन्या इव वहतुमेतवा १७. ९७
कया त्वन्न ऊत्याभि ३६. ७
कया नश्चित्र आभुव २७. ३९
३६. ४
कल्पन्तान्ते दिशस्तुभ्य ३५. ९
कवष्यो न व्यचस्वती २०. ६०
कस्त्वाच्छ्यति कस्त्वा २३. ३९
कस्त्वा युनक्ति स त्वा १. ६
कस्त्वा विमुञ्चति स त्वा २: २३
कस्त्वा सत्यो मदानाम् २७. ४०
३६. ५
का ईमरे पिशङ्गिला २३. ५५
काण्डात्काण्डात्प्ररोहन्ती १३. २०
कामङ्कामदुघे धुक्ष्व १२. ७२
काय स्वाहा कस्मै २२. २०
कार्पिरसि समुद्रस्य ६. २८
काव्योराजानेषु क्रत्वा ३३. ७२
का स्विदासीत्पूर्वचित्तिः २३. ११
२३. ५३
किं स्वित्सूर्यसमञ्ज्योति २३. ४७
किं स्विदासीदधिष्ठान १७. १८
किं स्विद्वनङ्क उ स वृक्ष १७. २०
कुक्कुटोसि मधुजिह्व १. १६
कुतस्त्वमिन्द्र माहिनः ३३. २७
कुम्भो वनिष्ठुर्जनिता १९. ८७
कुर्वन्नेवेह कर्माणि ४०. २
कुलायिनी घृतवती १४. २
कुविदङ्ग० यजन्ति । २३. ३८
कुविदङ्ग० यजन्ति । उपयाम० सुत्राम्ण १९. ६
कुविदङ्ग० यजन्ति । उपयाम० सुत्राम्णे १०. ३२
कृणुष्व पाजः प्रसितिन्न १३. ९
कृष्णग्रीवा आग्नेयाः शितिभ्रवो २४. ६
कृष्णग्रीवा आग्नेया बभ्रवः सौम्याः २४. ९
कृष्णग्रीवा आग्नेया बभ्रवः सौम्या २४ १४
कृष्णा भौमा धूम्रा २४. १०
कृष्णोस्याखरेष्ठोग्नये २. १
केतुङ्कृण्वन्नकेतवे पेशो २९. ३७
केष्वन्तः पुरुष आविवेश २३. ५१
को अस्य वेद भुवनस्य २३. ५९
कोदात्कस्मा अदात् ७. ४८
कोसि कतमोसि कस्मै २०. ४
कोसि कतमोसि कस्यासि ७. २९
क्रमध्वमग्निना नाकमुख्यं १७. ६५
क्रव्यादमग्निम्प्रहिणोमि ३५. १९
क्षत्रस्य त्वा परस्पाय ३८. १९
क्षत्रस्य योनिरसि २०. १
क्षत्रस्योल्बमसि क्षत्रस्य १०. ८

क्षत्रेणाग्ने स्वायुः संरभस्व	२७.	५
क्षपो राजन्नुत त्मनाग्ने	१५.	३७
खड्गो वैश्वदेवः श्वा	२४.	४०
गणानान्त्वा गणपतिं	२३.	१९
गन्धर्वस्त्वा विश्वावसुः	२.	३
गर्भो अस्योषधीनाङ्गर्भो	१२.	३७
गर्भो देवानाम्पिता	३७.	१४
गायत्रञ्छन्दोसि त्रैष्टुभ	३८.	६
गायत्री त्रिष्टुब्जगत्य	२३.	३३
गायत्रेण त्वा छन्दसा	१.	२७
गाव उपावतावतम्	३३.	१९
	३३.	७१
गृहा मा बिभीत मा	३.	४१
गोत्रभिदङ्गोविदं वज्रबाहु	१७.	३८
गोभिर्न्न सोममश्विना	२०.	६६
गोमदू षु णासत्या	२०.	८१
ग्रहा ऊर्जाहुतयो व्यन्तो	९.	४
ग्रीष्मेण ऋतुना देवा	२१.	२४
घर्मैतत्ते पुरीषन्तेन	३८.	२१
घृतङ्घृतपावानः पिबत	६.	१९
घृतम्मिमिक्षे घृतमस्य	१७.	८८
घृतवती भुवनानामभि	३४.	४५
घृताची स्थो धुर्यो	२.	१९
घृताच्यसि जुहूर्नाम्ना	२.	६
घृतेन सीता मधुना	१२.	७०
घृतेनाक्तौ पशूँस्त्रायेथां	६.	११
घृतेनाञ्जन्त्सम्पथो	२९.	२
चक्षुषः पिता मनसा	१७.	२५
चतस्रश्च मेष्टौ च	१८.	२५
चतुःस्रक्तिर्नाभिर्ऋतस्य	३८.	२०
चतुस्त्रिंशत्तन्तवो ये	८.	६१
चतुस्त्रिंशद्वाजिनो	२५.	४१
चत्वारि शृङ्गा त्रयो	१७.	९१
चन्द्रमा अप्स्वन्तरा	३३.	९०
चन्द्रमा मनसो जात	३१.	१२
चित्तिञ्जुहोमि मनसा	१७.	७८
चित्पतिर्मा पुनातु	४.	४
चित्रन्देवाना॰ तस्थुषश्च	१३.	४६
चित्रन्देवाना॰ तस्थुषश्च स्वाहा	७.	४२
चिदसि तया देवतया	१२.	५३
चिदसि मनासि धीरसि	४.	१९
चोदयित्री सूनृताना	२०.	८५
जनयत्यै त्वा संयौमीदमग्ने	१.	२२
जनस्य गोपा अजनिष्ट	१५.	२७
जनिष्ठा उग्रः सहसे	३३.	६४
जवो यस्ते वाजिन्निहितो	९.	९
जिह्वा मे भद्रं वाङ्महो	२०.	६
जीमूतस्य भवति प्रतीकं	२९.	३८
जुषाणो बर्हिर्हरिवान्न	२०.	३९
ज्यैष्ठ्यञ्च म आधिपत्यञ्च	१८.	४
ज्योतिरसि विश्वरूपं	५.	३५
तं यज्ञं बर्हिषि प्रौक्षन्	३१.	९
तं वो दस्ममृतीषहं	२६.	११
त आयजन्त द्रविणं	१७.	२८
तच्चक्षुर्देवहितम्पुरस्ता	३६.	२४
ततो विराडजायत	३१.	५
तत्त्वा यामि ब्रह्मणा	१८.	४९
	२१.	२
तत्सवितुर्वरेण्यम्भर्गो	३.	३५
	२२.	९
	३०.	२
तत्सूर्यस्य देवत्व	३३.	३७
तदश्विना भिषजा	१९.	८२
तदस्य रूपममृतं	१९.	८१
तदिदास भुवनेषु	३३.	८०
तदेजति तन्नैजति	४०.	५
तदेवाग्निस्तदादित्य	३२.	१
तद्विप्रासो विपन्यवो	३४.	४४
तद्विष्णोः परमम्पदं	६.	५
तनूनपाच्छुचिव्रत	२१.	१३
तनूनपात्पथ ऋतस्य	२९.	२६
तनूनपादसुरो विश्ववेदा	२७.	१२
तनूपा अग्नेसि तन्वम्मे	३.	१७
तनूपा भिषजा सुते	२०.	५६
तन्तुना रायस्पोषेण	१५.	७
तन्त्वा शोचिष्ठ दीदिवः	३.	२६
तन्त्वा समिद्भिरङ्गिरो	३.	३
तन्नस्तुरीपमद्भुतम्	२७.	२०
तन्नो वातो मयोभु	२५.	१७
तन्मित्रस्य वरुणस्या	३३.	३८

तपश्च तपस्यश्च शैशिरा	१५. ५७
तपसे कौलालम्मायायै	३०. ७
तपसे स्वाहा तप्यते स्वाहा	३९. १२
तप्तायनी मेसि वित्तायनी	५. ९
तमिद्गर्भम्प्रथमन्दध्र	१७. ३०
तमिन्द्रम्पशवः सचा	२०. ६९
तमीशानञ्जगतस्तस्थुष	२५. १८
तमु त्वा दध्यङ्ङृषिः	११. ३३
तमु त्वा पाथ्यो वृषा	११. ३४
तम्पत्नीभिरनुगच्छेम	१५. ५०
तम्प्रत्नथा पूर्वथा	७. १२
तरणिर्विश्वदर्शतो	३३. ३६
तव भ्रमास आशुया	१३. १०
तव वायवृतस्पते	२७. ३४
तव शरीरम्पतयिष्ण्व	२९. २२
तवायं सोमस्त्वमेह्यर्वाङ्	२६. २३
तस्मा अरङ्गमाम वो	११. ५२ ३६. १६
तस्मादश्वा अजायन्त	३१. ८
तस्माद्यज्ञात्सर्वहुतः	३१. ६
तस्माद्यज्ञात्सर्वहुत	३१. ७
तस्य वयं सुमतौ	२०. ५२
तस्यास्ते सत्यसवसः	४. १८
तां सवितुर्वरेण्यस्य	१७. ७४
ता अस्य सूददोहसः	१२. ५५ १५. ६०
ता उभौ चतुरः पदः	२३. २०
ता न आवोढमश्विना	२०. ८३
ता ना सत्या सुपेशसा	२०. ७४
तान्पूर्वया निविदा हूमहे	२५. १६
ता भिषजा सुकर्मणा	२०. ७५
तिरश्चीनो विततो रश्मि	३३. ७४
तिस्र इडा सरस्वती	२१. १९
तिस्रस्त्रेधा सरस्वत्यश्विना	२०. ६३
तिस्रो देवीर्बर्हिरेदं	२७. १९
तिस्रो देवीर्हविषा	२०. ४३
तीव्रान्घोषान्कृण्वते	२९. ४४
तुभ्यन्ता अङ्गिरस्तम	१२. ११६
ते अस्य योषणे दिव्ये	२७. १७
ते आचरन्ती समनेव	२९. ४१

तेजः पशूनां हवि	१२. ९५.
तेजोसि तेजो मयि	१९. ९
तेजोसि शुक्रममृत	२२. १
ते नो अर्वन्तो हवनश्रुतो	९. १७
ते हि पुत्रासो अदितेः	३. ३३
त्रया देवा एकादश	२०. ११
त्रातारमिन्द्रमवितार	२०. ५०
त्रिंशद्धाम विराजति	३. ८
त्रिधा हितम्पणिभिर्गुह्य	१७. ९२
त्रिपादूर्ध्व उदैत्पुरुषः	३१. ४
त्रिवृदसि त्रिवृते त्वा	१५. ९
त्रीणि त आहुर्दिवि	२९. १५
त्रीणि पदा विचक्रमे	३४. ४३
त्रीणि शता त्री सहस्रा	३३. ७
त्रीन्त्समुद्रान्त्समसृपत्	१३. ३१
त्र्यम्बकं यजामहे	३. ६०
त्र्यवयो गायत्र्यै पञ्चा	२४. १२
त्र्यविश्च मे त्र्यवी च	१८. २६
त्र्यायुषञ्जमदग्नेः	३. ६२
त्वं यविष्ठ दाशुषो	१३. ५२ १८. ७७
त्वं सोम पितृभिः	१९. ५४
त्वं सोम प्रचिकितो	१९. ५२
त्वन्नो अग्ने तव देव	३४. १३
त्वन्नो अग्ने वरुणस्य	२१. ३
त्वमग्न ईडितः कव्यवाहना	१९ ६६
त्वमग्ने द्युभिस्त्वमाशुशुक्षणि	११. २७
त्वमग्ने प्रथमो अङ्गिरा	३४. १२
त्वमग्ने व्रतपा असि	४. १६
त्वमङ्ग प्रशंसिषो देवः	६. ३७
त्वमिन्द्र प्रतूर्तिष्वभि	३३. ६६
त्वमिमा ओषधीः सोम	३४. २२
त्वमुत्तमास्योषधे तव	१२. १०१
त्वया हि नः पितरः	१९. ५३
त्वष्टा तुरीपो अद्भुत	२१. २०
त्वष्टा दधच्छुष्ममिन्द्राय	२०. ४४
त्वष्टा वीरन्देवकाम	२९. ९
त्वां हि मन्द्रतममर्कशोकै	३३. १३
त्वाङ्गन्धर्वा अखनँस्त्वामिन्द्र	१२. ९८
त्वाञ्चित्रश्रवस्तम हवन्ते	१५. ३१

त्वामग्ने अङ्गिरसो गुहा	१५. २८
त्वामग्ने पुष्करादध्यथर्वा	१५. २२
त्वामग्ने यजमाना अनु	१२. २८
त्वामग्ने वृणते ब्राह्मणा	२७. ३
त्वामद्य ऋष आर्षेय	२१. ६१
त्वामिद्धि हवामहे सातौ	२७. ३७
त्वे अग्ने स्वाहुत प्रियासः	३३. १४
दंष्ट्राभ्याम्मलिम्लूञ्जम्भ्यै	११. ७८
दक्षिणामारोह त्रिष्टुप्त्वा	१०. ११
दधिक्राव्णो अकारिष	२३. ३२
दस्रा युवाकवः सुता	३३. ५८
दिग्भ्यः स्वाहा चन्द्राय	३९. २
दिवः पृथिव्याः पर्योज	२९. ५३
दिवस्परि प्रथमञ्जज्ञे	१२. १८
दिवि धा इमं यज्ञमिमं	३८. ११
दिवि पृष्टो अरोचता	३३. ९२
दिवि विष्णुर्व्यक्रंस्त	२. २५
दिवो मूर्द्धासि पृथिव्या	१८. ५४
दिवो वा विष्ण उत वा	५. १९
दीक्षायै रूपं शष्पाणि	१९. १३
दीर्घायुस्त ओषधे	१२. १००
दुरो देवीर्दिशो मही	२१. १६
दृंहस्व देवि पृथिवि	११. ६९
दृते दृंह मा । ज्योक्ते	३६. १९
दृते दृंह मा मित्रस्य	३६. १८
दृशानो रुक्म उर्व्या	१२. १
	१२. २५
दृष्ट्वा परिस्रुतो रसं	१९. ७९
दृष्ट्वा रूपे व्याकरोत्	१९. ७७
देव इन्द्रो० त्रिबन्धुरो	२८. १९
देव इन्द्रो० सरस्वत्यश्वि	२१. ५५
देवकृतस्यैनसोवयजनमसि	८. १३
देवन्देवं वोवसे देव	३३. ९१
देवम्बर्हिः सरस्वती	२१. ४८
देवम्बर्हिरिन्द्रं सुदेव	२८. १२
देवम्बर्हिर्वयोधसन्देव	२८. ३५
देवम्बर्हिर्वारितीनान्देवमिन्द्रं	२८. ४४
देवम्बर्हिर्वारितीनान्देवमिन्द्र	२८. २१
देवम्बर्हिर्वारितीनामध्वरे	२१. ५७
देवश्रुतौ देवेष्वाघोषतम्	५. १७

देव सवितः० स्वदतु ।	११. ७
	३०. १
देव सवितः० स्वदतु स्वाहा	९. १
देव सवितरेष ते	५. ३९
देवस्त्वा सवितोद्वपतु	११. ६३
देवस्य चेततो महीम्	२२. ११
देवस्य त्वा० अग्नये जुष्टं	१. १०
देवस्य त्वा० अग्नीषोमाभ्यां	६. ९
देवस्य त्वा० अश्विनोर्भैषज्येन	२०. ३
देवस्य त्वा० आददे गायत्रेण	११. ९
देवस्य त्वा० आददेदित्यै	३८. १
देवस्य त्वा० आददेध्वरकृतं	१. २४
देवस्य त्वा० आददे नारिरसि	३७. १
देवस्य त्वा० आददे नार्यसी० बृहन्नसि	५. २२
देवस्य त्वा० आददे नार्यसी० यवोसि	५. २६
	६. १
देवस्य त्वा० आददे रावा	६. ३०
देवस्य त्वा० उपांशोर्वीर्येण	९. ३८
देवस्य त्वा० पृथिव्याः	११. २८
देवस्य त्वा० सं वपामि	१. २१
देवस्य त्वा० सरस्वत्यै० यन्तुर्यन्त्रिये	९. ३०
देवस्य त्वा० सरस्वत्यै० यन्तुर्यन्त्रेणाग्नेः	१८. ३७
देवस्य सवितुर्मतिमास	२२. १४
देवस्याहं० सत्यप्रसवसो	९. १३
देवस्याहं० सत्यसवसो	९. १०
देवहूर्यज्ञ आ च वक्षत्	१७. ६२
देवा गातुविदो गातुं	८. २१
देवा देवानाम्भिषजा	२१. ५३
देवा दैव्या० देवमिन्द्रं	२८. ४०
देवा दैव्या० देवमिन्द्र	२८. १७
देवानाम्भद्रा सुमति	२५. १५
देवान्दिवमगन्यज्ञस्ततो	८. ६०
देवा यज्ञमतन्वत	१९. १२
देवासो हि ष्मा मनवे	३३. ९४
देवी उषासानक्ता	२८. ३७
देवी उषासानक्तेन्द्रं	२८. १४
देवी उषासावश्विना	२१. ५०
देवी ऊर्जा० सुदुघेन्द्रे	२१. ५२
देवी ऊर्जा० सुदुघे पयसेन्द्रं	२८. ३९
देवी ऊर्जा० सुदुघे पयसेन्द्र	२८. १६

देवी जोष्ट्री० देवमिन्द्रं	२८. ३८
देवी जोष्ट्री० देवमिंन्द्र	२८. १५
देवी जोष्ट्री सरस्वत्यश्वि	२१. ५१
देवी द्यावापृथिवी	३७. ३
देवीरापः शुद्धा वोढ्वं	६. १३
देवीराप एष वो	८. २६
देवीरापो अपान्नपाद्	६. २७
देवीर्द्वार इन्द्रं सङ्घाते	२८. १३
देवीर्द्वारो अश्विना	२१. ४९
देवीर्द्वारो वयोधसं	२८. ३६
देवीस्तिस्रस्तिस्रो देवीः	२८. १८
देवीस्तिस्रस्तिस्रो देवीरश्विनेडा	२१. ५४
देवीस्तिस्रस्तिस्रो देवीर्वयोधसं	२८. ४१
देवेन्नो मनसा देव	३४. २३
देवेभ्यो हि प्रथमं	३३. ५४
देवो अग्निः स्विष्टकृद्देवमिन्द्रं	२८. ४५
देवो अग्निः स्विष्टकृद्देवमिंन्द्र	२८. २२
देवो अंग्निः स्विष्टकृद्देवान्	२१. ५८
देवो देवै० अश्विभ्यां	२१. ५६
देवो देवै० मधुशाखः	२८. २०
देवो नराशंसो देवमिन्द्रं	२८. ४२
देवो वनस्पतिर्देवमिन्द्रं	२८. ४३
देव्यो वम्र्यो भूतस्य	३७. ४
देहि मे ददामि ते	३. ५०
दैव्या अध्वर्यवस्त्वा	२३. ४२
दैव्या मिमाना मनुषः	२०. ४२
दैव्याय धर्त्रे जोष्ट्रे	१७. ५६
दैव्यावध्वर्यू० तम्प्रत्नथायं वेनः	३३. ७३
दैव्यावध्वर्यू० तम्प्रत्नथायं वेनश्चित्रं	३३. ३३
दैव्या होतारा ऊर्ध्वं	२७. १८
दैव्या होतारा प्रथमा	२९. ३२
दैव्या होतारा भिषजेन्द्रेण	२१. १८
द्यास्मा लेखीरन्तरिक्षम्	५. ४३
द्युभिरक्तुभिः परिपात	३४. ३०
द्यौः शान्तिरन्तरिक्षं	३६. १७
द्यौरासीत्पूर्वचित्ति	२३. १२ २३. ५४
द्यौस्ते पृथिव्यन्तरिक्षं	२३. ४३
द्यौस्ते पृष्ठम्पृथिवी	११. २०
द्रप्सश्चस्कन्द पृथिवी	१३. ५
द्रविणोदाः पिपीषति	२६. २२
द्रापे अन्धसस्पते	१६. ४७
द्रुपदादिव मुमुचानः	२०. २०
द्वन्नः सर्पिरासुतिः	११. ७०
द्वारो देवीरन्वस्य	२७. १६
द्विपदा याश्चतुष्पदा	२३. ३४
द्वे विरूपे चरतः	३३. ५
द्वे सृती अशृणवम्	१९. ४७
धन्वना गा धन्वनाजि	२९. ३९
धर्ता दिवो विभाति	३७. १६
धाता रातिः सविते	८. १७
धानाः करम्भः सक्तवः	१९. २१
धानानां रूपङ्कुवलम्	१९. २२
धानावन्तङ्करम्भिण	२०. २९
धान्यमसि धिनुहि	१. २०
धामच्छदग्निरिन्द्रो	१८. ७६
धामन्ते विश्वम्भुवन	१७. ९९
धूम्रान्वसन्तायालभते	२४. ११
धूम्रा बभ्रुनीकाशाः	२४. १८
धूरसि धूर्व धूर्वन्तन्धूर्व	१. ८
धृष्टिरस्यपाग्ने अग्निमा	१. १७
ध्रुवक्षितिर्ध्रुवयोनिर्ध्रुवासि	१४. १
ध्रुवसदन्त्वा नृपदम्मनः	९. २
ध्रुवासि धरुणास्तृता	१३. १६
ध्रुवासि धरुणेतो जज्ञे	१३. ३४
ध्रुवासिं ध्रुवोयं यजमानो	५. २८
ध्रुवोसि पृथिवीन्दृंह	५. १३
नक्तोषासा समनसा	१२. २ १७. ७०
नक्षत्रेभ्यः स्वाहा नक्षत्रियेभ्यः	२२. २८
न तं विदाथ य इमा	१७. ३१
न तद्रक्षांसि न पिशाचा	३४. ५१
न तस्य प्रतिमा अस्ति	३२. ३
न ते दूरे परमा चिद्	३४. १९
न त्वावाँ अन्यो दिव्यो	२७. ३६
नदीभ्यः पौञ्जिष्ठमृक्षीकाभ्यो	३०. ८
नभश्च नभस्यश्च वार्षिकावृतू	१४. १५
नमः कपर्दिने च व्युप्तकेशाय	१६. २९
नमः कूप्याय चावट्याय	१६. ३८
नमः कृत्स्नायतया धावते	१६. २०

नमः पर्णाय च पर्णशदाय	१६. ४६
नमः पार्याय चावार्याय	१६. ४२
नमः शङ्गवे च पशुपतये	१६. ४०
नमः शम्भवाय च मयोभवाय	१६. ४१
नमः शुष्क्याय च हरित्याय	१६. ४५
नमः श्वभ्यः श्वपतिभ्यश्च	१६. २८
नमः सभाभ्यः सभापतिभ्यश्च	१६. २४
नमः सिकत्याय च प्रवाह्याय	१६. ४३
नमः सु ते निर्ऋते तिग्मतेजो	१२. ६३
नमः सेनाभ्यः सेनानिभ्यश्च	१६. २६
नमः सोभ्याय च प्रतिसर्याय	१६. ३३
नमः स्रुत्याय च पथ्याय	१६. ३७
नम आशवे चाजिराय	१६. ३१
नम उष्णीषिणे गिरिचराय	१६. २२
नमस्त आयुधायानातताय	१६. १४
नमस्तक्षभ्यो रथकारेभ्यश्च	१६. २७
नमस्ते अस्तु विद्युते	३६. २१
नमस्ते रुद्र मन्यव	१६. १
नमस्ते हरसे शोचिषे	१७. ११
	३६. २०
नमो गणेभ्यो गणपतिभ्यश्च	१६. २५
नमो ज्येष्ठाय च कनिष्ठाय	१६. ३२
नमो धृष्णवे च प्रमृशाय	१६. ३६
नमो बभ्लुशाय व्याधिने	१६. १८
नमो बिल्मिने च कवचिने	१६. ३५
नमो मित्रस्य वरुणस्य	४. ३५
नमो रोहिताय स्थपतये	१६. १९
नमो वः पितरो रसाय	२. ३२
नमो वञ्चते परिवञ्चते	१६. २१
नमो वन्याय च कक्ष्याय	१६. ३४
नमो वात्याय च रेष्म्याय	१६. ३९
नमो विसृजद्भ्यो विद्ध्यद्भ्यश्च	१६. २३
नमो व्रज्याय च गोष्ठ्याय	१६. ४४
नमोस्तु नीलग्रीवाय	१६. ८
नमोस्तु रुद्रेभ्यो ये दिवि	१६. ६४
नमोस्तु रुद्रेभ्यो येन्तरिक्षे	१६. ६५
नमोस्तु रुद्रेभ्यो ये पृथिव्यां	१६. ६६
नमोस्तु सर्पेभ्यो ये	१३. ६
नमो हिरण्यबाहवे	१६. १७
नमो ह्रस्वाय च वामनाय	१६. ३०

न यत्परो नान्तर	२०. ८२
नराशंसः प्रति शूरो	२०. ३७
नराशंसस्य महिमानमेषा	२९. २७
नर्माय पुँश्चलूं हसाय	३०. २०
नवदशभिरस्तुवत	१४. ३०
नवभिरस्तुवत पितरो	१४. २९
नवविंशत्यास्तुवत	१४. ३१
न वा उ एतन्० यत्रासते	२३. १६
न वा उ एतन्० हरी ते	२५. ४४
नहि तेषाममा चन	३. ३२
नहि स्पशमविदन्नन्य	३३. ६०
नाना हि वान्देवहितं	१९. ७
नाभा पृथिव्याः समिधाने	११. ७६
नाभिर्मे चित्तं विज्ञानम्	२०. ९
नाभ्या आसीदन्तरिक्षं	३१. १३
नार्यस्ते पत्न्यो लोम	२३. ३६
नाशयित्री बलासस्यार्शस	१२. ९७
निक्रमणन्निषदनं	२५. ३८
नियुत्वान्वायवागह्ययं	२७. २९
निवेशनः सङ्गमनो वसूनां	१२. ६६
निषसाद० सुक्रतुः ।	१०. २७
निषसाद० सुक्रतुः । मृत्योः	२०. २
नि होता होतृषदने	११. ३६
नीलग्रीवाः शितिकण्ठाः	१६. ५७
नीलग्रीवाः शितिकण्ठा	१६. ५६
नृत्ताय सूतङ्गीताय	३०. ६
नृषदे वेडप्सुषदे	१७. १२
पञ्च दिशो दैवीर्यज्ञ	१७. ५४
पञ्च नद्यः सरस्वती	३४. ११
पञ्चस्वन्तः पुरुष	२३. ५२
पथस्पथः परिपतिं	३४. ४२
पयः पृथिव्यास्पय	१८. ३६
पयसा शुक्रममृत	१९. ८४
पयसो रूपं यद्यवा	१९. २३
पयसो रेत आभृतन्तस्य	३८. २८
परमस्याः परावतो	११. ७२
परमेष्ठी० ज्योतिष्मतीम्	१५. ५८
परमेष्ठी० व्यचस्वतीं	१५. ६४
परमेष्ठ्यभिधीतः प्रजापति	८. ५४
परम्मृत्यो अनुपरेहि	३५. ७

परस्या अधि संवतोवराँ ११. ७१
परि ते दूडभो रथोस्माँ ३. ३६
परि ते धन्वनो हेति १६. १२
परि त्वा गिर्वणो गिर ५. २९
परि त्वाग्ने पुरं वयं ११. २६
परि द्यावापृथिवी सद्य ३२. १२
परि नो रुद्रस्य हेति १६. ५०
परि माग्ने दुश्चरिताद् ४. २८
परि वाजपतिः कवि ११. २५
परिवीरसि परि त्वा ६. ६
परीतो षिञ्चता सुतं १९. २
परीत्य भूतानि परीत्य ३२. ११
परीमे गामनेषत ३५. १८
परो दिवा पर एना १७. २९
पवमानः सो अद्य नः १९. ४२
पवित्रेण पुनीहि मा १९. ४०
पवित्रे स्थो० अनिसृष्टमसि १०. ६
पवित्रे स्थो० देवीरापो १. १२
पशुभिः पशूनाप्नोति १९. २०
पष्ठवाट् च मे पष्ठौही च १८. २७
पष्ठवाहो विराज उक्षाणो २४. १३
पातन्नो अश्विना दिवा २०. ६२
पावकया यश्चितयन्त्या १७. १०
पावकवर्चाः शुक्रवर्चा १२. १०७
पावका नः सरस्वती २०. ८४
पाहि नो अग्न एकया २७. ४३
पिता नोसि पिता नो ३७. २०
पितुन्नु स्तोषम्महो ३४. ७
पितृभ्यः स्वधायिभ्यः १९. ३६
पीवो अन्ना रयिवृधः २७. २३
पुत्रमिव पितरा १०. ३४
२०. ७७
पुनन्तु मा देवजनाः १९. ३९
पुनन्तु मा पितरः १९. ३७
पुनरासद्य सदनमपश्च १२. ३९
पुनरूर्जा निवर्तस्व १२. ९
१२. ४०
पुनर्नः पितरो मनो ३. ५५
पुनर्मनः पुनरायुर्म ४. १५
पुनस्त्वादित्या रुद्रा १२. ४४
पुनाति ते परिस्रुतं १९. ४
पुरा क्रूरस्य विसृपो १. २८
पुरीष्यासो अग्नयः १२. ५०
पुरीष्योसि विश्वभरा ११. ३२
पुरुदस्मो विषुरूप ८. ३०
पुरुष एवेदं सर्वं ३१. २
पुरुषमृगश्चन्द्रमसो २४. ३५
पूर्णा दर्वि परापत ३. ४९
पूषणं वनिष्ठुनान्धाहीन् २५. ७
पूषन्तव व्रते वयन्न ३५. ४१
पूषा पञ्चाक्षरेण पञ्च ९. ३२
पृच्छामि त्वा चितये २३. ४९
पृच्छामि त्वा परमन्त २३. ६१
पृथिवि देवयजन्योषध्यास्ते १. २५
पृथिवी च म इन्द्रश्च १८. १८
पृथिवी च्छन्दोन्तरिक्षञ्छन्दो १४. १९
पृथिव्याः पुरीषमस्यप्सो १४. ४
पृथिव्याः सधस्थादग्निम् ११. १६
पृथिव्या अहमुदन्तरिक्ष १७. ६७
पृथिव्यै स्वाहान्तरिक्षाय २२. २९
पृश्निस्तिरश्चीनपृश्नि २४. ४
पृषदश्वा मरुतः पृश्नि २५. २०
पृष्टीर्मे राष्ट्रमुदरमंसौ २०. ८
पृष्टो दिवि पृष्टो अग्निः १८. ७३
प्रघासिनो हवामहे ३. ४४
प्रजापतये च वायवे २४. ३०
प्रजापतये त्वा जुष्ट २२. ५
प्रजापतये पुरुषान् २४. २९
प्रजापतिः सम्भ्रियमाणः ३९. ५
प्रजापतिर्विश्वकर्मा १८. ४३
प्रजापतिश्चरति गर्भे ३१. १९
प्रजापतिष्ट्वा सादयत्वपाम् १३. १७
प्रजापते० अस्तु वयं २३. ६५
प्रजापते० अस्त्वयमसुष्य १०. २०
प्रजापतेस्तपसा वावृधानः २९. ११
प्रजापतौ त्वा देवताया ३५. ६
प्र तद्विष्णु स्तवते ५. २०
प्र तद्वोचेदमृतन्नु ३२. ९
प्रति क्षत्रे प्रतितिष्ठामि २०. १०
प्रतिपदसि प्रतिपदे १५. ८

प्रति पन्थामपद्महि ४. २९
प्रतिश्रुत्काया अर्तन ३०. १९
प्रति स्पशो विसृज १३. ११
प्रतीचीमारोह जगती १०. १२
प्रतूर्त वाजिन्नाद्रव ११. १२
प्रतूर्वन्नेह्यवक्रामन् ११. १५
प्रत्युष्टं० अनिशितो १. २९
प्रत्युष्टं० उर्वन्तरिक्ष १. ७
प्रथमा द्वितीयैर्द्वितीया २०. १२
प्रथमा वां सरथिना २९. ७
प्र नूनम्ब्रह्मणस्पति ३४. ५७
प्र नो यच्छत्वर्यमा ९. २९
प्र पर्वतस्य वृषभस्य १०. १९
प्रप्रायमग्निर्भरतस्य १२. ३४
प्र बाहवा सिसृतञ्जीवसे २१. ९
प्रमन्महे शवसानाय ३४. १६
प्रमुञ्च धन्वनस्त्वमुभयो १६. ९
प्र याभिर्यासि दाश्वांस २७. २७
प्र व इन्द्राय बृहते ३३. ९६
प्र वायुमच्छा बृहती ३३. ५५
प्रवावृजे सुप्रया बर्हि ३३. ४४
प्रवीरया शुचयो दद्रिरे ३३. ७०
प्र वो महे मन्दमाना ३३. २३
प्र वो महे महि नमो ३४. १७
प्रसद्य भस्मना योनि १२. ३८
प्रस्तरेण परिधिना १८. ६३
प्रागपागुदगधराक् ६. ३६
प्राचीनम्बर्हिः प्रदिशा २९. २९
प्राचीमनु प्रदिशम्प्रेहि १७. ६६
प्राच्यै दिशे स्वाहा २२. २४
प्राणदा अपानदा १७. १५
प्राणपा मे अपानपा २०. ३४
प्राणम्मे पाह्यपानम्मे १४. ८
प्राणश्च मेपानश्च मे १८. २
प्राणाय मे वर्चोदा ७. २७
प्राणाय स्वाहा० अम्बे २३. १८
प्राणाय स्वाहा० चक्षुषे २२. २३
प्रातरग्निम्प्रातरिन्द्रं ३४. ३४
प्रातर्जितम्भगमुग्रं ३४. ३५
प्रेता जयता नर इन्द्रो १७. ४६
प्रेदग्ने ज्योतिष्मान्याहि १२. ३२
प्रेद्धो अग्ने दीदिहि १७. ७६
प्रैतु ब्रह्मणस्पतिः० नः। ३३. ८९
प्रैतु ब्रह्मणस्पतिः० नः। मखाय त्वा ३७. ७
प्रैतु वाजी कनिक्रदन् ११. ४६
प्रैषेभिः प्रैषानाप्नोत्या १९. १९
प्रोथदश्वो न यवसे १५. ६२
प्रोह्यमाणः सोम आगतो ८. ५६
बट्सूर्य श्रवसा महाँ ३३. ४०
बण्महाँ असि सूर्य ३३. ३९
बर्हिषदः पितर १९. ५५
बलविज्ञाय स्थविरः १७. ३७
बह्वीनाम्पिता बहुरस्य २९. ४२
बाहू मे बलमिन्द्रियं २०. ७
बीभत्सायै पौल्कसं ३०. .१७
बृहदिन्द्राय गायत २०. ३०
बृहन्निदिध्म एषा ३३. २४
बृहस्पते अति यदर्यो २६. ३
बृहस्पते परिदीया १७. ३६
बृहस्पते वाजञ्जय ९. ११
बृहस्पते सवितर्बोधयैनं २७. ८
बोधा मे अस्य वचसो १२. ४२
ब्रह्म क्षत्रम्पवते तेज १९. ५
ब्रह्म जज्ञानम्प्रथमम् १३. ३
ब्रह्मणस्पते त्वमस्य ३४. ५८
ब्रह्मणे ब्राह्मणङ्क्षत्राय ३०. ५
ब्रह्म सूर्यसमञ्ज्योति २३. ४८
ब्रह्माणि मे मतयः शं ३३. ७८
ब्राह्मणमद्य विदेयम् ७. ४६
ब्राह्मणासः पितरः २९. ४७
ब्राह्मणोस्य मुखमासीद् ३१. ११
भग एव भगवाँ अस्तु ३४. ३८
भग प्रणेतर्भग सत्यराधो ३४. ३६
भद्रङ्कर्णेभिः शृणुयाम २५. २१
भद्रा उत प्रशस्तयो १५. ३९
भद्रो नो अग्निराहुतो १५. ३८
भद्रो मेसि प्रच्यवस्व ४. ३४
भवतन्नः समनसौ ५. ३
१२. ६०
भायै दार्वाहारम्प्रभाया ३०. १२

भुज्युः सुपर्णो यज्ञो	१८. ४२
भुवो यज्ञस्य रजसश्च	१३. १५ १५. २३
भूताय त्वा नारातये	१. ११
भूम्या आखूनालभते	२४. २६
भूरसि भूमिरस्यदितिरसि	१३. १८
भूर्भुवः स्वः । तत्सवितु	३६. ३
भूर्भुवः स्वः सुप्रजाः	३. ३७
भूर्भुवः स्वर्द्यौरिव भूम्ना	३. ५
भेषजमसि भेषजङ्गवेश्वाय	३. ५९
मखस्य शिरोसि । मखाय	३७. ८
मघवे स्वाहा माधवाय	२२. ३१
मधु नक्तमुतोषसो	१३. २८
मधुमतीर्न इषस्कृधि	७. २
मधुमान्नो वनस्पति	१३. २९
मधु वाता ऋतायते	१३. २७
मधुश्च माधवश्च	१३. २५
मध्वा यज्ञन्नक्षसे	२७. १३
मनसः काममाकूतिं	३९. ४
मनस्त आप्यायतां	६. १५
मनो जूतिर्जुषतामाज्यस्य	२. १३
मनो न येषु हवनेषु	७. १७
मनो न्वाह्वामहे नाराशंसेन	३. ५३
मनो मे तर्पयत वाचम्मे	६. ३१
मन्यवेयस्तापङ्क्रोधाय	३०. १४
मयि गृह्णाम्यग्रे अग्निं	१३. १
मयि त्यदिन्द्रियम्बृहन्	३८. २७
मयीदमिन्द्र इन्द्रिय	२. १०
मयुः प्राजापत्य उलो	२४. ३१
मरुतां स्कन्धा विश्वेषा	२५. ६
मरुतो यस्य हि क्षये	८. ३१
मरुत्वन्तं वृषभं वावृधान	७. ३६
मरुत्वाँ इन्द्र वृषभो	७. ३८
मर्माणि ते वर्मणा	१७. ४९
मशकान्केशैरिन्द्रं	२५. ३
महाँ इन्द्रो नृवदा	७. ३९
महाँ इन्द्रो य ओजसा	७. ४०
महाँ इन्द्रो वज्रहस्तः	२६. १०
महानाम्न्यो रेवत्यो	२३. ३५
महि त्रीणामवोस्तु	३. ३१
मही द्यौः पृथिवी च	८. ३२ १३. ३२
महीनाम्पयोसि वर्चोदा	४. ३
महीमू षु मातरं	२१. ५
महो अग्नेः समिधानस्य	३३. १७
महो अर्णः सरस्वती	२०. ८६
मा च्छन्दः प्रमा च्छन्दः	१४. १८
मा त इन्द्र ते वयन्	१०. २२
माता च ते पिता च तेग्रं	२३. २४
माता च ते पिता च तेग्रे	२३. २५
मातेव पुत्रम्पृथिवी	१२. ६१
मा त्वाग्निर्ध्वनयीद्	२५. ३७
मा त्वा तपत्प्रिय आत्मा	२५. ४३
मा नः शंसो अररुषो	३. ३०
मा नस्तोके तनये	१६. १६
मा नो महान्तमुत	१६. १५
मा नो मित्रो वरुणो	२५. २४
मापो मौषधीर्हिंसीर्धाम्नो	६. २२
मा भेर्मा संविक्था अतमेरु	१. २३
मा भेर्मा संविक्था ऊर्जन्धत्स्व	६. ३५
मा मा हिंसीज्जनिता	१२. १०२
मा वो रिषत्खनिता	१२. ९५
मा सु भित्था मा सु	११. ६८
माहिर्भूर्मा पृदाकुः । उरुं	८. २३
माहिर्भूर्मा पृदाकुर्नमस्त	६. १२
मित्रं हुवे पूतदक्षं	३३. ५७
मित्रः संसृज्य पृथिवीम्	११. ५३
मित्रश्च म इन्द्रश्च	१८. १७
मित्रस्य चर्षणीधृतो	११. ६२
मित्रस्य मा चक्षुषेक्षध्व	५. ३४
मित्रावरुणाभ्यान्त्वा	७. २३
मित्रो न एहि सुमित्रध	४. २७
मित्रो नवाक्षरेण त्रिवृतं	९. ३३
मीढुष्टम शिवतम शिवो	१६. ५१
मुखं सदस्य शिर इत्	१९. ८८
मुञ्चन्तु मा शपथ्यादथो	१२. ९०
मूर्धानन्दिवो अरतिम्	७. २४ ३३. ८
मूर्धा वयः प्रजापति	१४. ९
मूर्धासि राड्ध्रुवासि	१४. २१

मृगो न भीमः कुचरो	१८. ७१
मेधाम्मे वरुणो ददातु	३२. १५
मो षू ण इन्द्रात्र पृत्सु	३. ४६
यः प्राणतो निमिषतो	२३. ३
	२५. ११
य आत्मदा बलदा	२५. १३
य इन्द्र इन्द्रियन्दधुः	२०. ७०
य इमा विश्वा भुवनानि	१७. १७
य इमे द्यावापृथिवी	२९. ३४
य एतावन्तश्च भूयांसश्च	१६. ६३
यकासकौ शकुन्तिका	२३. २२
यकोसकौ शकुन्तक	२३. २३
यङ्क्रन्दसी अवसा	३२. ७
यजा नो मित्रावरुणा	३३. ३
यजुर्भिराप्यन्ते ग्रहा	१९. २८
यज्जाग्रतो दूरमुदैति	१. १
यज्ञ यज्ञङ्गच्छ यज्ञपति	८. २२
यज्ञस्य दोहो विततः	८. ६२
यज्ञायज्ञा वो अग्नये	२७. ४२
यज्ञेन यज्ञमयजन्त	३१. १६
यज्ञो देवानाम्० वित्तरासत्	३३. ६८
यज्ञो देवानाम्० वित्तरासदा	८. ४
यते स्वाहा धावते	२२. ८
यतोयतः समीहसे	३६. २२
यत्ते गात्रादग्निना	२५. ३४
यत्ते पवित्रमर्चिष्यग्ने	१९. ४१
यत्ते सादे महसा	२५. ४०
यत्ते सोम दिवि ज्योति	६. ३३
यत्पुरुषं व्यदधुः कतिधा	३१. १०
यत्पुरुषेण हविषा	३१. १४
यत्प्रज्ञानमुत चेतो	३४. ३
यत्र धारा अनपेता	१८. ६५
यत्र बाणाः सम्पतन्ति	१७. ४८
यत्र ब्रह्म च क्षत्रञ्च	२०. २५
यत्रेन्द्रश्च वायुश्च	२०. २६
यत्रौषधीः समग्मत	१२. ८०
यथेमां वाचङ्कल्याणी	२६. २
यदक्रन्दः प्रथमञ्जायमान	२९. १२
यदग्ने कानि कानि चिदा	११. ७३
यदत्युपजिह्विका यद्वम्रो	११. ७४
यदत्र रिप्तं रसिनः	१९. ३५
यदद्य कच्च वृत्रहन्	३३. ३५
यदद्य सूर उदितेनागा	३३. २०
यदश्वस्य क्रविषो	२५. ३२
यदश्वाय वास उप	२५. ३९
यदस्या अंहुभेद्याः	२३. २८
यदाकूतात्समसुस्रोद्	१८. ५८
यदापिपेष मातरम्पुत्रः	१९. ११
यदापो अघ्न्या इति	२०. १८
यदाबध्नन्दाक्षायणा	३४. ५२
यदि जाग्रद्यदि स्वप्न	२०. १६
यदि दिवा यदि नक्त	२०. १५
यदिमा वाजयन्नह	१२. ८५
यदूवध्यमुदरस्यापवाति	२५. ३३
यद्ग्रामे० यच्छूद्रे	२०. १७
यद्ग्रामे० यदेनश्चकृमा	३. ४५
यद्दत्तं यत्परादानं	१८. ६४
यद्देवा देवहेडनन्देवास	२०. १४
यद्देवासो ललामगुम्	२३. २९
यद्धरिणो यवमत्ति न पुष्टं पशु	२३. ३०
यद्धरिणो यवमत्ति न पुष्टं बहु	२३. ३१
यद्धविष्यमृतुशो देवयान	२५. २७
यद्वाजिनो दाम सन्दान	२५. ३१
यद्वातो अपो अगनी	२३. ७
यद्वाहिष्ठन्तदग्नये	२६. १२
यन्ता च मे धर्ता च	१८. ७
यन्ते देवी निर्ऋति	१२. ६५
यन्त्री राड्यन्त्र्यसि	१४. २२
यन्निर्णिजा रेक्णसा	२५. २५
यन्नीक्षणम्माँस्पचन्या	२५. ३६
यन्मे छिद्रञ्चक्षुषो	३६. २
यमग्ने कव्यवाहन	१९. ६४
यमग्ने पृत्सु मर्त्यमवा	६. २९
यमश्विना नमुचेरासुरा	१९. ३४
यमश्विना सरस्वती	२०. ६८
यमाय त्वाङ्गिरस्वते	३८. ९
यमाय त्वा मखाय त्वा	३७. ११
यमाय यमसूमथर्वभ्यो	३०. १५
यमाय स्वाहान्तकाय	३९. १३
यमेन दत्तन्त्रित एन	२९. १३

यस्परिधिम्पर्यधत्था २. १७
यवानाम्भागोस्ययवाना १४. २६
यश्चिदापो महिना २७. २६
यस्तु सर्वाणि भूता ४०. ६
यस्ते अद्य कृणवद् १२. २६
यस्ते अश्वसनिर्भक्षो ८. १२
यस्ते द्रप्स स्कन्दति ७. २६
यस्ते रसः सम्भृत १९. ३३
यस्ते स्तनः शशयो ३८. ५
यस्माज्जातन्न पुरा ३२. ५
यस्मान्न जातः परो ८. ३६
यस्मिन्त्सर्वाणि भूता ४०. ७
यस्मिन्नश्वास ऋषभास २०. ७८
यस्मिन्नृचः साम यजूंषि ३४. ५
यस्य कुर्मो गृहे हवि १७. ५२
यस्य प्रयाणमन्वन्य ११. ६
यस्यायं विश्व आर्यो ३३. ८२
यस्यास्ते घोर आस १२. ६४
यस्येमे हिमवन्तो महित्वा २५. १२
यस्यै ते यज्ञियो गर्भो ८. २९
यस्यौषधीः प्रसर्पथाङ्ग १२. ८६
याँ आवह उशतो देव ८. १९
याः फलिनीर्या अफला १२. ८९
याः सेना अभीत्वरी ११. ७७
या इषवो यातुधानानां १३. ७
या ओषधीः पूर्वा जाता १२. ७५
या ओषधीः सोमराज्ञीर्बह्वीः १२. ९२
या ओषधीः सोमराज्ञीर्विष्ठिताः १२. ९३
या ते अग्नेयःशाया ५. ८
या ते घर्म दिव्या ३८. १८
या ते धामानि परमाणि १७. २१
या ते धामानि हविषा ४. ३७
या ते धामान्युश्मसि ६. ३
या ते रुद्र शिवा तनूः १६. ४९
या ते रुद्र शिवा तनू १६. २
या ते हेतिर्मीढुष्टम १६. ११
यामिषुङ्गिरिशन्त १६. ३
याम्मेधान्देवगणाः ३२. १४
यावती द्यावापृथिवी ३८. २६
या वाङ्कशा मधुमत्यश्विना ७. ११
या वो देवाः सूर्ये १३. २३
१८. ४७
या व्याघ्रं विषूचिकोभौ १९. १०
या शतेन प्रतनोषि १३. २१
याश्चेदमुपशृण्वन्ति १२. ९४
यास्ते अग्ने सूर्ये रुचो १३. २२
१८. ४६
युक्तेन मनसा वयन्देवस्य ११. २
युक्त्वाय सविता देवान् ११. ३
युक्ष्वा हि केशिना हरी ८. ३४
युक्ष्वा हि देवहूतमाँ १३. ३७
३३. ४
युजे वाम्ब्रह्म पूर्व्यन्नमोभि ११. ५
युञ्जते मन उत युञ्जते ११. ४
३७. २
युञ्जते मन उत युञ्जते० स्वाहा ५. १४
युञ्जन्ति ब्रध्नमरुषञ्चरन्त २३. ५
युञ्जन्त्यस्य काम्या हरी २३. ६
युञ्जाथां रासभं युव ११. १३
युञ्जानः प्रथमम्मन ११. १
युनक्त सीरा वि युगा १२. ६८
युवं सुराम० विपिपानाः २०. ७६
युवं सुराम० विपिपाना १०. ३३
युवन्तमिन्द्रापर्वता ८. ५३
युष्मा इन्द्रोवृणीत १. १३
यूपव्रस्का उत ये २५. २९
ये अग्निष्वात्ता ये १९. ६०
ये चेह पितरो ये १९. ६७
ये जनेषु मलिम्लव ११. ७९
ये तीर्थानि प्रचरन्ति १६. ६१
ये ते पन्थाः सवितः ३४. २७
ये त्वाहिहत्ये मघवन् ३३. ६३
ये देवा अग्निनेत्राः ९. ३६
ये देवा देदानां यज्ञिया १७. १३
ये देवा देवेष्वधि १७. १४
ये देवासो दिव्येकादश ७. १९
ये नः पूर्वे पितरः १९. ५१
ये नः सपत्ना अप ३४. ४६
येन ऋषयस्तपसा १५. ४९
येन कर्माण्यपसो ३४. २

येन द्यौरुग्रा पृथिवी	३२. ६
येन वहसि सहस्रं	१५. ५५
	१८. ६२
येना पावक चक्षसा	३३. ३२
येना समत्सु सासहो	१५. ४०
येनेदम्भूतम्भुवनम्	३४. ४
येन्नेषु विविद्ध्यन्ति	१६. ६२
ये पथाम्पथिरक्षय	१६. ६०
ये भूतानामधिपतयों	१६. ५९
ये रूपाणि प्रतिमुञ्चमाना	२. ३०
ये वाजिनम्परिपश्यन्ति	२५. ३५
ये वामी रोचने दिवो	१३. ८
ये वृक्षेषु शष्पिञ्जरा	१६. ५८
येषामध्येति प्रवसन्	३. ४२
ये समानाः समनसः	१९. ४५
ये समानाः समनसो	१९. ४६
यो अग्निः कव्यवाहनः	१९. ६५
यो अग्निरग्नेरध्यजायत	१३. ४५
यो अस्मभ्यमरातीयाद्	११. ८०
योगेयोगे तव स्तरं	११. १४
यो देवेभ्य आतपति	३१. २०
यो नः पिता जनिता	१७. २७
यो भूतानामधिपति	२०. ३२
यो रेवान्यो अमीवहा	३. २९
यो वः शिवतमो रस	११. ५१
	३६. १५
रक्षसाम्भागोसि निरस्तं	६. १६
रक्षोहणं वलगहनं	५. २३
रक्षोहणो वो वलगहनः	५. २५
रक्षोहा विश्वचर्षणिरभि	२६. २६
रजता हरिणीः सीसा	२३. ३७
रथवाहणं हविरस्य	२९. ४५
रथे तिष्ठन्नयति वाजिनः	२९. ४३
रयिश्च मे रायश्च मे	१८. १०
रश्मिना सत्याय सत्य	१५. ६
राजन्तमध्वराणाङ्गोपा	३. २३
राज्ञ्यसि प्राची दिग्वसवस्ते	१५. १०
राज्ञ्यसि प्राची दिग्विराडसि	१४. १३
रातिं सत्पतिम्महे	२२. १३
राया वयं ससवांसो	७. १०

राये नु यञ्जज्ञतू रोदसी	२७. २४
रुचन्नो धेहि ब्राह्मणेषु	१८. ४८
रुचम्ब्राह्मञ्जनयन्तो	३१. २१
रुद्राः संसृज्य पृथिवीम्	११. ५४
रूपेण वो रूपमभ्यागान्तुथो	७. ४५
रेतो मूत्रं विजहाति	१९. ७६
रेवती रमध्वमस्मिन्	३. २१
रेवती रमध्वम्बृहस्पते	६. ८
रोहितो धूम्ररोहितः	२४. २
लाङ्गलम्पवीरवत्सुशेवं	१२. ७१
लोकम्पृण च्छिद्रम्पृणाथो	१२. ५४
	१५. ५९
लोमभ्यः स्वाहा लोमभ्यः	३९. १०
लोमानि प्रयतिर्मम	२०. १३
वक्ष्यन्तीवेदागनीगन्ति	२९. ४०
वनस्पतिरवसृष्टो न	२०. ४५
वनस्पतेवसृजा रराण	२७. २१
वनस्पते वीड्वङ्गो हि	२९. ५२
वनेषु व्यन्तरिक्षन्ततान	४. ३१
वयं सोम व्रते तव	३. ५६
वयं हि त्वा प्रयति	८. २०
वयन्ते अद्य ररिमा	१८. ७५
वयन्नाम प्रब्रवामा	१७. ९०
वरुणः क्षत्रमिन्द्रियम्	२०. ७२
वरुणः प्राविता भुवन्	३३. ४६
वरुणस्योत्तम्भनमसि	४. ३६
वरूत्रीन्त्वष्टुर्वरुणस्य	१३. ४४
वर्षाभिर्ऋतुनादित्या	२१. २५
वर्षाहूर्ऋतूनामाखुः	२४. ३८
वसन्ताय कपिञ्जला	२४. २०
वसन्तेन ऋतुना देवा	२१. २३
वसवस्त्रयोदशाक्षरेण	९. ३४
वसवस्त्वा कृण्वन्तु	११. ५८
वसवस्त्वाच्छृन्दन्तु	११. ६५
वसवस्त्वाञ्जन्तु	२३. ८
वसवस्त्वा धूपयन्तु	११. ६०
वसु च मे वसतिश्च	१८. १५
वसुभ्य ऋश्यानालभते	२४. २७
वसुभ्यस्त्वा रुद्रेभ्यस्त्वा	२. १६
वसूनाम्भागोसि रुद्रा	१४. २५

वसोः पवित्रमसि द्यौरसि	१.	२
वसोः पवित्रमसि शतधारं	१.	३
वस्व्यस्यदितिरस्यादित्यासि	४.	२१
वह वपाञ्जातवेदः	३५.	२०
वाचन्ते शुन्धामि प्राणन्ते	६.	१४
वाचस्पतये पवस्व वृष्णो	७.	१
वाचस्पतिं विश्वकर्माणमूतये	१७.	२३
वाचस्पतिं विश्वकर्माणमूतये० उपयाम	८.	४५
वाचे स्वाहा प्राणाय	३९.	३
वाजः पुरस्तादुत	१८.	३४
वाजश्च मे प्रसवश्च	१८.	१
वाजस्य नु प्रसव आ	९.	२५
वाजस्य नु प्रसवे	१८.	३०
वाजस्य मा प्रसव	१७.	६३
वाजस्येमम्प्रसवः	९.	२३
वाजस्येमाम्प्रसवः	९.	२४
वाजाय स्वाहा प्रसवाय० वसवे	१८.	२८
वाजाय स्वाहा प्रसवाय० स्वः	२२.	३२
वाजेवाजेवत वाजिनो	९.	१८
	२१..	११
वाजो नः सप्त प्रदिश	१८.	३२
वाजो नो अद्य प्रसुवाति	१८.	३३
वातम्प्राणेनापानेन	२५.	२
वातरंहा भव वाजिन्युज्य	९.	८
वातस्य जूतिं वरुणस्य	१३.	४२
वाताय स्वाहा धूमाय	२२.	२६
वातो वा मनो वा	९.	७
वाममद्य सवितर्वाममु	८.	६
वायव्यैर्वायव्यान्याप्नोति	१९.	२७
वायुः पुनातु सविता	३५.	३
वायुरग्रेगा यज्ञप्रीः	२७.	३१
वायुरनिलममृतमथे	४०.	१५
वायुष्ट्वा पचतैरवत्वसित	२३.	१३
वायोः पूतः पवित्रेण	१९.	३
वायो ये ते सहस्रिणो	२७.	३२
वायो शुक्रो अयामि ते	२७.	३०
वार्त्रहत्याय शवसे	१८.	६८
विकिरिद्र विलोहित	१६.	५२
विज्यन्धनुः कपर्दिनो	१६.	१०
वित्तञ्च मे वेद्यञ्च मे	१८.	११

विद्यदी सरमा रुग्ण	३३.	५९
विद्मा ते अग्ने त्रेधा	१२.	१९
विद्याञ्चाविद्याञ्च यस्तद्	४०.	१४
विधृतिन्नाभ्या घृतं	२५.	९
विधेम ते परमे जन्मन्	१७.	७५
वि न इन्द्र मृधो जहि	१८.	७०
वि न इन्द्र मृधो जहि० उपयाम	८.	४४
वि पाजसा पृथुना	११.	४९
विभक्तारं हवामहे	३०.	४
विभूरसि प्रवाहणो	५.	३१
विभूर्मात्रा प्रभूः पित्रा	२२.	१९
विभ्राड्बृहत्पिबतु सोम्यम्	३३.	३०
विमान एष दिवो मध्य	१७.	५९
विमुच्यध्वमघ्न्या देवयाना	१२.	७३
विराडसि दक्षिणा दिग्	१५.	११
विराड्ज्योतिरधारयत्	१३.	२४
विवस्वन्नादित्यैष ते	८.	५
विश्वकर्मन्हविषा वर्द्धनेन	१७.	२४
विश्वकर्मन्हविषा वर्द्धनेन० उपयाम	८.	४६
विश्वकर्मन्हविषा वावृधानः	१७.	२२
विश्वकर्मा त्वा० ज्योतिष्मतीम्	१४.	१४
विश्वकर्मा त्वा० व्यचस्वतीम्	१४.	१२
विश्वकर्मा विमना आद्विहाया	१७.	२६
विश्वकर्मा ह्यजनिष्ट	१७.	३२
विश्वतश्चक्षुरुत विश्वतो	१७.	१९
विश्वस्मै प्राणायापानाय	१३.	१९
विश्वस्य केतुर्भुवनस्य	१२.	२३
विश्वस्य दूतममृतं	१५.	३३
विश्वस्य मूर्द्धन्नधितिष्ठसि	१८.	५५
विश्वा आशा दक्षिण	३८.	१०
विश्वानि देव सवितर्दुरितानि	३०.	३
विश्वा रूपाणि प्रतिमुञ्चते	१२.	३
विश्वासाम्भुवाम्पते विश्वस्य	३७.	१८
विश्वे अद्य मरुतो विश्व	१८.	३१
	३३.	५२
विश्वे देवाः शृणुतेमं	३३.	५३
विश्वे देवा अंशुषु न्युप्तो	८.	५७
विश्वे देवाश्चमसेषून्नीतो	८.	५८
विश्वे देवास आगत	७.	३४
विश्वेभिः सोम्यम्मध्वग्न	३३.	१०

विश्वेषामदितिर्यज्ञियानां	३३.	१६
विश्वो देवस्य नेतुर्मर्तो	४.	८
	११.	६७
	२२.	२१
विष्णोः कर्माणि पश्यत	६.	४
	१३.	३३
विष्णोः क्रमोसि सपत्नहा	१२.	५
विष्णो रराटमसि विष्णोः	५.	२१
विष्णोर्नुकं वीर्याणि	५.	१८
वीतं हविः शमितं	१७.	५७
वीतिहोत्रन्त्वा कवे	२.	४
वृष्ण ऊर्मिरसि राष्ट्रदा	१०.	२
वेदाहमस्य भुवनस्य	२३.	६०
वेदाहमेतम्पुरुषम्	३१.	१८
वेदेन रूपे व्यपिबत्	१९.	७८
वेदोसि येन त्वन्देव	२.	२१
वेद्या वेदिः समाप्यते	१९.	१७
वेनस्तत्पश्यन्निहितङ्गुहा	३२.	८
वैश्वदेवी पुनती देव्यागाद्	१९.	४४
वैश्वानरस्य सुमतौ स्याम	२६.	७
वैश्वानरो न० अग्निरुक्थेन	२६.	८
वैश्वानरो न० अग्निर्नः	१८.	७२
व्यचस्वतीरुर्विया वि	२९.	३०
व्रतङ्कृणुत व्रतङ्कृणुताग्नि	४.	११
व्रतश्च म ऋतवश्च	१८.	२३
व्रतेन दीक्षामाप्नोति	१९.	३०
व्रीहयश्च मे यवाश्च	१८.	१२
व्रेशीनान्त्वा पत्मन्	८.	४८
शं वातः शं हि ते	३५.	८
शश्च मे मयश्च मे	१८.	८
शतं वो अम्ब धामानि	१२.	७६
शतमिन्नु शरदो अन्ति	२५.	२२
शन्ते परेभ्यो गात्रेभ्यः	२३.	४४
शन्नो देवीरभिष्टय	३६.	१२
शन्नो भवन्तु वाजिनो	९.	१६
	२१.	१०
शन्नो मित्रः शं वरुणः	३६.	९
शन्नो वातः पवतां	३६.	१०
शमिता नो वनस्पतिः	२१.	२१
शर्म च स्थो वर्म च	११.	३०
शर्मास्यवधूतं० अद्रिरसि	१.	१४
शर्मास्यवधूतं० धिषणासि	१.	१९
शादन्दद्भिरवकान्दन्तमूलै	२५.	१
शारदेन ऋतुना देवा	२१.	२६
शिरो मे श्रीर्यशो मुख	२०.	५
शिल्पा वैश्वदेव्यो रोहिण्य	२४.	५
शिवेन वचसा त्वा	१६.	४
शिवो नामासि स्वधितिस्ते	३.	६३
शिवो भव प्रजाभ्यो	११.	४५
शिवो भूत्वा मह्यमग्ने	१२.	१७
शुक्रज्योतिश्च चित्रज्योतिश्च	१७.	८०
शुक्रन्त्वा शुक्रेण क्रीणामि	४.	२६
शुक्रश्च शुचिश्च ग्रैष्मावृतू	१४.	६
शुद्धवालः सर्वशुद्धवालो	२४.	३
शुनं सुफाला विकृषन्तु	१२.	६९
शैशिरेण ऋतुना देवा	२१.	२८
श्रायन्त इव सूर्यं विश्वे	३३.	४१
श्रीणामुदारो धरुणो	१२.	२२
श्रीश्च ते लक्ष्मीश्च	३१.	२२
श्रुधि श्रुत्कर्ण वह्निभि	३३.	१५
श्वात्राः पीता भवत	४.	१२
श्वात्रा स्थ वृत्रतुरो	६.	३४
श्वित्र आदित्यानामुष्ट्रो	२४.	३९
षडस्य विष्ठाः शतमक्षरा	२३.	५८
षोडशी स्तोम ओजो	१५.	३
संवत्सरोसि परिवत्सरो	२७.	४५
संवर्चसा पयसा सन्तनूभि	२.	२४
	८.	१४
	८.	१६
संवसाथां स्वर्विदा समीची	११.	३१
सं वाम्मनांसि संव्रता	१२.	५८
संशितम्मे ब्रह्म संशितं	११.	८१
संशितो रश्मिना रथः	२३.	१४
संसमिद्युवसे वृषन्	१५.	३०
संसीदस्व महाँ असि	११.	३७
संसृष्टां वसुभी रुद्रैर्धीरैः	११.	५५
संस्रवभागा स्थेषा बृहन्तः	२.	१८
संहितासि विश्वरूप्यूर्जा	३.	२२
संहितो विश्वसामा सूर्यो	१८.	३९
स इधानो वसुष्कवि	१५.	३६

स इषुहस्तैः स निषङ्गिभि १७. ३५
सखायः सं वः सम्यञ्च १५. २९
सङ्क्रन्दनेनानिमिषेण १७. ३४
स जातो गर्भो असि ११. ४३
सजूरब्दो अयवोभिः १२. ७४
सजूर्ऋतुभिः सजूर्विधाभिः १४. ७
सजूर्देवेन सवित्रा ३. १०
सजोषा इन्द्र सगणो ७. ३७
सञ्चेध्यस्वाग्ने प्र च २७. २
सञ्ज्ञानमसि कामधरणम् १२. ४६
सत्यञ्च मे श्रद्धा च १८. ५
सत्रस्य ऋद्धिरस्यगन्म ८. ५२
स त्वन्नश्चित्र वज्रहस्त २७. ३८
स त्वन्नो अग्नेवमो २१. ४
सदसस्पतिमद्भुतम् ३२. १३
स दुद्रवत्स्वाहुतः १५. ३४
सद्यो जातो व्यमिमीत २९. ३६
सधमादो द्युम्निनीराप १०. ७
स नः पावक दीदिवो १७. ९
स नः पितेव सूनवेग्ने ३. २४
स न इन्द्राय यज्यवे २६. १७
स नो बन्धुर्जनिता ३२. १०
स नो भुवनस्य पते १८. ४४
सन्ते पयांसि समु यन्तु १२. ११३
सन्ते मनो मनसा सम्प्राणः ६. १८
सन्ते वायुर्मातरिश्वा ११. ३९
सन्त्वमग्ने सूर्यस्य वर्चसा ३. १९
सन्धये जारङ्गेहायोपपति ३०. ९
सन्नः सिन्धुरवभृथायोद्यतः ८. ५९
स पर्यगाच्छुक्रमकाय ४०. ८
सप्त ऋषयः प्रतिहिताः ३४. ५५
सप्त ते अग्ने समिधः १७. ७९
सप्तास्यासन्परिधयस्त्रिः ३१. १५
स प्रथमो बृहस्पति ७. १५
स बोधि सूरिर्मघवा १२. ४३
समख्ये देव्या धिया ४. २३
समग्निरग्निना गत ३७. १५
समध्वरायोषसो नमन्त ३४. ३९
समास्त्वाग्न ऋतवो २७. १
समितं सङ्कल्पेथां १२. ५७
समिदसि सूर्यस्त्वा २. ५
समिद्ध इन्द्र उपसामनीके २०. ३६
समिद्धे अग्नावधि १७. ५५
समिद्धो अग्निः समिधा २१. १२
समिद्धो अग्निरश्विना २०. ५५
समिद्धो अञ्जन्कृदरम् २९. १
समिद्धो अद्य मनुषो २९. २५
समिधाग्निन्दुवस्यत ३. १
१२. ३०
समिन्द्र णो मनसा नेषि ८. १५
समुद्रङ्गच्छ स्वाहान्तरिक्ष ६. २१
समुद्रस्य त्वावकयाग्ने १७. ४
समुद्रादूर्मिर्मधुमाँ उदार १७. ८९
समुद्राय त्वा वाताय ३८. ७
समुद्राय शिशुमारानालभते २४. २१
समुद्रे ते हृदय० यज्ञस्य ८. २५
समुद्रे ते हृदय० सुमित्रिया २०. १९
समुद्रे त्वा नृमणा १२. २०
समुद्रोसि नभस्वानार्द्रदानुः १८. ४५
समुद्रोसि विश्वव्यचा ५. ३३
सम्प्रच्यवध्वमुप सम् १५. ५३
सम्बर्हिरङ्क्तां हविषा २. २२
सम्भूतिञ्च विनाशञ्च ४०. ११
सम्मा सृजामि पयसा १८. ३५
सम्यक्स्रवन्ति० एते १७. ९४
सम्यक्स्रवन्ति० घृतस्य १३. ३८
सम्राडसि प्रतीची १५. १२
स यक्षदस्य महिमान २७. १५
सरस्वती मनसा पेशलं १९. ८३
सरस्वती योन्याङ्गर्भ १९. ९४
सरोभ्यो धैवरमुपस्था ३०. १६
सर्वे निमेषा जज्ञिरे ३२. २
सविता ते शरीराणि ३५. ५
सविता ते शरीरेभ्यः ३५. २
सविता त्वा सवानां ९. ३९
सविता प्रथमेहन्नग्नि ३९. ६
सविता वरुणो दधद् २०. ७१
सवितुस्त्वा प्रसव १. ३१
सवित्रा प्रसवित्रा १०. ३०
सहदानुम्पुरुहूत १८. ६९

सह रय्या निवर्तस्वाग्ने १२. १०
१२. ४१
स हव्यवाडमर्त्य उशिग् २२. १६
सहश्च सहस्यश्च १४. २७
सहसा जातान्प्रणुदा १५. २
सहस्तोमाः सहछन्दस ३४. ४९
सहस्रशीर्षा पुरुषः ३१. १
सहस्रस्य प्रमासि १५. ६५
सहस्राणि सहस्रशो १६. ५३
सहस्व मे अरातीः १२. ९९
साकं यक्ष्म प्रपत चाषेण १२. ८७
सा विश्वायुः सा विश्वकर्मा १. ४
सिंह्यसि सपत्नसाही ५. १०
सिंह्यसि स्वाहा सिंह्यस्यादित्य ५. १२
सिञ्चन्ति परिषिञ्चन्त्युत् २०. २८
सिनीवालि पृथुष्टुके ३४. १०
सिनीवाली सुकपर्दा ११. ५६
सिन्धोरिव प्राध्वने १७. ९५
सीद त्वम्मातुरस्या १२. १५
सीद होतः स्व उ लोके ११. ३५
सीरा युञ्जन्ति कवयो १२. ६७
सीसेन तन्त्रम्मनसा १९. ८०
सुगव्यन्नो वाजी स्वश्व्यम् २५. ४५
सुगा वो देवाः सदना ८. १८
सुजातो ज्योतिषा सह ११. ४०
सुत्रामाणम्पृथिवी २१. ६
सुनावमारुहेयमस्रवन्ती २१. ७
सुपर्ण वस्ते मृगो अस्या २९. ४८
सुपर्णः पार्जन्य आतिर्वाहसो २४. ३४
सुपर्णोसि गरुत्माँस्त्रिवृत्ते १२. ४
सुपर्णोसि गरुत्मान्पृष्ठे १७. ७२
सुप्रजाः प्रजाः प्रजनयन् ७. १८
सुबर्हिरग्निः पूषण्वान् २१. १५
सुभूः स्वयम्भूः प्रथमो २३. ६३
सुमित्रिया न आप ३५. १२
३६. २३
३८. २३
सुरावन्तं बर्हिषदं सुवीरं १९. ३२
सुवीरो वीरान्प्रजनयन् ७. १३
सुषारथिरश्वानिव ३४. ६
सुषुम्णः सूर्यरश्मिश्चन्द्रमा १८. ४०
सुष्टुतिं सुमतीवृधो २२. १२
सुसन्दृशन्त्वा वयम् ३. ५२
सुसमिद्धाय शोचिषे ३. २
सूपस्था अद्य देवो २१. ६०
सूर्य एकाकी चरति २३. १०
२३. ४६
सूर्यत्वचस स्थ राष्ट्रदा १०. ४
सूर्यरश्मिर्हरिकेशः १७. ५८
सूर्यस्य चक्षुरारोहाग्ने ४. ३२
सो अग्निर्यो वसुर्गृणे १५. ४२
सोमं राजानमवसे ९. २६
सोमः पवते सोमः पवते ७. २१
सोममद्भ्यो व्यपिबत् १९. ७४
सोम राजन्विश्वास्त्वम् ६. २६
सोमस्य त्वा द्युम्नेनाभि १०. १७
सोमस्य त्विषिरसि० अग्नये १०. ५
सोमस्य त्विषिरसि० मृत्योः १०. १५
सोमस्य रूपङ्क्रीतस्य १९. १५
सोमानं स्वरणङ्कृणुहि ३. २८
सोमाय कुलुङ्ग आरण्योजो २४. ३२
सोमाय लवानालभते २४. २४
सोमाय हंसानालभते २४. २२
सोमो धेनुं सोमो अर्वन्त ३४. २१
सोमो राजामृतं सुत १९. ७२
सौरी बलाका शार्गः २४. ३३
स्तीर्णम्बर्हिः सुष्टरीमा २९. ४
स्तोकानामिन्दुम्प्रति २०. ४६
स्थिरो भव वीड्वङ्ग ११. ४४
स्योना पृथिवि नो ३६. १३
स्योना पृथिवि नो० । अप ३५. २१
स्योनासि सुषदासि १०. २६
स्रुचश्च मे चमसाश्च १८. २१
स्वगा त्वा देवेभ्यः २२. ४
स्वतवाँश्च प्रघासी च १७. ८५
स्वयं वाजिँस्तन्वङ्कल्पयस्व २३. १५
स्वयम्भूरसि श्रेष्ठो २. २६
स्वराडसि सपत्नहा ५. २४
स्वराडस्युदीची दिङ् १५. १३
स्वर्ण घर्मः स्वाहा १८. ५०

स्वर्यन्तो नापेक्षन्त १७. ६८
स्वस्ति न इन्द्रो वृद्धश्रवाः २५. १९
स्वाङ्कृतोसि विश्वेभ्य ७. ६, ३
स्वादिष्ठया मदिष्ठया २६. २५
स्वादुषंसदः पितरो २९. ४६
स्वाद्वीन्त्वा स्वादुना १९. १
स्वाहा पूष्णे शरसे ३८. १५
स्वाहा प्राणेभ्यः साधिपति ३९. १
स्वाहा मरुद्भिः परिश्रीयस्व ३७. १३
स्वाहा यज्ञं वरुणः २१. २२
स्वाहा यज्ञम्मनसः ४. ६
स्वाहा रुद्राय रुद्रहूतये ३८. १६
स्वैर्दक्षैर्दक्षपितेह १४. ३
हंसः शुचिषद्वसुरन्तरिक्ष १०. २४
१२. १४
हरयो धूमकेतवो ३३. २
हविर्धानं यदश्विना १९. १८
हविष्मतीरिमा आपो ६. २३
हस्त आधाय सविता ११. ११
हिङ्काराय स्वाहा हिङ्कृताय २२. ७
हिमस्य त्वा जरायुणाग्ने १७. ५
हिरण्मयेन पात्रेण ४०. १७
हिरण्यगर्भः समवर्तताग्रे १३. ४
२३. १
२५. १०
हिरण्यपाणिः सविता ३४. २५
हिरण्यपाणिमूतये २२. १०
हिरण्यरूपा उषसो १०. १६
हिरण्यशृङ्गोयो अस्य २९. २०
हिरण्यहस्तो असुरः ३४. २६
हृदे त्वा मनसे० ऊर्ध्वं ६. २५
हृदे त्वा मनसे० ऊर्ध्वो ३७. १९
हेमन्तेन ऋतुना देवा २१. २७
होताध्वर्युरावया २५. २८
होता यक्षत्तनूनपातमुद्भिदं २८. २५
होता यक्षत्तनूनपातमूतिभि २८. २
होता यक्षत्तनूनपात् २१. ३०
होता यक्षत्तिस्रो० त्रिधातवोपस २८. ८
होता यक्षत्तिस्रो० त्रिधातवोपसो २१. ३७
होता यक्षत्त्वष्टारमिन्द्र २८. ९
होता यक्षत्पेशस्वती २८. ३१
होता यक्षत्प्रचेतसा २८. ३०
होता यक्षत्प्रजापतिं २३. ६४
होता यक्षत्समिधाग्नि २१. २९
होता यक्षत्समिधानम् २८. २४
होता यक्षत्समिधेन्द्र २८. १
होता यक्षत्सरस्वतीम् २१. ४४
होता यक्षत्सुपेशसा २८. २९
होता यक्षत्सुपेशसोषे २१. ३५
होता यक्षत्सुबर्हिषम् २८. २७
होता यक्षत्सुरेतसं २८. ३२
होता यक्षत्सुरेतसमृषभं २१. ३८
होता यक्षत्स्वाहाकृती २८. ३४
होता यक्षदग्निं स्वाहा २१. ४०
होता यक्षदग्निं स्विष्टकृत २१. ४७
होता यक्षदश्विनौ छागस्य वपाया २१. ४१
होता यक्षदश्विनौ छागस्य हविष २१. ४३
होता यक्षदश्विनौ सरस्वती २१. ४२
होता यक्षदिडाभिरिन्द्र २८. ३
होता यक्षदिडेडित २१. ३२
होता यक्षदिन्द्रं स्वाहा २८. ११
होता यक्षदिन्द्रमृषभस्य २१. ४५
होता यक्षदीडेन्यमीडितं २८. २६
होता यक्षदुषे इन्द्रस्य २८. ६
होता यक्षदोजो न वीर्यं २८. ५
होता यक्षद्दुरो दिशः २१. ३४
होता यक्षद्दैव्या० भिषजाश्विनेन्द्रं २१. ३६
होता यक्षद्दैव्या० भिषजा सखाया २८. ७
होता यक्षद्बर्हिरूर्णम्म्रदा २१. ३३
होता यक्षद्बर्हिषीन्द्र २८. ४
होता यक्षद्वनस्पतिं० धियो २८. १०
होता यक्षद्वनस्पतिं० भीमं २१. ३९
होता यक्षद्वनस्पतिं० हिरण्य २८. ३३
होता यक्षद्वनस्पतिमभि २१. ४६
होता यक्षद्व्यचस्वतीः २८. २८
होता यक्षन्नराशंसन्न २१. ३१

॥ इति शुक्लयजुर्वेदमन्त्राणां वर्णानुक्रमणी ॥

99682719826 - 9871837945